CC0. In Public Domain. Digitized by Muthulakshmi Academy

DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS

STOTRA-S
PART II

Compiled by
PANDIT K. PARAMESWARA AITHAL
Curator, Adyar Library

THE ADYAR LIBRARY AND RESEARCH CENTRE

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy

750/-

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy

THE ADYAR LIBRARY SERIES

VOLUME NINETY-SIX

DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy

DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS

Volume Four

STOTRA-S

PART II

By PANDIT K. PARAMESWARA AITHAL

Curator, Adyar Library

THE ADYAR LIBRARY AND RESEARCH CENTRE

CC0. In Public Domain. Digitized by Muthulakshmi Academy

© 1968 The Adyar Library and Research Centre
Adyar, Madras 20, India

ACKNOWLEDGEMENT

We acknowledge with grateful thanks the grant-in-aid given by the Ministry of Education, Government of India, which has made possible the publication of this Catalogue.

PRINTED IN INDIA

At the Vasanta Press, The Theosophical Society, Adyar, Madras 20.

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CONTENTS

PART TWO

APPENDIX

	PAGES
Gaṇapati-stotra-s ..	1 - 15
Subrahmaṇya-stotra-s ..	16 - 29
Devī-stotra-s ..	29 - 126
Śiva-stotra-s ..	127 - 230
Viṣṇu-stotra-s ..	230 - 301
Lakṣmī-stotra-s ..	301 - 310
Garuḍa-stotra-s ..	310
Hanumat-stotra-s ..	311 - 315
Navagraha-stotra-s ..	315 - 318
Nadī-tīrtha-stotra-s ..	318 - 324
Gāyatrī-stotra-s ..	324 - 327
Sarasvatī-stotra-s ..	327 - 331
Ācārya-stotra-s ..	331 - 371
Miscellaneous stotra-s ..	371 - 395
Jaina-stotra-s ..	396 - 404

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy

GAṆAPATI-STOTRA-S

1

66640 ऋणहरणगणपतिस्तोत्रम्

Beginning:

अस्य श्रीऋणहरणगणपतिस्तोत्रमहामन्त्रस्य भगवान् शुकाचार्य ऋषिः, ऋणविमोचनगणपतिर्देवता, अनुष्टुप् छन्दः, श्रीमहागणपतिप्रीत्यर्थे जपे विनियोगः ।

ओं स्मरामि देवदेवेशं वक्रतुण्डं महाबलम् ।
षडक्षरमहासिन्धुं नमामि ऋणमुक्तये ॥

End:

एतद् ऋणहरं स्तोत्रं त्रिसंध्यं यः पठेन्नरः ।
न च ऋणभयं तस्य सर्वसिद्धिकरं शुभम् ॥
पुत्रपौत्रधनं धान्यमैश्वर्यं विजयं च सा (?) ।
षण्मासाभ्यन्तरे तस्य ऋणच्छेदो न संशयः ॥

3

69819 गणनायकाष्टकम् (गणाष्टकम्)

The following verse showing the order of verses in the work is added at the end:

एका-मौञ्जी-चित्र-रत्न-मूषिको गजवक्त्रकः ।
यक्षाम्बिका-सर्वविघ्न-गणाष्टकमिदं क्रमात् ॥

5

PM33 गणनायकाष्टकम् (विघ्नेश्वराष्टकम्)

Adds the following verses after the verse गणाष्टकम् . . .

मूषिकवाहन मोदकहस्त चामरकर्ण विलम्बितसूत्र ।
वामनरूप महेश्वरपुत्र विघ्नविनायकपाद नमस्ते ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

Colophon:

इति विघ्नेश्वराष्टकं संपूर्णम् ।

9

66640 गणेशपञ्चरत्नस्तोत्रम्

Beginning:

हिमाद्रिजासुतं भजे गणेशमीशनन्दनम् एकदन्तवक्रतुण्डनागयज्ञसूत्रकम् ।
रक्तगात्र पद्मनेत्र शुक्लवस्त्रमण्डन कल्पवृक्ष भक्तरक्ष नमोऽस्तु ते गजानन ॥

End:

पञ्चरत्नं पठेन्नित्यं प्रातःसंध्यार्धरात्रिषु ।
व्यासेन(?)कुरुते . . . फलं वाञ्छाकरोत्तमम् ॥

Colophon:

इति गणेशपञ्चरत्नस्तोत्रं समाप्तम् ।

13

PM2516 गणेशमानसपूजास्तोत्रम्

Beginning:

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढं त्रिणेत्रं
पाशं चैवाङ्कुशं वै रदनमभयदं बाहुभिर्धारयन्तम् ।
शक्त्या युक्तं गजास्यं पृथुतरजठरं नागयज्ञोपवीतं
देवं चन्द्रार्धचूडं सकलभयहरं विघ्नराजं नमामि ॥
नानारत्नविचित्रकं रमणकं सिंहासनं कल्पितं
स्नानं जह्नुसुताम्भसा गणपते पीताम्बरं गृह्यताम् ।
कण्ठे मौक्तिकमालिकां श्रुतियुगे द्वे चारुणी कुण्डले
नानारत्नविराजितो रविविभायुक्तः किरीटःशिरः ॥

End:

दीनानाथ दयानिधे सुरगणैः संसेव्यमान द्विज-
ब्रह्मेशानमहेन्द्रशेषगिरिजागन्धर्वसिद्धैः स्तुतः ।
सर्वारिष्टनिवारणैकनिपुण त्रैलोक्यनाथ प्रभो
भक्तिं मे सफलां कुरुष्व सकलान् क्षान्त्वापराधान् मम ॥

Colophon:

इति गणेशमानसपूजा समाप्ता ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

16

PM81 गणेश्वरस्तोत्रम्

Beginning:

बिभ्रद् दक्षिणहस्तपद्मयुगले दन्ताक्षसूत्रे शुभे
वामे मोदकपूर्णपात्रपरशुं नागोपवीती त्रिदृक् ।
श्रीमान् सिंहयुगासनः श्रुतियुगे शङ्खे वहन् मौलिमान्
दिश्यादीश्वरपुत्र एष भगवान् लम्बोदरः शर्म नः ॥
गणानामधिपश्चण्डो गजवक्त्रस्त्रिलोचनः ।
प्रसन्नो भव मे नित्यं वरं दाता विनायकः ॥

End:

नित्यं प्रभातकाले तु चिन्तयेद् गणनायकम् ।
एतत् स्तोत्रं पवित्रं च मङ्गल्यं पापनाशनम् ॥
शस्त्रखड्गोदवेतालयक्षरक्षोभयापहम् ।
चोरारण्यभयव्याघ्रव्याधिदारिद्र्यनाशनम् ॥
कृत्यादिमायाशमनं सर्वशत्रुविमर्दनम् ।
त्रिसंध्यं पठते यस्तु सर्वसिद्धिमवाप्नुयात् ।
गणेश्वरप्रसादेन लभते शांकरं पदम् ॥

Colophon:

इत्यादिपुराणे गणेश्वरस्तोत्रं समाप्तम् ।

18

PM81 महागणपतिस्तवराजः

Beginning:

विघ्नेशो नः स पायाद् विहृतिषु जलधिं पुष्कराग्रेण पीत्वा
यस्मिन्नुद्धृत्य हस्तं वमति तदखिलं दृश्यते व्योम्नि देवैः ।
काप्यम्भः कापि विष्णुः क्वचन कमलभूः काप्यनन्तः क्वचिच्छ्रीः
काप्यौर्वः कापि शैलाः क्वचन मणिगणाः कापि नक्रादिसत्त्वाः ॥
निर्विघ्नविश्वनिर्माणसिद्धये यदनुग्रहम् ।
मन्ये स वव्रे धातापि तस्मै विघ्नजिते नमः ॥

. . . . . .

अस्य श्रीगणपतिस्तवराजस्य नानावृत्तानि छन्दांसि । अनुष्टुप् छन्दः । सदाशिव ऋषिः महागणपतिर्देवता । तत्पुरुष इति बीजम् । एकदन्त इति शक्तिः । धर्मार्थकाममोक्षार्थे स्तवराजपाठे विनियोगः । श्री ईश्वर उवाच—

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ओंकारममृतं ब्रह्म शिवमक्षरमव्ययम् ।
यमामनन्ति वेदेषु तं प्रपद्ये विनायकम् ॥

End:

एवं ते कथितं चैतत् क्रमेण परिपृच्छत: ।
विनायकस्य माहात्म्यं प्रतिष्ठार्चनयोर्विधि: ॥
प्रशंसा ब्रह्मगायत्र्या: कल्पं तस्याश्च शोभनम् ।
इत्थमेतत् परं ब्रह्मन् किं भूय: श्रोतुमिच्छसि ।
स्तवराजस्य माहात्म्यं स्वरूपं च विशेषत: ॥
इति विरचयति स्म त्र्यम्बक: स्तोत्रराजं
वरमिभवदनस्य स्वामिनोऽत्यादरेण ।
गुरुवरचरणाग्रान् मूर्ध्नि धृत्वा . . .
पठितमिह वरेण्यं घोरविघ्नोपशान्त्यै ॥

Colophon:

इति श्रीभविष्यत्पुराणे श्रीमहागणपतिस्तवराज: समाप्त:

20

PM2588 **महागणपतिस्तवराज:**

Beginning:

बिभ्रद्दक्षिणहस्तपद्मयुगले दन्ताक्षसूत्रे शुभे
वामे मोदकपूर्णपात्रपरशु नागोपवीती त्रिदृक् ।
श्रीमान् सिंहयुगासन: श्रुतियुगे शङ्खे वहन् मौलिमान्
दिश्यादीश्वरपुत्र ईशभगवान् लम्बोदर: शर्म न: ॥

21

66816 **महागणपतिस्तोत्रपञ्चकम्**

Beginning:

वन्दे सिन्दूरकान्तिं मदयुतकरटप्रान्तसंभ्रान्तभृङ्ग-
ध्वानैरापूरिताशामुखमचलसुताह्लादपाथोधिचन्द्रम् ।
शुण्डाकाण्डे समुद्रान् सुमणिगणयुतान् लीलयापूर्य लोके
दिव्ये मौग्ध्ये किरन्तं गजवरवदनं शोणशैलेन्द्रसूनुम् ॥

End:

कैलासे कमनीयरत्नखचिते सैंहे स्थितं विष्टरे
शंभुं सर्वचराचरात्मकजगद्रूपं प्रणत्वा फलम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

चूतं तत्करसंस्थितं रसयुतं स्कन्दानतेः प्राङ् मुदा
चर्वन्तं परिगृह्य कुञ्जरमुखं वन्दामहे शांकरम् ॥

Colophon:

महागणपतिस्तोत्रं पञ्चकं समाप्तम् ।

22

67193 विघ्नेश्वरमानसिकम्

Beginning:

विघ्नेश्वरस्य विषये हृदि मानसाख्यां
पूजां विधातुमुचितं सरसं प्रबन्धम् ।
विद्वज्जने धुरि चिदम्बर एष नम्रः
श्लोकैर्वसन्ततिलकैर्वितनोति शीघ्रम् ॥
कान्ताकृतिं गमितया कमनीयकान्त्या
सत्या सदापि निजया नवरत्नपीठे ।
कान्तं वसन्तममरेन्द्रमुखाग्रवन्द्यं
दन्तावलेनवदनं हृदि भावयामि ॥

End:

विघ्नाधिनेतरि चिदम्बरसूरिक्लृप्त-
संभावनादिपरमप्रमदावसानैः ।
पूजोपचारविधिभिर्भुवि मानसाख्या
जीयाच्चिरं सुविदुषां हृदयंगमेयम् ॥

Colophon:

विघ्नेश्वरमानसिकं संपूर्णम् ।

23

66749 विनायकभुजङ्गम्

Beginning:

उमाप्रेमबालं लसत्सामलोलं
कनद्रत्नचेलं विलासत्कपोलम् ।
जगज्जन्ममूलं जगद्द्वेषिकालं
नमाम्येकदन्तं नतानेकदं तम् ॥

End:

गलद्दानगण्डं मिलद्भृङ्गषण्डं
चलच्चारुशुण्डं जगत्त्राणशौण्डम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कनद्दन्तकाण्डं विपद्भृङ्गचण्डं
शिवप्रेमपिण्डं भजे वक्रतुण्डम् ॥

Colophon:

विनायकभुजङ्गं समाप्तम् ।

27

70257 विनायकाष्टकम्

Beginning:

एकदन्तमीशपुत्रमाखुवाहमैश्वरं
तत्त्वराजदन्तसूर्यमन्तरायमर्दनम् ।
अच्युताद्यशेषदेवपूजिताङ्घ्रिपङ्कज
विघ्नशैलवज्रिणं विनायकं नमाम्यहम् ॥

End:

देवदैत्ययोगिसिद्धचारणैर्नरोरगैः
खेचरैश्च भूचरैश्च वन्दितं सुनन्दितम् ।
ईप्सितार्थदायकं विशेषसिद्धिनायकं
विघ्नशैलवज्रिणं विनायकं नमाम्यहम् ॥
श्रीविनायकाष्टकं तु शंकरेण निर्मितं
श्रीकरं विभूषितं समस्तविघ्ननाशनम् ।
ये पठन्ति साधनं समस्तमन्त्रसिद्धिदं
(ते प्रयन्ति हीप्सितार्थमीशपुत्रसंनिधौ) ॥

29

67323 हुंकारगणपतिस्तोत्रम्

Beginning:

. . . . . .
. . . . . . ।
. . . स्थमुदावहं श्रुतिवनालंकारमुद्यद्रवेः
संकाशं स पुरः पदं वितनुतां हुंकारविघ्नेश्वरः ॥ ५ ॥

End:

विघ्नराजशतकं भुवि सर्वाघघ्नमत्र पठतेऽनुदिनं यः ।
विघ्नतो . . . भयदयायते(?)विघ्नलेशरहितः स कृतार्थः ॥ ३३ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीहुंकारगणपतिस्तोत्रं संपूर्णम् ।

30

PM 2643 गकारादिगणपतिसहस्रनामस्तोत्रम्

Beginning:

ओं कैलासशिखरे रम्ये सुखासीनं त्रिलोचनम् ।
प्रणम्य शिरसा नाथं पार्वती पर्यपृच्छत ॥

पार्वत्युवाच—

त्वत्तः श्रुतं पुरा देव गणेशस्य महात्मनः ।
नाम्नां सहस्रं तच्चित्रं गकारादिकमिष्टदम् ।
ओं गणेश्वरो गणाध्यक्षो गणाराध्यो गणप्रियः ॥

End:

गुरुसंतापशमनो गुरुराज्यसुखप्रदः ।
. . . . ॥
इति श्रुत्वा महादेवाद् देवी विस्मितमानसा ।
पूजयामास विधिना गणेश्वरपदद्वयम् ॥

Colophon:

इति श्रीरुद्रयामले शिवोमासंवादे गकारादिगणपतिसहस्रनामस्तोत्रं संपूर्णम् ।

35

PM 2642 गणपतिसहस्रनामस्तोत्रम्

Beginning:

श्रीभैरव उवाच—

शृणु देवि रहस्यं मे यत् पुरा सूचितं मया ।
तव भक्त्या गणेशस्य वक्ष्ये नामसहस्रकम् ॥

श्रीदेव्युवाच—

भगवन् गणनाथस्य वरदस्य महात्मनः ।
श्रोतुं नामसहस्रं मे हृदयं प्रोत्सुकायते ॥

श्रीभैरव उवाच—

. . . . . .
. . . . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अस्य श्रीवरदगणेशसहस्रनामस्तोत्रमहामन्त्रस्य श्रीभैरव ऋषिः गायत्री छन्दः श्रीमहागणपतिर्देवता। गं बीजम्। ह्रीं शक्तिः। कुरु कुरु कीलकम्। श्रीधर्मार्थकाममोक्षार्थे सहस्रनामस्त(व) पाठे विनियोगः।

ओं ह्रीं श्रीं गं गणाध्यक्षो ग्लौं गं गणपतिर्गुणी।
गुणाढ्योऽतिगुणो गोमा गजवक्त्रो विभावसुः॥

End:

इदं नाम्नां सहस्रं मे महागणपतेः स्मृतम्।
गुह्यं गोप्यतमं गुह्यं सर्वतन्त्रेषु गोपितम्॥

. . . .

इतीदं पुण्यसर्वस्वं मन्त्रनामसहस्रकम्।
महागणपतेर्गुह्यं गोपनीयं स्वयोनिवत्॥

Colophon:

इति श्रीदेवीरहस्यतन्त्रे महागणपतिमन्त्रनामैकोनत्रिंशः पटलः। इति **गणपतिसहस्रनाम** संपूर्णमस्तु।

36

66823 गणपतिस्तोत्रम्

Beginning:

अस्य श्रीविनायकस्तोत्रमहामन्त्रस्य नन्दिकेश्वर ऋषिः। अनुष्टुप् छन्दः। विनायको देवता। गोक्षीरधवलाकारमिति बीजम्। प्रमाणनृत्यायतमिति शक्तिः। सप्तकोटिमन्त्रेणेति कीलकम्। हेमवर्णः। उदात्तस्वरः। परब्रह्मक्षेत्रम्। मम चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः। ध्यानम्।

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्त्या तु संस्मरेन्नित्यमायुःकामार्थसिद्धये॥

End:

द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः।

. . . .

इदं गणपतिस्तोत्रं षण्मासात्तु वशं लभेत्।
सर्वरक्षणसिद्ध्यर्थं लभते नात्र संशयः॥

Colophon:

इदं गणपतिस्त्रोत्रं संपूर्णम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

37

67323 गणपतिस्तोत्रम् (महागणपतिस्तोत्रम्)

Adds the following stanza at the beginning:

श्रमादिसाध्यं श्रवणादिसिद्धिदं
प्रमादहीनं परमार्थदायकम् ।
समाधिसाम्राज्यसमानसिद्धिदं
नमामि विघ्नेश्वरपादपङ्कजम् ॥

Colophon:

इति श्रीस्कान्दपुराणे महागणपतिस्तोत्रं संपूर्णम् ।

41

72451 गणपत्यष्टोत्तरशतनामावलिः

End:

सृष्टिकर्त्रे नमः । स्वस्तिजगद्धराय नमः । वरमूषिकवाहनाय नमः । प्रह्व(दृष्ट)चित्ताय नमः । सर्वात्मने नमः । स्कन्दप्रियाय नमः । पाटलविघ्नेश्वराय नमः । ओं महागणपतये नमः ।

42

70640 गणपत्यष्टोत्तरशतनामावलिः

Beginning:

गणाधिपतये नमः । गजाननाय नमः । गणाध्यक्षाय नमः । विघ्नराजाय नमः । विनायकाय नमः । द्वैमात्रे नमः । द्विपमुखाय नमः । प्रमुखाय नमः । सुमुखाय नमः ।

End:

उन्मत्ताय नमः । कान्ताश्लिष्टकलेबराय नमः । समस्तजगदाधाराय नमः । सर्वैश्वर्यप्रदायकाय नमः । गं उच्छिष्टशक्तिगणपत्यष्टोत्तरशतकं मन्त्रपुष्पं समर्पयामि ।

47

75347 गणेशसहस्रनामस्तोत्रम्

Beginning:

देवः पूर्वं पुरारातिः पुरत्रयजयोद्यमे ।
अनर्चनाद् गणेशस्य जातो विघ्नाकुलः किल ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

नमो नमः सुरवरपूजिताङ्घ्रये नमो नमो विपुलदयैकसिद्धये ।
नमो नमः करिकलभाय ते नमो नमो नमः कृपापरिणतमानसे ॥
प्रकटितगुरुमतिचारुकिरणो मदजललहरीकलितकपोलः ।
शमयतु दुरितं गणपरिपालो भवतु मम मङ्गलं गणनायकः ॥

Colophon:

इति श्रीगणेशपुराणे उपासनाकाण्डे ईश्वरगणेशसंवादे गणेशसहस्रनामामृतस्तोत्र-कथनं नाम सप्तचत्वारिंशोऽध्यायः ।

51

66905 **गणेशसहस्रनामस्तोत्रम्**

Beginning:

नायकं सर्वलोकानां विनायकमनुत्तमम् ।
नानाकल्पधरं नौमि विघ्नादीनां विनायकम् ॥
नैमिशे नैमिशक्षेत्रे मनोह्लादनकारिणि ।
नानावृक्षसमाकीर्णे नानापुष्पविराजिते ॥

End:

तस्मात्तु सर्वदा सर्वैः सेव्यमेतन्न संशयः ।
महागणपतेर्नाम्नां सहस्रमिदमुत्तमम् ॥
ऋषिर्महागणपतिश्छन्दोऽनुष्टुप् च देवता ।
महागणपतिः प्रोक्तः सर्वेषामिष्टदायकः ॥
देवः पूर्वं . . . . घ्रमे ।

Colophon:

इति श्री अगस्त्यसंहितायां महागणपतिसहस्रनामस्तवराजस्तोत्रं संपूर्णम् ।

52

PM 2646 **गणेशसहस्रनामव्याख्या (गणपतिसहस्रनामार्थप्रकाशः) खद्योतः**

Beginning:

गणेशो वः पायात् प्रणमत गणेशं जगदिदं
गणेशेन त्रातं नम इह गणेशाय महते ।
गणेशान्नास्त्यन्यत् त्रिजगति गणेशस्य महिमा
गणेशे मच्चित्तं निवसतु गणेश त्वमव माम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

गुरुरेव गतिर्गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोरधिकं शिशुरस्मि गुरोर्मतिरस्तु गुरौ मम पाहि गुरो ॥
प्राचां कुदृष्टिरचनैकमयस्वभावामज्ञातगाणपततन्त्रपुगणभावाम् ।
व्याख्यामुदस्य सुविभाव्य गणेशनामान्यर्थापयामि तदुपासकतोषहेतोः ॥

. . . .

केषां न दुष्करं नाम्नां साकल्येनार्थवर्णनम् ।
अतः संक्षिप्य वक्तव्ये श्लोकैरेव स वर्ण्यते ॥

. . . .

सहस्रनामस्तवस्यापि पुराणतन्त्रभेदेन बहुविधस्य मध्येऽयमेव बहुभिरुपासकैः परिगृहीत इत्ययमेव व्याक्रियते ।

. . . .

अथोपदेशविषयस्यालौकिकत्वाद् व्यूढादिवत् स्वयमेव तत्स्वरूपं विध्यपेक्षितत्वात् प्रदर्शयति —गणेश्वर इत्यादिना अनन्तानन्दसौख्यद इत्यन्तेन ।

वियदादिप्रपञ्चस्य समूहो गण उच्यते ।
तदात्मकस्तदीशश्च तेन देवो गणेश्वरः ॥
साक्षाच्छिष्यो गणेशस्य गणक्रीडाभिधो गुरुः ।
तच्छिष्यो विकटस्तस्य शिष्यो वै विघ्ननायकः ॥

End:

ग्रन्थान्ते मङ्गलमाचरति—नमो नम इति । विपुलपदं परं धाम, तस्य मुख्या सिद्धिर्यस्मात् सः । स्पष्टमन्यदिति सर्वं शिवम् ॥ २१५ ॥

गभीरबुधयज्वनस्तनुभवोऽधिवाराणसि
त्रिलोचनपदानुगः कृतमखोऽग्निचिद् भास्करः ।
महागणपतेर्महान्त्यपि सहस्रनामानि तद्-
दयाजनितया धिया सुजनतुष्टये व्याकरोत् ॥
संप्रदायजुषामेष खद्योतो लोकबान्धवः ।
ग्रन्थविस्तरलुब्धानां खद्योतो ज्योतिरिङ्गणः ॥

श्लोकाः षट् प्रथमे त्रयस्तु चरमे नाम्नां शतान्तेषु तु
श्वासा (७४) श्चित्त (६६) वणिक् (५४) सुता (५७) गति (५३)
गुणा (५३) धर्मः (५९) सखे (२७) त्यष्टसु ।
स्तोता (५५) धीद (८९) इति द्वयोः समुदिता पादाधिका षट्शती
पादोना द्विशती परापि तदयं ग्रन्थोऽष्टशत्यात्मकः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणभारत्युपनामगम्भीररायदीक्षितसूरिसूनुभास्कर-रायदीक्षिताग्निचिता रचितो गणपतिनामार्थप्रकाशः खद्योतः संपूर्णः ।

इति गणेशनामस्तोत्रसहस्रकं संपूर्णम् ।

55

73243 गणेशाष्टोत्तरशतनामस्तोत्रम् (विघ्नेश्वराष्टोत्तरशतनामस्तोत्रम्)

End:

भक्तकल्याणदोऽमेयः कल्याणगुणसंश्रयः ।
एतानि दिव्यनामानि गणेशस्य महात्मनः ॥

. . . .

वक्रतुण्ड सुराराध्य सूर्यकोटिसमप्रभ ।
निर्विघ्नेनैव सततं काशीवासं प्रयच्छ मे ॥
गणेशादपरो लोके विघ्नहर्ता न विद्यते ।
तस्मादन्वहमाराध्यो गणेशः सर्वसिद्धिदः ॥

Colophon:

इति श्रीशिवरहस्ये सप्तमांशे विघ्नेशाष्टोत्तरशतनामस्तोत्रं संपूर्णम् ।

57

68309 गणेशाष्टोत्तरशतनामस्तोत्रम्

The following verses dealing with *ṛṣi*, *chandas*, etc., are added at the end:

पञ्चान्तकं बिन्दुधरं बीजं गणपतेर्विदुः ।
गणकः स्यान्मुनिश्छन्दो निचृत् स्याद् विघ्नदेवता ।
षड्दीर्घभाजा बीजेन कुर्यादङ्गक्रियां मनोः ॥
सिन्दूराभं त्रिणेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं
दन्तं पाशाङ्कुशेष्टान् पृथुतरविलसद्बीजपूराभिरामम् ।
बालेन्दुद्योतिमौलिं करिपतिवदनं दानपूरार्द्रगण्डं
भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्राङ्गरागम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

59

73246 महागणपत्यष्टोत्तरशतनामस्तोत्रम्

Beginning:

श्रीमहेश्वर उवाच—

शृणु देवि परं गुह्यं नाम्नामष्टोत्तरं शतम् ।
सर्वपापहरं पुण्यं भुक्तिमुक्त्येकसाधनम् ॥

अस्य श्रीमहागणपतिमहामन्त्रस्य गणक ऋषिः, अनुष्टुप् छन्दः, श्रीमहागणपतिर्देवता । जं बीजम् , स्वाहा शक्तिः, श्रीं कीलकम् । मम महागणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः । ग्लामित्यादि षडङ्गन्यासः । ध्यानम् ।

. . . .

गणेशो गणनाथश्च गणाधीशो गजाननः ।
गणेश्वरो गणाध्यक्षो गणको गणनायकः ॥

End:

सामगानप्रियकरः सर्वामीष्टफलप्रदः ।
इतीदं गणनाथस्य नाम्नामष्टोत्तरं शतम् ॥

. . . .

यो नरः पठते नित्यं तस्यासाध्यं न विद्यते ।
तस्मात् सर्वेषु कार्येषु पठितव्यं द्विजोत्तमैः ॥

Colophon:

इति ब्रह्माण्डपुराणे उमामहेश्वरसंवादे महागणपत्यष्टोत्तरशतस्तोत्रं संपूर्णम् ।

60

73247 महागणपत्यष्टोत्तरशतनामस्तोत्रम्

Adds the following verses after the first verse instead of the prose portion seen in the MS. no. 73246 (No. 59 above):

ओं गणको ऋषिर्देवस्य छन्दोऽनुष्टुप् प्रकीर्तितः ।
देवो गणेशो जं बीजं स्वाहा शक्तिरुदीरिता ।
तद्बीजेन षडङ्गस्य वाञ्छितार्थे नियुज्यते ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

61

71168 विघ्नेश्वराष्टोत्तरशतनामस्तोत्रम्

Beginning:

अस्य श्रीविघ्नेश्वराष्टोत्तरशतदिव्यनामस्तोत्रमहामन्त्रस्य गृत्समद ऋषि:, अनुष्टुप् छन्द:, गणपतिर्देवता ।

. . . .

विनायको विघ्नराजो गौरीपुत्रो गणेश्वर: ।
स्कन्दाग्रजोऽव्यय: पूतो गणाध्यक्षो द्विजप्रिय: ॥

End:

विघ्नाद्रिहर्ता च जटी चन्द्रचूडोऽमरेश्वर: ।
नागोपवीती श्रीकण्ठ: सर्वसिद्धिप्रदायक: ।
एवं श्रीगणनाथस्य नाम्नामष्टोत्तरं शतम् ॥

. . . .

य: पठेत् प्रयतो नित्यं तस्य व्याधि: शमं व्रजेत् ।
इदमेव परं सत्यं सर्वसंकष्टनाशनम् ॥

Colophon:

इति विघ्नेश्वराष्टोत्तरं संपूर्णम् ।

62

66904 विघ्नेश्वराष्टोत्तरशतनामावलि:

Beginning:

विघ्नेश्वराय नम: । विरूपाक्षाय नम: । विशोकाय नम: । विगतज्वराय नम: । विश्वनाथाय नम: । विरागात्मने नम: । विद्यावते नम: । विजयाय नम: ।

End:

भूताय नम: । भूतेशाय नम: । भूतनाशनाय नम: । हृत्पद्मकाय नम: । महातेजसे नम: । सर्वज्ञाय नम: । पुष्टिवर्धनाय नम: । श्रीगणपतये नम: । विघ्नेश्वराय नम: ।

63

67886 विघ्नेश्वराष्टोत्तरशतनामावलि:

Beginning:

गजाननाय नम: । गणाध्यक्षाय नम: । विघ्नराजाय नम: । विनायकाय नम: । द्वैमातुराय नम: ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

सनातनाय नमः। सर्वसाक्षिणे नमः। द्विरूपाय नमः। चिन्मयाय नमः। इष्टसिद्धिप्रदाय नमः।

Colophon:

विघ्नेश्वराष्टोत्तरशतं संपूर्णम्।

64

71548 विनायकाष्टोत्तरशतनामस्तोत्रम्

Beginning:

अस्य श्रीविनायकाष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य गणक ऋषिः। अनुष्टुप् छन्दः। श्रीविनायको देवता। गं बीजम् . . . शक्तिः। ग्लौं कीलकम्। विनायकप्रसादसिद्ध्यर्थे जपे विनियोगः।

विनायको विघ्नराजो गणनाथो गजाननः।
महोदरो महाकाय . . . . . . ज्ञनमुखद्युतिः॥

End:

ओंकारो ब्रह्मविद् ब्रह्म परब्रह्मपरायणः।
सुभगः सर्वलोकाढ्यो हरसूनुरुमासुतः॥
बालचन्द्रश्चतुर्बाहुर्भिन्नदन्तो महोदरः।
लम्बोदरः सुखासीनः सुप्रसन्नो गणाधिपः॥
एवं चाष्टशतं नाम्नां यः पठेत् सततं नरः।
सर्वैश्वर्यप्रदं विद्याकामितार्थप्रदं भवेत्॥

65

67216 विनायकाष्टोत्तरशतनामावलिः

Beginning:

विनायकाय नमः। शिवसुताय नमः। विघ्नेश्वराय नमः। गजाननाय नमः। हेरम्बाय नमः। हस्तिरूपाय नमः।

End:

सर्वलोकप्रियाय नमः। दिव्यनेत्राय नमः। गङ्गापुत्राय नमः। श्रीविजयविघ्नेश्वराय नमः।

Colophon:

इति श्रीविनायकाष्टोत्तरशतं संपूर्णम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

SUBRAHMAṆYA-STOTRA-S

67

PM2621 कुमारस्तुतिपञ्चकम्

Beginning:

करे शक्तिमन्तं गले हार . . .
. . . पन्नमन्तं सदा पालयन्तम् ।
मयूरे वसन्तं . . . . .
विलासोल्लस . . . . . . ॥

Colophon:

कुमारस्तुतिपञ्चकं . . . ।

68

PM2622 कुमारस्वामिस्तवः

Below is given the full text of the Stotra:

षण्मुखं च गणाधीशं साम्बं च परमेश्वरम् ।
मम दुःखविनाशाय संततं चिन्तयाम्यहम् ॥
कार्तिक्यां कृत्तिकायोगे यः कुर्यात् स्वामिदर्शनम् ।
सप्तजन्म भवेद् विप्रो धनाढ्यो वेदपारगः ॥
द्विषड्भुजं षण्मुखमम्बिकासुतं
कुमारमादित्यसमानतेजसम् ।
वन्दे मयूरासन(मुग्र ? मग्नि)संनिभं
सेनान्यमद्याहमभीष्टसिद्धये ॥

69

73243 गुहस्तोत्रम्

Beginning:

तव श्रीमन्मूर्ते दर्शनविहीनोऽहमधुना
भवत्पादाम्भोजं भवभयहरं यामि शरणम् ।
अतः सत्याद्रीश प्रमथगणनाथात्मज विभो
गुह स्वामिन् दीने वितर मयि कारुण्यमनिशम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

महान्तं केकीन्द्रं वरद निजमारूढ दिविषद्-
गणानां सर्वेषामभयद (म ? मु)नीनां च भजताम् ।
वलाराते: कन्यारमण बहुपुण्याचलपते
गुह स्वामिन् दीने वितर मयि कारुण्यमनिशम् ॥

71

73262 गुहाष्टकम्

Beginning:

वन्दे भानुसहस्रकोटिसदृशं वन्दे सुरेन्द्रार्चितं
वन्दे माल्यविभूषितं शिवसुतं वन्दे गुरूणां गुरुम् ।
वन्दे वेदकदम्बकैरभिनुतं वन्दे मयूरासनं
वन्दे सिद्धगणाश्रयं प्रतिदिनं वन्दे गुहं षण्मुखम् ॥

End:

वन्दे भूतपिशाचशासनपरं वन्दे सदा शांभवं
वन्दे घोरभयापमृत्यु . . . हर वन्दे नराणां गतिम् ।
वन्देऽगाधभवार्णवस्य तरणं वन्दे सुराणां पतिं
वन्दे शाश्वतभुक्तिमुक्तिफलदं वन्दे गुहं षण्मुखम् ॥

74

73243 षण्मुखषट्कम्

Adds the following stanzas at the end:

सिन्दूरारुणमिन्दुकान्तवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं सर्वस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रत्नाङ्गहारोज्ज्वलं
सुब्रह्मण्यमुपास्महे प्रणमतामिष्टार्थसिद्धिप्रदम् ॥
कल्पद्रुमं प्रणमतां कमलारुणाभं
स्कन्दं भुजद्वयमनामयमेकवक्त्रम् ।
कात्यायनीतनुभुवं कटिसूत्रबद्ध-
कौपीनदण्डधरदक्षिणहस्तमीडे ॥
षडाननं कुङ्कुमरक्तवर्णं महामतिं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरसैन्यनाथं गुहं सदाहं शरणं प्रपद्ये ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

द्विषड्भुजं षण्मुखमम्बिकासुतं
कुमारमादित्यसहस्रतेजसम् ।
वन्दे मयूरासनमग्निसंभवं
सेना(निवि?न्यम)ग्राहमभीष्टसिद्धये ॥
उमाकोमलहस्ताब्जसंभावितललाटकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥
आम्नायाञ्चलमध्यस्थमाननैः षड्भिरन्वितम् ।
हिमाद्रितनयास्तन्यकुक्षिंभरिमुपास्महे ॥

75

66451 षण्मुखषट्कम् (कुमाराष्टकम्)

The following verse is added at the beginning:

उमाकोमलहस्ताभ्यां संभावितललाटकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥

76

71102 षण्मुखषट्कम्

Beginning:

चिरभूतरनायक(?)चिन्मयमेघ
करुणार(स)सागर कान्ततनो ।
तरुणारुणभास्कर चारुरुचे
चिरसंभव(?)पालय षण्मुख माम् ॥

End:

इति गोकुलभक्तन . . . धुरि . . .
स्तुतिमद्भुतयं . . . सर्गधितम् ।
पठतामपि षण्मुखषट्कमिदं
नमतामभिनन्दनयि . . .
यं कुचशस्ति शरीरभृताम् (?) ॥

Colophon:

इति षण्मुखषट्कं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

77

77644 षण्मुखस्तोत्रम्

Beginning:

सिन्दूरारुणकान्तिमिन्दुवदनं केयूरहारादिभि-
दिंव्यैराभरणैर्विभूषिततनुं स्वर्गादिसौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागोज्ज्वलं
सुब्रह्मण्यमुपास्महे प्रणमतामिष्टार्थसिद्धिप्रदम् ॥
ध्यायेत् षण्मुखमिन्दुकोटिसदृशं रत्नप्रभाशोभितं
बालार्कद्युतिसत्किरीटविलसत्केयूरहारान्वितम् ।
कर्णालम्बितकुण्डलप्रविकसद्गण्डस्थलैः शोभितं
काञ्चीकङ्कणकिङ्किणीरवयुतं शृङ्गारसारोदयम् ॥

End:

षडाननं कुङ्कुमरक्तवर्णं महामतिं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरसैन्यनाथं गुहं सदाहं शरणं प्रपद्ये ॥

Colophon:

इति षण्मुखस्तोत्रं समाप्तम् ।

Adds the following verse after the colophon:

मौलौ चन्द्रकलावती मनसि च श्रीकण्ठचिन्तावती
कण्ठे हारलतावती कचभरे कादम्बमालावती ।
गाने नृत्यसुधावती करतले कल्याणवीणावती
दृष्टौ पूर्णकृपावती दिशतु ते श्रेयांसि सो(? स्वसौ)पार्वती ॥

78

66008 सुब्रह्मण्यध्यानम्

Below given is the full text of the Stotra:

सव्ये शक्तिं दधानः सरसिजसदृशो वामहस्तेऽक्षमालां
कृत्वा वामं कराब्जं ललितकटितटे . . . हस्तेऽब्जपुष्पम् ।
क्रूरं शूरं निहत्य त्रिणयनमनिशं पूजयन् सिन्धुतीरे
तिष्ठन्निष्टार्थदायी ग्रथितपृथुजटः पातु मां श्रीगुहाख्यः ॥
ध्यायेत् षण्मुखमिन्दुकोटिसदृशं रत्नप्रभाशोभितं
बालार्कद्युतिषट्किरीटविलसत्केयूरहारान्वितम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कर्णालम्बितकुण्डलप्रविलसद्गण्डस्थलाशोभितं
काञ्चीकङ्कणकिङ्किणीरवयुतं शृङ्गारसारोदयम् ॥
ध्यायेदीप्सितसिद्धिदं शिवसुतं श्रीद्वादशाक्षं गुहं
खेटं कुक्कुटमङ्कुशं च वरदं पाशं धनुश्चक्रकम् ।
वज्रं शक्तिमसिं त्रिशूलमभयं दोर्भिर्धृतं षण्मुखं
ध्यायेचि(त्र)मयूरवाहसुभगं चित्राम्बरालंकृतम् ॥

The following words are written in the margin at the beginning:

जयन्तिपुरं तिरुचेन्दूर् सुब्रह्मण्यरूपध्यानम् ।

79

66521 सुब्रह्मण्यध्यानम्

Beginning:

षडाननं कुङ्कुमरक्तवर्णं महामतिं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरसेव्यमानं गुहं सदा शरणमहं प्रपद्ये ॥
एकास्यं द्विभुजं वामे वज्रं दक्षिणके करे ।
इच्छाज्ञानक्रियाशक्तिरूपं शक्तिधरं भजे ॥

End:

अभयधृतकृपाणं शक्तिबाणं च सव्ये
वरदकुलिशचापं खेटकानन्यहस्तैः ।
दधतमभयसेनानायकं चाष्टबाहुं
कमलवदनषट्कं क्रौञ्चहन्तारमीडे ॥
विद्रुमप्रभमेकमुखं विभुं
वज्रशक्तिवरदाभयपाणिनम् ।
देवलोकरिपुघ्नमविघ्नदं
नौमि रुद्रभुवं शिखिवाहनम् ॥

Colophon:

सुब्रह्मण्यध्यानं संपूर्णम् ।

80

66446 सुब्रह्मण्यभुजङ्गम्

Beginning:

गणेशं नमस्कृत्य गौरीकुमारं
गजास्यं गुहस्याग्रजातं गभीरम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

प्रलम्बोदरं शूर्पकर्णं त्रिणेत्रं
प्रवक्ष्ये भुजङ्गप्रयातं गुहस्य ॥
पृथक्षट्किरीटस्फुरद्दिव्यरत्न-
प्रभाक्षिप्तमार्तण्डकोटिप्रकाशम् ।
चलत्कुण्डलोद्यत्सुगण्डस्थलान्तं
महानर्घहारोज्ज्वलत्कम्बुकण्ठम् ॥

End:

गाङ्गेयं वह्निगर्भं शरवणजनितं ज्ञानशक्तिं कुमारं
ब्रह्मण्यं स्कन्ददेवं गुहमचलभिदं रुद्रतेजःस्वरूपम् ।
सेनान्यं तारकघ्नं गजमुखसहितं कार्तिकेयं षडास्यं
सुब्रह्मण्यं मयूरध्वजरथसहितं देवदेवं नमामि ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपादशिष्यश्रीमच्छंकर-भगवत्पादकृतिषु सुब्रह्मण्यभुजङ्गं संपूर्णम् ।

Adds the following two stanzas after the colophon:

वामदेवं लोकनाथं सुन्दरं लोकसुन्दरम् ।
वन्दे महेश्वरं नित्यं पार्वतीनायकं प्रभुम् ॥
आसनारूढपादस्तु यो जपेद् वेदमातरम् ।
संवत्सरकृतं पुण्यं तत्क्षणेन विनश्यति ॥

82

66445 सुब्रह्मण्यभुजङ्गम् (स्कन्दभुजङ्गम्)

End:

इदं तारकारेर्गुणस्तोत्रराजं
पठन्तस्त्रिकाले प्रपन्ना जना ये ।
सुपुत्रेष्टभोगानिहत्याश्च भुक्त्वा
लभन्ते तदन्ते परं स्वर्गभोगम् ॥

Colophon:

स्कन्दभुजङ्गं समाप्तम् ।

87

67323 सुब्रह्मण्यस्तोत्रम्

Beginning:

आलम्ब्याङ्कं शैलपुत्र्या विशालं
खेलन्तं सानन्दमाश्चर्यशीलम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सालंकारं दैत्यसंहारकालं
बालं सुब्रह्मण्यमीडेऽतिवेलम् ॥
षड्भिर्दीप्तं किरीटैर्मणिधगधगितैः कुण्डलैर्मण्डितास्यं
केयूरालंकृतद्वादशभुजमिषुमच्चापहस्तं रथस्थम् ।
शूरघ्नं वीरबाहुप्रभृतिभटवृतं स्तूयमानं सुरौघैः
सुब्रह्मण्यं नमामि प्रणतभयहरं शांभवं शक्तिहस्तम् ॥

End:

परमाश्च(र्य)विहारं प्रकटितभक्तौघपापसंहारम् ।
गुरुमौक्तिकमयहारं गुहमीडे कलितशूरसंहारम् ॥
निगमविपिने वरेण्यं निधिमिव संतोषकारणं पुण्यम् ।
प्रणमत सुब्रह्मण्यं प्रणतार्तिहरं बुधाः सकारुण्यम् ॥

Colophon:

सुब्रह्मण्यस्तोत्रं संपूर्णम् ।

Adds the following stanza after the colophon:

गाङ्गेयरुग् भवति यः सति येन तेजो
गाङ्गेयमन्यरिपुणेव धृतैव शक्तिः ।
गाङ्गेयमेकगतिमेव तमन्त्रलोके(?)
गाङ्गेयमाश्रितगणेन मयूरवाहम् ॥

सुब्रह्मण्यं संपूर्णम् ।

88

66451 सुब्रह्मण्यस्तोत्रम्

Beginning:

श्रीशब्रह्मशिवात्मकं मुनिगणैः प्रस्तूयमानं सदा
भक्तानां भवरोगदुःखशमनं कुष्ठामयध्वंसिनम् ।
आधिव्याधिविनाशकारणमयं त्रैलोक्यपूजावहं
सुब्रह्मण्यमहं भजे मम मनोऽभीष्टार्थसंसिद्धये ॥

End:

शान्तं शाश्वतभोगभोग्यफलदं सेवापराणां नृणां
दीप्तं दिव्यवरप्रदं शुभकरं ज्ञानप्रदं शाश्वतम् ।
पूर्णं पूरयितुं मनोरथफ लं(?)आविर्भवं निर्मलं
सुब्रह्मण्यमहं भजे मम मनोऽभीष्टार्थसंसिद्धये ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

89

77644 सुब्रह्मण्याष्टकम्

Beginning:

हृदयकमलमध्ये सूर्यविम्बासनस्थं
निखिलनिगमबीजं सृष्टिसंहारहेतुम् ।
निरतिशयसुखाढ्यं ज्योतिषं हंसरूपम्
अमितभुवनभासा चिन्तयेदात्मरूपम् ॥

शुभमस्तु

नन्दनं तुहिनशैलजापतेर्नन्दनीयचरितं षडाननम् ।
सुन्दराङ्गमखिलार्तिभञ्जनं भावयाम्यखिलरोगशान्तये ॥

End:

सत्यचिद्घनमुदारविक्रमं नित्यमग्र्यमखिलेश्वरं प्रभुम् ।
भृत्यहृत्तिमिरसंघभञ्जनं भावयाम्यखिलरोगशान्तये ॥
नित्यमेव हृदि षण्मुखं स्मरन् यः पठेद्दिनमनन्यमानसः ।
रोगनाशनकरः स मानुषः सर्वरोगरहितः सुखी भवेत् ॥

Colophon:

इति सुब्रह्मण्याष्टकं संपूर्णम् ।

90

66458 सुब्रह्मण्याष्टकम्

Beginning:

षडाननं कुङ्कुमरक्तवर्णं महामतिं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरसैन्यनाथं गुहं सदा शरणमहं प्रपद्ये ॥
षडाननं चन्दनलेपिताङ्गं महाद्भुतं दिव्यमयूरवाहनम् ।
महेशपुत्रं सुरलोकनाथं ब्रह्मण्यदेवं शरणं प्रपद्ये ॥

End:

सत्य . . . . मद्वितीयममलं वेदान्तसारं शुभं
देवानामभयप्रदं पशुपतेः पुत्रं जगत्स्वामिनम् ।
मायातीततनुं कृपाब्धिमनिशं मूकं च वाचां पतिं
. . . . त्यनन्तमहिम त्वां देवदेवं भजे ॥
उमाकोमलहस्ताब्ज(लम्बा ? संभा)वितललाटकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

सुब्रह्मण्याष्टकं संपूर्णम् ।

91

71168 सुब्रह्मण्यषोडशनामस्तोत्रम्

Beginning:

प्रथमो ज्ञानशक्त्यात्मा द्वितीयः स्कन्द एव च ।
अग्निभूर्वै तृतीयश्च ब्राहुलेयश्चतुर्थकः ॥

End:

त्रयोदशो ब्रह्मचारी शिवतेजाश्चतुर्दश ।
पञ्चदशः क्रौञ्चहारी षोडशः शिखिवाहनः ॥

Colophon:

इति श्रीसुब्रह्मण्यषोडशनाम संपूर्णम् ।

92

66028 सुब्रह्मण्यषोडशनामस्तोत्रम्

Adds the following verses at the end:

षोडशैतानि नामानि जपेत् संध्यासु सादरम् ।
बृहस्पतिसमो वाग्मी ब्र(ह्मते)जा भवेत् सदा ॥
कन्यार्थी लभते कन्यां ज्ञानार्थी ज्ञानमाप्नुयात् ।
विद्यार्थी लभते विद्यां धनार्थी धनमाप्नुयात् ॥
. . . र्थयते मर्त्यस्तत्तत् सर्वार्थमाप्नुयात् ।
सुब्रह्मण्य नमस्तुभ्यं सुरसेनाग्रगामिने ।
ईश्व . . . . शक्तिकुण्ठितशात्रवे ॥

93

PM2745 सुब्रह्मण्यषोडशनामस्तोत्रम्

Beginning:

अस्य श्रीसुब्रह्मण्यषोडशनामस्तोत्रमहामन्त्रस्य सनत्कुमार ऋषिः पङ्क्तिश्छन्दः श्रीसुब्रह्मण्यो देवता । श्रीसुब्रह्मण्येश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

CC0. In Public Domain. Digitized by Muthulakshmi Academy

. . . .

सुब्रह्मण्यं प्रणम्याहं सर्वज्ञं सर्वसंपदम् ।
अभीष्टफलसिद्ध्यर्थं प्रवक्ष्ये नाम षोडश ।
प्रथमो ज्ञानशक्त्यात्मा द्वितीयः स्कन्द एव च ॥

End:

पञ्चदशः क्रौञ्चदारी षोडशः शिखिवाहनः ।
एतानि षोडश नामानि त्रिसंध्यायां तु साधकः ॥
बृहस्पतिसमो वाग्मी ब्रह्मतेजा भवेत् तथा ।
सुब्रह्मण्यस्य महिमा वर्णितुं केन शक्यते ।
यत्रोच्छिष्टमपि स्पृष्टं सित्रीणस्वांदहत्यहि (?) ॥

Colophon:

इति स्कान्दे सुब्रह्मण्यषोडशनाम समाप्तम् ।

94

66521 सुब्रह्मण्यषोडशनामस्तोत्रम्

Beginning:

ज्ञानशक्तिधरः स्कन्दो देवसेनापतिस्तथा ।
सुब्रह्मण्यो गजारुढः शरकाननसंभवः ॥

End:

बालश्च क्रौञ्चभेत्ता च शिखिवाहन एव च ।
एतानि स्वामिनामानि षोडश प्रत्यहं नरः ।
यः पठेत् सर्वपापेभ्यः स मुच्येत महामुने ॥

Colophon:

सुब्रह्मण्यषोडशनाम संपूर्णम् ।

95

77651 सुब्रह्मण्यसहस्रनामावलिः

Beginning:

अचिन्त्यशक्तये नमः। अनघाय नमः। अक्षोभ्याय नमः। अपराजिताय नमः। अनाथ-वत्सलाय नमः।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

क्षमाश्रयाय नमः । क्षालिताय नमः । क्षितिधराय नमः । क्षीणसंरक्षणाय नमः । क्षमाय नमः ।

Colophon:

सुब्रह्मण्यसहस्रनाम समाप्तम् ।

99

66455 सुब्रह्मण्यसहस्रनामावलिः (स्कन्दसहस्रनामावलिः)

Beginning:

अनन्ताय नमः । शाश्वताय नमः । सूक्ष्माय नमः । स . . . . य नमः । पार्वतीसुताय नमः । तारकासुरसंहारिणे नमः ।

End:

तारकान्तकाय नमः । एकवर्णाय नमः । मुण्डमालिने नमः । परितापिने नमः । दुरासदाय नमः । मेषारूढाय नमः ।

100

66451 सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रम्

Beginning:

पप्रच्छ नारदोऽगस्त्यं सुब्रह्मण्यानुकीर्तनम् ।
अष्टोत्तरशतं नाम अशेषारोग्यकारणम् ।
वद सर्वं मुनिश्रेष्ठ श्रोतुं कौतूहलं हि मे ॥

अगस्त्य उवाच—

. . . .

अस्य श्रीसुब्रह्मण्याष्टोत्तरशतदिव्यनामस्तोत्रमहामन्त्रस्य अगस्त्यभगवानृषिः । अनुष्टुप् छन्दः । श्रीसुब्रह्मण्यो देवता । सौं बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् । मम सुब्रह्मण्यप्रसादसिद्ध्यर्थे जपे विनियोगः । . . . . . .

स्कन्दो गुहः षण्मुखश्च फालनेत्रसुतः प्रभुः ।
पिङ्गलः कृत्तिकासूनुः शिखिवाहो द्विषड्भुजः ॥

End:

सर्वेश्वरो लोकगुरु(रसुरानीकमर्दनः) ।
सुब्रह्मण्यो गिरीशश्च ब्रह्मण्यो ब्राह्मणप्रियः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

न देयं यस्य कस्यापि मुने गुह्यं कुरुष्व ह ।
. . . .
आयुर्वृद्धिकरं नृणामपमृत्युविनाशनम् ।
ईप्सितार्थं लभेन्नित्यं जपवान् . . .
. . . . मुख्यमेतं मुने श्रृणु ॥

Colophon:

इति श्रीस्कान्दे पुराणे अगस्त्यमुनिवाचकं श्रीसुब्रह्मण्याष्टो . . .

102

66460 सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रम्

End:

एतत् स्तोत्रं पठेद् यस्तु स्कन्दभक्तिसमन्वितः ।
सुप्रीतस्तस्य सांनिध्यं करोति शिवनन्दनः ॥
रह . . मया प्रोक्तं कृपया तव सुव्रत ।
न देयं यस्य कस्यापि मुने गुप्तं कुरुष्व ह ॥

Colophon:

इति स्कान्दे अगस्त्यनारदसंवादे ईश्वरप्रोक्ते सुब्रह्मण्याष्टोत्तरस्तोत्रं संपूर्णम् ।

103

70220 सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रम्

End:

सुब्रह्मण्यो गुहः प्रीतो ब्रह्मण्यो ब्राह्मणप्रियः ।
एवमष्टोत्तरशतनामभिः पूजितो गुहः ।
सर्वाभीष्टप्रदाता च सुप्रसन्नो भविष्यति ॥

105

71422 सुब्रह्मण्याष्टोत्तरशतनामावलिः

Beginning:

स्कन्दाय नमः । गुहाय नमः । षण्मुखाय नमः । फालनेत्रसुताय नमः । विभवे नमः पिङ्गलाय नमः । कृत्तिकासूनवे नमः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

असुरानीकमर्दनाय नमः। मयूरध्वजाय नमः। ब्रह्मण्याय नमः। निर्गुणाय नमः। ब्राह्मणप्रियाय नमः।

Colophon:

सुब्रह्मण्यनामावली संपूर्णा।

106

66451 सुब्रह्मण्याष्टोत्तरशतनामावलिः

End:

असुरानीकमर्दनाय नमः। सुब्रह्मण्याय नमः। गिरीशाय नमः। ब्रह्मण्याय नमः। ब्राह्मण-प्रियाय नमः।

Colophon:

अष्टोत्तरशतनाम संपूर्णम्।

107

70640 सुब्रह्मण्याष्टोत्तरशतनामावलिः

End:

असुरमर्दनाय नमः। लोकगुरवे नमः। गाङ्गेयाय नमः। अ(श्वयि? ष्टै)श्वर्यप्रयात्मिने(?) नमः। कारुण्यमूर्तये नमः। करुणासिन्धवे नमः। श्रीसुब्रह्मण्याय नमः। गजवल्ल्यै नमः। महावल्ल्यै नमः। सुब्रह्मण्याष्टोत्तरशतकमन्त्रपुष्पं समर्पयामि।

112

66448 सुब्रह्मण्याष्टोत्तरशतनामावलिः

End:

सर्वेश्वराय नमः। लोकगुरवे नमः। असुरसेनामर्दनाय नमः। सुब्रह्मण्येश्वराय नमः। श्रीगुरुदक्षिणामूर्तये नमः।

115

70640 सुब्रह्मण्याष्टोत्तरशतनामावलिः

Beginning:

शरवणभवाय नमः। शक्तिधराय नमः। शतपत्रकमलवासिने नमः। शरभेश्वरपूजिताय नमः। शरभसृष्टिविधायिने नमः। शरवर्षाय नमः।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

कौञ्चधूलिताय नमः । सेनापतये नमः । अरुणाम्बरनाथाय नमः । सुरदेवकुञ्जरीसमेताय नमः । सुन्दराय नमः । सुमङ्गलाय नमः । सुप्रसन्नाय नमः । श्रीमत्षण्मुखदेशिकाय नमः ।

सुब्रह्मण्याष्टोत्तरशतकं मन्त्रपुष्पं समर्पयामि ।

DEVĪ-STOTRA-S

116

PM644 अखिलाण्डनायकीस्तोत्रम्

Below is given the full text of the Stotra:

श्रीधरमुखसुरनुत्यं श्रीमद्बालास्यरचितनृपकृत्यम् ।
श्रियमादधातु नित्यं श‍ृङ्गाराद्वैतसारसाहित्यम् ॥
अम्बुरुहोपमवक्त्रां शम्बरमथनारिसंगतसुगात्राम् ।
अम्बरचरनुतिपात्रामनुदिनमखिलाण्डनायकीं वन्दे ॥
इन्दुकलाधरमौलिं सुन्दरनिजगमननिन्दितमरालीम् ।
इन्द्रानतपदयुगलीमनुदिनमखिलाण्डनायकीं वन्दे ॥
उन्नतचारुसुनासां संनुतसंगीतललितसंवासाम् ।
किंनरगानसुहासामनुदिनमखिलाण्डनायकीं वन्दे ॥
कमनीयाकृतिभूषां रमणीयाभरणरञ्जितसुवेषाम् ।
काञ्चनमणिमयमालां काञ्चनकैलासगिरिकलितलीलाम् ।
वाञ्छितदानविलोलामनुदिनमखिलाण्डनायकीं वन्दे ॥

120

69592 अन्नपूर्णास्तोत्रम्

The MS. omits the verse देवी सर्वविचित्र. . . and adds instead the following verse at the end before the stanza अन्नपूर्णे. . .:

वामे माणिक्यपात्रं मधुरसभरितं बिभ्रतीं पाणिपद्मै-
र्दिव्यैरन्यैः प्रपूर्णं घृतमणिविलसद्दक्षिणे रत्नदर्वीम् ।
रक्ताङ्गीं तुङ्गपीनस्तनकटिविलसद्रत्नहारां त्रिणेत्रां
वन्दे पूर्णेन्दुबिम्बप्रतिनिधिवदनामम्बिकामन्नपूर्णाम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

122

66800 अन्नपूर्णास्तोत्रम्

Omits the stanza देवी सर्वविचित्र . . . and adds the following verse:

दर्वी रत्नसुवर्णवर्णखचितां सव्ये करे संस्थितां
वामे चारुपयोधर हेमरसां सौभाग्य . . . ।
. . . . फला रसकरी काशीपुराधीश्वरी
भिक्षां + + + पूर्णेश्वरी ॥

Colophon:

अन्नपूर्णादशकं समाप्तम् ।

125

67261 अन्नपूर्णास्तोत्रम् (अन्नपूर्णाष्टकम्)

One additional stanza is given at the end as noted below:

अन्नपूर्णाष्टकं नित्यं श्रद्धाभक्तिसमन्वितः ।
यः पठेत् प्रयतो देव्या भक्तिर्मुक्तिश्च जायते ॥

Colophon:

अन्नपूर्णाष्टकं संपूर्णम् ।

129

68703 अन्नपूर्णास्तोत्रम्

The following incomplete verse is seen in the middle.

. . . .
प्रातः पठेत् तथा शुभकरं सर्वेश्वरा मानवाः ।
सर्वैश्वर्यसमस्तजोतिभगवान् सर्वान्नयापूर्णधृक्
बालेशामरसारदस्वविलसल्लक्ष्मीकटाक्षं मम ॥

132

66148 अम्बानवरत्नमालिकास्तोत्रम्

This Stotra, beginning with चेटीभवन्निखिल is also called *Devīpraṇava-ślokīstuti* and ascribed to Kālidāsa in *BSR*, II, pp. 616-19. The MS. omits two verses and adds the following three verses at the end:

CC0. In Public Domain. Digitized by Muthulakshmi Academy

दासायमानसुमहासा कदम्बवनवासा कुसुम्भसुमनो-
वासादिपञ्चमदुरासाभिभूतमधुमासारविन्दमदिरा ।
कासारसूनुततिवासा गिराममृतकासारशीतकिरणा
नासामणिप्रवरभासा शिवातिमिरमासादयेदुपनिधिम् ॥
जम्भारिकुम्भिपृथुकुम्भापहासिकुचसंभाव्यहारलतिका
रम्भाकरीन्द्रकरडम्भापहोरुगतडिम्भानुरञ्जनपरा ।
शंभावुदारपरिरम्भा करोत्पुलकडिम्भानुरागपिशुना
शं भासुराभरणगुम्भा सदा दिशतु शुम्भासुरप्रमथिनी ॥
रक्षामणीदनुजशिक्षाविधौ कलितदीक्षा मनोहरगुणा
भिक्षाशिनो नटनवीक्षाविनोदमुखिदक्षाध्वरप्रहरणा ।
दाक्षायणी जयति दक्षा स्वकीयजनपक्षा विपक्षविमुखी
नि(वि)क्षेपगाननिधिराक्षेपशक्तिमयय(र)क्षादधानकलना ॥

Colophon:

इति श्रीकालिदासकृतमम्बानवरत्नमालिकास्तोत्रम् ।

136

PM915 अम्बाष्टकम्

Beginning:

अम्बा शांभवि चन्द्रमौलिरबलापर्णा उमा पार्वती
का(ली हैम)वती शिवाद्रितनया कात्यायनी भैरवी ।
सावित्री नवयौवना शुभकरी साम्राज्यलक्ष्मीप्रदा
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥

End:

अम्बापावनमन्त्रराजपठनमम्बाष्टकं यः पठे-
दम्बालोलकटाक्षवीक्षणरसा-श्वर्य . . रति ।
अम्बापावनमन्त्रराजपठनं भक्त्यार्थमोक्षप्रदा
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥

Colophon:

इति श्रीमच्छंकराचार्यसद्गुरुविरचितायाम् अम्बाष्टकस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

139

PM2111 अम्बाष्टकम्

Beginning:

अम्बा शांभवि एकदन्तजननी(अत्युन्नता)कारिणी
कल्याणी नगराज(पुत्रि सततं)काम्यप्रदाचन्द्रिका ।
पद्मा(क्षी त्रिदशा)र्चिताङ्घ्रियुगला पद्मासनासंस्थिता
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥

End:

. . . .
या विद्या शिवकेशव . . . . या वै जगन्मोहिनी ।
या पञ्चप्रणव . . . नलिनी या चित्कलारूपिणी
सा पायात् परदेवता भगवती श्रीराजराजेश्वरी ॥

Colophon:

श्रीमच्छंकराचार्यविरचितम् अम्बाष्टकं संपूर्णम् ।

140

77644 अम्बाष्टकम्

Beginning is same as in No. 139 above (PM 2111).

End:

ह्रींकारीं प्रणवात्मिकां परतरां श्रीविद्यद्वृ्यामयाम्
ऐं क्लीं सौरितिमन्त्रमूर्तिमबलां श्रीमातृकारूपिणी(म्) ।
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवतां
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥

Colophon:

अम्बाष्टकं संपूर्णम् ।

141

68778 अम्बास्तवः

Beginning:

यामामनन्ति + + + शरणं प्रपद्ये ॥

End:

अम्ब त्वदंशोरणुरंशुमाली तवैव मन्दस्मितबिन्दुरिन्दुः ।
पुंभावलीला पुरुषत्रयं ते यादृच्छिकं सल्लपितं त्रयं ते ॥

Colophon:

अम्बास्तवः संपूर्णः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

143

72762 **अम्बास्तवः**

The following verse is added after the colophon:

मञ्जीरशोभिचरणं वलिशोभिमध्यं
हाराभिरामकुचमम्बुरुहायताक्षम् ।
नीलालकं हिममहीधरकन्यकाख्यं
ज्ञानस्वरूपमिदमीश्वरदीपदीप्तम् ॥

144

TR803 **अम्बिकात्रिशती**

Beginning:

परमाभरणं शंभोः पर्वतनाथस्य पुण्यपरिपाकः ।
निजलोचनवीक्षणतो रक्षितलोकत्रयं च तद् रत्नम् ॥
निगमान्तपरमविद्या दद्यादद्य प्रमोदमिह नमताम्
निखिलचराचरचिन्मयरूपं रक्षाकरं च लोकानाम् ॥

End:

शांकरि कथं नु वर्ण्यस्तव महिमा वेदमौलिगणवेद्यः ।
इति निश्चित्य पदाब्जं तव वन्दे मोक्षकामोऽहम् ॥
त्वामम्ब बालिशोऽहं त्वचमत्कारैर्गिरां गुम्भैः ।
अयथायथक्रमं हि स्तुवन्नपि प्राप्तजन्मसाफल्यः ॥

Colophon:

इति **अम्बिकात्रिशती** समाप्ता ।

145

68776 **अम्बिकास्तुतिः**

Beginning:

अथ कुम्भात् समुत्थाय हनूमान् मारुतात्मजः ।
आर्यां कात्यायनीं भक्त्या तुष्टावेष्टफलप्रदाम् ॥
नमामि खड्गहस्तां त्वां खेटहस्तां भयानकाम् ।
वरदाभयहस्तां च भृत्यलोकभयापहाम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

य: स्तोत्रमेतत् प्रजपेत् सकृद्वासकृदेव वा ।
यं यं चिन्तयते कामं तं तं प्राप्नोत्यसंशय: ॥
राघवस्य प्रसादेन सर्वसिद्धिमतस्तव ।
मया न देयं किमपि तथापीष्टं ददामि ते ॥

Colophon:

इति श्रीहनुमद्भिरचिता अम्बिकास्तुति: समाप्ता ।

146

68779 अम्बिकास्तोत्रम्

Beginning:

अम्ब केचिदमृतस्वरूपिणीं लम्बिकान्तरशिखाग्रवर्तिनीम् ।
ताल्वुमूलमवधीकृताग्रया जिह्वया परिलिहन्ति सुन्दरि ॥
स्तब्धदृष्टिबहिरर्कसंश्रया निर्विकल्पमपि यत् तवासनम् ।
मुक्तपञ्जरशुकानुकारितं भैरवं वपुरुदारमारभेत् ॥

End:

सर्वा: शक्तीश्चेतसा दर्शनाद्या:
स्वे स्वे वेद्ये यौगपद्येन विष्वक् ।
क्षिप्त्वा मध्ये हाटकस्तम्भरूप-
स्तिष्ठन् विश्वाकार एको विभाति ॥

147

PM26 आनन्दलहरीस्तोत्रपाठफलप्रकार:

Beginning:

अथ स्तवान्तरं वक्ष्ये शंकरोक्तं पुरातनम् ।
महेश्वरै: सुरैर्वापि दुर्लभं भुवनत्रये ॥

ओं अस्य श्रीआनन्दलहरीस्तोत्रमहामन्त्रस्य शंकराचार्य ऋषि:, अनुष्टुप् छन्द:, श्रीमहात्रिपुरसुन्दरी देवता, मम सकलाभीष्टसिद्ध्यर्थे जपे विनियोग: । ध्यानम्—

जपापुष्पप्रतीकाशां रक्तोत्पलसमप्रभाम् ।
बालार्ककिरणाभासां वन्दे त्रिपुरसुन्दरीम् ॥
आनन्दलहरीस्तोत्रपाठस्य फलमुत्तमम् ।
वक्ष्याम्यतिरहस्यं च सर्वकामार्थदं नृणाम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

इदं श्रीशंकराचार्यरचितं स्तोत्रमुत्तमम् ।
यः पठेन्नित्यमेकाग्रः प्राप्नोतीह सुखं सदा ।
अन्ते मुक्तिमवाप्नोति विद्यते नात्र संशयः ॥

Colophon:

इति श्रीमन्त्रचिन्तामणिग्रन्थे आनन्दलहरीफलप्रकारः समाप्तः ।

152

71232 आम्नायस्तोत्रम्

Beginning:

शुद्धविद्या च बाला च द्वादशार्धा मतङ्गिनी ।
द्विजत्वसाधका विद्या गायत्री वेदमातृका ॥
गाणपत्यं कार्तिकेयं मृत्युघ्नं नीलकण्ठकम् ।
त्र्यम्बकं जातवेदाश्च तथा प्रत्यङ्गिरादयः ॥
तत्पुरुषादुद्भवो मन्त्रा वैदिकाश्च द्विकोटयः ।
एताः कामगिरीन्द्रस्थाः पूर्वाम्नायस्य देवताः ॥

End:

भुक्त्वा भोगान् यथाकामान् सर्वभूतहिते रतः ।
स भार्यापुत्रसौभाग्यसहितः पशुमान् भवेत् ॥
एकवारं जपेदेनं कोटियज्ञफलं भवेत् ।
एतद्विज्ञानमात्रेण सर्वेषां देशिको भवेत् ।
शिवसायुज्यमा . . . शिवयोरेव . . . . ॥

Colophon:

इति श्रीरुद्रयामले शिवेन विरचितम् आम्नायस्तोत्रं संपूर्णम् ।

154

71186 आम्नायस्तोत्रम्

End:

कौलविद्या ततः प्रो . . . . ।
अनामाख्यातसंकेता विद्यानुत्तरपूर्विका ॥
. . . पूर्तिविद्या च महात्रिपुरसुन्दरी ।

द्वादशान्ते—

पूर्वं दक्षिणपश्चिमोत्तरमधश्चोर्ध्वं . . . (see No. 156 below).

CC0. In Public Domain. Digitized by Muthulakshmi Academy

155

68887 आम्नायस्तोत्रम्

Beginning:

शुद्ध(-विद्या च) बाला च द्वादशार्धा मतङ्गिनी ।
एताः कामगिरीन्द्रस्थाः पूर्वाम्नायस्य देवताः ॥
गुरुत्रयादि पीठान्तं चतुर्विंशत्सहस्रकम् ।
एतदावरणोपेतं पूर्वाम्नायं भजाम्यहम् ॥

End:

त्रिसंध्यं पठते विद्वानाम्नायस्तोत्रमुत्तमम् ।
सर्वपापविमुक्तात्मा सर्वैश्वर्यसमन्वितम् ।
भुञ्जन् भोगान् यथाकामान् श्रीविद्यालोकमाप्नुयात् ॥

Colophon:

इति कुलार्णवतन्त्रे उमामहेश्वरसंवादे आम्नायस्तोत्रं संपूर्णम् ।

156

72792 आम्नायस्तोत्रम्

Beginning:

अस्य श्री आम्नायस्तोत्रमहामन्त्रस्य आनन्दभैरव (ऋषिः) गायत्र्यनुष्टुप् (छन्दः) आम्नायदेवो (देवता) ऐं बीजम् ह्रीं श(क्तिः) श्रीं की(लकम्) इष्टार्थे वि(नियोगः) । ह्रामित्यादिन्यासः । भूर्भुवः . . . ध्यानम्—

पूर्वं दक्षिणपश्चिमोत्तरमधश्चोर्ध्वं तथानुत्तरं
द्विस्रोतश्च गुरुत्रयं त्रिचरणं वन्दे महद्वासनम् ।
पञ्चाम्बानवनाथषोडशषडाधाराश्च षड्दर्शनं
वन्दे द्व्यष्टषडङ्गपञ्चकरहस्याम्नायरत्नस्तुतौ ॥

पञ्चपूजां कृत्वा,

शुद्धविद्या च बाला च द्वादशार्धा मतङ्गिनी ।

End:

यस्त्रिसंध्यं पठेद् यस्तु(?) आम्नायस्तोत्रमुत्तमम् ।
भुक्त्वा भोगान् यथाकामान् सर्वैश्वर्यसमन्वितम् ॥
श्रीविद्यालोकमाप्नोति वेदवाक्यानुसारणात् ।

Colophon:

इति आम्नायस्तवं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

157

PM2569 आम्नायस्तोत्रम्

Beginning is same as in No. 155 above.

End:

सायुज्यहेतुकं नित्यं वन्दे चोर्ध्वमकल्मषम् ।
पश्चादनुत्तरं वन्दे परब्रह्मस्वरूपकम् ॥
यस्त्रिसंध्यं पठेद् विद्वान् सर्वप्रियहिते रतः ।
पार्वतीलोकमाप्नोति वेदवाक्यानुसारतः ॥

Colophon:

इत्याम्नायस्तोत्रं संपूर्णम् ।

158

PM2946 आरतिस्तवः

Beginning:

जय देवि जय देवि जय महिषासुरमथिनि ।
सुरवर-ईश्वरवरदे त्रैलोक्यजननि ॥
विन्दुत्रिकोणवसुदलषट्कोणाकारम् ।
विन्दुमध्ये प्रणवं तदुपरि तदुपरि त्रय वीजम् ॥

End:

नारदतुम्बुरुनरगीते सुरवन्द्ये शंकरसुत(?) ।
राजेश्वरि तव चरणं वन्दे । जय देवि . . . ॥

Colophon:

इति श्रीदेवी-आरतिस्तवः समाप्तः ।

159

PM644 आर्यापञ्चदशी

Beginning:

करकलितचापबाणां कह्लाराङ्घ्रिं नमामि कल्याणीम् ।
कन्दर्पदर्पजननीं कलुषहरां कामितार्थफलदात्रीम् ॥
एषा स्तोतुं वाणी नैव समर्था तवेशि महिमानम् ।
शेषोऽप्यब्दसहस्रैः शेषं कृतवान् महेशि तव चरितम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

ह्रींकारकेलिभवने हिमकरमौल्यङ्कमञ्जुपर्यङ्के।
हृदयसरोजे मे वस हृदयानन्दप्रबोधपरहंसि ॥
आर्यापञ्चदशीं तामार्यां यो भजति शुद्धधीर्नित्यम्।
भार्ये लक्ष्मीवाण्यौ पर्यायात् तस्य सादरं भवतः ॥

Colophon:

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्नेनान्ध्रेण त्यागराजनाम्ना विरचितम् आर्यापञ्चदशीस्तोत्रं संपूर्णमस्तु ।

160

TR1071 आर्यास्तोत्रम्

Beginning:

ओं ब्रह्मोवाच—

श्रृणु वत्स प्रवक्ष्यामि आर्यास्तोत्रं महाफलम् ।
यः पठेत् सततं भक्त्या स एव विष्णुदुर्लभम् ॥ (?)
मृत्युव्याधिभयं नास्ति तस्य किंचित् कलौ युगे ।
अपुत्रो लभते पुत्रं त्रिपक्षं श्रवणं यदि ॥

End:

चक्रिणी रणदाता च रणयुक्ता रणप्रिया ।
दुर्गा जयन्ती काली च भद्रकाली महोदरी ॥
नारसिंही च वाराही सिद्धिदाता सुखप्रदा ।
जयंकरी महारौद्री महाभयविनाशिनी ॥

Colophon:

इति श्रीब्रह्मनारदसंवादे आर्यास्तोत्रं समाप्तम् ।

161

PM2608 कल्याणवृष्टिस्तोत्रम्

End:

इति विरचितमेतत् त्रैपुरं स्तोत्ररत्नं प्रकटितपरमार्थं योगिहृद्ध्यानगम्यम् ।
सकलदुरितरोगध्वंसिनानन्यकार्यप्रथित . . . निधानं सेव्यतां भक्तियुक्तैः ॥

Colophon:

इति श्रीमच्छंकराचार्यविरचितं कल्याणवृष्टिस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

162

73243 कल्याणवृष्टिस्तवः (षोडशाक्षरीस्तवराजः)

End:

ह्रींकारत्रयसंपुटेन + + + वयः ।

कल्याणीं मेधबोधां सकलसुखमयीमीश्वरीं लक्षणाढ्यां
ह्रींकारीं हर्षसान्द्रां सततमभयदां कल्पवल्लीं हरार्धाम् ।
लक्ष्मीं ह्रींकारभूषां सकलशुभयुतां ह्रांपदस्थां त्रिणेत्रा-
मम्बां पाशाङ्कुशेक्षुप्रसवशरकरां सुन्दरीं भावयेऽहम् ॥

Colophon:

इति श्रीशंकराचार्येण विरचितं षोडशाक्षरीस्तवराजं संपूर्णम् ।

170

73475 गिरिजादशकम् (अन्नपूर्णादशकम्)

Adds the following *dhyānaśloka-s* in the beginning:

उद्यद्भानुनिभे दुकूलवसने क्षीरोदमध्ये शुभे
मूले कल्पतरोः स्फुरन्मणिमये सिंहासने संस्थिताम् ।
बिभ्राणां करयोः सुवर्णचषकं बीजं च शाल्युद्भवं
भक्ताभोष्टवराभयाञ्जलिपुटां ध्यायेऽन्नपूर्णेश्वरीम् ॥
ब्रह्माणी चतुराननाक्षवलयं कुम्भं करे स्रुक्स्रुवौ
बिभ्राणारुणकान्तिमिन्दुवदना रुद्रा . . . . . . ।
हंसारोहणकेलिरम्बरमणीबिम्ब . . . भूषिता
गायत्री हृदि भाविता भवतु नः संपत्करी सर्वदा ॥
रुद्राणी नवयौवना त्रिणयना वैयाघ्रचर्माम्बरा
. . . ङ्गे त्रिशिखाक्षसूत्रवलया . . . . . . धाना स्रुवम् ।
विद्युत्पिङ्गजटाकलापविलसत्पूर्णेन्दुवक्त्रावृता
सावित्री हृदि भाविता भवतु नः संपत्करी सर्वदा ॥
ध्येया चात्र सरस्वती भगवती पीताम्बराडम्बरा
. . . मा . . . धनुर्धरा परिणमद्रात्राञ्चिता वैष्णवी ।
तार्क्ष्यस्था मणिनूपुराङ्गविलसद्ग्रैवेयभूषोज्ज्वला
हस्तालम्बितशङ्खचक्रकमलाभोतीर्दधाना सु . . ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

180

75423 चण्डीरहस्यम्

The following verse in praise of Appayadīkṣita is written at the beginning of the work.

भूमिर्भ्राम्यति बुद्ध एव मरुत: प्रत्यभ्रमोऽत्यद्भुतो
भ्राम्यन्त्येव सहाश्रयेण च दिवा ज्योतींषि सर्वाण्यपि ।
आ(वा?व)र्तोऽयमपां भ्रम: स परितो मूर्तिर्हरस्याष्टमी
यासावप्पयदीक्षित: (स ?)जयति सा त्वेका निर(स्ता?स्त)भ्रमा ॥

184

72764 चर्चास्तव:

End:

य: स्तोत्रमेतदनु + + + मदिरेक्षणानाम् ॥

खड्गं पादुकमञ्जनं च घुटिकां सारस्वतीं संपदं
मृत्योर्वञ्चनमुग्रकालहरणं देहस्थिते: कारणम् ।
भ्रूभङ्गान्नगतुङ्गवृक्षपतनं वश्यं जगद्योषितां
चर्चास्तोत्रमिदं करोति . . . त्वत्पूजकस्येप्सितम् ॥
पाश्चात्यभागपरिलम्बिजटाकलापां प्रत्यग्रवल्कलधरां भसितत्रिपुण्ड्राम् ।
पञ्चाक्षरीजपपरस्फुरिताधरोष्ठीं पञ्चाग्निमध्यनिलयां प्रणमामि गौरीम् ॥

Colophon:

इति श्रीकालिदासमहाकविकृतौ चर्चास्तव: संपूर्ण: ।

185

67900 चर्चास्तव:

The following verse is added after the colophon:

ह्रांकारमन्तरुभयोरपि पार्श्वयोर्यत् पद्मारुणे जननि चेतसि संनिधेहि ।
ह्रींकारिणि त्रिपुरभैरवि देवि मात: श्रीपादुकेश्वरि परे त्रिपुरे प्रसीद ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

190

67965 चिन्तामणिस्तोत्रम्

Add the following verse at the beginning:

वन्देऽन्तरायवदनं तुन्दिलमीशानवंशसौभाग्यम् ।
मदि . . म्महान्धकारध्वंसनकमलस्थमाश्रितजनानाम् ॥

191

67774 ज्वालामुखीस्तोत्रम्

Beginning:

शत्रुध्वंसकरी शताक्षरमयी शातोदरी शांकरी
शर्वाणी शशिशेखरी भगवती श्रीशांभवी पार्वती ।
सावित्री सकलार्थसिद्धितकरी सर्वाङ्गभूषोज्ज्वली
ध्यायेऽहं नृथुलापुरिश्वनिलयां(?)ज्वालामुखीं भावये ॥

End:

जंझामारुतजर्झरीकृतझरीझंकारवर्णाझरी
झंकारैः करकङ्कणाझणझणत्कारैः सदानर्तनाम् ।
ब्रह्मास्त्रां बगलामुखीं भगवतीं ज्वालामुखीं भावये
. . . . ॥
कार्याकारणकर्तृभोक्तृनिरतां कल्याणिनीं कामजां
कामाक्षीं कमलासनीं कवचिनीं कालाग्निरुद्रेश्वरीम् ।
काश्मीरागरु . . . . ॥

192

PM81 ज्वालास्तोत्रम् (रत्नपञ्चकम्)

Beginning:

नताः स्तुतिपराः सर्वे यस्याः स्वर्गे दिवौकसः ।
तमो हत्वा शंकरस्य भूत्यै भूयात् सदाशिवा ॥
श्रीसुन्दरीं जगद्धात्रीं ज्वालाव्याप्तदिगन्तराम् ।
सुरसिद्धैः स्तुतां भूपैः सुमुखीं नौम्यहं शिवाम् ॥
दैत्यानां बहुकोटिकोटिमुकुटाटोपानधः कुर्वतीं
विघ्नानां कटकान्यतीव कटुकान्यापाटयन्तीं स्फुटाम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

भक्तानामभयं वरं विदधतीं शान्तात्मनां सर्वदा
षड्वर्गेण जितक्रियाविरहितो ज्वालामुखीं नौम्यहम् ॥

End:

रत्नपञ्चकनामानं श्रीसुन्दरीस्तवं परम् ।
अन्याकुलं यः पठति सोऽभीष्टां सिद्धिमाप्नुयात् ॥
ज्वालामुखि महाज्वाले ज्वालापिङ्गललोचनि ।
ज्वालातेजो महातेजो ज्वालामुखि नमोऽस्तु ते ॥

Colophon:

इति श्रीरत्नपञ्चकाभिधं ज्वालास्तोत्रं संपूर्णं समाप्तम् ।

194

PM2673 त्रिपुटास्तवराजः

Beginning:

वराभीतिहस्तं द्विबाहुं प्रसन्नं शिवं शुभ्रवर्णं स्वशक्त्योपविष्टम् ।
प्रसन्नास्यबिम्बं प्रकाशस्वरूपं शिरःपद्ममध्ये गुरुं पूजयामि ॥
. . . वह्निसंस्थं त्रिमूर्त्या प्रयुक्तं शशाङ्केन युक्तं तवाद्यं स्वबीजम् ।
सुवर्णप्रभं ये जपन्ति त्रिलोके श्रियं सौभगत्वं लभन्ते नरास्ते ॥

End:

इदं स्तोत्रमत्यन्तगुह्यं नरा ये पठन्ति त्रिसंध्यं कुलान्ते जपित्वा ।
न तेषामसाध्यं त्रिलोके जनानां लभन्ते स्वरूपं भवानि प्रसीद ॥

Colophon:

इति श्रीरुद्रयामले त्रिपुटास्तवराजः समाप्तः ।

195

73331 त्रिपुरसुन्दरीचिन्तामणिस्तोत्रम्

Beginning:

मूलेन प्राणायामत्रयं कृत्वा ऐं ह्रीं श्रीं ओं अस्य श्रीत्रिपुरसुन्दरीचिन्तामणिस्तोत्रमन्त्रस्य अमृतानन्दनाथमहायोगीश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीमहात्रिपुरसुन्दरी देवता, श्रीं ह्रां क्लीं ऐं सौः ओं ह्रीं श्रीं इति बीजम् । क . . . . . सक . . . ल ह्रां सकल ह्रीं शक्तिः । सौः ऐं क्लीं ह्रां श्रीं इति कीलकम् ।। मम श्रीमहात्रिपुरसुन्दरीचिन्तामणिस्तोत्रप्रसादेन सर्वकामार्थसिद्ध्यर्थे विनियोगः । ध्यानम्—

CC0. In Public Domain. Digitized by Muthulakshmi Academy

बालार्कायुतसंकाशां कमलायतलोचनाम् ।
चिन्तितार्थप्रदां वन्दे महात्रिपुरसुन्दरीम् ॥
. . . . . . ।
एवं ध्यात्वा महादेवीं पूजां तत्र समारभेत् ॥

End:

एतद् भगवता प्रोक्तं विष्णुना परमात्मना ।
पठेद् यः सर्वदा भक्त्या स शिवो नात्र संशयः ॥
एतत् त्रिपुरसुन्दर्याश्चिन्तामण्याख्यमुत्तमम् ।
स्तोत्रमुक्तं महापुण्यं किं पुनः श्रोतुमिच्छसि ॥

Colophon:

इति श्रीत्रिपुरसुन्दरीचिन्तामणिस्तोत्रं संपूर्णम् ।

196

66010 त्रिपुरसुन्दरीदशकम्

Beginning:

श्वेतपद्मासनारूढां शुद्धस्फटिकसंनिभाम् ।
वन्दे वाग्देवतां ध्यात्वा देवीं त्रिपुरसुन्दरीम् ॥
पद्मालयां पद्मपीठां पद्मसंभवसेविताम् ।
पद्मरागसमाकारां देवीं त्रिपुरसुन्दरीम् ॥

End:

काञ्चीवासमनोरम्यां काञ्चीदामविभूषिताम् ।
काञ्चीपुरीश्वरीं वन्दे देवीं त्रिपुरसुन्दरीम् ॥
एतत् त्रिपुरसुन्दर्या दशकं यः पठेन्नरः ।
तस्य श्रीरायुरारोग्यं सत्संतानं च सिध्यति ॥

Colophon:

इति श्रीत्रिपुरसुन्दरीदशकस्तोत्रं संपूर्णम् ।

The following stanza is added after the colophon:

उच्चेषु नीचेष्वपि दर्शनेषु प्रकाशते देवि तव स्वरूपम् ।
सम्यक् स्फुरत्येव हि यज्ञवाटे चण्डालवेश्मन्यपि जातवेदाः ॥

200

67054 त्रिपुरसुन्दरीध्यानम्

Beginning:

. . . . वेल्लितम् ।
प्रसूनपांसुसौरभ्यपश्यतोहरमारुतम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वकुलप्रसवाकीर्णं वन्दे नन्दनकाननम् ॥
तस्य मध्ये तटिद्दीप्तं सिद्धगन्धर्वसेवितम् ।
निर्यन्निजमयूखालिनीराजितदिगन्तरम् ॥
प्रक्षालितं समीपस्थपारावारोर्मिकन्दलैः ।
महर्षिगणसंकीर्णमणिद्वीपं नमाम्यहम् ॥

End:

अपवर्गैकनिलयमवनीपालवश्यदम् ।
पठति ध्यानरत्नं यः प्रातः सायमतन्द्रितः ॥
निमेषादेव स पुमान्निर्माति भुवनत्रयम् ।

Colophon:

इति श्रीविद्यारण्यमुनीश्वरकृतत्रिपुरसुन्दरीध्यानं संपूर्णम् ।

203

PM2696 त्रिपुरसुन्दरीमहिम्नःस्तोत्रम्

The name of the scribe and the date of copying:

संवत् १७४७ शाके १६१३ कार्तिकीशुद्धषष्ठी भौमे प्रकाशीकृताब्जस्थः पण्ड्याधवलेन लिखितोऽयं महिम्नः ।

206

TR813 त्रिपुरसुन्दरीमहिम्नःस्तोत्रं सव्याख्यम्

Colophon:

इति श्रीशैवेतिहासाख्ये शिवरहस्ये द्वितीयांशे दुर्वासमुनिकृतदेवीमहिम्नस्तुतिव्याख्यानं नित्यानन्दनाथविरचितं त्रैपुरमहिम्नदर्पणं संपूर्णम् ।

208

PM2384 त्रिपुरसुन्दरीस्तोत्रम्

Beginning:

यानुभूतिरमला सदोदिता वेदमाननिरताशुभापहा ।
तामतीव सुखदामहं शिवां केशवादिसुरसेवितां नुमः ॥
मूलाधाराज्जृम्भमाणां द्वादशान्तर्निवासिनीम् ।
. . दर्कायुताभासां शक्तिं कुण्डलिनीं नुमः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तां मूलेऽङ्कुरितां सूक्ष्मां नाभौ पल्लवितां प(राम्) ।
हृदि कोरकितां . . रं वक्त्रे कुसुमितां नुमः ॥

End:

यया युक्ततया वेदा अद्वितीयमपीश्वरम् ।
सद्वितीयं वदन्त्यद्धा तां वन्दे शिवगेहिनीम् ॥
इक्षुकोदण्डपुष्पेषुपाशाङ्कुशकरोज्ज्वलाम् ।
उद्यत्सूर्यनिभां वन्दे महात्रिपुरसुन्दरीम् ॥

213

TR 580 त्रिपुरास्तवराजः

Beginning:

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनि मन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥
सेवे सिन्दूरसंदोहसुन्दरस्वाङ्गभासुराम् ।
करुणापूरपीयूषकटाक्षां कुलनायिकाम् ॥
. . . . . .
या नित्या परमा शक्तिर्जगच्चैतन्यकारिणी ।
तां नमामि महादेवीं पञ्चमीं मातृरूपिणीम् ॥

End:

इमं त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ।
रक्षामन्त्रं च शुभदं शिवेन परिकीर्तितम् ॥
यः पठेत् प्रयतो भक्त्या सद्यो रोगात् स मुच्यते ।
आयुरारोग्यमैश्वर्यं भुक्तिं मुक्तिं च विन्दति ।
सर्वान् कामानवाप्नोति देवेन्द्रस्यापि दुर्लभान् ॥

Colophon:

इति श्रीरुद्रयामले श्रीमत्त्रिपुरास्तवराजः संपूर्णः ।

214

68212 त्रिपुरास्तवराजः

Beginning:

यत्रैव यत्रैव मनो मदीयं तत्रैव तत्रैव तव स्वरूपम् ।
यत्रैव यत्रैव शिरो मदीयं तत्रैव तत्रैव पदद्वयं ते ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥
शिवे सिन्दूरसंदोहसुन्दरे स्वर्णशोभिनि ।
करुणापूर्णकल्लोलकटाक्षे कुलनायिके ॥

End:

मोहनस्तम्भनाकर्षमारणोच्चाटने तथा ।
कल्पनादेव जायन्ते सर्वा सिद्धिमुपालभेत् ॥
इति त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ।
रक्षामन्त्रं च शुभदं शिवेन परिकीर्तितम् ॥

Colophon:

इति श्रीरुद्रयामले त्रिपुरसुन्दरीस्तवराजः संपूर्णः ।

215

PM2717 त्रिपुरास्तवराजः (पञ्चमीस्तवराजः)

Beginning:

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥
या नित्या परमा शक्तिर्जगच्चैतन्यरूपिणी ।
तां नमामि महादेवीं पञ्चमीं मातृरूपिणीम् ॥

End:

इति त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ।
रक्षामन्त्रं च शुभदं शिवेन परिकीर्तितम् ॥
छत्रं मूर्ध्नि सहस्रपत्रकमलं रक्तं सुधाकर्षणं
दिव्यस्त्रीपरिचर्यमानमनिशं चात्मानमेवं सदा ।
ध्यायेन्मानसपङ्कजे भगवतीं रक्तामपूर्वासने
योऽयं स्वस्ति समस्तमाशु लभते राज्यास्पदं भूतले ॥
आकाशे स्वप्रकाशे सकलगुणमयीं सुन्दरीं रक्तनेत्रां
नित्यां पद्मासनस्थां तरुणरविनिभां रक्तचन्द्रप्रभासाम् ।
आत्मानं सर्वभावैः सकलगुणयुतां सर्वदा यो हि पश्येद्
देवः को वा शिवो वा मदनदहनकृश्वेवरो(?)जायते सः ॥

Colophon:

इति श्रीरुद्रयामले पञ्चमीस्तवराजस्तोत्रं संपूर्णम् ।
संवत् १७६५ वर्षे फाल्गुनवदि ११ गुरुवारे लिखितम् । दीक्षितशिवरामकृष्णरजी ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

217

TR816 त्रिपुरास्तवराजभाष्यम्—श्रीविद्यात्रिभुवनालंकारसंजीविनी

Beginning:

श्रीचक्रं प्रणवान्तस्थं नाददीपशिवान्तरम्।
भजे महाकलनाथं पञ्चमीलसितं महः ॥

श्रीचक्रमित्यत्र भाष्यमारम्भणीयम्। तत्रास्ति चन्द्रभाष्यम्। किमिह प्रगल्भवचनेन। अस्तु चरणं पवित्रमिति श्रीचक्रे प्रमाणं, नेह नानास्ति सौरभाष्यम्—घृणिरिति द्वे अक्षरे, श्रिया हैवाभिषिच्यते, एष ते गायत्रो भाग इति सोमाय ब्रूताद् इति सूर्यचन्द्रयोरभेदात् . . .

'सर्वत्र प्रसिद्धोपदेशात्, भूमा संप्रसादादध्युपदेशात्, सर्वधर्मोपपत्तेश्च, सर्वोपेता च तद्दर्शनात्' इत्यादौ पञ्चमी श्रीविद्या सूचिता। . . . .
तदेतदुच्यते या नित्या परमा शक्तिरिति। . . . . प्रत्यक्षशिवात्मानं सद्योगपीठस्थं निर्विकल्पसमाधिस्थं भोगमोक्षार्थं सद्गुरुं नमामि। नित्या परमा शक्तिः जगच्चैतन्यरूपिणी या आत्मस्वरूपिणी महादेवीं पञ्चमीं कादिविद्यां तां नमामि।

End:

तथाच श्रीविद्यारहस्यमेवं विज्ञेयम्। श्रीविद्योपासकानां सर्वाभीष्टसिद्ध्यर्थमस्य स्तोत्रस्य शिवेनोक्तत्वात् न अप्रामाण्यशङ्कादोषः। तथाच श्रीचक्रपूजया श्रीविद्योपासकाः दीर्घायुष्मन्तः कीर्तिमन्तः प्रजावन्तः श्रीमन्तश्च भवन्ति। तस्मादिदं स्तोत्रमवश्यं प्रतिदिनं पठनीयम्।

श्रीमत्त्रिपुरसुन्दर्याः सिद्धान्तो मोक्षसाधकः।
जयतीव वृषारूढः कलाभिर्बहुशोभितः ॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगत्पादाचार्यविरचितश्रीविद्यात्रिभुवनालंकारसंजीविन्याख्यपञ्चमीस्तवराजभाष्यं संपूर्णम्।

Copied from the original MS. of Sambasivasastrigal, Sthanikam of Sri Gold Kāmākṣī Ambal Devasthanam, Tanjore. 15-1-19.

222

PM2948 दक्षिणकालीकर्पूरस्तवः रहस्यार्थसाधिकाव्याख्यासहितः

Beginning:

कालीचरणसरोजं नत्वा श्रीकाशिनाथशर्मणा।
क्रियते कालिस्वरूपाख्यनुतिरहस्यार्थसाधिका टीका ॥

महाकाल उवाच। अनादिपुरुषो महाकालः परमकृपया घोरेऽस्मिन् संसारे साधकानां सुखभोगेन मुक्त्युपायं चिकीर्षुराद्यशक्तेरनन्तगुणायाः कतिपयगुणगुम्फितस्रग्धराशिखरिणीछन्दोनि-

CC0. In Public Domain. Digitized by Muthulakshmi Academy

र्मितपद्येन नानामतेन स्तुतिमुपक्रमते महाकाल उवाचेति। आदिबीजावयववर्णनवाचकत्वेन तदर्णचिन्तनवाच्यत्वेन च त्रिगुणीकृत्य तस्य जपादेव सर्वसिद्धिसंपत्करत्वं कवित्वकुशलत्वं च कलयति—कर्पूरमिति।

End:

समन्तादिति—यदि भक्तो विवासा दिगम्बरः गलितचिकुरः मुक्तकेशः समन्तादापीनस्तनजघनधृग्यौवनवतीरताशक्तः समन्तात् सर्वतः आ सम्यक् पीनौ स्थूलौ स्तनौ जघनौ ऊरू च ध्रियेते यया तस्यां यौवनवत्यां रताशक्तः क्रीडाशक्तः सन् नक्तं रात्रौ त्वां ध्यायन् तव मनुं मन्त्रं जपति तस्य समस्ताः सिद्धौघाः सिद्धिसमूहाश्चाणिमादयो वशगा भवन्ति। भुवि पृथिव्यां चिरकालं व्याप्य जीवति कविर्भवति।

223

68237 दक्षिणकालीपञ्जरस्तोत्रम्

Beginning:

श्रीमत्कैलाससौधाग्रे मूले मन्दारशाखिनः।
नानारत्नसमाबद्धवरसिंहासनस्थितम्॥
ब्रह्मादिवन्दितं देवं प्रमथैर्वृतमव्ययम्।
. . . . . .
पप्रच्छ शैलजा भक्त्या प्रणम्य शिरसा पतिम्।

पार्वत्युवाच—

देव देव जगन्नाथ मन्नाथानाथरक्षक।
यद्देव्यै मन्त्रपूतेन पञ्जरेण विशेषतः॥
नरो न पश्यते पीडामायुर्वृद्धिकरोऽपि च।
सर्वाङ्गरक्षणकरं पञ्जरं पापनाशनम्॥
मन्त्रोपासनकालादौ फलदं ब्रूहि वल्लभ।

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि रहस्यं परमं महत्।
दक्षिणाकालिकादेव्या वज्रपञ्जरमुत्तमम्॥

End:

अस्य पंञ्जरराजस्य पुस्तकं यद्गृहे वसेत्।
कदापि तं नरश्रेष्ठं कलिपीडा न बाधते॥
युद्धकाले पठित्वा तु नृपतिर्विजयी भवेत्।
यं यं कामं कामयते तं तमाप्नोत्यसंशयः॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

224

68345 दुर्गाष्टकम्

Beginning:

सर्वमङ्गल + + + नमोऽस्तु ते ॥ १ ॥
सर्वस्वरुपे + + + नमोऽस्तु ते ॥ २ ॥
शरणागत + + + नमोऽस्तु ते ॥ ३ ॥
कात्यायनि महामाये ख(ण्डा?ङ्ग)बाणधनुर्धरि ।
खट्वाङ्गधारिणि शिवे दुर्गादेवि नमोऽस्तु ते ॥ ४ ॥

End:

ऋग्यजुःसामाथर्वाणां चतुर्णां च परायणे ।
ब्रह्मस्वरूपिणि ब्राह्मि दुर्गादेवि नमोऽस्तु ते ॥ १० ॥

Colophon:

दुर्गाष्टकं समाप्तम् ।

225

75433 दुर्गास्तुतिः (वज्रपञ्जरम्)

Beginning:

देवा ऊचुः—

नमो देवि जगद्धात्रि जगत्त्रयमहारणे ।
महेश्वरमहाशक्ते दैत्यद्रुमकुठारके ॥
त्रैलोक्यव्यापिनि शिवे शङ्खचक्रगदाधरि ।
सुशार्ङ्गव्यग्रहस्ताग्रे नमो विष्णुस्वरूपिणि ॥

End:

रणे राजकुले द्यूते संग्रामे शत्रुसंकटे ।
ग्रहेऽवनौ जलादौ च शर्वाणी सर्वदावतु ।
इति स्तुत्वा जगद्धात्रीं प्रणेमुस्ते पुनः पुनः ॥

. . . .

दुर्गास्तुतिरियं पुण्या वज्रपञ्जरसंज्ञिका ।
अनया कवचं कृत्वा मा बिभेतु यमादपि ॥

. . . .

इति दत्त्वा वरं देवी देवेभ्योऽन्तर्हिता तदा ।
तेऽपि स्वर्गौकसः सर्वे स्वं स्वं स्वर्गं ययुर्मुदा ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

226

75236 दुर्गास्तोत्रम्

Beginning:

कल्पान्ते मधुकैटभासुरपराभूतस्य धातुः स्तवैः
प्रीता पङ्कजलोचनस्य नयनान्निर्गम्य निद्रामयी ।
तौ युद्धे परिमोह्य घातितवती तेनैव विश्वेश्वरी
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥

End:

माहात्म्यं च सुमेधसानुकथितं श्रुत्वा महीभृद्विशोः
सह्याद्रौ विहितत्रिवर्षतपसोः प्रत्यक्षतामेयुषी ।
भूभर्त्रे ददती पुनर्मनुपदं वैश्याय बोधप्रदा
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥
श्रीदुर्गास्तुतिपद्यसप्तदशकं नित्यं पठन् मानवो
मुक्त्वा मृत्युभयं विहाय विपदं लब्ध्वाखिलं काङ्क्षितम् ।
मुक्तिं चापि लभेत मुक्तिनिलये देव्याः कृपागौरवा-
न्निःशेषं फलमश्नुवीत गिरिजामाहात्म्यपाठोद्भवम् ॥

227

70220 दुर्गास्तोत्रम्

Beginning:

(लक्ष्मीशे यो)गनिद्रां प्रभजति भुजगाधीशतल्पे सदर्पा-
वुत्पन्नौ दानवौ तच्छ्रवणमलमयाङ्गौ मधुं कैटभं च ।
दृष्ट्वा भीतस्य धातुः स्तुतिभिरभिनुतामाशु तौ नाश(यन्तीं)
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥

End:

(एतत्) सन्तः पठन्तस्तवमखिलविपज्जालतूलानलाभं
हृन्मोहध्वान्तभानुप्रतिममखिलसं(कल्प)कल्पद्रुकल्पम् ।
दौर्गं दौर्गत्यघोरातपतुहिनकरप्रख्यमंहोगजेन्द्र-
(श्रेणी)पञ्चास्यदेश्यं विपुलभयदकालाहिताक्ष्र्यप्रभावम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

228

PM2622 देवीपञ्चरत्नस्तोत्रम्

Beginning:

तुलाकोटीकोटीकिरणपरिपाटीदिनकरं
नखच्छायामायाशशिनलिनदायादविभवम् ।
पदं सेवे भावे तव विहितभावेत्यवसितुं
जगन्मात: प्रात: कमलमुखि नात: परतरम् ॥

End:

क्वणत्काञ्ची काञ्चीपुरिमणिविपञ्चीलयझरी-
शिर:कम्पा कम्पावसतिरनुकम्पाजलनिधि: ।
घनश्यामा श्यामा कठिनकुचसीमा मनसि मे
मृगाक्षी कामाक्षी हरनटनसाक्षी विहरताम् ॥

Colophon:

श्रीमच्छंकराचार्यविरचितं पञ्चरत्नस्तोत्रं संपूर्णम् ।

229

68775 देवीपञ्चस्तवी

Beginning:

यामामनन्ति + + + शरणं प्रपद्ये ॥

End:

इति गिरिवरपुत्रीपादराजीवभूषा भुवनममलयन्ती सूक्तिसौरभ्यसारैः ।
शिवपदमकरन्दस्यन्दिनी मन्निबद्धा मदयतु कविभृङ्गान् मातृकापुष्पमाला ॥

Colophon:

इति श्रीकालिदासमहाकविकृतौ मातृकापुष्पमालास्तवं संपूर्णम् ।
पञ्चस्तवं संपूर्णम् ।

231

PM81 देवीपञ्चस्तवी

Beginning (of *Laghustava*):

देवीं कदम्ववनगामरुणत्रिकोणसंस्थां सितां सितवराम्बुजकर्णिकास्थाम् ।
सत्पुस्तकाकुवलयार्पितपाणिपद्मां ? वागीश्वरीं कुलगुरुं प्रणमामि भक्त्या ॥

ऐन्द्रस्येव + + + वाङ्मयी ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

भुवि + + + मामित्यवश्यम् ॥

Colophon:

इति श्रीपञ्चस्तव्यां लघुस्तवः प्रथमस्तवः संपूर्णः ।
इति श्रीपञ्चस्तव्यां सकलजननीस्तवः समाप्तः ।

241

69493 देवीस्तोत्रम्

Beginning:

सजलघनसमाभां भीमदंष्ट्रां त्रिणेत्रां भुजगरचितभूषां कृष्णवस्त्रामरिघ्नीम् ।
परशुडमरुखड्गान् खेटकं बाणचापौ त्रिशिखनरकपाले बिभ्रतीं भावयामि ॥

End:

जन्मानि सन्तु मम देवि शताधिकानि माया न मे विशतु चित्तमबोधहेतुः ।
किंचित् क्षणार्धमपि ते चरणारविन्दान्नापैतु मे हृदयमीशि नमो नमस्ते ॥

242

75368 देवीस्तोत्रम्

Beginning:

अम्ब प्रसीद वरदा भव दुःखहन्त्री कामान् ममाशु परिपूरय कामधेनो ।
अद्यैव मे रिपुगणा विलयं प्रयान्तु वीर्यं जयं च विपुलं च यशः प्रदेहि ॥
अम्ब प्रसीद महतीं श्रियमत्र लोके सर्वातिगां वितरतादितरानपेक्षाम् ।
संपत्करीं सुखकरीं भवतीमुपास्ते यस्तस्य दुर्लभमिह त्रिदिवेऽपि नास्ति ॥

End:

इति स्तुवति मारुतौ निहतचण्डमुण्डासुरा
सुरासुरनरोरगाद्यखिललोकधात्री शिवा ।
महामहिषमर्दनी समवलम्ब्य दिव्यं वपुः
पुरः समभवत् तदा पुरुषमात्रसाम्राज्यदा ॥

Colophon:

इति मैरावणवधे त्रिचत्वारिंशः सर्गः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

243

73286 देवीस्तोत्रम्

Beginning:

वन्दे सिन्दूरवर्णाभं (वा)मोरुन्यस्तवल्लभम् ।
इक्षुवारिधिमध्यस्थमिभराजमुखं महः ॥
गम्भीरलहरीजालगण्डूषितदिगन्तरम् ।
अव्यान्मामममृताम्भोधिरनर्घ्यमणिसंयुतः ॥
मध्ये तस्य मनोहारि मधुपारवमेदुरम् ।
प्रसूनविरलम्माध्वीप्रवाहपरिकीर्तितम् ॥

End:

पचेलिमेन्दुसुषुमापटच्चरमुखप्रभाम् ।
कंधराकान्तिहसितकम्बुबिम्बोकडम्बराम् ॥

हरिः ओम् ।

नमो नारायणीशानि नमो ह्यागीश्वरि(?)संभवे ।
नमो नित्ये जगद्धात्रि नारायणि नमोऽस्तु ते ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ।

श्रीमहात्रिपुरसुन्दर्यै नमः

244

67597 देवीस्तोत्रम्

Beginning:

वेलातिशाथिलल्लितालापनर्मरतलीलाशुकातिसुभगा
तालाभिरामकुचकूलातिलोलमणिमालाचिरांशुललिता ।
फालातिमुग्धहरिनी . . . . जिनतूलानलात्ममहिमा
कालारिवामहगवेलां तरङ्गयतु हेलां मदुक्तिसरणेः ॥
भाषामुखत्रिदशयोषाविशेषकविशेषारुणाङ्घ्रिसुषमा
दौ. . . कविभूत्राकवीन्द्रकृततोषा कयापि कलया ।
पूषानलेन्दुदृगशेषाम्बिका शमितदोषा स्मृता झटिति या
सैषा तनोतु सुमनीषां निजस्तुतिविशे . . . विधौ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

क्षीराम्बुराशिमणितीरामरद्यक्रत . . . लीलमनिशं
तारभवाम्बुनिधिपूरादुदञ्चयति वीरान् स्वभक्तिविषये ।
श्रीरामचन्द्रकविगीराविरास यदुदाराङ्घ्रिसंस्तुतिविधौ
स्मेराननना . . . राजगुर्निगमसारार्थमेव खलु याम् ॥

246

TR1069 देव्यपराधभञ्जनस्तोत्रम्

Beginning:

प्राग्देहस्थो यदासं तव चरणयुगं नाश्रितो नार्चितोऽहं
तेनाद्याकीर्तिवर्गैर्जठरजदहनैर्बाध्यमानो गरिष्ठैः ।
स्थित्वा जन्मान्तरं नः पुनरिह भविता स्वाश्रये क्वापि सेवा
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥
बाल्ये बालाभिला(सौ? षे)र्जडितजडमतिर्बाललीलाप्र(श? स)क्तो
न त्वां जानामि मातः कलिकलुषहरां भोगमोक्षैकदात्रीम् ।
नाचारो नैव पूजा न च भजनकथा न श्रुतिर्नैव सेवा
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥

End:

स्तोत्रेणानेन देवीं परिणमति जनः सर्वदा भक्तियुक्तो
दुष्कीर्तिर्दुर्गसंघः परिभवति सदा विघ्नता नाशमेति ।
नाधिव्याधिः कदाचिद् यदि भवति पुनः सर्वदा स्वापराधः
सर्वं तत् कामरूपा त्रिभुवनजननी क्षामयेत् पुत्रबुद्ध्या ॥
जेता शक्त्या कवीनां भवति धनपतिर्दानशीलो दयात्मा
निष्पापो निष्कलङ्कः कुलमतिकुशलः सामवाग् धार्मिकस्तु ।
नित्यानन्दो दयाढ्यः पशुगणविमुखैः सत्कथाभासशीलः ?
संसाराब्धिं सुखेन प्रतरति गिरिजे पादपद्मावलम्बात् ॥

Colophon:

इति गुह्यार्णवतन्त्रे हरपार्वतीसंवादे अपराधभञ्जनस्तोत्रं समाप्तम् ।

247

PM644 धर्माम्बिकास्तवः

Beginning:

कल्याणामृतकामधेनुमहिले कामप्रियाहर्षदे . . . .
कारुण्यामृतवापिके पिकशिशुस्वानन्दसल्लापिनि ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कामेशप्रियकामकल्पलतिके कादम्बवाटीप्रिये
देहि श्रीपदपद्मभक्तिमनिशं धर्माम्बिके श्रीशिवे ॥

End:

मूलाल्वालजपराविटपिप्रसूनैरभ्यर्चिता श्रुतिरहस्यसुगन्धगन्धैः ।
प्रस्पन्दिधीपवनचालितवाङ्मयैस्त्वं त्यागाधिराजमहिषी वरदे प्रसीद ॥

Colophon:

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्नेनान्ध्रेण त्यागराजनाम्ना विरचितो धर्माम्बिकास्तवः संपूर्णः ।

248

77644 **नवमणिमाला**

Beginning:

वाणीं जितशुकवाणीमलिकुलवेणीं भवाम्बुधिद्रोणीम् ।
वेणीशुकशिशुवाणीं नतगीर्वाणीं नमामि शर्वाणीम् ॥
कुवलयदलनीलाङ्गीं कुवलयरक्षैकदीक्षितापाङ्गीम् ।
लोचनहसितकुरङ्गीं मातङ्गीं नौमि शंकरार्धाङ्गीम् ॥

End:

धन्यां सुरवरमान्यां हिमगिरिकन्यां त्रिलोकमूर्धन्याम् ।
विहितसुरद्रुमवन्यां त्वां वेद्मि विना वरां सुरेष्वन्याम् ॥
एतां नवमणिमालां पठन्ति भक्त्येह ये पराशक्त्याः ।
तेषां वदने सदने नृत्यति वाणी रमा च सौहार्दात् ॥

Colophon:

नवमणिमालास्तवं समाप्तम् ।

250

68373 **नवरत्नमालिकास्तोत्रम्**

Beginning:

कुन्दसुन्दरमन्दहासविराजिताधरपल्लवा-
मिन्दुबिम्बनिभाननामरविन्दचारुविलोचनाम् ।
चन्दनागरुपङ्करूषिततुङ्गपीनपयोधरां
चन्द्रशेखरवल्लभां प्रणमामि शैलसुतामुमाम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

डाडिमीकुसुममञ्जरीनिकरसुन्दरे मदनमन्दरे (?)
यामिनीरमणखण्डमण्डितशिखण्डिके तरलकुण्डले।
पाशमङ्कुशमुदञ्चितं दधति कोमले कमललोचने
तावके वपुषि संततं जननि मामकं भवतु मानसम् ॥

End:

माणिक्यमङ्गलितमौक्तिकवालिकेन मन्दस्मितेन वदनारुणपङ्कजेन ।
कालान्तदीर्घमणिमङ्गलसूत्रकण्ठी माता विशालनयना मम संनिधत्ताम् ॥
नित्यमेव नियमेन पूजिते भुक्तिमुक्तिरतिशक्तिसिद्धये ।
शंकरेण रचिता मनोर(थें ? मा) नाम(मेव ? तस्तु) **नवरत्नमालिका** ॥

268

PM644 नवाक्षरीस्तोत्रम्

Beginning:

श्रीगुरुचरणसरोजं श्रीकरभवतरणसुकरदृढनावम् ।
मच्चित्तमधुपझङ्कृतमानन्दं नौमि शांकरं शरण्यम् ॥
न्द्रधनुर्मरतकभामैरावतनाथगीर्भिरभ्यर्च्याम् ।
ऐंकारार्थस्वरूपामैशानीनाथसेवितां वन्दे ॥

End:

अक्षरनवाक्षरीयं निक्षेपमयी सुवाक्सुधारूपा ।
एतत् स्तोत्रं पठतां यच्छति सौभाग्यकीर्तिपुष्टिधृती: ॥

Colophon:

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्नेनान्ध्रेण **त्यागराजनाम्ना** विरचितं **नवाक्षरीस्तोत्रं** संपूर्णम् ।

269

71499 पञ्चदशाक्षरीस्तोत्रम्

Beginning:

कल्याणोज्ज्वलकार्मुकाञ्चितकरां कान्तेन्दुमन्दस्मितां
कारुण्याङ्कुशपञ्चबाणकलितां कन्दर्पदर्पोन्नताम् ।
कामाकर्षणदिव्यपाशभरितां बालार्ककोटिप्रभां
कादिक्षान्ततनुत्रयां त्रिणयनां ध्यायेच्छित्रां शांभवीम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

ध्यानावाहनमासनार्घ्यकमिदं स्नानांशुकं भूषणं
गन्धं चाक्षतपुष्पधूपममलं दीपं च नैवेद्यकम् ।
ताम्बूलार्पणचित्रचामरयुगं रत्नोज्ज्वलं दर्पणम्
आधूतव्यजनं प्रदक्षिणनमस्कारान् गृहाणाम्बिके ॥

270

70353 पञ्चदशाक्षरीस्तोत्रम्

Beginning:

कल्याणोज्ज्वल + + + शांभवीम् ॥

End:

ह्रींकारोन्नतदिव्यमन्त्रविलसच्छ्रींकारतत्त्वात्मिके
श्रीविद्ये प्रणतार्तिहारिणि परे श्रीशंभुपत्नीश्वरि ।
श्रीविद्याङ्कितचक्रराजनिलये श्रीदेवि सौभाग्यदे
श्रीमातस्त्रिपुरे सदेशि विमले विश्वाधिके रक्ष माम् ॥

271

PM2608 पञ्चदशाक्षरीस्तोत्रम्

Adds the following verse at the beginning:

अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशपुष्पबाणचापाम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥

End:

ह्रींका . . . शिवतत्त्वमध्यनिलये विद्यात्मतत्वात्मिके
ह्रींकारत्रयवाग्भवादिमुनिभिः संशोध्यतत्त्वत्रये ।
जप्त्वा कादि . . . नादिसादिमुनिभिर्नत्वा पुनः शांभवीं
स्तुत्वा शंकरवल्लभां त्रिणयनां संपूजयामि . . . ॥

272

72342 पञ्चमीमङ्गलस्तवराजः

Beginning:

शुद्धविद्या च बाला च द्वादशार्धा मतङ्गिनी ।
एताः कामगिरीन्द्रस्थाः पूर्वाम्नायस्य देवताः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

गुरुत्रयादिपीठान्तं चतुर्विंशत्सहस्रकम् ।
एतदावरणोपेतं पूर्वाम्नायं भजाम्यहम् ॥
सौभाग्यविद्या . . . . हला वाराही वटुकस्तथा ।
श्रीतिरस्करणी प्रोक्ता दक्षिणाम्नायदेवता: ॥

End:

सर्वरोगविनिर्मुक्त: चिरकालं सुखी भवेत् ।
सर्वं वा श्लोकमेकं वा सद्यो रोगात् प्रमुच्यते ॥
मोहनस्तम्भनाकर्षमारणोच्चाटने तथा ।
कल्पनादेव जायन्ते तथा सर्वमुपालभेत् ॥
हरिपुरंदरप्रभृतिदेवतामकुटविस्फरत्किरणभासुरम् ।
नमत सन्ततं नमत सन्ततं त्रिपुरसुन्दरीचरणपङ्कजम् ॥

Colophon:

इति श्रीराजराजेश्वरीतन्त्रे उमामहेश्वरसंवादे पञ्चमीमङ्गलस्तवराजनामा षोडश: पटल: ।

273

73243 परदेवतास्तोत्रम्

Beginning:

जय मातर्जगद्वन्द्ये जय विश्वेश्वरप्रिये ।
जय कल्याणदे भव्ये जय सौभाग्यसंश्रये
जय कल्याणनिलये जय वेदान्तसंस्तुते ।
जय पुण्यैकनिलये जय कारुण्यसंश्रये ॥

End:

जय मातस्त्रिणयने जय मात: सुरेश्वरि ।
जय मात: प्रसीद त्वं जय मात: शिवप्रिये ।
जय मात: कृपापूर्णे जय मात: परात्परे ॥

Colophon:

इति श्रीशिवरहस्ये सप्तमांशे परदेवतास्तोत्रं संपूर्णम् ।

274

72914 पार्वतीस्तव:

Beginning:

पार्वतीं प्रति शक्रस्तव: । शक्र:—

जयाक्षरे जयानन्दे जयाव्यक्ते निरामये ।
जय देवि महामाये जय त्रिदशवन्दिते ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

जय भद्रे विदेहस्थे जयाद्ये त्रिगुणात्मिके ।
जय विश्वंभरे गङ्गे जय सर्वार्थसिद्धिदे ॥

End:

नेन्द्रियाणां विकलता यथान्येषां भवेन्नृणाम् ।
देवलोकं गमिष्यन्ति स्कन्दलोकोपरि स्थितम् ।
पुनरावृत्तिरहितं स्तोत्रजप्यान्न संशयः ॥

Colophon:

इत्यादित्यपुराणे मानवीयसंहितायां सप्तचत्वारिंशोऽध्यायः ।

275

74062 पार्वतीस्तोत्रम्

Beginning:

विबुधाधिपतेजिनीशकान्ते वदनाभाजितयामिनीशकान्ते ।
नवकुन्दविराजमानदन्ते नलिनाभं प्रणमाम्यहं पदं ते ॥
विकचाम्बुरुहां विलासचोरैरतिशीतैः प्रवहद्दयाम्बुपूरैः ।
शशिशेखरचित्तनृत्तरङ्गैस्तरसालोकय देवि मामपाङ्गैः ॥

End:

वस मे हृदये तवाङ्गलग्ने तव सन्दर्शनमोदसिन्धुमग्ने ।
परिपालय मां त्रसन्निकुम्भे मकुटोल्लासिसुधामयूखडिम्भे ॥
सकलोपनिषत्सरोजवाटीकलहंस्यास्तव मे कवित्वधाटी ।
कृपयाविरभूदियं तु पेटी वहतु त्वद्गुणरम्यरत्नकोटी ॥

276

67640 प्रतिक्रियाशूलिनीस्तोत्रम्

Beginning:

श्रीपार्वत्युवाच—

श्रीमत्सकलसूक्ष्मेश बोधकेश जगत्पते ।
प्रतिक्रियास्तोत्रमन्त्रं प्रवदस्व दयानिधे ॥

श्रीशिव उवाच—

शृणु देवि प्रवक्ष्यामि गुह्याद् गुह्यमनुत्तमम् ।
प्रतिक्रियाशूलिनीयस्तोत्रमन्त्रमभीष्टदम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

. . . .

ऋष्यादिकं यथामूलं कर्तव्यं विधिना ततः ।
प्रतिक्रियार्थसिद्ध्यर्थे विनियोगो वरानने ॥
न्यासं मूलेन वै कुर्याद् विशेषाद् ध्यानमुच्यते ।

. . . .

अनुश्लोकं मनुं योज्य सावधानेन चेतसा ।
जपेत् प्रतिक्रियाशूलिनीं सर्वाभीष्टसिद्धये ॥
सर्वलोकैकजननि सर्वाभीष्टवरप्रदे ।
रक्ष मां क्षुद्रजालेभ्यः पातकेभ्यश्च सर्वदा ॥

End:

प्रतिक्रियास्तोत्रमिदं रहस्यं जपेत् त्रिसंध्यं प्रतिवासरं यः ।
अवाप्य कामानखिलान् मनीषी निजावृतो मुक्तिमुपैति सत्यम् ॥
इति श्रीशिवायाः प्रसादानुभूतिप्रदाशेषसूक्ष्मप्रयोगप्रभावम् । . . .

Colophon:

इति श्री आकाशभैरवकल्पे शर . . . ल्पे दुर्गाक्रियाभेदविधाने प्रतिक्रियाशूलिनीस्तोत्रं संपूर्णम् ।

The following *mantra* is written at the end:

ओं यौं ह्रीं ग्लौं वायुरूपेण ज्वल ज्वल ज्वालामालिनि सकलकलिमलोच्चाटनशूलिनि देवदत्तस्य देहे वर्तमानवर्तिष्यमाणभूतरोगाद्युच्चाटनं कुरु कुरु हुं फट् स्वाहा ।

277

75201 प्रतिक्रियाशूलिनीस्तोत्रम्

End:

इति श्रीशिवायाः प्रसादानुभूतिप्रदाशेषसूक्ष्मप्रभावं समस्तम् ।
समस्तप्रकारैः श्रुतं सम्यगुक्तं पुनः श्रोतुमिच्छस्युमे किं रहस्यम् ॥

Colophon:

इत्याकाशभैरवकल्पे प्रतिक्रियास्तोत्रकथनं नाम द्वादशोपदेशः ।

278

73119 प्रतिक्रियाशूलिनीस्तोत्रम्

Beginning:

श्रीशिव उवाच—

श्रृणु देवि प्रवक्ष्यामि गुह्याद् गुह्यमनुत्तमम् । . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

इति श्रीशिवायाः प्रसादानुभूतिप्रदाशेषसूक्ष्मप्रयोगप्रभावम् ।
समस्तप्रकारैः श्रुतं सम्यगुक्तं पुनः श्रोतुमिच्छस्युमे किं रहस्यम् ॥

देवदत्तारिदुरितान्मोचय रैं हैं अरिदुरितमोचनरूपेण ज्वल ज्वल प्रतिक्रियाशूलिनि ग्रासयाशु प्रयोक्तॄन् हुं फट् स्वाहा ।

Colophon:

इति महाशैवतन्त्रे शूलिनीदुर्गाविधाने प्रतिक्रियाशूलिनीस्तोत्रमन्त्रं नाम दशमोपदेशः ।

279

66096 प्रतिक्रियाशूलिनीस्तोत्रम् (शूलिनीप्रतिक्रियास्तोत्रम्)

Beginning:

सर्वलोकैकजनके सर्वाभीष्टफलप्रदे ।
रक्ष मां क्षुद्रजालेभ्यः पातकेभ्यश्च सर्वदा ॥

द्रैं हूं अं ममारिपूरितान् मोचनरूपेण स्वाहा ज्वल दुष्टग्रहप्रतिक्रियाशूलिनि फट् हुं ग्रासयाशु प्रयोक्तॄन् हन हन हुं फट् स्वाहा ।

End:

इति श्रीशिवायाः + + + रहस्यम् ॥

Colophon:

इति श्रीशूलिनीप्रतिक्रियास्तोत्रं नाम सप्तमोऽध्यायः ।

280

TR1082 बगलामुखीस्तोत्रम्

Beginning:

ब्रह्मास्त्रं संप्रवक्ष्यामि सद्यः प्रत्ययकारकम् ।
साधकानां हितार्थाय स्तम्भनाय च वैरिणाम् ।
यस्य स्मरणमात्रेण . . . स्थिरायते ॥

अस्य बगलामुखीस्तोत्रस्य नारदो भगवानृषिः, त्रिष्टुप् छन्दः, श्रीबगलामुखी देवता, मम संनिहितानां दुष्टानां द्वेषिणां वाङ्मनोजिह्वाबुद्धीनां स्तम्भनार्थे विनियोगः ।

. . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

चलत्कनककुण्डलोन्नमितचारुगण्डस्थलीं
लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् ।
गदाहतविपक्षकां . . . नोनद्रिक्ताञ्चलां
स्मरामि बगलामुखीं वि . . . खसंमुखस्तम्भिनीम् ॥

End:

ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम् ।
गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥
पीताम्बरां च द्विभुजां त्रिनेत्रां तां गतोज्ज्वलाम् ।
शिलमुद्गरहस्तां च स्मरेत् तां बगलामुखीम् ॥

प्रातर्मध्याह्नकाले स्तवपठनमिदं कार्यसिद्धिप्रदं स्यात् ।

Colophon:

इति रुद्रयामले बगलामुखीस्तोत्रं संपूर्णम् ।

281

PM2519 बगलामुखीस्तोत्रम्

Beginning:

अस्य श्रीबगलाब्रह्मास्त्रशत्रुविध्वंसनीस्तोत्रमन्त्रस्य नारद ऋषिः, बृहती छन्दः, बगला-ब्रह्मास्त्रशक्तिर्देवता, आकाशपृथ्वीबीजानीति कीलकम्, बगलाब्रह्मास्त्रशक्तिप्रीत्यर्थे दुष्टस्तम्भनार्थे राजसर्वजनहस्तिनीपद्मिनीजातिस्त्रीणां वशीकरणार्थे . . . इन्द्रजालमहेन्द्रजालाद्यतिक्रमत्वसिद्ध्यर्थं ब्रह्मास्त्रस्तोत्रजपं करिष्ये ।

त्वं विद्या परमा त्रिलोकजननी विघ्नौघविध्वंसिनी
योषाकर्षणकारिणी जनमनःसंमोहसंधायिनी ।
दुष्टोच्चाटनकारिणी च सुमहाबन्धैकविच्छेदिनी
जिह्वाकीलनवैभवा विजयते ब्रह्मास्त्रविद्या परा ॥

End:

षट्त्रिंशदक्षरी विद्या सद्यः स्तम्भनकारिणी ।
त्रिसंध्यं यः पठेद् विद्वान् भुक्तिमुक्तिफलप्रदम् ॥
स्तम्भनी या महाविद्या नारदो(?)रचितं पुरा ।
त्रैलोक्यवश्यमाप्नोति देवीसायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीरुद्रयामले नारदप्रोक्ते बगलामुखीस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

282

72792 बालास्तवराजः

Beginning:

सुधासागरमध्ये तु कल्पवृक्षवनान्तरे ।
मणिद्वीपे महासौधे चिन्तामणिगृहान्तरे ॥
इन्द्रादिलोकपालैश्च परिवारैश्च सेविते ।
सरस्वत्या च लक्ष्म्या च सिंहासनपरिस्थिताम् ॥

End:

एवंक्रमेण पूजार्हां देवीं पूज्य च सर्वदा ।
नित्यं यः पूजयेद् भक्त्या स विद्वान् नात्र संशयः ॥

Colophon:

इति श्रीभैरवयामले उमामहेश्वरसंवादे शंकरेण विरचिते बालास्तवराजः संपूर्णः ।

284

73248 बृहदम्बाशतकम्

Beginning:

श्रीगोकर्णनिकेता श्रीविद्यादिव्यशुक्तिकामुक्ता ।
श्रीकण्ठनित्यमिलिता श्रीचक्रेशी पुरोऽस्तु मे माता ॥
कल्याणं कलयेन्नः कल्यानस्मान् करोतु शतमब्दान् ।
कल्यातङ्कमपास्येत् कल्याणी नः सदैव बृहदम्बा ॥

End:

वन्दे विश्वविधात्रीं वन्दे विद्याविमुक्तिफलदात्रीम् ।
वन्दे वकुलवनेशीं वन्दे गोकर्णवल्लभसुकेशीम् ॥
जयति स्फारदयार्द्रा गोकर्णाधीशवल्लभा जयति ।
जयति प्रसादसुमुखी श्रीरघुनाथेन्द्रपूजिता जयति ॥
आख्यां सकृद् यदीयामाख्यायाशेषवाञ्छितं लभते ।
तस्याः स्तुतिप्रियाया यः स्यात् स्तोत्रं पठन् स पूर्णार्थः ॥

Colophon:

इति बृहदम्बाशतकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

285

68948 **भद्रकालीस्तवः**

Beginning:

कालीं मेघसमप्रभां त्रिनयनां भेतालकण्ठस्थितां
खड्गं खेटगुणौघदारिकशिरः कृत्वा कराग्रेषु च ।
भूतप्रेतपिशाचमातृसहितां मुण्डस्रजालंकृतां
वन्दे दुष्टमसूरिकादिसकलासंघातसंहारकाम् ॥
नमस्कृत्य गणाधीशं देवीं बालहितैषिणीम् ।
कलिदोषनिहन्तारम् उष्णं ? कारुण्यसागरम् ॥
दयार्द्रेणेक्षणेनैव ज्ञानदानात्मने गुरून् ।
भद्रकालीस्तवं वक्ष्ये शत्रुसंहरणाय मे ॥

End:

ज्योतिर्मयि प्रमाहीने चित्स्वरूपे नियामिके ।
विनाशयाशु मे शत्रून् भित्त्वा शूलेन वक्षसि ॥
सच्चिदानन्दनिरते ब्रह्मरूपे नियामिके ।
विनाशयाशु मे शत्रून् भित्त्वा शूलेन वक्षसि ॥

287

68379 **भवानीभुजङ्गम् (देवीभुजङ्गम्)**

End:

पाशाङ्कुशानङ्गशरेक्षुचापान् मालां शुकाभीतिवरान् कराब्जैः ।
वीणामुरस्याचितमादधानामेणाङ्कमाता (चूडा-)-मरुणामुपासे ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिते देवीभुजङ्गं संपूर्णम् ।

295

TR1083 **भवान्यष्टकम्**

Beginning:

न तातो न माता न बन्धुर्न पाता न पुत्रा न पुत्री न भृत्यो न भर्ता ।
न जाया न वित्तं न वित्तिर्ममैव गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

अनाथो दरिद्रो जरारोगयुक्तो महाक्षीणदीनः सदा जाड्यरक्तः ।
विपत्तिप्रविष्टः शरण्ये सदाहं गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥
य इह पठति भक्त्या स्तोत्रमेतत् समग्रं स भवति सुरपूज्यो वल्लभः सर्वलोके ।
धनद इव धनाढ्यो माननीयोऽमराणां बहुकुलजनभर्ता भर्तृभोगी कवीन्द्रः ॥

Colophon:

इति शंकराचार्यविरचितं भवान्यष्टकं समाप्तम् ।

297

PM2588 **भवान्यष्टकम्**

End:

इदं पवित्रमायुष्यं पवित्रं परिकीर्तितम् ।
यः पठेत् प्रातरुत्थाय सर्वपापैः प्रमुच्यते ॥

Colophon:

इदं त्रिपुरसुन्दर्यै समाप्तः (?) ।

298

PM2111 **भवान्यष्टकम्**

Beginning:

उमा नित्यकल्याणि पूर्णेन्दुवक्त्रे रमामुख्यसन्मानि राजीवनेत्रे ।
उमा शैलसंजातहेरम्बमात्रे नमस्ते नमस्ते नमस्ते भवानि ॥

End:

लसच्चन्द्रचूडे ललामे कराले प्रसन्नस्त्रिवन्द्यः पुराणे कुटुम्बे ।
सुसंगीतसंलोलशोभनाकारैः प्रशस्ते पुराणे नमस्ते भवानि ॥ (?)

Colophon:

इति श्री . . . विरचितं भवान्यष्टकं समाप्तम् ।

299

75433 **मङ्गलगौर्यष्टकम् (मङ्गलाष्टकम्)**

Beginning:

देवि त्वदीयचरणाम्बुजरेणुगौरीं फालस्थलीं वहति यः प्रणतिप्रवीणः ।
जन्मान्तरेऽपि रजनीकरचारुलेखी तां गौरयत्यतितरां किल तस्य पुण्यम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीमङ्गले सकलमङ्गलजन्मभूमे श्रीमङ्गले सकलकिल्बिषतूलवह्ने ।
श्रीमङ्गले सकलदानवदर्पहन्त्रि श्रीमङ्गलेऽखिलमिदं परिपाहि विश्वम् ॥

End:

गौरि त्वमेव शशिमौलिनि वेधसि त्वं सावित्र्यसि त्वमसि चक्रिणि चारुलक्ष्मीः ।
काश्यां त्वमस्यमलरूपिणि मोक्षलक्ष्मीस्त्वं मे शरण्यमिह मङ्गलगौरि मातः ॥
स्तुत्वेति तां स्मरहरार्धशरीरशोभां श्रीमङ्गलाष्टकमहास्तवनेन भानुः ।
देवीं च देवमसकृत् परितः प्रणम्य तूष्णीं बभूव सविता शिवयोः पुरस्तात् ॥

देवदेवः—

उत्तिष्ठोत्तिष्ठ भद्रं ते प्रसन्नोऽस्मि महामते ।
मित्र मन्नेत्रगो नित्यं प्रपश्यैतत् चराचरम् ॥
. . . . . .
तस्मात् सर्वप्रयत्नेन मानवैर्मोक्षकाङ्क्षिभिः ।
एतत् स्तोत्रद्वयं जप्यं त्यक्त्वा स्तोत्राण्यनेकशः ॥
प्रपञ्चश्चावयोरेव सर्व एव चराचरः ।
तदावयोः स्तवादस्मान्निष्प्रपञ्चो जनो भवेत् ॥

301

73510 **मनोन्मनीस्तोत्रम्**

Beginning:

वन्दे ते मनसा देवि शुद्धज्ञानस्वरूपिणि ।
शुद्धदीपमयाकारे शुद्धधारे परापरे ॥
अखण्डमण्डलाकारे व्याप्तिदेवि चराचरे ।
शिवज्ञानि शिवानन्दे शिवरूपि शिवालये ॥

End:

अवस्थातीततत्त्वेशि रूपातीतं मनोन्मनि ।
सर्वत्र मनसा देवि मानसांशस्वरूपिणि ॥
तस्मात् प्रयतमात्मानं सर्वदेवीमयः प्रभुः ।
इदं स्तोत्रं पठेन्नित्यं शृणुयाच्च समाहितः ॥

Colophon:

इति स्कन्दपुराणे भृङ्गिरिटिप्रोक्ते मनोन्मनीस्तोत्रं समाप्तम्

CC0. In Public Domain. Digitized by Muthulakshmi Academy

304

PM2761 **महिषासुरमर्दिनीपुष्पाञ्जलिस्तवटीका**

Beginning:

. . . दन्तिसंख्यभुजभृते। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते। तथाच दिक्पतयोऽष्टौ दन्तिनश्चाष्टौ। एवं च दिक्पतिसंख्यभुजभृते दन्तिसंख्यभुजभृते। शंभुः स्वयंभूश्च सर्वलोकसिद्धत्वात् स्वभूर्द्विभुजभृत्। स्वेन भवति ब्रह्मात्मभूरिति। एवमष्टादशभुजधारणे हेतुरुक्तः। अथवा केषांचिन्मते दश दिशः। केषांचिन्मतेऽष्टौ। तदुभयं पातुं किमित्युत्प्रेक्षा।

End:

साधु वन्द्यस्ततः श्रीपतेः सूनुनाकारि सत्सूरिणापि विश्वमातुः पद्येप(?)।

शून्येषुधनवर्षे तु शुक्ले तपसि धातरि।
वैकुण्ठेन स्थिता देवीस्तुतिव्याख्या सतां मुदे॥ (?)

Colophon:

श्रीमहिषासुरमर्दिनीपुष्पाञ्जलिस्तोत्रं टीकासहितं संपूर्णम्।
पिङ्गलनामसंवत्सरभाद्रपदशु. ५ सोमवारं नाडति जाजालसुब्बावधानुडु व्राशिनपुस्तकम्।

313

71214 **मीनाक्षीचूर्णिका**

Beginning:

जय जय सुमीननयने जय पाण्ड्यराजतनये महामरतकश्यामले मलयध्वजपुत्रकामेष्टियागपावकसंभवे त्रिसंवत्सरबालरूपिणि त्रिस्तनसंजाते सुकुमारशरीरे कोमलकोकिलालापे पूर्णचन्द्रानने विद्युद्वलयशोभितताटङ्कयुगले करुणापूरितदशे मधुरालापशुकाभिरामहस्ते . . . .

End:

आयुरारोग्यदायिनि दारिद्र्यध्वंसिनि दारापत्यगृहारामक्षेत्रादिसर्वसंपद्विधायिनि पशुयशोविद्याधनसौभाग्यमित्रलाभसुहृद्बन्धुवर्गप्रदायिनि नित्यमङ्गले परमेश्वरि पराशक्ति हैमवति कल्याणि शंकरि गौरि शांभवि मीनाक्षि जगन्मातर्मातर्नमस्ते नमस्ते।

314

66616 **मीनाक्षीचूर्णिका**

Beginning:

ओं श्रीमहादिव्यरूपि विरूपि स्वरूपि महामूलमन्त्रि तन्त्रि त्रिणेत्रि महात्मनि मतङ्गि जटाङ्गि निराकारनाथस्वरूपि शिवज्ञानि वेदान्तवेद्ये भवानि शशिधारिणि वैष्णवि देवदेवि।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

नित्यकल्याणि लीलाविनोदि भोगेन्द्रहारि मुक्तिकालंकृताङ्घ्रि कुम्भिकुम्भस्थलामण्डलप्रकाण्ड-कामी शोभिनी अनाकारदूरी अनाचारदूरी महावेदचोरी महाभर्तृकोषी महाभैरवनाशी अम्ब चोक्कनाथ-स्वाम्यर्धाङ्गि लक्ष्मि श्रीमीनाक्ष्यम्ब नमस्ते नमस्ते ।

315

66117 मीनाक्षीदण्डकम्

Beginning:

माणिक्यवीणामुपलालयन्तीं मदालसां मञ्जुलवाग्विलासाम् ।
माहेन्द्रनीलद्युतिकोमलाङ्गीं मातङ्गकन्यां मनसा स्मरामि ॥

मधुरेश्वरि मम परिपालनार्थाय तव चरणारविन्दयुगलं सदाहं भजामि । मलयध्वजपाण्ड्यराज-वरकुमारि शफराक्षीनामधारिणि सुरासुरवरमुनिभूसुरकरार्चित. . . रसिरुह. . . रामरकृतचामीकर-निर्मितनूपुरकिङ्किणिरवशोभिते . . . . .

End:

अम्ब तव कटाक्षवीक्षणेन कृपया सह शाश्वतसौभाग्यसंपत्ति मे ददाश्वाशाम् . . . देवि मम स्वजनपुत्रमित्रकलत्रपरिपालनं कुरु मङ्गलेश्वरि श्रीमद्गौरि मां रक्ष करुणानिधे मीनलोचने तव दासोऽहं नमस्ते ।

316

67633 मीनाक्षीनवरत्नमालिका

Beginning:

श्रीमद्रत्नकिरीटहारवलयां ग्रैवेयभूषोज्ज्वला-
माताम्रारुणसूर्यकोटिसदृशामाशोणक्षेलाञ्छलाम् (?) ।
कस्तूरीतिलकालकां सुनयनां कामारिवामाङ्कितां
मीनाक्षीं परदेवतां सुरनुतां वन्दे जगन्मातरम् ॥

End:

गौरीं दाडिमपुष्पवर्णयुगलां कोदण्डवद्भ्रूलतां
बिम्बोष्ठीं जितकुन्ददन्तरुचिरां वाणीरमासेविताम् ।
नानावेदकदम्बपूजितपदां धर्मार्थसिद्धिप्रदां
मीनाक्षीं परदेवतां सुरनुतां वन्दे जगन्मातरम् ॥

Colophon:

मीनाक्षीनवरत्नमालिका संपूर्णा ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

317

77644 **मीनाक्षीनवरत्नमालिकास्तोत्रम्**

Beginning:

करकलितविपञ्चीं किङ्किणीरम्यकाञ्चीं
करधृतशुकडिम्भां पीनवक्षोजकुम्भाम् ।
कुवलयदलनीलां कुङ्कुमारक्तलोला-
मखिलनिगमवेलामाश्रये पाण्ड्यबालाम् ॥

Colophon:

नवरत्नमालिका समाप्ता ।

Adds the following verse after the colophon:

कालीं मेघसमप्रभां त्रिणयनां वेतालकण्ठस्थितां
खड्गं खेटनिकृन्तदारुकशिलां प्रोगुक्तवाकाननाम् । (?)
भूतप्रेतपिशाचमातृसहितां मुण्डास्थिकालंकृतां
वन्दे दुष्टमसूरिकादिसकलं संहारिकामीश्वरीम् ॥

320

66458 **मीनाक्षीपञ्चरत्नम्**

Beginning:

उद्यद्भानु + + + वारांनिधिम् ॥

End:

वाचा वा मनसाथवा गिरिसुते कायेन वा संततं
मीनाक्षीति कदाचिदम्ब कुरुते त्वन्नामसंकीर्तनम् ।
लक्ष्मीस्तस्य गृहे वसत्यनुदिनं वाणी च वक्त्राम्बुजे
धर्माद्यर्थचतुष्टयं करतलप्राप्तं भवेन्निश्चयम् ॥

Colophon:

इति **मीनाक्षीपञ्चरत्नम्** ।

321

PM915 **मीनाक्षीपञ्चरत्नम्**

End:

शब्दब्रह्ममयी चराचरमयी ज्योतिर्मयी सन्मयी
तत्त्वातीतमयी परापरमयी मायामयी श्रीमयी ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सर्वैश्वर्यमयी सदाशिवमयी मां पाहि मीनाम्बिके
मीनाक्षीं प्रणतोऽस्मि संततमहं कारुण्यवारांनिधिम् ॥

322

70353 मीनाक्षीपञ्चरत्नम्

End:

मधुरापुरनायिके नमस्ते मधुरालापशुकाभिरामहस्ते ।
मलयध्वजपाण्ड्यराजकन्ये मयि मीनाक्षि कृपां निधेहि धन्ये ॥

323

68976 मीनाक्षीपञ्चरत्नम्

Beginning:

मरकतमणिकान्ते मन्मथारातिकान्ते करधृतशुकवीणे गानविद्याप्रवीणे ।
गमनविजितहंसे गौरि चन्द्रावतंसे जननि भवति लक्ष्मीं देहि मीनाक्षि मह्यम् ॥

End:

जय जय जगदम्बा जन्मविच्छेदकर्त्री जय जय करुणाब्धे जम्भभिद्विष्णुवन्द्ये ।
जय जय जयशीले जमभाजां शरण्ये जननि भवति लक्ष्मीं देहि मीनाक्षि मह्यम् ॥

Colophon:

पञ्चरत्नम् ।

324

72119 मीनाक्षीस्तवराजः

Beginning:

श्रीविद्ये शिववामभागनिलये श्रीराजराजार्चिते
श्रीनाथादिगुरुस्वरूपविभवे चिन्तामणीपीठगे ।
श्रीवाणीन्द्रनुतायताङ्घ्रिकमले(?) श्रीशांभवि श्रीशिवे
मन्मातर्मलयध्वजाधिपसुते मां पाहि मीनाम्बिके ॥

End:

श्रीमातस्त्रिपुरे श्रितान्तरगते श्रीकण्ठवामाङ्कगे
श्रीशाद्यामरदिव्यरत्नमकुटालंकारपादाम्बुजे ।
श्रीमत्पट्टणरत्नपीठनिलये श्रीमन्त्रसिद्धिप्रदे
सांनिध्यं कुरु मा(म)कीनहृदये मां पाहि मीनाम्बिके ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

मूलालवालकुहरान्तविराजमान(दी)पाग्रसंस्थितकले त्रिपुरे त्रिनेत्रे ।
पाशाङ्कुशप्रस(व)बाणधनुर्धरे ते पादद्वयं शिरसि नित्यमहं भजामि ॥

Colophon:

श्रीमीनाक्षीस्तवराजः संपूर्णः ।

श्रीमुख सं । फाल्गुनशुद्धगुरुवासरं दिनमंदु शेषय्यगारु चिरंजीवि सदाशिवुनी मीनाक्षीस्तवराजं व्राशिनदि संपूर्णम् ।

328

73243 मीनाक्षीस्तोत्रम् (विद्यावतीस्तुतिः)

End:

चराचरं जगत् सर्वं यस्याः पादसमुद्भवम् ।
नमस्तस्यै + + + मूर्तये ॥
इति स्तुत्वा महादेवीं प्रणम्य च पुनः पुनः ।
अनुज्ञया सुमीनाक्ष्याः प्रार्थयामास कन्यका ।
मातस्तव पदध्याने मनो निश्चलमस्तु मे ॥

330

73243 मीनाक्षीस्तोत्रम्

Beginning:

तमोऽपहन्त्रीं देवेशीं त्रिपुरां वाग्विभूतये ।
तरुणादित्यसंकाशां वन्देऽहं मीनलोचनाम् ॥
साकाररूपां सर्वेशीं सर्वज्ञां वाग्विभूतये ।
सर्वैश्वर्यप्रदां देवीं वन्देऽहं मीनलोचनाम् ॥

End:

दुःखहन्त्रीं महाविद्यां मृगाक्षीं वाग्विभूतये ।
मलयाचलमध्यस्थां वन्देऽहं मीनलोचनाम् ॥
योगिनां योगिभिः पूज्यां योगीशीं वाग्विभूतये ।
योगानन्दप्रदां सर्वां वन्देऽहं मीनलोचनाम् ॥

331

68975 मीनाक्षीस्तोत्रम्

Beginning:

वन्दे शंकरभूषणी गुणमणी सौन्दर्यमुद्रामणी
वन्दे रत्नविभूषणी सुरमणी चिन्तामणी सद्गुणी ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वन्दे राक्षसगर्वसंहरकरी वन्दे जगद्रक्षणी
मीनाक्षीं करुणाकटाक्षविभवीमङ्गीकरी पाहि माम् (?) ॥

End:

वन्दे सुन्दरताण्डवप्रियकरी सौभाग्यचिन्तामणी
वाणी वीणकचप्रवाहसहितं ज्वालापलाल्वाहिणी (?) ।
बिम्बोष्ठी शशिपद्मरत्नमकुटी हारस्मरत्कुण्डली
मायानूपुरकङ्कणप्रतिगतीं मीनाक्षीं + पाहि माम् (?) ॥

332

68975 मीनाक्षीस्तोत्रम्

Beginning:

कस्तूरीतिलकाभिराममनिटले कल्याणवेषोज्ज्वले
कान्ते चन्द्रकलाधरस्य गुणधे कारुण्यवारांनिधे ।
कम्पातीरविहारशूलिनि शि(वा?वे) काञ्चीपुरीनायिके
कालि श्रीजगदम्ब पाहि कृपया कामाक्षि तुभ्यं नमः ॥

End:

उन्मत्तं महिषासुरं बलवतामग्रेसरं भीकरं
देवानामपि दुर्जयं त्रिजगतां संहारघोरान्तरे ।
हत्वा देवि जगत् समस्तमभयं कृत्वा त्वया रक्षितं
त्वय्येवाम्ब ममास्तु भक्तिरनिशं मीनाक्षि तुभ्यं नमः ॥

333

66800 मीनाक्षीस्तोत्रम्

The following is the full text of the Stotra:

वन्दे शंकरभूषणी गुणमणी सौन्दर्यमुद्रामणी
वन्दे रत्नविभूषणी सुरमणी चिन्तामणी सद्गुणी ।
वन्दे राक्षसगर्वसंहरकरी . . . . रुणी
मीनाक्षी करुणाकटाक्षविकरी अङ्गीकरी पाहि माम् (?) ॥
कस्तूरी वदने ललाटतिलकं श्रीचन्दनालंकृतं
काञ्चीमालाविरचितकलधरी(?) मन्दारमालाधरी ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वन्दे पार्वति मन्दहासवदने वन्दे जगद्रक्षकि
मीनाक्षी करुणाकटाक्षविभवी अङ्गीकरी पाहि माम् ॥
हस्तेनादाय दर्वीं कनकविरचितां दक्षिणेनेतरेण
प्रद्युक्ते(?) रत्नपात्रे घृतगुल्सहितं पायसं हेमभूषे ।
सर्वेभ्यो दानशीले हिमगिरितनये तप्तजाम्बूनदाभे
मातर्मीनाक्षि मह्यं भगवति वरदे देहि कल्याणि भिक्षाम् ॥

Colophon:

मीनाक्षीस्तोत्रं संपूर्णम् ।

334

68975 **मीनाक्ष्यष्टकम्**

Beginning:

हस्तेनादाय दर्वीं कनकविरचितां दक्षिणेनेतरेण
प्रद्योते रत्नपात्रं घृतगुडसहितं पायसं हेमभूषे ।
सर्वेभ्यो दानशीले हिमगिरितनये तप्तजाम्बूनदाभे
मातर्मीनाक्षि मह्यं भगवति वरदे देहि कल्याणि भिक्षाम् ॥
हंसस्कन्धाधिरूढे धृतशशिशकले कोशपाशाङ्कुशाक्ष-
स्रग्घस्ते तारहारे त्रिणयनमहिषि क्षौमचेले सुचेले ।
चारुस्मेराननाब्जे स्फटिकमणिनिभे ब्रह्मविद्येऽनवद्ये
मातर्मीनाक्षि मह्यं समरसकवितां देहि वाग्देवि भिक्षाम् ॥

End:

रत्नैर्भ्राजत्किरीटे . . भूतिमधुकरज्येक्षुकोदण्डमाध्यं ?
बिभ्राणे पाणिपद्मे कुसुमशरसृणे पाशमोंकारपीठे ? ।
नीपोद्यानस्थविद्यामणिगृहनिलये दाडिमीपुष्परक्ते
मातर्मीनाक्षि भिक्षां परमशिवयुते देहि मे सुन्दरेशे ॥
श्रीमद्धालास्यसंज्ञाप्रथितपुरपतेः सुन्दरेशस्य . . .
स्तोत्रं मीनेक्षणायाः परशिवफणितं चाष्टकं ये पठन्ति ।
शृण्वन्तीदं लभन्ते धनपतिसदृशं सर्वसंपत्समृद्धिं
दीर्घायुष्यं सुपुत्रान् पुनरपि कृपया मोक्षलक्ष्मीं भजन्ति ॥

335

73248 **मूकपञ्चशती**

Beginning:

महिम्नः पन्थानं + + + ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End (of *Stutiśataka*):

इदं परं पञ्चशतं स्तुतीनां परत्र चेहाधिककामसाधनम् ।
पठध्वमम्बां हृदये निधाय नित्यं भवाम्भोधितितीर्षवो जनाः ॥

336

72183 मूकपञ्चशती

End (of *Stutiśataka*):

कम्पातीरचरच्चकोरपरिषत्सौहित्यमातन्वती
पादद्वन्द्वनखद्युतिप्रचुरकौमुद्याभिधस्फूर्तया ।
स्वीयैः केशभरैश्च नीलजलदाभिख्यैः कवीनां मनः-
कह्लारान् मुदितान् करोति . . . . . . ॥

337

73240 मूकपञ्चशती

End (of *Kaṭākṣaśataka*):

पातेन लोचनरुचस्तव कामकोटि पातेन पातकपयोधिभवातुराणाम् ।
पूतेन तेन नवकाञ्चनकुण्डलांशुशीतेन शीतलय भूधरकन्यके माम् ॥

End (of *Stutiśataka*):

इदं परं + + + जनाः (same as in No. 335 above)

342

PM78 मूकाम्बिकास्तोत्रम्

The following stanza is added after the colophon:

केशे पिञ्छमयी मुखे शशिमयी दन्तेषु मुक्तामयी
संलापेषु सुधामयी करतले कल्याणवीणामयी ।
कण्ठे शङ्खमयी कुचे गिरिमयी याने मरालीमयी
मध्ये व्योममयी नगाधिपसुता चित्ते मदीये वसेत् ॥

343

69452 मूकाम्बिकास्तोत्रम्

End:

माणिक्यकुण्डलितमौक्तिकवालुकेन मन्दस्मितेन मधुनारुणपङ्कजेन ।
कालाम्बुदीर्घमणि कूल . . . सूत्रकण्ठं माता विशालनयना मम संनिधत्ताम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितायां मूकाम्बिकास्तोत्रं संपूर्णम् ।

344

PM2519 राजराजेश्वरीचूर्णिका

Beginning:

श्रीमज्जय जय जम्भजम्भारिकुम्भिकुम्भगम्भीरभुजास्तनघनयुगले विस्फुलिङ्गप्रलयानिलजनितम- . . . . अग्निगर्भमध्ये ब्रह्मास्त्रनामविद्युद्गलमहच्चक्रविन्दुमध्ये हेमकमलासने ।

End:

ब्रह्मास्त्रसमरसानन्दसंस्मरणादिब्रह्मास्त्रप्रतिपादुकां मां पाहि मां पाहि देवि नमस्ते नमस्ते नमस्ते नमः ।

345

PM2519 राजराजेश्वरीदिव्यमङ्गलध्यानम्

Beginning:

श्रीदेव्युवाच—

देव देव महादेव सच्चिदानन्दविग्रह ।
पञ्चकृत्यपरेशान परमानन्ददायक ॥
श्रीराजराजेश्वरी(च) या श्रीत्रिपुरसुन्दरी ।
तस्या ध्यानं ममाचक्ष्व यदि ते करुणा मयि ॥

शिव उवाच—

लक्षवारसहस्राणि वारितापि पुनः पुनः ।
स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ॥
. . . . . .
राजराजेश्वरीध्यानं सर्वस . त्तमोत्तमम् ।
तव स्नेहात् प्रवक्ष्यामि भोगमोक्षप्रदं नृणाम् ॥
. . . . . .
सर्वविद्यासने सर्वतेजोमयशुभास्तरे ।
कोटिकन्दर्पलावण्यशिववामाङ्कवासिनीम् ॥
एककालोदितानेकचन्द्रकोट्यर्कपाटलाम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

सृष्टिस्थित्युपसंहारकर्ता शिव इवापरः ।
राजराजेश्वरीरूपो राजराजाभिवन्दितः ।
कुलकोटिं समुद्धृत्य शिवयोरैक्यमाप्नुयात् ॥

Colophon:

इति श्रीरुद्रयामले उमामहेश्वरसंवादे दिव्यमङ्गलध्यानं संपूर्णम् ।

347

71124 राजराजेश्वरीदिव्यमङ्गलध्यानम् (राजराजेश्वरीस्तोत्रम्)

End:

राजराजेश्वरी + + + वन्दितः ॥

पाशाङ्कुशानङ्गशरेक्षुचाप . . . शुकाभीतिवरान् कराब्जैः ।
वीणामुरस्यञ्चितमादधानामेणाङ्कचूडामरुणामुपासे ॥

Colophon:

इति राजराजेश्वरीस्तोत्रं नाम षट्त्रिंशः पटलः ।

350

68316 राजराजेश्वरीदिव्यमङ्गलध्यानम्

Colophon:

इति श्रीमहात्रिपुरसिद्धान्ते श्रीराजराजेश्वरीदिव्यमङ्गलध्यानं संपूर्णम् ।

Adds the following stanzas after the colophon:

शङ्खारिचापशरभिन्नकरां त्रिणेत्रां तिग्मेतरांशुकलया विलसत्किरीटाम् ।
सिंहास्थितां ससुरसिद्धनतां च दुर्गां दूर्वानिभां दुरितवर्गहरां नमामि ॥
महिषमस्तकनृत्तविनोदनस्फुटरणन्मणिनूपुरमेखला ।
जननरक्षणमोक्षविधायिनी जयतु शुम्भनिशुम्भनिघातिनी ॥
अष्टदोर्भिः समायुक्तां महिषासुरसुन्दरीम् ।(?)
धनुर्बाणसमायुक्तां खड्गशूलासिधारिणीम् ॥
शङ्खचक्रधरां देवीं सर्वाभरणभूषिताम् ।
सिंहास्थितां हेमवर्णां ध्यायेदिष्टार्थसिद्धये ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

351

PM644 राजराजेश्वरीस्तवः

Beginning:

या त्रैलोक्यकुटुम्बिका वरसुधाधाराभिसंतर्पिणी
भूम्यादीन्द्रियचित्तचेतनपरा संविन्मयी शाश्वती ।
ब्रह्मेन्द्राच्युतवन्दितेशमहिषी विज्ञानदात्री सतां
तां वन्दे हृदयत्रिकोणनिलयां श्रीराजराजेश्वरीम् ॥

End:

या भक्तेषु ददाति संततसुखं वाणीं च लक्ष्मीं तथा
सौन्दर्यं निगमागमार्थकवितां सत्पुत्रसंपत्सुखम् ।
सत्सङ्गं सुकलत्रतां सुविनयं सायुज्यमुक्तिं परां
तां वन्दे हृदयत्रिकोणनिलयां श्रीराजराजेश्वरीम् ॥

Colophon:

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्नेनाग्रेण त्यागराजनाम्ना विरचितं श्रीराजराजेश्वरीस्तवं संपूर्णम् ।

355

PM2519 राजराजेश्वर्यष्टकम्

Beginning:

श्रीलसद्रूपि प्रचारिणि सेविताश्रितपावनि
मूलमन्त्राधारि त्रिगुणसमुद्भवादि निरञ्जनि ।
पावितब्रह्माण्डनायकि भक्तजनफलदायकि
श्रीशैलनन्दनि राजराजेश्वरि नमस्ते शंकरि ॥

End:

श्रीमहामहिमावलम्बितसिद्धवटपुटमेदिनि
कामिनीमणि कलुषतिमिरमहार्कसमतेजोनिधे ।
कामसंहरदेवि दुर्गे उमामहेश्वरि पाहि मां
वामलोचनि राजराजेश्वरि नमस्ते शंकरि ॥

Colophon:

राजराजेश्वर्यष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

357

PM81 **राज्ञीस्तवः**

Beginning:

बालार्ककोटिद्युतिपुञ्जरूपां विभावितार्थप्रथितस्वभावाम् ।
शैवीं तनुं तां द्विविधां प्रथायां त्वां विश्वराज्ञीं शरणं प्रपन्नाः ॥
परापरां तां परमार्थरूपां चित्या प्रमित्या परमार्थनित्याम् ।
विसर्गशक्तिं विभृतां प्रपन्नां त्वां विश्वशक्तिं शरणं प्रपन्नाः ॥

End:

उक्तस्वरूपामपि वागवाच्यां निराकृतिं साकृतिमप्यग्राह्याम् ।
कायेन वाचा मनसापि राज्ञीं भूयश्च भूयः शरणं श्रयामः ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
राज्ञीं चतुर्धा व्यासरूपां ? परां तां भूयश्च भूयः शरणं श्रयामः ॥

Colophon:

इति **श्रीभृङ्गेशसंहितायां** लहरविषये पूजातीर्थसंग्रहे कुलमूले **लवर्णनामराज्ञीस्तवः** समाप्तः ।

360

72765 **लघुस्तवः**

Beginning:

ऐन्द्रस्येव + + + वाङ्मयी ॥

End:

आनन्दोद्भवकम्पपूर्णमनघं(निद्राटहाहा ? रौद्राट्टहासा)द्भुतं
वेदव्याकरणावगाहनगरक्षोभादिसिद्ध्यष्टकम् ।
वश्याकर्षपुरप्रवेशकवितातर्कोक्तिमुक्तिप्रदं
लघ्वीजप्यमिदं करोति सततं योगी महीमण्डले ॥

Colophon:

इति कालिदासस्य कृतौ लघुस्तवः संपूर्णः ।

362

TR813 **लघुस्तवः कुलचूडामणिभाष्यसहितः**

Beginning:

वन्दे वृन्दारकैर्वन्द्यपादद्वन्द्वारविन्दकम् ।
नन्दनं नगकन्यायाः सुन्दरं द्विरदाननम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

मूलाधाराज्जृम्भमाणां द्वादशान्तर्निवासिनीम् ।
विद्युदर्कायुताभां तां शक्तिं कुण्डलिनीं नुमः ॥
. . . .
गुर्वर्थस्य लघोर्भाष्यं चूडामणिसमाह्वयम् ।
क्रियते केवलं भक्त्या न हि वाचां प्रसारतः ॥

श्रीमद्गुरुप्रसादपारंपर्येण संप्राप्तपरसंविदात्मकशक्तिस्वरूपस्य समाधिबललाभेन साक्षात्कृतसमस्तपदार्थस्य . . . निजकीर्तिकुसुमनिकरसुरभितदिगन्तरस्य श्रीमदादिनाथस्य पदारविन्देषु भृङ्गायमानमानसेन श्रीमत्सिंहराजेन श्रीमल्लघुस्तुतिमन्त्रस्य श्रीकुलचूडामणिर्नाम भाष्यमारभ्यते . . .

अथेदानीमाद्यवृत्तं विव्रियते—ऐन्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां . . . ।

श्रीमन्महाराज्ञीसमक्षमेव त्रैलोक्येष्वाज्ञासिद्धेन सिद्धसारस्वतेन गुरुणा कटाक्षपातमात्रेण संसिद्धास्तत्क्षणमेव सरस्वतीमन्दिरायमाणवदनाम्भोरुहो लघुभट्टारको निजलाभप्रकर्षः सर्वेषां भवत्विति बुद्धया परमेश्वर्या ज्योतिर्मयवाङ्मयस्वरूपप्रपञ्चं प्रतिपादयन् तत्कालवर्तिनः सदस्यान् प्रत्याशीर्वचनं करोति ।

End:

लघुभट्टारको भक्त्यतिशयेन परमेश्वर्या आधिक्यं प्रति न किंचिदप्युक्तं मयेति मन्यमानो निजाज्ञानोक्तशङ्कया परमेश्वरीं प्रसादयति—सावद्यं निरवद्यमिति . . . .

इदं स्तोत्रं यस्य त्वयि भक्तिरस्ति स जनो नूनं पठिष्यति ध्रुवं स जनो वा योऽध्ययनं करिष्यति इति निश्चितमेवेति । देवसिद्धर्षिमनुजगुर्वच्छिन्नधारया पारंपर्यागमनं यस्मिन् महत् स्वच्छन्दसंग्रहम् । इत्येकविंशतिवृत्तम् ।

366

PM2801 लघुस्तवटीका

Beginning:

सर्वज्ञं पुण्डरीकाक्षं शंकरं नाभिसंभवम् ।
प्रणम्य टीकां वक्ष्येऽहं संक्षेपेण लघुस्तवे ॥

इह हि पूर्वं केनचिन्महानरेन्द्रेण निजसभायां दूरदेशान्तरादभ्यागतः समस्तशास्त्रपारंगमः कोऽपि पण्डितग्रामणीर्विद्याविशेषोत्कर्षं पृष्टः शीर्षे स्वहस्तकमलविन्यासमात्रेण सर्वथा निरक्षरस्यापि शिशोर्गाङ्गतरङ्गानुकारिणीं तात्कालिकाभिनवकाव्यकर्तव्यतामाह । ततश्च सद्यो भूपभ्रूक्षेपचालनेन राजपुरुषैरुपाहृतः स्पष्टमस्पष्टोऽप्यष्टवर्षदेश्यो बालकः संस्तवगौरववस्त्रालंकृतः पुरस्तादुपवेश्य मस्तके दक्षिणं हस्तं धृत्वा वदेति विदुषा साक्षेपं भावितोऽनेककर्मक्षमां मन्त्रपदगर्भाम् ऐन्द्रस्येव शरासनस्येत्येकविंशतिकाव्यमयीं नवकोटिकात्यायनीस्तुतिं व्याजहार । तस्याश्च स्वतोऽपि मन्दमतिसत्त्वानुकम्पया विवरणमभिदध्महे । तद्यथा—ऐन्द्रस्येति । एषासौ त्रिपुरा प्रत्यक्षाप्रत्यक्षस्वरूपा देवी नोऽस्माकमघं पापं दुःखं वा छिन्द्याद् विनाशयेदिति संबन्धः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

बालको हि यथा मातुरुत्सङ्गश्शृङ्गारस्वेच्छयालपन्नपि न दूषणीयः प्रत्यु(त भू)षणीय एव भवति तथाहमज्ञानशिरोमणिरपि जगन्मातुः श्री . . . निजसहजलीलया स्तुवन् दोषैर्नापराधभाजनं दूषणशुद्धि . . . वात्सल्यवात्सल्यसुधाप्रवाहैः प्रीणीय च प्रमाणपदवीमध्या . . . यः सकलकल्याणमयो भविष्यामीति वृत्तार्थः ।

Colophon:

इति श्री . . . तिलकसूरिशिष्यसोमतिलकसूरिविरचिता लघुस्तवटीका समाप्ता ।

शके १६६९ प्रभवनाम्नि संवत्सरे भाद्रपदशुद्धप्रतिपदि गोविन्दभास्करदशपुत्रेण लिखितेयं टीका ।

367

PM2807 ललितानीराजनम्

Beginning:

श्रीनाथ जयनाथ जय सद्गुरुमूर्ते । हर मम मतिमिहरार्ते हृतसंसृतिजूर्ते ॥
धृत उन्मन्यापि च परतो निवसति सत्कूटे । दशशतदलसरसीरुहशशिमयकरि हे ॥

End:

य इमां शंकररचितां स्तुतिमिह भावयते त्रिभुवनजननीमेवं यो नीराजयते ॥
स भवति कविरतुलधनः सकलागमवेत्ता । उपैतु मातुः पदवीं रविमण्डलभेत्ता ॥
जय देवि जय देवि जय जननि शरण्ये । जय जय नवचक्रेश्वरि सकलागमगण्ये ॥
जय हिमगिरिकुलनन्दिनि समुदितलावण्ये । जय भगवति कामेश्वरि संततकारुण्ये ॥

Colophon:

इति श्रीमच्छंकराचार्यविरचितं ललितानीराजनं संपूर्णम् ।

369

69102 ललितास्तवरत्नम्

End:

ललितायाः स्तवरत्नं + + + सैव ॥

ललितायास्तत्त्वविदां प्रवरैः स्तव एष कोपनमुनीन्द्रैः ।
अस्माभिरस्तु रचितः साधकसंसिद्धिदापनधुरीणः ॥

Colophon:

इति श्रीदुर्वाससा कृतं श्रीमेरुचक्रस्वरूपं ललितास्तवरत्नं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

370

75457 **ललितास्तवरत्नम्**

End:

ललितायास्तत्वविदां प्रवरैः स्तव एष शंकराचार्यैः । . . .

Colophon:

ललितास्तवरत्नं संपूर्णम् ।

सौम्यवर्षे पुरट्टाशि मासं १४ शुक्रवारदिने लेखनारम्भः २४ सोमवारे समाप्तः ।

अगुप्ता गुप्ता वा स्वयमपि महान्तोऽपि लघवः
सकीला निष्कीला गुरुभिरु(-पदि-)ष्टा अपि न वा ।
प्रसन्नायां देवि त्वयि सकलमन्त्राश्च फलदा-
स्तरुर्मूले सिक्ते फलति ननु शाखाशतम . . ॥

372

70204 **ललितास्तवरत्नम्**

End:

ललितायास्तत्वविदां + + + धुरीणः ॥

पातय वा पाताले स्थापय वा निखिललोकसाम्राज्ये ।
मातस्तव पदयुगलं नाहं मुञ्चामि नैव मुञ्चामि ॥
शोणप्रभं सोमकलावतंसं पाणिस्फुरत्पञ्चशरेक्षुचापम् ।
प्राणप्रियं नौमि पिनाकपाणेः कोणत्रयस्थं कुलदैवतं नः ॥
चिन्तातरङ्गतरलस्तृष्णासलिलः प्रपञ्चवाराशिः ।
यदनुग्रहेण तीर्णस्तस्मै श्रीनाथनाविकाय नमः ॥

373

PM2817 **ललितास्तवराजः**

Beginning:

देवा ऊचुः—

जय देवि जगन्मातर्जय देवि परात्परे ।
जय कल्याणनिलये जय कामकलात्मिके ॥
जय प्रकारिणी वामा जय कामाक्षि सुन्दरि ।
जयाखिलसुराराध्ये जय कामेशि कामदे ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

विद्याविनयसंपन्ना नीरोगा दीर्घजीविनः ।
पुत्रमित्रकलत्राढ्या भवन्तु मदनुग्रहात् ॥
इति लब्धवरा देवा देवेन्द्राद्या महाबलाः ।
आमोदं परमं जग्मुस्तां विलोक्य मुहुर्मुहुः ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे ललितोपाख्याने ललितास्तवराजः संपूर्णः ।

376

75206 वशीकरणवाराहीस्तोत्रम्

Beginning:

अस्य श्रीवशीकरणवाराहीस्तोत्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, वशीकरणवाराही देवता, ह्रीं बीजम्, स्वाहा शक्तिः, राजादिसर्वजनवशीकरणार्थे विनियोगः । ध्यानम्—

रक्ताङ्गीं रक्तवसनां नीलजीमूतसंनिभाम् ।
चन्द्रकोटिप्रतीकाशां हारनूपुरशोभिताम् ॥
पाशाङ्कुशधरां देवीं वराभयकराम्बुजाम् ।
वाराहीममरा . . . भीषणां प्रणमाम्यहम् ॥
अश्वारूढे रक्तवर्णे स्मितसौम्यमुखाम्बुजे ।
राजस्त्रीसर्वजन्तूनां वशीकरणदायिनि ॥

End:

तस्मादवश्यं वाराहि वश्यं सर्वं प्रदर्शय ।
वशीकरणवासस्त्वं भक्तानामनिवारितः ॥
तस्मादवश्यं वाराहि जगत् सर्वं वशीकुरु ।
वश्यस्तोत्रमिदं देव्यास्त्रिसंध्यं यः पठेन्नरः ॥
सोऽपि वश्यं नयेत् सर्वं राज्ञीं राजानमेव च ।

Colophon:

इति श्रीरुद्रयामले वशीकरणवाराहीस्तोत्रं संपूर्णम् ।

377

73287 वाराहीनिग्रहाष्टकम्

Beginning:

देवि क्रोड + + + प्रयाणोन्मुखाः ॥

End:

हलं कपालं दधतीं कराभ्यां वामेतराभ्यां मुसलेष्टदौ च ।
श्यामाम्बरास्रस्ता(?)भरणस्रगाढ्यां वाराहिसंज्ञां प्रणतोऽस्मि नित्यम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

निशिततरे तव वदने दंष्ट्रानिर्धूतपावकज्वाले ।
वाराहि येन विदितं रिपवस्तस्याशु यान्ति यमसदनम् ॥
विटविदूषकनृत्तगायकभ्रमणचारणखङ्गखलादिभिः ।
प्रकटिते तु रहस्यशिवार्चने जपतु निग्रहघोरमिमं स्तवम् ॥

378

67245 **वाराहीनिग्रहाष्टकम्**

End:

श्यामां + + + तेषां द्विषः ॥
चक्रं खड्गं मुसलमभयं दक्षिणाभिश्चतुर्भिः
शङ्खं खेटं हलमपि वरं बिभ्रतीं वामदोर्भिः ।
सिंहारूढां मधुरनयनां श्यामलां कोलवक्त्रां
वन्दे देवीं स्वजनशुभदां पञ्चमीं मातृमध्ये ॥

Colophon:

निग्रहाष्टकं संपूर्णम् ।

379

67245 **वाराह्यनुग्रहाष्टकम्**

Beginning:

कुवलयनिभा कौशेयार्धोरुका मुकुटोज्ज्वला
हलमुसलिनी सद्भक्तेभ्यो वराभयदायिनी ।
कपिलनयना मध्ये क्षामा कठोरघनस्तनी
जयति जगतां मातः सा ते वराहमुखी तनुः ॥

End:

तमसि बहुले शून्याटव्यां पिशाचनिशाचर-
प्रमथकलहे चोरव्याघ्रोरगद्विपसंकटे ।
क्षुभितमनसः क्षुद्रस्यैकाकिनोऽपि कुतो भयं
सकृदपि मुखे मातस्त्वन्नाम संनिहितं यदि ॥
विदितविभवं हृद्यैः पद्यैर्वराहमुखीस्तवं
सकलफलदं पूर्णं मन्त्राक्षरैरिममेव यः ।
पठति स पटुः प्राप्नोत्यायुश्चिरं कवितां प्रियां
सुतसुखधनारोग्यं कीर्तिं श्रियं जयमुर्वराम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

380

TR765 शक्तिपरवेदपादस्तवः

Beginning:

श्रिया शिरश्चन्द्रभुवा बहिः स्रवद्दयास्रवन्त्येव जगत्त्रयापदः ।
शमं नय(न्तं) समुपास्महे शिरा(? वम्)उमासहायं परमेश्वरं प्रभुम् ॥
ब्रह्मेन्द्रोपेन्द्रचन्द्रार्कभक्तिसंभाविताङ्घ्रये ।
विघ्नराजाय वेद्याय वक्रतुण्डाय धीमहि ॥
. . . .
भक्तवत्सले परमशिवकान्ते स्वप्नसंगते मयि सपरि(?)देवि ।
वेदपादिकां स्तुतिमनुवदती बिभ्रती जरामजर उग्र आगाः ॥

End:

देव्या महिम्ना वेदानां प्रामाण्यात् स्तोत्रपाठकः ।
सपुत्रपौत्रसौभाग्यो जीवातु शरदः शतम् ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥

Colophon:

इति शक्तिपरवेदपादस्तोत्रं समाप्तम् ।

381

PM644 शान्तिस्तवः

Beginning:

स्वानन्दमन्दहसितां शिववामभागां भृङ्गावलीकचभराकलितेन्दुमौलिम् ।
श्यामां विशालनयनामतिकोमलाङ्गीं वन्दे स्मरारिमहिलां वरदां शिवाख्याम् ॥
कालदेशकलनाविवर्जिता स्वेच्छयैव भुवनान्यजीजनत् ।
क्रीडति स्वयमनेकभूमिका सा शिवाहमिति शान्तिमाश्रये ॥

End:

त्यागराजसुखरूपिणी परं योगिराजहृदयोज्ज्वला सदा ।
आगमाद्यखिलमानबोधिता सा शिवाहमिति शान्तिमाश्रये ॥
शान्तिस्तवं पठति नित्यमनन्यभक्त्या यो मानवो भवति शंकर एव साक्षात् ।
संसारदुःखभयमोचनदक्षकल्पं स्वात्मापरोक्षकरणे गुरुपादकल्पम् ॥

Colophon:

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्नेनान्ध्रेण त्यागराजनाम्ना विरचितं शान्तिस्तवं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

382

73710 **शान्तिस्तवः**

Beginning:

जयन्तु देव्यो हरपादपङ्कजं प्रसन्नधामामृतमोक्षदायकम् ।
अनन्तरध्वान्तमतिप्रबोधकं नमामि चाष्टाष्टकयोगिनीगणम् ॥
योगिनीचक्रमध्यस्थं मातृमण्डलवेष्टितम् ।
नमामि शिरसा नाथं भैरवं भैरवीप्रियम्

End:

निन्दन्तु बान्धवाः सर्वे त्यजन्तु स्त्रीसुतादयः ।
जना हसन्तु मां दृष्ट्वा राजानो दण्डयन्तु वा ॥
सेवे सेवे पुनः सेवे त्वामेव कुलनायिके ।
त्वदर्थं नैव मुञ्चामि मनोवाक्कायकर्मभिः ॥

Colophon:

इति कुलार्णवसंहितायां शान्तिस्तवं संपूर्णम् ।

383

77644 **शारदाम्बाष्टकम्**

Adds the following verse at the end, not found in the printed ed.:

पुरा शंकराचार्यवर्यप्रसन्नां लसन्मन्दहासप्रभावक्त्रचिह्नाम् ।
चलच्चञ्चलाचारुताटङ्ककर्णां भजे शारदाम्बामजस्रं मदम्बाम् ॥

Colophon:

इति शारदाम्बाष्टकं संपूर्णम् ।

386

PM81 **शारिकास्तोत्रम्**

Beginning:

बीजैः सप्तभिरुज्ज्वलाकृतिरसौ या सप्तसप्तिद्युतिः
सप्तर्षिप्रणताङ्घ्रिपङ्कजयुगा या सप्तलोकार्तिहृत् ।
कश्मीरप्रवरीशमध्यनगरीप्रद्युम्नपीठे स्थिता
देवीसप्तकसंयुता भगवती श्रीशारिका पातु नः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

जय भगवति विन्ध्यवासिनि कैलासवासिनि श्मशानवासिनि हुंकारिणि कालायनि कात्यायनि कालरात्रि हिमगिरितनये कुमारमातः गोविन्दभगिनि शितिकण्ठकण्ठाभरणे . . . . .

End:

कालकिंकरमथनि कालाग्निशिखे कालरात्रे अजे नित्ये सिंहरथे योगरथे योगीश्वरनमिते भक्तजनवत्सले सुरप्रिये सुरप्रियकारिणि दुर्गे दुर्लये अरण्ये शरण्ये हिरण्ये शारिके कुरु मे जयम्।

अमा चैव तु कामा च चार्वङ्गे टङ्कधारिणी।
तारा च पार्वती चैव यक्षिणी शारिकाष्टमी॥
प्रद्युम्नशिखरासीनां सार्धचक्रो(?न्द्रो)पशोभिताम्।
पीठेश्वरीं शिलारूपां शारिकां प्रणमाम्यहम्॥

Colophon:

इति श्रीशारिकास्तोत्रं समाप्तम्।

388

PM2588 शारिकास्तोत्रम्

Has the following colophon:

इति प्रद्युम्नशिखरावतारे रुक्मिणीमते शारिकाभगवतीस्तवः।

389

71102 शिवकाम्यष्टकम्

Beginning:

पुण्डरीकपुरमध्यवासिनि नृत्तराजसहधर्मचारिणि।
अद्रिराजतनयान्तनीतनीं(?) चिन्तयामि शिवकामसुन्दरि॥
पुण्डरीकपुरवर्यराजितां पुण्डरीकपदभोगिपूजिताम्।
पुण्डरीकनय(न)स्य सोदरीं चिन्तयामि शिवकामसुन्दरि॥

End:

अङ्गनामणिमनङ्गवैभवां मङ्गलालयमनोज्ञविग्रहाम्।
. . . तकुचभारहारिणि चिन्तयामि शिवकामसुन्दरि॥
अ . . . कशशिमण्डलाननां कङ्कणाङ्कितकराम्बुजां भुजाम्।
पङ्कजारुणपदद्वयां परां चिन्तयामि शिवकामसुन्दरि॥

Colophon:

इति शिवकाम्यष्टकं संपूर्णम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

390

75204 शीतलाष्टकम्

Beginning:

ओं शीतलास्तोत्रस्य महादेव ऋषिः, अनुष्टुप् छन्दः, श्रीशीतला देवता, ह्रीं बीजम्, हूं शक्तिः, मम शरीरोत्पन्नविस्फोटरोगक्लेशोत्पन्नशान्त्यर्थे विनियोगः . . .

स्कन्द उवाच—

भगवन् देवदेवेश शीतलायाः स्तवं शुभम्।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहम्॥

ईश्वर उवाच—

नमामि शीतलां देवीं रासभस्थां दिगम्बराम्।
मा(र्जनी)कलशोपेतां शूर्पालंकृतमस्तकाम्॥
वन्देऽहं शीतलां देवीं सर्वलोकभयापहाम्।
यामासाद्य निवर्तेत विस्फोटकभयं महत्॥

End:

श्रोतव्यं पठितव्यं (च) श्रद्धाभक्तिसमन्वितम्।
उपसर्गविनाशाय परं स्वस्त्ययनं महत्॥
शीतलाष्टकमेवेदं न दातव्यं तु कस्यचित्।
दातव्यं हि सदा तस्मै भक्तिश्रद्धान्विताय वै॥

Colophon:

इति शीतलाष्टकं संपूर्णम्।

391

PM1002 शीतलाष्टकम्

Beginning:

वन्देऽहं शीतलां देवीं रासभस्थां दिगम्बराम्।
मार्जनीकलशोपेतां शूर्पालंकृतमस्तकाम्॥

End:

एतानि खरनामानि शीतलाग्रे तु यः पठेत्।
तस्य गेहे शिशूनां च शीतलारुङ् न जायते॥
शीतलाष्टकमेवेदं न देयं यस्य कस्यचित्।
दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीस्कन्दपुराणे शीतलाष्टकस्तोत्रं संपूर्णम् ।

392

66088 शीतलास्तोत्रम्

Beginning:

अस्य श्रीशीतलास्तोत्रमहामन्त्रस्य ईश्वर ऋषिः । अनुष्टुप् छन्दः । शीतला देवता । ओं बीजं ह्रीं शक्तिः स्वाहा कीलकम् । शीतलाप्रसादसिद्ध्यर्थे जपे विनियोगः . . .

End:

इतीदं शीतलादेव्याः स्तोत्रं स्फोटकदाहनम् ।
पठितव्यं सदा तेन श्रद्धाभक्त्यन्वितेन च ॥
प्रसन्नायां त्वयि सदा न बाधा स्फोटकादिका ।
भवन्ति भूतले तस्य सत्यं सत्यं च नान्यथा ॥

Colophon:

इति शीतलास्तोत्रं संपूर्णम् ।

The following *mantra* is written at the end:

ओं ह्रीं शीतले शीतले स्फोटकान् निवारय निवारय सदाघं शमय शमय तन्तून् छेदय छेदय शीतले शीतले ह्रीं स्वाहा ।

398

66116 श्यामलादण्डकम्

End:

. . . देवि तुभ्यं नमस्ते नमस्ते नमस्ते ॥
माणिक्यवीणां + + + स्मरामि ॥
माता + + + वासिनी ॥

वाचा वा मनसाथवा गिरिसुते कायेन वा संनतो
मीनाक्षीति कदाचिदम्ब कुरुते त्वन्नामसंकीर्तनम्
लक्ष्मीस्तस्य (गृहे) वसत्यनुदिनं वाणी च वक्त्राम्बुजे
धर्माद्यर्थचतुष्टयं करतलप्राप्तं भवेन्निश्चयम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

403

73248 श्यामलादण्डकम्

End:

. . . जगन्मातृके पाहि मां पाहि माम् ।

मधुरापुरिनायिके नमस्ते मधुरालापिशुकाभिरामहस्ते ।
मलयध्वजपाण्ड्यराजकन्ये मयि मीनाक्षि कृपां निधेहि धन्ये ॥

408

PM2889 श्यामलादण्डकम्

Beginning:

सकलकविजनाम्बा सर्वलोकावलम्बा परिमलनिकुरुम्बा बालभास्वन्नितम्बा ।
विमलवदनबिम्बा विश्वकृद्वक्त्रलम्बा रमणगुणकदम्बा राजते श्यामलाम्बा ॥

End:

इन्दीवरमन्दिरचरदिन्दिन्दिरनिचयसुन्दरकटाक्षाम् ।
अरविन्दसमानसुन्दरास्यामरविन्दासनसुन्दरीमुपासे ॥

Colophon:

श्यामलादण्डकं समाप्तम् ।

409

PM919 श्यामलादण्डकम्

Beginning:

नीलांशुकाबद्धनितम्बबिम्बां तालीदलेनाश्रितकर्णभूषाम् ।
कराग्रवीणां कलयामि देवीं मातङ्गकन्यां मनसा स्मरामि ॥

End:

अम्बाप्रत्यक्षकाले प्रविमलकरुणालब्धविद्याविशेष-
प्रौढेनारूढकीर्तिप्रथितमतिमता कालिदासेन चित्रम् ।
पात्रं सम्यग् जनानां रचितमिदमहो दण्डकं श्यामलाया
ये वा नित्यं पठन्ति प्रतिदिनमतुलं ते तु धन्याः कवीन्द्राः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

411

66108 श्यामलादण्डकम्

Beginning:

कुचाञ्चलविपञ्चिकां कुटिलकुन्तलालंकृतां
कुशेशयनितम्बिनीं कुटिलचित्तविद्वेषिणीम् ।
मतङ्गमुनिकन्यकां मनसिजारिराज्यस्त्रियं
मदालसगतिप्रियां मधुरभाषिणीमाश्रये ॥ १ ॥
नीलांशुकाबद्धनितम्बबिम्बां तालीदलेनार्पितकर्णपूराम् ।
मतङ्गिनीं मन्मथवैरिपत्नीं कराग्रवीणां कलयामि चित्ते ॥ २ ॥
अम्ब शशिबिम्बवदने कम्बुग्रीवे कठोरकुचकुम्भे ।
अम्बरसमानमध्ये शम्बररिपुवैरिदेवि मां पाहि ॥ ३ ॥
स्मरे(स्फू?) प्रथमपुष्पिणीं रुधिरबिन्दुनीलाम्बरां
गृहीतमधुपत्रिकां मदविघूर्णनेत्राञ्चलाम् ।
(ख? क)रे स्फुरितवल्लकीं विमलशङ्खताटङ्किनीं
घनस्तनभरालसां गलितचूलितश्यामलाम् ॥ ४ ॥
श्रीकान्तसिन्दूर(र)साभिरामां काश्मीररेखा(ख? क)लिताग्रफालाम्
माणिक्यवीणोज्ज्वलदिव्यखेलां मातङ्गबालां मनसा स्मरामि ॥

माणिक्यवीणां + + + स्मरामि ॥
जय मातङ्ग + + + प्रिये ॥
जय जननि . . . ॥

412

67160 श्यामलाम्बास्तुतिः

Beginning:

श्रीविद्यापञ्चदशाक्षरीमूलमन्त्राक्षरानुक्रमेण श्रीमदादिपुरक्षेत्रगतश्यामलाम्बास्तुतिः—आदौ तत्पूर्वपीठिकापञ्चकं विलिख्य पश्चात् तादृशस्तुतिं सोत्तरपीठिकाद्वयसहितां विलिखामः ।

श्रीमत्केरलकोङ्कनामकमहादेशद्वयान्तःस्थित-
श्रीमद्राजतभूधरात् स्रवति या काञ्चीनदी पावनी ।
तस्या दक्षिणतीरपिप्पिनवनक्षेत्रोत्तमे प्राक्तने
श्रीमत्यादिपुरेऽस्ति लिङ्गमतुलं गोष्ठेश्वराख्यं महत् ॥

. . . .

इतः परं ह्रींकारत्रयसंपुटितायाः श्रीमत्पञ्चदशाक्षर्या मूलमन्त्राक्षराणां ककारपूर्वकत्वात् तदारभ्य प्रत्यक्षरमेकैकश्लोकक्रमेण प्रागुक्तस्तुतिः क्रियते ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

हर्यश्वाद्यमरान . . . हठमहायोगप्रपञ्चीकृत-
प्राणायामपरायणैर्हृदि स . न्मीलत् षडध्वातिगे ।
रम्भोरूर्जितखेचरादिकमहा . . . . . .
. . . . . . ॥

413

PM644 षट्त्रिंशन्नवमल्लिकास्तवः

Beginning:

या माता सदसद्विलक्षणपरासंवित्स्वरूपा सदा
जाग्रत्स्वप्नसुषुप्तिवृत्तिविलसत्स्फूर्तिः परा वैखरी ।
इच्छादित्रयधर्मिणी परगुहाहंताप्रकाशात्मिका
तां नौमि त्रिपुरां परापरमयीं स्वानन्दसंवित्तये ॥

End:

नित्यैश्वर्यवती महागुणवती सत्पुत्रसंपद्वती
सत्सौभाग्यवती पतिप्रियवती प्राज्ञेश्वरी पार्वती ।
सत्सौन्दर्यवती शिवव्रतवती साध्वी च या शाश्वती
तां नौमि त्रिपुरां परापरमयीं स्वानन्दसंवित्तये ॥
षट्त्रिंशन्नवमल्लिकास्रजमिमां त्यागेशपादार्पितां
प्रज्ञासूत्रसुगुम्भितां गुरुकृपानन्दामृताप्लाविताम् ।
यो धत्ते हृदि मूर्ध्नि निश्चलधिया श्रोत्रेण वाचाथवा
तस्मै दास्यति देवता शिवपदं सत्पुत्रसंपत्सुखम् ॥

Colophon:

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्नेनान्ध्रेण त्यागराजनाम्ना विरचितं षट्त्रिंशन्नवमल्लिकास्तवं संपूर्णम् ।

416

PM2899 संकटहरणबालास्तोत्रम्

Beginning:

श्रीकाली ब(गला)मुखी च ललिता धूमावती भैरवी
मातङ्गी भुवनेश्वरी च कमला श्रीवज्रवैरोचनी ।
तारापूर्वमहापदेन कथिता विद्या स्वयं शंभुना
लीलारूपमगाद् यया च दशधा बाला च मां पातु सा ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ब्रह्मास्त्रं सुमुखीवक्त्रनिमितां बालां बलाकाननां
हस्ते न्यस्त उदस्तवैरिरसनामन्ये दधानां गदाम् ।
पीतां भूषणगन्धमाल्यरुचिरां पीताङ्गरागाम्बरां
वन्दे संकटनाशिनीं च बगलामम्बां स्वयं बालिकाम् ॥

End:

विराजन्मन्दारद्रुमकुसुमहारस्तनतटे
वरत्रासत्राणस्फटिकघटिकापुस्तककरे ।
गले रेखास्तिस्रः गमकगतिगीतैश्च निपुणा
सदा पीता हाला जयति किल बाला भगवती ॥

Colophon:

इति श्रीरुद्रयामले तन्त्रे बालासंहितायां संकटहरणबालास्तोत्रं संपूर्णम् ।

417

TR1086 संकटास्तोत्रम्

Beginning:

नारद उवाच—

योगीश्वर मुनिश्रेष्ठ सर्वज्ञ सुखदायक ।
आख्यातानि सुपुण्यानि श्रुतानि त्वत्प्रसादतः ॥
न तृप्तिमनुगच्छामि तव वागमृतेन च ।
वदस्वैकं महाप्राज्ञ संकटाख्यानमुत्तमम् ॥
. . . . . .
आनन्दकानने देवी संकटा नाम विश्रुता ।
वीरेश्वरोत्तरे भागे चन्द्रेश्वरस्य पूर्वतः ॥
श्रृणु नामाष्टकं तस्याः सर्वसिद्धिकरं नृणाम् ।
संकटा प्रथमं नाम द्वितीयं विजया तथा ॥

End:

एतत्स्तोत्रस्य पठनं पुत्रपौत्रप्रवर्धनम् ।
संकटनाशनं चैव त्रिषु लोकेषु विश्रुतम् ।
गोपनीयं प्रयत्नेन महावन्ध्याप्रसूतिकाम् ॥

Colophon:

इति पद्मपुराणे संकटास्तोत्रं समाप्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

425

66516 सौन्दर्यलहरी

End:

प्रदीपज्वालाभिः + + + रियम् ॥
समानीतः पद्भ्यां + + + पङ्केरुहमिव ॥
समुत्तुङ्ग + + + मियमुमे ॥

मनोवाक्त्वत्तस्पर्शो मधुरिपुविधात्रैरपि तव ?
स्वरूपे जात्यन्धस्तव जननि वाचां स्तुतिरियम् ।
दृशोर्लक्षीकृत्य प्रहित इव बाणोऽयमथवा
स्वरूपे जात्यन्धस्तव जननि सर्वात्मवपुषि ॥
यन्मात्राबिन्दुवर्णद्वितयपदमथ द्वन्द्ववर्णादिहीनं
भक्त्याभक्त्यानुपूर्व्यात् प्रसभगतिवशाद् व्यक्तमव्यक्तमम्ब ।
मोहादज्ञानतो वा पठितमपठितं सांप्रतं ते स्तवेऽस्मिन्
तत् सर्वं साङ्गमास्तां भगवति वरदे त्वत्प्रसादात् प्रसीद ॥
ह्रींकारमन्तरुभयोरपि पार्श्वयोर्यः पद्मारुणे जननि चेतसि संनिधेहि ।
ह्रींकारिणि त्रिपुरभैरवि देवि मातः श्रीपादुकेश्वरि वरे त्रिपुरे प्रसीद ॥
शब्दब्रह्ममये स्वेच्छे त्रिगुणानन्दरूपिणि ।
यथाशक्ति कृता पूजा गृहाण मदनुग्रहात् ॥

433

73286 सौन्दर्यलहरी

Beginning:

अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशपुष्पबाणचापाम् ।
अणिमादिभिराश्रितां मयूखैरहमित्येव विभावयेद् भवानीम् ॥

End:

प्रदीप + + + रियम् ॥

Although the MS. does not contain the comm. we have this colophon:

इति श्रीमहोपाध्यायश्रीलक्ष्मीधरदेशिकेन कृतेयं लक्ष्मीधराव्याख्या सौन्दर्यलहरीस्तुतिव्याख्या संपूर्णा ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

435

73394 सौन्दर्यलहरी

End:

प्रदीप + + + स्तुतिरियम् ॥

अस्मिन् सौन्दर्यलहरीश्लोकशतके 'समानीतः पद्भ्यामिति च', 'समुद्भूत + + + मुमे', 'निधे + + + स्तुतिमिमाम्' इति श्लोकंत्रयमपि वर्तते। तत्तु भगवत्पादकृतं न भवति इति केनचिद्भक्तेन प्रक्षिप्तमिति व्याख्याकर्तृभिर्न व्याख्यातम्।

437

70923 सौन्दर्यलहरी

Beginning:

अस्य श्री आनन्दलहरीस्तोत्रमहामन्त्रस्य श्रीमच्छंकराचार्य ऋषिः, त्रिष्टुप् छन्दः, श्रीमहात्रिपुरसुन्दरी देवता, शिवः शक्तिः काम इति बीजम्, धनुःपौष्पं मौर्वीति शक्तिः, स्मरं योनिं लक्ष्मीमिति कीलकम्। इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः। ध्यानम्—

जपापुष्पप्रतीकाशां रक्तोत्पलसमप्रभाम्।
बालार्ककिरणाभासां वन्दे त्रिपुरसुन्दरीम्॥
शिवः शक्त्या + + + प्रभवति ॥

441

66512 सौन्दर्यलहरी सौभाग्यवर्धनीटीकासहिता

End:

किं विज्ञापनया + + + हितम् ॥

प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानाम्।
अ . . धन्यामनुसंचरन्तीमानन्दमुद्रामवलोकयामः ॥

Colophon:

इति परमहंसपरिव्राजकाचार्यश्रीगोविन्दाश्रमपादपूज्यशिष्यकैवल्याश्रमविरचिता सौन्दर्यलहरीटीका सौभाग्यवर्धिनीनाम्नी संपूर्णा।

साधारणसंवत्सरमाघशुद्धाष्टमी भानुवारं वरकु वाविलालवेङ्कटशिवशास्त्रिचातसटीकव्रायवड्डुदि।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

446

PM2923 सौन्दर्यलहरी टीकासहिता

Beginning:

ओंकारोत्तमरम्यहर्म्यनिलयां प्रासादमध्यस्थितां
(कामाख्यां) भुवनेश्वरीं निरुपमां ब्रह्मादिभिर्वन्दिताम् ।
योगीन्द्रैकनिषेवितां त्रिजगतामुत्पत्तिनाशस्थलीं
ज्ञानानन्दमयीं महोदयकरीं कांचिद् भजे देवताम् ॥
सम्यग्वाग्भवकामशक्तिजपनासक्तान् स्वभक्तान् मुदा
सम्यग् वाग्भवकामशक्तिसहितान् कामं करोतीह या ।
सान्द्रानन्दमयी सुरासुरनरैरानन्दिभिर्वन्दिता
सा स्तान्नः शिवगेहिनी शिवकरी श्रीसुन्दरी सर्वदा ॥
परमात्मापृथग्भूतां प्रणम्य परमेश्वरीम् ।
आनन्दलहरीटीका गौरीकान्तेन तन्यते ॥
गौरीकान्तः सार्वभौमभट्टाचार्यसुधीरिमाम् ।
आनन्दलहरीटीकां तनुते विदुषां मुदे ॥

शिष्टाचारपरिप्राप्तं प्रारिप्सितविघ्नविघातकप्रयोजकं शिवशक्तिस्मरणरूपं मङ्गलं कृत्वा शिष्यान् शिक्षयितुमा(दौ) नि(र्विघ्नन्? बध्नन्) विनयातिशयार्थं ब्रह्मादिभिराराध्यमानाया भगवत्याः स्तुतिकरणे स्वस्यासंभावनां प्रकाशयति—शिव इति ।

शिवः शक्त्या + + + प्रभवति ॥

शिवशब्दस्यार्थस्मरणद्वारैव दधिदूर्वादिन्यायेन स्वतोऽपि मङ्गलत्वमिति हर इत्याद्यपहाय शिव इत्युक्तम् ।

End:

एतत् स्थलत्रये यथा तदीयैरेव स्तुतिभिस्तदाराधनं क्रियते तथा त्वदीयवाग्भिस्तव स्तवनम्, अनन्यगमकत्वादिति भावः। सौहित्यं तर्पणं तृप्तिरित्यमरः ॥

मातः शिवे शिवविरिञ्चिहरिस्वरूपे दीने कृपामयि मयि प्रणते प्रसीद ।
दुष्टं मदुक्तमपि ते चरणारविन्दविन्यस्तमस्तु सुधियां हृदये विशुद्धम् ॥
अतीवासौ दुर्गा दुरयणगभीराशयवती
निगूढार्थग्राह्या गुरुतररसानन्दलहरी ।
अनायासेनास्या यदि हृदि रुचिर्वो विहरणे
तदा धार्या धीरा लघुपदपटीका तरिरियम् ॥
यो नानाविधशास्त्रतर्कनिपुणश्चक्रे निबन्धान् बहून्
पूजां भूरि महीभुजां सदसि यो लेभेऽतिधीमान् कविः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

यो गौडोत्तरदेशदिग्गज इह श्रीसार्वभौमो महान्
भट्टाचार्य इमां स एष विदधे टीकां मुदे वाग्विदाम् ॥

Colophon:

इति गौडीयराजान्वयसच्छ्रोत्रियवंशजश्रीगौरीकान्तसार्वभौमभट्टाचार्यविरचितानन्दलहरीतरी नाम टीका संपूर्णा ।

संवत् १८०४ वर्षे शके १६६९ प्रवर्तमाने श्रावणमासे शुद्धपक्षे दशम्यां १० भौमवासरे समाप्तोऽयं ग्रन्थः ।

448

TR837 सौन्दर्यलहरी डिण्डिमरामकृतव्याख्यासहिता

Beginning:

कपालनिष्यन्दमदाम्बुधारासंतर्पितालिव्रजझङ्कृतौघैः ।
उद्गीयमानं गिरिराजपुत्र्याः पुत्रं गणेशं हृदि चिन्तयामः ॥
समस्तवेदशास्त्रौघसारभूतार्थसंग्रहम् ।
आनन्दलहरीस्तोत्रं व्याकरोमि यथामति ॥
स्तोत्रमेतद् वदन्त्येके शिवेन परिभाषितम् ।
तस्यैवांशावतारेण शंकरेणेति केचन ॥
केचिद् वदन्त्यादिशक्तेर्ललिताया महौजसः ।
दशनेभ्यः समुद्भूतमिति नानाविधश्रुतिः ॥
अत्र स्तोत्रे गुरुमुखादवगम्यागमामृतम् ।
कामेश्वर्याः प्रसादेन भुक्तिमुक्ती भजेन्नरः ॥

शिवः शक्त्या युक्त इत्यादि । अत्रश्लोके भगवत्याः संबुद्धिपदं नास्ति अतोऽध्याहर्तव्यमिति ये केचिदाहुः, ते भ्रान्ताः । हरीति पदस्य संबुद्धिरूपेण वर्तमानत्वात् । 'हरिर्ना कपिले त्रिषु' इति वचनात् कपिलवाचिनो हरिशब्दस्य मेचलिङ्गत्वात् । ततश्च 'कृदिकारादक्तिनो वा ङीष् वक्तव्यः' इति ङीषि कृते हरीति दीर्घान्तो गौरीशब्दसमानार्थ आगमे प्रसिद्धः । तस्य संबुद्धौ हे गौरीतिवत् हे हरीति भवति ।

End:

कलङ्क इति । . . . अत एव वह्न्यादिछद्मना चन्द्रमसः कलाकर्पूरखण्डमण्डलं भगवत्यैव भुज्यते । सर्वभोक्त्री नैव सर्वं भोक्तुमर्हा देवस्य सदृशी सधर्मिणीति मन्तव्यम् ॥ ९५ ॥

Colophon (on p. 283):

इति श्रीपदवाक्यप्रमाणज्ञश्रीमन्महाभाष्यभट्टारविन्दलोचनाचार्यपुत्रस्य महामहोपाध्यायस्य वात्स्यडिण्डिमरामकवेः कृतौ आनन्दलहरीभाष्यालोचने प्रथममुन्मीलनम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

451

PM2917 सौन्दर्यलहरी टीकासहिता

Beginning:

शिव: शक्त्या + + + प्रभवति ॥

. . . मिति । हे शक्ते परमेश्वरि ब्रह्मादीनां तव चरणकमलपादुकाग्रभूमावुन्मादाग्रहेतुकदण्डवत्पतनरूपककायिकनमस्कारव्याजेन कुण्ठतां तन्नान्तरीयकतया . . . सूक्ष्मा रज:कणास्तान् शिरसि धृत्वा स्वकार्यं कुर्वन्ति । ब्रह्मादय इति । पांसुं शिरसि संचितं कुर्वन् तत्प्रसादेन लब्धसामर्थ्य इति । अविकलान् पूर्णावयवान् विरचय . . . सृष्टिरूपे कार्ये तव चरणरज:कणप्रसादस्यैवायं महिमेत्यर्थ: । आश्चर्यमपि । पांसु: सूक्ष्मादपि सूक्ष्मतम: अप्रमितगरिमब्रह्माण्डमण्डलाकारेण परिणमत इति ।

End:

प्रदीप + + + ेयिम् ॥

तेजोनिधे: . . . शिखया . . . नीराजनम् । अ . . . नम् । त्वन्मन्त्रमातृकाक्षरैस्तव स्तुतिरिति त्वमेव सर्वं . . . स्यूता . . . रूपा प्रतिभाससे इति ।

Colophon:

इति श्रीद्रविडसंप्रदायिना शंकराचार्येण विरचिता श्रीमहात्रिपुरसौन्दर्यलहरीस्तुति: समाप्ता ।

Post-colophon writing:

शके शैलव्योमावनिपतिमिते मासि नभसि तृतीयायां काव्ये मिहिरपुरवास: सितदले ।
उमापालज्ञात्युद्भवनहरिरामाभिधसुतो व्यलेखीत् श्यामाख्यो ललिततरसौन्दर्यलहरीम् ॥

452

75194 सौन्दर्यलहरी सव्याख्या

Beginning:

शिव: शक्त्या + + + प्रभवति ॥

तत:,

निर्गुण: सगुणश्चेति शिवो ज्ञेय: सनातन: ।
मायाकालुष्यरहितो निर्गुणोऽथ निरञ्जन: ।
मायाकालुष्यसंयुक्तो देवश्च सगुण: स्मृत: ॥

सगुणात् सृष्टयादिकमाह—शिव: परमात्मा शक्त्या मायया युक्तो मिलितो यदि भवति तदा प्रभवितुं जगदुत्पादको भवितुं शक्त: समर्थ: । एतेन शिवशक्त्यो: संबन्धे जाते परमशिवो जगत्कर्तृकत्वेनात्मानं गोचरीकर्तुं समर्थ इति वाक्यार्थ: ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

निवे + + + स्तुतिमिमाम् ॥

हे नित्ये (व ? इ)मां स्तुतिं निशामय। मन्त्ररूपेण श्रृणु। नित्यस्मेरे हे नित्यवधूगुणे हे नीतिचतुरे सर्वत्र संबोधनम्।

Colophon:

इति श्रीशंकराचार्यविरचिता आनन्दलहरी समाप्ता।

453

PM2920 सौन्दर्यलहरीव्याख्या कैवल्यवर्धनी

Beginning:

शंकराचार्यः सर्वदेवमयीं श्रीत्रिपुरसुन्दरीं स्तौति—शिव इति। शिवो मङ्गलरूपः सामर्थ्यविशेषरूपया शक्त्या युक्तो यदि भवति तदा प्रभवितुं शक्तः सर्वोत्कृष्टः स्यात्। न चेदेवं देवः स्पन्दितुं चलितुमपि न कुशलः खलु। अतः कारणात् त्वां हरिहरविरिञ्च्यादिभिरप्याराध्यां प्रणन्तुं वा स्तोतुम् अकृतपुण्यः कथं प्रभवति समर्थो भवति।

End:

प्रदीपेति। यथा प्रदीपज्वालाभिः सूर्यस्य नीराजनाविधिः, यथा चन्द्रस्य चन्द्रकान्तजन्यजलैरर्घ्यनंदी(?) स्वकीयैः सामुद्रियैर्जलैः समुद्रस्य तर्पणं तथा त्वदीयाभिर्वाग्भिर्मातृकाक्षररूपाभिः स्तुतिर्जननि इयमस्तु।

Colophon:

इत्यखण्डानन्दरचिता सौन्दर्यलहरीटीका कैवल्यवर्धनी नाम समाप्ता।

संवत् १७८२ वर्षे फाल्गुनमासे कृष्णपक्षे चतुर्थ्यां भृगुवासरे धन्यपुरीवासिना भट्टयदुरामात्मजसूरनन्दनस्याङ्गजेन प्रभुनन्दनेन लेखनं कृतम्।

454

PM2919 सौन्दर्यलहरीभाष्यम्

Beginning:

तत्रादौ अनेकमङ्गलमयं सकलजगत्सारभूतं सर्वाभिमतफलदं विशिष्टदेवतास्वरूपं स्तोतुकामो ग्रन्थकृद् ब्रूते—शिव इति। अत्र भगवत्याः संबुद्धिपदाभावात् तदध्याहर्तव्यमिति केचित्। तन्न, हरीति संबुद्धिपदस्य वर्तमानत्वात्। न चानुशासनानुपपत्तिः कपि(ल)वाचिनो हरिशब्दस्य मेद्यलिङ्गत्वात् कृदिकारादक्तिन इति ङीषि कृते हे गौरीतिवत् हे हरीत्यस्योपपन्नत्वात् . . .

हे गौरि शिवो महादेवः चिरंभवनपरपर्यायः(?)। प्रकृतिरूपिण्या त्वया साधारणचिच्छक्तिकलया संपृक्तश्चेत् तदा प्रभवितुं शक्तः।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

प्रदीपेति। सर्ववाग्रूपे यत् तव स्त(व)नं मया कृतं तन्मम च वाक्कृतं न भवति। त्वमेव समस्तजिह्वाग्रेषु वाग्रूपिणी। अतस्त्वदीयवाग्भिस्तव स्तुतिः। यत एवं ततस्तव स्तुत्या प्रीतिसंपादनं दुर्लभम्। निरर्थकस्तुतिपरे मयि दया विधेया। यथा प्रदीपमहसा (र)विनीराजनं सोमकान्त-जलैश्चन्द्रार्घ्यं तदम्भोभिः सिन्धुतर्पणं तथैव प्रकृतेऽपीति ज्ञेयम्।

Colophon:

इति श्रीसौन्दर्यलहरीभाष्यं समाप्तिमगमत्।
संवत् १८०७ वर्षे वैशाखवदि. १ प्रतिपदि मं . . .

456

PM2927 सौन्दर्यलहरीव्याख्या (आनन्दलहरीव्याख्या)

Beginning:

वारं वारमुदारसस्मितमुखः शिक्योपरि स्थापितं
हारं हारमुलूखलोपरिगतो हैयङ्गवीनं हठात्।
आयान्तीं पुरतो विलोक्य जननीमादाय यष्टिं करे
धावं धावमिह प्रकाशितभयः पायात् स मायार्भकः॥
कल्हारोत्पलकैरवाम्बुजलसन्माकन्दसन्मञ्जरीः
कोदण्डं करपङ्कजेन दधतीं पुण्ड्रेक्षुदण्डोद्भवाम्।
सौवर्णाङ्कुशपाशपाणिमरुणामारक्तवस्त्रावृता-
माताम्राम्बुजसंस्थितां त्रिनयनां चन्द्रार्धचूडां भजे॥
प्रणम्य शंकराचार्यचरणाम्बुरुहद्वयम्।
आनन्दलहरीस्तोत्रं विष्णुपक्षेऽपि लक्ष्यते॥

तत्र भवानीपक्षे—ननु हरिहरविरिञ्च्यादिदेववृन्दमपास्य किमिति कात्यायनीस्तुतेराचरण-मिति शिष्याशङ्कामपनिनीषुराह—शिवः शक्त्येति। शिवः कल्याणरूपः सदाशिवः अविद्यातत्कार्यो-पार्जितजन्ममरणाद्यनेकक्लेशरूपामङ्गलरहितत्वात्।

End:

इदानीं मुकुटादिचरणान्तमङ्गं स्तौति—गतैरिति। हे हिमगिरिसुते ते हैमं सुवर्णघटितं किरीटं कः कीर्तयतु। तथापि समीडे स्तौमि। कीदृशं माणिक्यत्वं रत्नविशेषभावं गतैः प्राप्तैः गगनमणिभिः द्वादशादित्यैः मित्रवरुणादिनामकैः सान्द्रघटितं सुश्लिष्टतया योजितम्। यस्य मुकुटस्य छायाच्छुरणेन कान्तिविलेपनेन शबलं नानावर्णं चन्द्रशकलं कर्तृ, सौनासीरं सुनासीर इन्द्रः तत्संबन्धि धनुः कार्मुकं किमेतदिति धिषणां बुद्धिं बध्नाति जनयतीत्यर्थः। विष्णुपक्षे ते तव हैमं किरीटं हिमगिरि

CC0. In Public Domain. Digitized by Muthulakshmi Academy

हिमसदृशशीतले गिरि वचने उपनिषद्रूपे सुते अभिव्यक्ते त्वयि कः कीर्तयतु । पूर्ववद् विष्णुसंबोधनं वा । चन्द्रशकलमिति तु किरीटोपरिशोभार्थम . . .

457

75457 सौन्दर्यलहरीव्याख्या मनोरमा

Beginning:

प्रचण्डपञ्चकाण्डारेर्गण्डस्पृष्टिमदालसा ।
अखिलाण्डेश्वरीदृष्टिः कृषीष्ट मम मङ्गलम् ॥
गणपमथ गुरुं सच्चिदानन्दनाथं शिवमिथुनमुपास्यं ब्रह्मविद्यारहस्यम् ।
ब्रुव इव(ह) बहुतन्त्रं वीक्ष्य चैषां प्रसादात् त्रिणयनविभवश्रीशंकराचार्यपद्ये ॥
सच्चिदानन्दशिष्येण सहजानन्दधीमता ।
आनन्दलहरीव्याख्या तन्यतेऽसौ मनोरमा ॥

इह खलु सर्वेषां जन्तूनां सुखमेव भूयाद् दुःखं मा भूयादिति सुखोपादित्सादुःखजिहासे भवतः । अत्यन्तदुःखनिवृत्तिः सुखावाप्तिश्च ब्रह्मज्ञानमन्तरेण न भवतः । ब्रह्म वेद ब्रह्मैव भवति . . .
. . . (on fo. 3a) शिवः शक्त्या युक्त इति शतश्लोक्या आगमरहस्यं प्रकाशयंस्तामस्तौच ।

End:

तत्र श्रीमच्छंकराचार्यः—

रम्यमप्युज्ज्वलमपि मनसोऽपि समीप्सितम् ।
लोकविद्वेषणं वेषं नैव कुर्यात् कदाचन ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरे जनाः ।

इति श्रीकृष्णवचनेन च सर्वेषां शिष्टाचारमेव निश्चितम् । सर्वमनवद्यम् ।

Colophon (on fo. 4a):

इति श्रीशिवादिगुरुपारंपर्यसत्संप्रदायानुसारिश्रीमुनीन्द्रसच्चिदानन्दनाथशिष्यसहजानन्द-नाथविरचितायामानन्दलहरीव्याख्यायां मनोरमायां प्रथमोल्लासः ।

458

PM644 संविच्छतकम्

Beginning:

यस्या नित्यं चरणकमलद्वन्द्वमैश्वर्यबीजं
प्रध्यायन्तो हृदयकमले पुण्यभाजो मुनीन्द्राः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

निर्द्वन्द्वं तत्समरसमहो प्राप्य तिष्ठन्ति तस्मिन्
तस्यै देव्यै तपनरुचये तत्त्वतोऽस्तु प्रणामः ॥
या कल्याणगुणप्रसूः परशिवानन्दामृतस्यन्दिनी
भूमानन्दमयी परापरमयी तेजोमयी वाङ्मयी ।
आद्यन्तार्णतनूः शिवादिवसुधान्तान्तःप्रकाशात्मिका
तस्यै देव्यै तपनरुचये तत्त्वतोऽस्तु प्रणामः ॥

End:

आद्यामम्बुरुहेक्षणामनुपमामापीनतुङ्गस्तनी-
मार्यामागमसारमूर्तिमरुणामानन्दचन्द्राननाम् ।
साध्वीं सत्कविवाग्झरीं समरसानन्दामृतस्यन्दिनीं
ध्यायन्त्यात्मनि सर्वपाशगलिताः संविन्मयीं नौमि ताम् ॥
गुरुचरणसरोजं गुप्तगङ्गातरङ्गस्तिमितममितशुक्लज्योतिषां ज्योतिरेकम् ।
निरुपममकरन्दस्पन्दमानन्दकन्दं निधनजननहीनो निर्मलोऽहं निषेवे ॥
शार्दूलवृत्तमपि साधु भवत्यहो तत् सारस्वतं समरसामृतलोचनानाम् ।
सद्यो जयत्यघरिपुं श्रुतिमार्गयोगात् त्यागेशसान्द्रकरुणाद्भुतमेव भद्रम् ॥

Colophon:

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्नेनान्ध्रेण त्यागराजनाम्ना विरचितं संविच्छतकं संपूर्णम् ।

459

69038 अम्बाष्टोत्तरशतनामस्तोत्रम्

Beginning:

शिवा भवानी कल्याणी गौरी काली शिवप्रिया ।
कात्यायनी महादेवी दुर्गार्या चण्डिका . . . ॥

End:

निराकारे निष्कलङ्के शाश्व . . . नमोऽस्तु ते ।
नमोऽस्तु ते सत्यमा . . . सुन्दरी भुवनेश्वरि ॥

Colophon:

अम्बाया अष्टोतरशतं समाप्तम् ।

479

67633 इन्द्राक्षीस्तोत्रम्

End:

रणे राजभये चोरे सर्वत्र विजयी भवेत् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ओं नमो भगवति इन्द्राक्षि सकलजनमनोहारिणि कालरात्रि कालरूपिणि नारसिंहि शत्रुसंहारिणि असिभयपराजिते अजिते महासिंहवाहनि महानागप्रतिहते विश्वरूपिणि मधुसूदनि महाविष्णु-स्वरूपिणि महिषासुरमर्दिनि महारुणद्री(?) असुरदमनि मम शत्रून् ह(न) हन दुष्टान् मारय मारय चोरान् संहारय संहारय रोगान् निवारय निवारय यक्षग्रहरक्षग्रहराक्षसग्रहपिशाचग्रहसर्वग्रहबालग्रह-विनायकग्रहकूश्माण्डवेतालशाकिनीडाकिनीसर्वग्रहान् भञ्जय भञ्जय। व्याघ्रादिमृगभयान्निवारय निवारय सर्पवृश्चिकादिभयान्नाशय नाशय मां रक्ष रक्ष भक्ताभीष्टप्रदायिनि महादेवि मां मङ्गलं कुरु कुरु ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा।

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते॥

Colophon:

इति श्रीमार्कण्डेयपुराणे सप्तशतीदेवीमाहात्म्ये इन्द्राक्षीस्तोत्रं नाम सप्तदशोऽध्यायः।

482

71172 इन्द्राक्षीस्तोत्रम्

End:

शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते॥
किंशुकाधरविशाललोचनीं किञ्चनागवल्लिरसवासिनीम्।
अङ्गचम्पकसमानवर्णिनीं शंकरप्रियसखीं नमाम्यहम्॥
त्रिपाद्भस्मप्रहरणा त्रिशिरा रक्तलोचना।
. . . . .
ज्वरं च ज्वरसारं च ज्वरातिसारमेव च।
संनिपातज्वरं चैव शीतोष्णविगतज्वरः॥

Colophon:

इन्द्राक्षीस्तोत्रं संपूर्णम्।

485

68955 इन्द्राक्षीस्तोत्रम्

End:

मृत्योस्तुल्यं त्रिलोकीं ग्रसितुमतिरसान्निःसृताः किं नु जिह्वाः
किं वा कृष्णाङ्घ्रिपद्मद्युतिभिररुणिता विष्णुपद्याः पदव्यः।
प्राप्ताः संध्याः स्मरारेः स्वयमुत नुतिभिस्तिस्र इत्यूह्यमाना
देवैर्देव्यास्त्रिशूलक्षतमहिषभुषो रक्तधारा जयन्ति॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

490

71554 **उमाष्टोत्तरशतनामावलिः**

Beginning:

उमायै नमः। महेश्वर्यै नमः। काल्यै नमः। गिरिजायै नमः। शंकर्यै नमः। शिवायै नमः पार्वत्यै नमः। चण्डिकायै नमः।

End:

वरायै नमः। त्रिपुरमर्दन्यै नमः। कृपाशीलायै नमः। वेदवेद्यायै नमः। सर्वमङ्गलमाङ्गल्यै नमः। ज्ञानशक्त्यै नमः। श्रीउमायै नमः। अष्टोत्तरशतदिव्यनामपूजां समर्पयामि।

491

67190 **उमाष्टोत्तरशतनामावलिः**

Beginning:

उमायै नमः। संमोहिन्यै नमः। देव्यै नमः। सुन्दर्यै नमः। भुवनेश्वर्यै नमः। एकाक्षर्यै नमः।

End:

प्राणधारिण्यै नमः। वज्रशक्तिधरदेव्यै नमः। शरणागतरक्षिण्यै नमः। महात्रिपुरसुन्दर्यै नमः। राजराजेश्वर्यै नमः। महादेव्यै नमः। कामाक्ष्यम्बिकायै नमः। अष्टोत्तरहरिद्राकुङ्कुमार्चनपूजां समर्पयामि।

492

68408 **उमाष्टोत्तरशतनामावलिः**

Beginning:

Same as in No. 491 above.

End:

चतुर्भुजायै नमः। त्रिनेत्रायै नमः। हृल्लेखायै नमः। परमेश्वर्यै नमः। त्रैलोक्यप्राणजनन्यै नमः। श्रीशैवनायक्यै नमः। श्रीपरदेवतायै नमः।

Colophon:

अष्टोत्तरशतं संपूर्णम्।

500

66817 **उमाष्टोत्तरशतनामावलिः (ललिताष्टोत्तरशतनामानि)**

Beginning:

उमायै नमः। कात्यायन्यै नमः। गौर्यै नमः। काल्यै नमः। हैमवत्यै नमः। ईश्वर्यै नमः। शिवायै नमः। भवान्यै नमः। रुद्राण्यै नमः। शर्वाण्यै नमः। सर्वमङ्गलायै नमः।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

शुम्भनिशुम्भदैत्यसंहारिण्यै नमः। महिषासुरसंहारिण्यै नमः। मायायै नमः। दुष्टशिक्षिण्यै नमः। शिष्टसंरक्षिण्यै नमः। चतुर्भुजायै (नमः)।

501

69228 कालिकारहस्यस्तवराजः

Beginning:

सुखस्थितं जगन्नाथं कैलासे गिरिजैकदा।
आलिङ्ग्याह कथं वा सन् दत्त्वा त्वं गि च वंचसि(?)॥

. . . .

ईश्वर उवाच—

लक्ष्मणे शरसंभिन्ने विलपन्तं रघूत्तमम्।
चतुर्भुजात्मिका काली प्रादुर्भूताञ्जनप्रभा॥

. . . . . .

कला कलावती कीर्तिः कमनीया कुलेश्वरी।
कपर्दिनी कमलिनी कमला कमलालया॥

End:

इत्येतज्जगदम्बाया नाम्नामष्टाधिकं शतम्।
कार्यसिद्धिकरं विघ्ननाशनं सकलार्थदम्॥

. . . . . .

विपुला पुलका एव मन्त्रविद्भिरितिस्सदा महार्थसिद्धिः। (?)
स भवति नरदेव एक वन्द्यः सकलसुखमवाप्य परसुखं मोक्षमेति॥ (?)

Colophon:

इति कुलाचारचन्द्रोदये परमसिद्धागमे कालिकारहस्यस्तवराजः समाप्तः।

504

PM2619 कालिकासहस्रनामस्तोत्रम्

End:

मुक्ताः श्रीचरणारविन्दविमुखाः स्वर्गामिनो भोगिनो
ब्रह्मोपेन्द्रशिवात्मिकार्चितपदं लोकेऽपि संलेभिरे।
श्रीमच्छंकर . . . श्वकमहाकालीपदध्यायिनो
भुक्तिर्मुक्तिमती स्वयं स्तुतिपरा(?)मुक्तिः करस्थायिनी॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीकालीसहस्रनामस्तोत्रं संपूर्णम् ।

Date of copying: संवत् १७१६ वर्षे प्रथमज्येष्ठवदि. ३ गुरौ लिखितम् ।

505

70640 **चक्रेश्वर्यष्टोत्तरशतनामावलिः**

Beginning:

ओं उमायै नमः । भारत्यै नमः । उग्रायै नमः । शर्वाण्यै नमः । विजयायै नमः । वाण्यै नमः । सर्वगतायै नमः । गौर्यै नमः ।

End:

सत्यज्ञानायै नमः । तमोग्रहायै नमः । महेश्वरप्रियायै नमः । महादेव्यै नमः । रौद्र्यै नमः । महात्रिपुरसुन्दर्यै नमः । महात्रिपुरसुन्दरीमष्टोत्तरशतकं समर्पयामि ।

506

TR1077 **तकारकूटसहस्रनामस्तोत्रम्**

Beginning:

मेरुपृष्ठे सुखासीनं शंकरं चन्द्रशेखरम् ।
पप्रच्छ प्राञ्जलिः . . . . ॥

श्रीपार्वत्युवाच—

त्रैलोक्यनाथ श्रीनाथ जगन्नाथ जगद्गुरो ।
कृपया परयाविष्टः कथयस्व मयि प्रभो ॥

. . . . . .

अस्य श्रीतारकब्रह्मताराष्टोत्तरसहस्रनामस्तोत्रस्य महाभैरवाक्षोभ्यश्रीकृष्णऋषिः, अनुष्टुप् छन्दः, श्रीमत्तारिणी देवता . . .

ओमित्येकाक्षरब्रह्मतारकब्रह्मरूपिणी ।
तारकत्वात् सदा तारा तारिणी तारकेश्वरी

End:

प्रासादाम्भोजयुग्मोज्ज्वलरुचिविलसत्प्रेमधाराविलासः
पाणौ्यन्मुण्डखण्डोद्धटघटरुचिराह्लादचित्तप्रकाशः ।
मायाबालस्ववीज(?)प्रभवति घटनास्त्रैकवर्णं बिभर्ति
त्वं स्त्री देवेन्द्रराज्यं कुरु कुरु सततं मोक्षसंतोषदात्री ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीनीलतन्त्रे उत्तरखण्डे सिद्धाविद्याप्रकाशे श्रीकृष्णमुखपङ्कजे(? ज) निर्गततारिणीतारकब्रह्मकूटाष्टोत्तरतकारकूटसहस्रनामस्तोत्रराजकवचविन्यासो नाम त्रयस्त्रिंशः पटलः।

पतङ्गे वृश्चिके याते वसुपक्षं गते शनौ।
इदं स्तोत्रं प्रदद्यां च भवामि शंकर ह्यहम्॥ ?

507

TR1078 तकारादिस्वरूपाख्यसहस्रनामस्तोत्रम्

Beginning:

सुमेरुशिखरे रम्ये नानादेवगणावृते।
कामेश्वरं समालिङ्ग्य पप्रच्छ त्रिपुरा परा॥

श्रीत्रिपुरा बाला उवाच—

विना ध्यानं विना न्यासं विना पूजां विना बलिम्।
. . . . . .
केन वा तारिणी विद्या प्रसीदति कलौ युगे॥
हे महेश महादेव भक्तिमुक्तिप्रदायक।
आशुतोष कृपानाथ कृपया कथय प्रभो॥

श्रीकामेश्वर उवाच—

धन्ये श्रीत्रिपुरे बाले साधु पृष्टं त्वया प्रिये।
. . . . . .
तकारादिस्वरूपाख्यं नामसाहस्रकं शृणु॥
. . . . . .

ओं अस्य श्रीतकारादिस्वरूपाख्यसहस्रनामस्तोत्रस्य अक्षोभ्य ऋषिः, अनुष्टुप् छन्दः, श्रीब्रह्मानन्दमयी तारा देवता, अणिमाद्यष्टसिद्धिचतुर्वर्गसिद्धये विनियोगः।

स्त्रीं श्रीं स्त्रीं हूं मन्त्ररूपा स्त्रींरूपा स्त्रींस्वरूपिणी।
स्त्रींबीजजपसंतुष्टा स्त्रींबीजजपसिद्धिदा॥

End:

तन्त्रविद्याप्रियतमा तन्त्राचारपरायणा।
त्रिःफट् स्वाहानमस्तन्त्रं त्रूं तूं जूं फट्स्वरूपिणी॥
इति ते कथितं बाले रहस्यं परमाद्भुतम्।
. . . . . .
इति ते कथितं बाले किमन्यत् श्रोतुमिच्छसि॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इति परमरहस्यं गोपितं . . . . त्रिदिवसुखनिनादपसिद्धिसंज्ञप्रमाणम् (?) ।
शुचिरशुचिरहस्य(?)य: पठेत् पाठयेद्वा भवति मनुजव(जं? गं)स्तारिणीप्रेमपात्रम् ॥

Colophon:

इति श्रीबालाविलासतन्त्रे देवीश्वरसंवादे तकारादिस्वरूपाख्यसहस्रनामस्तोत्रं संपूर्णम् ।

508

PM2951 त्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्

Beginning:

नामाष्टशतकस्यास्य ऋषिरानन्दभैरव: ।
छन्दोऽनुष्टुप् तथा देवी देवतानन्दभैरवी ॥
मूलमन्त्रैस्त्रिभि: प्रोक्ता बीजशक्त्यादिकल्पना ।
मूलाङ्गैरङ्गक्लृप्ति: स्यात् तथा शेषं तु मूलवत् ॥
अथ ध्यानं प्रवक्ष्यामि तत्तद्वाञ्छितसिद्धये ।
बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ॥
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ।
परमानन्दलहरी परचैतन्यदीपिका ।
स्वयंप्रकाशकिरणा नित्यवैभवशालिनी ॥

End:

नित्यं नामाष्टकशतं पूजां होमं च तर्पणम् ।
जपन् स्तुतिं च संकल्प्य कुर्यादेवं विचक्षण: ।
सर्वसिद्धिमवाप्नोति देवता सुप्रसीदति ॥

Colophon:

इति श्रीत्रिपुरसुन्दर्या अष्टोत्तरशतनाम संपूर्णम् ।
इति श्रीकौलागमरहस्ये उत्तरभागे श्रीमत्त्रिपुरसुन्दरी-अष्टोत्तरशतनामावली समाप्ता ।

509

PM2810 त्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्

Colophon:

इति गर्भकौलागमरहस्ये श्रीललितामहात्रिपुरसुन्दर्या अतिरहस्याश्चर्याष्टोत्तरशतनाम-स्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

510

TR580 त्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम् (देवीवैभवाश्चर्याष्टोत्तरशतनामस्तोत्रम्)

Beginning:

श्रीपार्वत्युवाच—

सर्वज्ञ करुणासिन्धो सर्वभूतमहेश्वर ।
करुणाकरगम्भीरकटाक्षपदवीं सकृत् ॥
मयि प्रेरय मन्नाथ मन्दहासप्रभासिताम् ।
लभ्यते वर्णराड्व्यक्तं तव सौमुख्यसुन्दरम् ॥

. . . . . .

ईश्वरः—

अस्ति गुह्यतमं किंचिज्ज्ञेयं . . . त्यज्यतां त्वया ।
त्वदीयवैभवाश्चर्यनाम्नामष्टोत्तरं शतम् ॥

. . . . . .

नामाष्टकशतस्यास्य ऋषिरानन्दभैरवः ।
परमानन्दलहरी परचैतन्यदीपिका ।
स्वयंप्रकाशकिरणा नित्यवैभवशालिनी ॥

End:

एवं नामाष्टकशतमेतद् गोप्यतरं शिवे ।
नास्तिकक्लेशपाषण्डबौद्धपद्मदुर्गमम् ॥

. . . . . .

आश्चर्यनामाष्टशतमेवं प्रीतिर्भवेन्मम ।
स त्रिः प्रणवमूलान्ते नामोच्चार्य ततः परम् ।
देवीश्रीपादुके द्वे तु पूजयामीति पूजयेत् ॥
तर्पयेत् तर्पयामीति देव्यै स्वाहेति होमकृत् ।
नमस्कारे जपे चैव नमोऽन्तं परिकल्पयेत् ॥

Colophon:

इति श्रीमद्रुभैकुलार्णवे रहस्यजीवतन्त्रे पार्वतीश्वरसंवादे श्रीदेवीवैभवाश्चर्याष्टोत्तरशतदिव्यनामस्तोत्रकथनं समाप्तम् ।

511

68243 दक्षिणकालीसहस्रनामस्तोत्रम्

Beginning:

कैलासशिखरे रम्ये नानादेवगणैर्वृते ।
नानावृक्षलताकीर्णे नानापक्षिरवैर्युते ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

चतुर्मण्डपसंयुक्ते शृङ्गारे मण्डपे स्थितम् ।
समाधौ संस्थितं शान्तं क्रीडन्तं योगिनीप्रियम् ।
तत्र मौनधरं दृष्ट्वा शिवा पृच्छति शंकरम् ॥

श्रीदेव्युवाच—

किं त्वया जप्यते नाथ किं त्वया स्मर्यते सदा ।
. . . . . .

श्रीशिव:—

विना मन्त्रं विना स्तोत्रं विनैव तपसा प्रिये ।
. . . . . .
कथ्यते नामसाहस्रं सावधानमना: शृणु ॥
सर्वसाम्राज्यमेधाख्यनामसाहस्रकस्य च ।
महाकाल ऋषि: प्रोक्त उष्णिक् छन्द: प्रकीर्तितम् ॥
देवता दक्षिणाकाली माया बीजं प्रकीर्तितम् ।
कालिकावरदानादिस्वेष्टार्थे विनियोगत: ॥
कीलकेन षडङ्गानि षड् दीर्घस्तेन कारयेत् ।
ध्यानं च पूर्ववत् कृत्वा साधयेत् स्वेष्टसाधनम् ॥

ओं अस्य श्रीसर्वसाम्राज्यमेधाश्रीमद्दक्षिणकालिकारूपककारात्मकदिव्यसहस्रनाममहामन्त्रस्य महाकाल ऋषि:, उष्णिक् छन्द:, श्रीमद्दक्षिणकालिका देवता, क्रीं बीजम्, क्रूं शक्ति:, क्रीं कीलकम्, राजराजेश्वरीसर्वविद्यामहाराज्ञीश्रीमद्दक्षिणकालिकावरदानाद्यखिलेष्टार्थसिद्ध्यर्थे धर्मकाममोक्षार्थे सर्वकामनासमृद्ध्यर्थे जपे विनियोग: ।

क्रीं काली क्रूं कराली च कल्याणी कमला कला ।
कलावती कलाद्या च कलापूजा कलात्मिका ॥

End:

क्रों क्रां क्रूं फट् मन्त्रवर्णा क्रीं ह्रां हुं फट् नम: स्वधा ।
क्रीं क्रां क्रां ह्रीं ह्रां ह्रां हुं हुं फट् स्वाहामन्त्ररूपिणी ॥
इति श्रीसर्वसाम्राज्यमेधानामसहस्रकम् ।
सुन्दरीवरदानाख्यस्वरूपाभेदमेव च ॥
कथितं दक्षिणाकाल्या: सुन्दर्या: प्रीतियोगत: ।
. . . . . .
इति संक्षेपत: प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।
ध्यायेद्गुरुपदाम्भोजं शुक्लरक्तसमाश्रितम् ॥

Colophon:

इति श्रीमहायोगिश्रीमदादिनाथविरचितायां कालीसंवादसुन्दरीवरदानाख्यकालीस्वरूपदिव्यनामसहस्रस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

513

TR1063 दुर्गाशतनामस्तोत्रम्

Beginning:

ईश्वर उवाच—

शतनाम प्रवक्ष्यामि शृणुष्व कमलासनि ।
यस्य प्रसादमात्रेण दुर्गा प्रीता भवेत् सती ॥
सती साध्वी भवप्रीता भवानी भयमोचनी।
आर्या दुर्गा जया सौम्या त्रिनेत्रा भूतधारिणी ॥

End:

भौमावास्यानिशाभागे चन्द्रे शतभिषग्गते ।
विलिख्य प्रपठेत् स्तोत्रं भवेत् सह पदापदम् (?) ॥

Colophon:

इति विश्वसारतन्त्रे दुर्गायाः शतनामस्तोत्रं समाप्तम् ।

514

68338 दुर्गाष्टोत्तरशतनामावलिः

Beginning:

ओं महालक्ष्म्यै नमः । महाकाल्यै नमः । महाकन्यकायै नमः । महासरस्वत्यै नमः । भक्ता- . . . . नमः । ईशानायै नमः ।

End:

आधारायै नमः । निराधारायै नमः । सर्वोपद्रवशान्तिकारिण्यै नमः । महालक्ष्म्यै नमः । भूम्यै नमः । महालक्ष्म्यै नमः । ओम् ।

Colophon:

. . . . दुर्गाष्टोत्तरशतं संपूर्णम् ।

515

68369 दुर्गासहस्रनामस्तोत्रम्

Beginning:

तं मन्महे महेशानं महेशानीप्रियार्भकम् ।
महेशानप्रियगणेशानमीशमनामयम् ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि दुर्गानामसहस्रकम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

आयुरारोग्यस्वस्तिदं पुत्रपौत्रकरं परम् ॥

. . . . . .

ब्रह्मोवाच—

नान्यत् पश्यामि शरणं त्रैलोक्ये सचराचरे ।
संस्मारितां तु शक्तिं वै सद्यः संसारतारणीम् ।
स्तौमि नामसहस्रेण लोकस्यार्तिहरां शिवाम् ॥

अस्य रहस्यस्तोत्रस्य प्रजापतिर्ऋषिः, अनुष्टुप् छन्दः, आधारशक्तिर्भगवती दुर्गादेवी देवता, श्रीदुर्गाप्रीत्यर्थसहस्रनामजपे विनियोगः ।

नमोऽस्तु ते महादुर्गे दुर्गे दुर्गार्तिहारिणि ।
सांख्ययोगोद्भवे वीरे वरदे देवपूजिते ॥

End:

किं स्तौमि चतुर्मुखेन सर्वा त्वं विश्वरूपिणी ।
स्तव्यासि मुखलक्षेण विश्वमूर्ते नमोऽस्तु ते ॥
एवं स्तुता तदा देवी विश्वात्मा परमेष्ठिना ।

. . . . . .

सैव पालयते विश्वं सैव विश्वं प्रसूयते ।
सैव संहरते विश्वं विश्व सैव द्विजोत्तमाः ।
तुष्टा भवति सानेन रहस्यमिदमीरितम् ॥
तया तोषितया तुष्टं त्रैलोक्यं सचराचरम् ।
त्रैलोक्येनेह तुष्टेन कृतकृत्यो भवेद् ध्रुवम् ॥

Colophon:

इति स्कान्दे पुराणे चतुरशीतिसाहस्रे अम्बिकायै दुर्गामाहात्म्यरहस्यकथने विष्णुशंकरयोर्युद्धसमाधाने श्रीदुर्गादेव्याः सहस्रनामस्तोत्रं समाप्तम् ।

516

68341 दुर्गासहस्रनामावलिः

Beginning:

ओं महादुर्गायै नमः । दुर्गायै नमः । दुर्गातिहारिण्यै नमः । सांख्ययोगोद्भवायै नमः । वीरायै नमः । वरदायै नमः ।

End:

चतुर्मुखस्तुत्यै नमः । सर्वायै नमः । विश्वरूपिण्यै नमः । मुखलक्षेण स्तव्यायै नमः । विश्वमूर्त्यै नमः । श्रीमहादुर्गायै नमः । समस्तोपचारान् समर्पयामि ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

517

68421 देव्यष्टोत्तरशतनामस्तोत्रम्

Beginning:

अनाद्यायाभिवाद्याय मायिने गतमायिने ।
अरूपाय स्वरूपाय शिवाय गुरवे नमः ॥

श्री सूत उवाच—

अष्टोत्तरशतं देव्या नाम्नामत्यन्तपावनम् ।
मूलमन्त्रात्मकं वक्ष्ये शृणुध्वं मुनिसत्तमाः ॥
. . . . .

श्रीभगवान् स्कन्दः—

देव्याश्चाष्टोत्तरशतस्तोत्रस्यास्य महामुने ।
स्कन्द एव ऋषिः पङ्क्तिश्छन्दः प्रोक्तास्य देवता ॥
जगन्माता महादेवी श्रीमत्त्रिपुरसुन्दरी ।
विद्यायाः प्रथमः खण्डो बीजं शक्तिर्द्वितीयकम् ॥
खण्डस्तृतीयः संप्रोक्तः कीलकं मम सर्वदा ।
देव्याः प्रसादसिद्ध्यर्थे विनियोग ऋषे स्मृतः ॥

. . . . स्कन्द उवाच—ओं ऐं ह्रीं श्रीं ओं

कल्याणसुन्दरी मूर्तिः कन्दर्पानन्तसुप्रभा ।
कारुण्यसागराकारा कलिदोषैकहारिणी ॥

End:

एतद्भक्ताय दातव्यं प्रशान्ताय द्विजातये ।
नाभक्ताय वदेदेतद् देविप्रीतिविवर्धये ।
सत्यं सत्यं मुनिश्रेष्ठा गुरोः प्राप्य पठेद् द्विजः ॥

Colophon:

इति श्रीशैवपुराणे दे . . . ।

520

75945 देव्यष्टोत्तरशतनामावलिः

Beginning:

महामनोन्मनीशक्त्यै नमः । शिवशक्त्यै नमः । शिवंकर्यै नमः । इच्छाशक्तिज्ञानशक्तिक्रिया-शक्तिस्वरूपिण्यै नमः । शान्त्यतीतकलानन्दायै नमः । शिवमायायै नमः । शिवप्रियायै नमः । सर्वज्ञायै नमः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

भुक्तिमुक्तिफलप्रदायै नमः। विज्ञाननयनायै नमः। प्रज्ञायै नमः। प्रज्ञानफलदायिन्यै नमः। अहंकारकलात्मिकायै नमः। पराशक्त्यै नमः। परात्परायै नमः।

Colophon:

देव्यष्टोत्तरशतं समाप्तम्।

525

71547 पार्वत्यष्टोत्तरशतनामावलिः

Beginning:

अस्य श्रीपार्वत्यष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य वेदव्यासभगवानृषिः, अनुष्टुप् छन्दः। श्रीपार्वती देवता, ओमिति बीजम्, भवानीति कीलकम्, पार्वतीप्रसादसिद्ध्यर्थे जपे विनियोगः। ध्यानम्—

नमस्ते देवि कल्याणि सर्वसिद्धिप्रदायिनि।
सुप्रसन्ने महालक्ष्मि पीनोन्नतपयोधरे॥

व्यास उवाच—

ओं अचिन्त्यलक्षणायै नमः। अमरेश्वर्यै नमः। पार्वत्यै नमः। प्रलयान्तिकायै नमः पर्वतात्मजायै नमः। प्रणवात्मिकायै: नमः। प्रपञ्चातीतायै नमः। अव्यक्तायै नमः।

End:

भाग्यप्रदायै नमः। मङ्गल्यायै नमः। मङ्गलप्रदायै नमः। मङ्गलात्मिकायै नमः। मङ्गलमूर्तये नमः। मङ्गलवर्धिन्यै नमः। मङ्गलवदनायै नमः। श्रीपार्वत्यै नमः।

Colophon:

इति श्रीपार्वत्यष्टोत्तरं संपूर्णम्।

526

70331 बालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्

Beginning:

सदाबाला महाबाला वरबाला नमोऽस्तु ते।
सरस्वति श्रियं देहि एकवक्त्रे नमोऽस्तु ते॥
स्थूलरूपी सूक्ष्मरूपी सर्वरूपी नमोऽस्तु ते।
नादबिन्दुकलातीते देवि देवि नमोऽस्तु ते॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

वस्त्रभूषाद्यलंकारे दृष्टरूपि नमोऽस्तु ते ।
दृष्टरूपी द्रष्टृरूपी सृष्टिरूपी नमोऽस्तु ते ॥
धूपं दीपं च नैवेद्यं ताम्बूलं चैव धारिणम् (?) ।
पीताम्बरधरा देवी शुद्धदेवि नमोऽस्तु ते ॥

Colophon:

इति श्रीमच्छंकराचार्यविरचितं बालात्रिपुरसुन्दर्यष्टोत्तरशतदिव्यनामस्तोत्रं संपूर्णम् ।

527

73710 बालाष्टोत्तरशतनामस्तोत्रम्

Beginning:

विशदकमठजुष्टा पुण्डरीकोपविष्टा धवलकमलदेहा मालतीबद्धकेशा ।
शशधरवरवस्त्रा रत्नताटङ्ककर्णा जयतु जितसमस्ता भारती वेत्रहस्ता ॥
श्री उमा पार्वती बद्धा भवानी विजया जया ।
वाणी सरस्वती गौरी वाराही कमलासना ॥

End:

अष्टोत्तरशतं नाम्नां श्रीबालात्रिपुरास्तवम् ।
त्रिसंध्यं कीर्तयेद्भक्त्या सर्वसिद्धिं लभेत् सदा ॥
आयुरारोग्यमैश्वर्यं सुतपत्न्यादिवर्धितम् ।
सिद्धसारस्वतं नाम एषणानाशनं भवेत् ।
षट्कर्मसिद्धिदं स्तोत्रं शुभ्रं त्रैलोक्यमोहनम् ॥

ध्यानम्—

रक्तारविन्दमकरन्दरसावलीनपानप्रमत्तललितालिकुलालकान्ताम् ।
वीणामनोरमणपाणिविनोदलीलां वाणीं भजे सुकवितामधुपानलीलाम् ॥

Colophon:

इति श्रीबालाष्टोत्तरशतकपूजाविधानं संपूर्णम् ।

528

73102 बालाष्टोत्तरशतनामस्तोत्रम्

Beginning:

महागणेशभगिनी बाला विश्वविमोहिनी ।
नववर्षात्मिका धन्या ललितानन्दिनी कला ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कलात्मिका कलानाथमुखी कर्मफलप्रदा ।
एकाक्षरी त्र्यक्षरी च ज्ञानदा ज्ञानविग्रहा ॥

End:

सनकादिमुनिध्येया साम्राज्यपददायिनी ।
सत्यसंधा सत्यरूपा कल्याणी जगदम्बिका ॥

Colophon:

इति बालाष्टोत्तरम् ।

530

73710 बालासहस्रनामस्तोत्रम्

Beginning:

अरुणकिरणजालैरञ्जिताशावकाशा विधृतजपपटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या फुल्लकल्हारसंस्था निवसतु हृदि बाला नित्यकल्याणशीला ॥
पुस्तकजपपटहस्ते वरदाभयचिह्नचारुलते ।
कर्पूरामलदेहे वागीश्वरि शोधयाशु मम चेतः ॥

इति ध्यात्वा,

रक्तवस्त्रपरीधानां फुल्लकल्हारहस्तकाम् ।
तां देवीं च नुमो बालां नित्यकल्याणरूपिणीम् ॥

इति ध्यात्वा पञ्च मुद्रा नमस्कृत्य ।

उमा गौरी शिवा कान्ता शक्तिर्लोकमहेश्वरी ।
वामा वामेश्वरी रम्या ज्येष्ठा शक्तिर्ध्रुवा स्थिरा ॥
विष्णुमाता विष्णुगर्भा लोकमाता यशस्विनी ।
भूतधात्री विनिष्ठा च ब्रह्माणी ब्रह्मवत्सला ॥

End:

संवत्सरेण युक्तात्मा सद्गतिर्मानवाप्नुयात् ?।
उत्तमां सिद्धिमाप्नोति नात्र कार्या विचारणा ॥
इत्येतत् कथितं सर्वं रहस्यं भुवि दुर्लभम् ।
देव्या नामसहस्रं तु मन्त्रोद्धारमथ शृणु ।

Colophon:

इति श्रीहंसयामले महातन्त्रे बालानामसहस्रं संपूर्णम् ।

531

PM2733 बालासहस्रनामस्तोत्रम्

Beginning:

कैलासशिखरे रम्ये नानारत्नविचित्रिते ।
देवदेवं समा(नीतं ?)सीनं महादेवं जगद्गुरुम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

प्रणम्य शिरसा नाथं पार्वती वाक्यमब्रवीत् ।
इतीदं परमं गुह्यं भुक्तिमुक्तिप्रदायकम् ॥
तस्या नामसहस्रं तु कथयस्व महेश्वर ।

श्रीमहादेव उवाच . . . . अस्य श्रीबालात्रिपुरासहस्रनामस्तोत्रस्य दक्षिणामूर्तिः ऋषिः, पङ्क्तिः छन्दः, श्रीबालात्रिपुरसुन्दरी देवता, सर्वार्थसाधने पाठे विनियोगः ।

बाला कात्यायनी गौरी पार्वती शैलनन्दिनी ।
पद्माक्षी पद्मवक्त्रा च पद्माकारकरा तथा ॥

End:

सर्ववर्णशरीरा च सर्वमन्त्रमयी परा ।
बालात्रिपुरवासिन्या मम वक्त्राद्धि निःसृतम् ॥
सर्वपापहरं पुण्यं नाम्नामष्टसहस्रकम् ।
गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्तितम् ॥

. . . . . .

एतस्य पठनाद् देवि धारणाद् वा विशेषतः ।
सत्यं च साधकः सत्यं साक्षाद् देवः सदाशिवः ॥

Colophon:

इति श्रीरुद्रयामले पार्वतीमहादेवसंवादे बालासहस्रनामस्तोत्रं संपूर्णम् ।

532

70331 बालासहस्रनामस्तोत्रम्

Beginning:

मन्दारकुन्दपुष्पेषुपाशाङ्कुशचतुर्भुजाम् ।
उद्यत्सूर्यनिभां वन्दे महात्रिपुरसुन्दरीम् ॥

श्रीदेव्युवाच—

भगवन् भाविताशेषविशेष करुणानिधे ।
देव्यास्त्रिपुरसुन्दर्या मन्त्रनामसहस्रकम् ॥

. . . . . .

ओं अस्य श्रीत्रिपुरसुन्दरीसहस्रनामस्तोत्रमन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीमहात्रिपुरसुन्दरी देवता, ऐं बीजम्, क्लीं शक्तिः, सौः कीलकम्, श्रीत्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे जपे विनियोगः। ध्यानम्—

. . . . . .

सुभगा सुन्दरी सौम्या सुषुम्ना सुखदायिनी ।
सुमङ्गली शुभकरी शोभना ललिता शिवा ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

ऐंकारी वासुदेवेशी खड्गिनी चण्डदण्डिनी ।
क्लींकारी वत्सरा हृष्टा सौःकारी मन्दहासिनी ॥
इति त्रिपुरसुन्दर्या मन्त्रनामसहस्रकम् ।
कथितं तव देवेशि मन्त्रनामसहस्रकम् ॥
. . . .
एवमेतस्य मन्त्रस्य प्रभावो वर्णितो मया ।
न शक्यते वरारोहे कल्पकोटिशतैरपि ॥

Colophon:

इति त्रिपुरागमे गौरीशिवसंवादे श्रीबालात्रिपुरसुन्दरीस्तोत्रं संपूर्णम् ।

533

67815 बालासहस्रनामस्तोत्रम्

Colophon:

इति श्रीकुलार्णवसंहितायां बालात्रिपुरसुन्दरीसहस्रनामस्तोत्रं संपूर्णम् ।

The following verse is written after the colophon:

त्रिकोणं चैव षट्कोणं वसुपत्रं वरानने ।
चतुरश्रं चतुर्द्वारं बालाचक्रमिति स्मृतम् ॥

537

PM2744 भवानीसहस्रनामस्तोत्रम्

Beginning:

अस्य श्रीस्तवराजस्य सदाशिव ऋषिः स्मृतः ।
देवता जगतां धात्री त्रिपुरा परमोत्तमा ॥ १ ॥
. . . .
ऊर्ध्वं तुण्डधराधस्तात् पातु त्रिपुरभैरवी ।
एवं न्यासं समाधाय पठेद् विघ्नविवर्जितः ॥ ९ ॥
कैलासशिखरे रम्ये देवदेवं महेश्वरम् ।

End:

भूयात् सा वरदा लोके साधूनां विश्वमङ्गला ॥

Colophon:

इति श्रीरुद्रयामलतन्त्रे नन्दिकेश्वरसंवादे ईश्वरप्रोक्तं महाप्रभावं श्रीभवानीसहस्रनामस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

The following verse is added after the colophon:

सिंहादुत्थाय कोपाद्दडडदडदडद्धावमाना भवानी
दैत्यानां दिव्यशस्त्रैस्त्रतटतटतटत्रोटयन्ती शिरांसि ।
तेषां रक्तं पिबन्ती घुघुटघुटघुटत् प्रेषयन्ती पिशाचान्
तृप्ता सृप्ता हसन्ती खखडखडखड: शांभवी न: पुनातु ॥

540

PM2655 भवानीसहस्रनामस्तोत्रम् (गुह्यभवानीसहस्रनामस्तोत्रम्)

Beginning:

अथ न्यासो लिख्यते । ओं एकवीरायै अं० । ओं महामायायै त० । ओं पार्वत्यै म० । ओं गिरिशप्रियायै अ० । ओं गौर्यै क० । ओं करालिन्यै करतल० । एवं हृदयादिन्यास: । ओं अस्य श्रीभवानीसहस्रनामस्तवराजस्य भगवान् महादेव ऋषि:, अनुष्टुप् छन्द:, आद्या शक्तिर्भवानी देवता, ओं ह्रीं बीजम्, श्रीं शक्ति:, क्लीं कीलकम्, श्रीभवानीप्रीत्यर्थे जपे विनियोग: . . .

कैलासशिखरे रम्ये देवदेवं जगद्गुरुम् ।

End:

भूयात् सा वरदा लोके साधूनां सर्वमङ्गला ।
यदक्षरं पदं भ्रष्टं मात्रास्पर्शविवर्जितम् ॥
तत् सर्वं पूर्णतामेतु त्वत्प्रसादात् सुरेश्वरि ।
पूजाहोमविधिश्चैव जपमुद्रादिका क्रिया ॥
सम्यग् ज्ञानं न जानामि नामोच्चारात् प्रसीदताम् ।
सर्वेषां पश्चिमाम्नायभाविताय च योगिने ॥
वक्रभक्तानुक्रमेण पूजाविविधकुर्वता(?) ।

ओं ह्रीं श्रीं ह्रां क्लीं सप्रकाशिनि वद वद वाग्वादिनि भगवति मम शास्त्रप्रकाशं कुरु कुरु ह्रीं स्वाहा ।

Colophon:

इति श्रीरुद्रयामले ईश्वरनन्दिसंवादे गुह्यभवानीसहस्रनामस्तोत्रं संपूर्णम् ।

धातृनामसंवत्सर आषाढबहुल० ७ गुरुवासरे उत्तरायणान्त्यदिवसे आलम्पुराख्यग्रामे श्रीनृसिंहानन्दनाथेन लिखितं स्वार्थं परार्थं च ।

541

PM81 भवानीसहस्रनामस्तोत्रम्

Beginning:

शङ्खत्रिशूलशरचापकरां त्रिनेत्रां तिग्मेतरांशुकलया विलसत्किरीटाम् ।
सिंहस्थितामसुरसिद्धनुतां च दुर्गां दूर्वानिभां दुरितदु:खहरीं नमामि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अकुलकुलपतन्ती चक्रमध्ये स्फुरन्ती . . . पवन्ती कण्टकान् भक्षयन्ती ।
दुरितमपहरन्ती साधकान् पोषयन्ती जयति जगति देवी सुन्दरी क्रीडयन्ती ॥
चतुर्भुजामेकवक्त्रां पूर्णेन्दुवदनप्रभाम् ।
खड्गशक्तिधरां देवीं वरदाभयपाणिकाम् ॥
प्रेतसंस्थां महारौद्रीं भुजगेनोपवीतिनीम् ।
भवानीं कालसंहारबद्धमुद्राविभूषिताम् ॥
जगत्स्थितिकरीं ब्रह्मविष्णुरुद्रादिभिः सुरैः ।
स्तुतां तां परमेशानीं नौम्यहं विघ्नहारिणीम् ॥
ओं कैलासशिखरे . . . . ॥

543

72113 **मीनाक्ष्यष्टोत्तरशतनामावलिः**

Beginning:

सुमीननयनायै नमः । सूदाना-(? सुन्दरनाथा-)र्धशरीरिण्यै नमः । देव्यै नमः । काञ्चनमालात्मकन्यकायै नमः । कनकप्रभायै नमः । त्रिकुचायै नमः । त्रिदशाराध्यायै नमः ।

End:

श्रीकरायै नमः । महाज्ञानिन्यै नमः । तटातकायै नमः । श्रीसुन्दरेशवामस्थायै नमः । श्रीमत्सिंहासनेश्वर्यै नमः । श्रीमीनाक्ष्यै नमः ।

555

PM2804 **ललितात्रिशतीस्तोत्रम्**

Adds the following *dhyānaśloka* at the beginning:

सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरां जपविधौ स्मरेदम्बिकाम् ॥

अगस्त्य उवाच . . . .

559

66640 **ललितात्रिशतीस्तोत्रम्**

Beginning:

अस्य श्रीत्रिशतीस्तोत्रमहामन्त्रस्य आनन्दभैरव ऋषिः, गायत्री छन्दः, परब्रह्मस्वरूपिणी महात्रिपुरसुन्दरी देवता, ऐं बीजम्, क्लीं शक्तिः, सौः कीलकम्, श्रीमहात्रिपुरसुन्दरीप्रीत्यर्थे जपे विनियोगः । ध्यानम् . . . . ककाररूपा कल्याणी + + + ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

ह्रींकारमन्त्रसर्वस्वा ह्रींकारपरसौख्यदा ॥
इत्येतत् पठते नित्यं श्रद्धया च समन्वितः ।
हयग्रीवेण कथितं नाम्नां देव्याः शतत्रयम् ॥
लोपामुद्रा च सागस्त्य सगरेण विलेपिना । ?
भरतेन वसिष्ठेन विश्वामित्रेण धीमता ॥
पुरूरवादिबहुभिर्जप्तं देवीशतत्रयम् ।
लब्धकामा ययुः स्वर्गं केचिन्मोक्षमवाप्नुयुः ॥
. . . .
बहुनोक्तेन किं देव्याः स्तोत्रपाठेन नित्यशः ।
सर्वान् कामान् समाप्नोति सत्यं सत्यं न संशयः ॥

Colophon:

इति श्रीहयग्रीवविरचिते पञ्चदशीमन्त्रगर्भितं त्रिशतीनामस्तोत्रं समाप्तम् ।

560

68360 ललितात्रिशतीस्तोत्रम्

Beginning:

अस्य श्रीराजराजेश्वरीस्तोत्रमहामन्त्रस्य परब्रह्म ऋषिः, अनुष्टुप् छन्दः, श्रीराजराजेश्वरी देवता, श्रीं बीजम्, ह्रीं शक्तिः, ह्रूं कीलकम्, मम राजराजेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः। राजराजेश्वरी अं०। राजपरमेश्वरी त०। महात्रिपुरसुन्दरी म०। श्रीं ह्रीं क्लीं सर्वजनसंमोहिनी अना०। श्रीं ह्रीं क्लीं सर्वजनवशंकरी कनि०। सकलस्थावरजङ्गमस्य मुखहृदयवशं कुरु स्वाहा करतल०। एवं हृदयादिन्यासः। ध्यानम्—

इक्षुकोदण्डपुष्पेषुपाशाङ्कुशचतुर्भुजाम् ।
उद्यत्सूर्यनिभां वन्दे महात्रिपुरसुन्दरीम् ॥

पञ्चपूजा यथाशक्ति मूलं जपित्वा। ककाररूपा + + + ॥

End:

इत्येतत् ते मयाख्यातं दिव्यं नामशतत्रयम् ।
रहस्यातिरहस्यं च गोपनीयं त्वया मुने ॥

Colophon:

इति त्रिशती समाप्ता ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

561

77414 ललितात्रिशतीस्तोत्रम्

Beginning:

अस्य श्रीत्रिशतीनामस्तोत्रमहामन्त्रस्य आनन्दभैरव ऋषिः, देवी गायत्री छन्दः, श्रीमहात्रिपुरसुन्दरी ललिताम्बा देवता, ऐं क ए ई ल ह्रीं बीजम्, क्लीं ह स क ह ल ह्रीं शक्तिः, सौः स क ल ह्रीं कीलकम्, श्रीमहात्रिपुरसुन्दरीललिताम्बाप्रसादसिद्ध्यर्थे त्रिशतीनामशतस्तोत्रजपे विनियोगः . . . . ककाररूपा + + + ॥

591

PM2805 ललितात्रिशतीभाष्यं त्रिशतीनामार्थप्रकाशिका

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशंकराचार्यविरचितायां त्रिशतीनामार्थप्रकाशिकायां तृतीयखण्डचतुर्थवर्णनामार्थप्रकाशनं पञ्चदशं समाप्तम् ।

594

67111 ललितापञ्चशतीस्तोत्रम्

Beginning:

(कल्याणी करु)णामूर्तिः कल्याणगिरिमन्दिरा ।
चिदग्नि(जाता चिद्रूपा दि)विषद्रक्षणक्षमा ॥
पाशाङ्कुशधनुर्बाणलसद्बाहुचतुष्टया ।
(बालार्क)श्रेणिसंकाशा नवयौवनगर्विता ॥

End:

योगीन्द्रमानसमहागुहामत्तेभवैरिणी ।
सर्वोपनिषदाकारा पञ्जरश्रीशुकाङ्गना ॥
बृन्दारकेन्द्रमकुटीधोरणीधार्यपादुका ।
महाकामेशसुलभा ललिता परमेश्वरी ॥

Colophon:

पञ्चशती संपूर्णा ।

596

67055 ललितापञ्चशतीस्तोत्रम् (ललितापञ्चशतीस्तवसारः)

Beginning:

कदाचित् कमलानाथं कमलायतलोचना ।
पप्रच्छ करुणाराशिं प्रणम्य शिरसा मुहुः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

मन्नाथ किं त्वया नित्यं जप्यते दृढभक्तित: ।
तन्मे ब्रूहि मयि प्रीतिर्यद्यस्ति मधुसूदन ॥
इति पृष्ट: श्रिया विष्णुरुवाच कमलां हसन् ।
. . . .
इयं पञ्चशती नाम्नां युष्मद्विरचिता मम ।
नामसारस्तुतिर्नाम विश्रुता स्याज्जगत्त्रये ॥
. . . .
कल्याणी करुणामूर्ति: कल्याणगिरिमन्दिरा ।
चिदग्निजाता चिद्रूपा दिविषद्रक्षणक्षमा ॥

End:

महाकामेशसुलभा ललिता परमेश्वरी ।
इति ते कथितं स्तोत्रं नामसारात्मकं मया ॥
. . . .
शृङ्गारनायिका माता करुणारसवारिधि: ।
मोक्षसाम्राज्यसाम्राज्ञी तवाभीष्टं प्रदास्यति ॥

Colophon:

इति चातुर्लक्षग्रन्थविस्तरे सौभाग्यलक्ष्मीकल्पे उपरिभागे मोक्षपादे कमलाकमलाक्षसंवादे श्रीललितापञ्चशतीस्तवसारो नाम पञ्चाश: पटल: ।

610

67061 ललिताष्टोत्तरशतनामावलि: (दिव्यनामाष्टोत्तरशतम्)

Beginning:

रजताचल + + + नमो नम: ॥

End:

महादेवसमायुक्तमहादीप्त्यै नमो नम: ॥
इदं गिरीशगिरिजानाम्नामष्टोत्तरं शतम् ।
व्यासेन कथितं सर्वं सर्वरोगनिवारणम् ॥
स्तोत्रं श्रीकण्ठदेवस्य भवान्या: पठतेऽन्वहम् ।
स नरो महदैश्वर्यं लभते वाञ्छितं फलम् ॥
आयुर्विद्यां च पुत्रांश्च भार्यामपि मनोहराम् ।
अनेकक्षेत्रधान्यानि गाश्च दोग्ध्री: पयस्विनी: ॥
एतन्नाम सकृद्विप्र: पठन्नेव न संशय: ।
देहान्ते मुक्तिमाप्नोति पुनरावृत्तिवर्जिताम् ॥

Colophon:

इति श्रीशिवरहस्ये उमामहेश्वरसंवादे दिव्यनामाष्टोत्तरशतं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

611

66640 ललितासहस्रनामस्तोत्रम्

Beginning:

अगस्त्य उवाच—

अश्वानन महाबुद्धे सर्वशास्त्रविशारद ।
कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥

. . . . . .

अस्य श्रीललितासहस्रनामस्तोत्रमहामन्त्रस्य वशिन्यादिभ्यो वाग्देवाताभ्यो ऋषिभ्यो नमः शिरसि । अनुष्टुप्छन्दसे नमः मुखे । श्रीमहात्रिपुरसुन्दर्यै देवतायै नमः हृदये . . . । श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।

End:

श्रीशिवा शिवशक्त्यैक्यरूपिणी ललिताम्बिका ।
इत्येवं नामसाहस्रं कथितं ते घटोद्भव ॥

. . . . . .

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम् ।
आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत् ॥

Colophon:

इति ब्रह्माण्डपुराणे ललितासहस्रनामस्तोत्रं संपूर्णम् ।

647

PM2815 ललितासहस्रनामस्तोत्रभाष्यशोधनम्

This is more or less identical with the comm. of Bhāskararāya. See pp. 86 and 104 of Nirnayasagar ed. (1914) for the corresponding portions of the following beginning and end.

Beginning:

. . . वेषमात्रोपादानात् कृतार्थोऽस्मीति तुष्टिरुपादानाख्या । काल एव सेत्स्यति किं ध्यानक्लेशेनेति चेत्तुष्टिः कालाख्या । दैवोदय देव संत्स्यतीति तुष्टिर्भाग्याख्या । एताश्चात्मानमधिकृत्य भवन्तीत्याध्यात्मिकाः । बाह्यास्तु शब्दादिविषयपञ्चकभेदेन पञ्चधा ।

End:

मृगेन्द्रसंहितायां तु महदादिसप्तकरूपसुषुम्नावेष्टिता कुण्डलिन्येवाष्टप्रकृतिरूपा मूलप्रकृतिरुच्यत इत्युक्तम् । तेन तद्रूपा वा । अथवा पृथिव्यादीनामाकाशान्तानां मध्ये पूर्वपूर्वस्य विकृतिभूतस्योत्तरोत्तरं भूतं प्रकृतिः । आकाशस्य ब्रह्मैव प्रकृतिः । आत्मन आकाशः संभूत इति श्रुतेः । तस्य तु न . . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon: (on p. 3):

इति श्रीताण्डवशिवकृते भाष्यस्य शोधने ।
तृतीयशतकेनाभून्मरीच्याख्या कला वरा ॥

648

70016 ललितासहस्रनामस्तोत्रं चिद्विलासव्याख्यासहितम्

Beginning:

. . . मन्तःकलामेकामात्मनीनां सुधामयीम् ।
सदानन्दचिदाकारां स्वानुभूतामुपास्महे ॥
नत्वा श्रीविमलानन्दनाथश्रीगुरुपादुकाम् ।
कुर्वे श्रीललितानामसहस्रविवृतिं मुदे ॥

अगस्त्यमहामुनिः . . . हयग्रीवमुखान्मन्त्रन्यासपूजापुरश्चरणहोमरहस्यस्तोत्रैः सप्तभिः खण्डैः श्रीललिताम्नायाः रहस्यजातमाकर्ण्यापीतः परं रहस्यं नामसहस्रमस्तीति तपोबलान्निश्चित्य तद्गुरुभिः . . . पदिष्टमिति संदिहानः पृच्छतीत्याह सूतः—अगस्त्य उवाच । अगं विन्ध्यं स्त्यायति स्तम्भयतीत्यगस्त्यः ।

End:

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम् ।
आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत् ॥

Colophon (I):

इति श्रीललितानामसहस्रव्याख्याने श्रीविमलानन्दनाथगुरुचरणकिंकरेण विमर्शानन्दनाथेन विरचिते चिद्विलासाख्याने द्वादशी क्षमा कला । इति द्वादशी कला ।

यः स्त्रीपुंक्लीबरूपेण क्रीडते मायया स्वयम् ।
तस्मै सच्चित्सुखायास्तु शिवाय गुरवे नमः ॥
नत्वा श्रीविमलानन्दनाथ श्रीगुरुपादुकाम् ।
विमर्शानन्दनाथोक्तश्चिद्विलासः प्रकाशताम् ॥

Colophon (II):

इति श्रीविमलानन्दनाथगुरुचरणकमलपरिचरणकिंकरेण विमर्शानन्दनाथेन विरचितश्रीललितानामसहस्रव्याख्यानं समाप्तम् ।

650

67087 ललितासहस्रनामस्तोत्रव्याख्या ललितासहस्रनामप्रकाशः

Beginning:

अचिन्त्याद्भुतसोपानविश्रान्तिसरणीमणिम् ।
उमासहायमीशानं प्रणमामि सदाशिवम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अतिविस्तृतभाष्याब्धेः सारोद्धारे समुत्सुकाः ।
भजध्वं ललितानामसहस्रस्य प्रकाशनम् ॥
पञ्चाशदेक आदौ नामसु सार्धद्व्यशीतिशतम् ।
षडशीतिः सार्धान्ते सर्वे विंशतिशतत्रयं श्लोकाः ॥

आदौ पूर्वपीठिकायामित्यादिरर्थः । ध्यानश्लोकस्तु प्रत्यहं पठनीय इति वैषम्यध्वननाय एक इति विभज्य तस्य कथनम् । अगस्त्याख्यो हि महानृषिः श्रीविद्योपासकाग्रेसरः स्वदेशिकश्रीहयग्रीवमुखात् ब्रह्माण्डपुराणीयमन्त्रन्यासपूजापुरश्चरणहोमरहस्यस्तोत्रखण्डैः सप्तभिः खण्डैः श्रीमातुः प्रादुर्भावादिरहस्यजातमाकर्ण्य ततोऽपि परमरहस्यं नामसहस्रमस्तीति तपोबलादेव निश्चित्य तद्भक्तायापि मह्यं किमिति गुरुभिर्न दत्तमित्यनुपदेश . . . संदिहानः पृच्छतीत्याह भगवान् सूतः । अगस्त्य उवाच— अगं विन्ध्यं स्त्यायतीत्यगस्त्यः । स्त्यानं स्तम्भनम् ।

End:

'प्रहृष्टो वचनं प्राह' इत्यादिनोक्तान्तमेकेन श्लोकेनोपसंहरति भगवान् सूतः । सूत उवाच— इत्यु . . . आनन्दे स्वात्मानन्दे मग्नं विषयान्तरसंचाराराहित्येन तदेकप्रवणं हृदयं यस्य सः । पुलकाः आनन्दजन्यरोमाञ्चाः अस्य संजाताः तारकादित्वादितच् ।

Colophon:

इति श्रीललितानाम(सह)स्रप्रकाशे द्वादशोऽध्यायः संपूर्णः ।

इति श्रीललितानामसहस्रस्य प्रकाशनम् ।
कृतं विद्वत्समूहेषु जीयात् श्रीमातृतोषदम् ॥

Colophon (on fo. 78-b):

इत्यप्पादीक्षित इति विख्यातेनाष्टमेन गौरीशः ।
अप्पय्यदीक्षितानुच्छन्नस्य कृतिः कृता जीयात् ॥
कुप्पादीक्षितपुत्रः नरसिंहानन्दनाथ इति ।
कृतनामा गुरुचरणैः ग्रन्थकृतौ विज्ञेषु जिहेति ॥

672

PM2588 शारिकासहस्रनामस्तोत्रम्

Beginning:

कथयामि परां विद्यां सहस्राक्षाभिधां शिवे ।
शिलायाः शारिकाख्यायाः परं सर्वस्वरूपिणि ॥
विना नित्यक्रियां देवि विना न्यासं विनार्चनम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

विना पुरस्क्रियां जप्यं विना होमं च तर्पणम् ॥

. . . . . .

अस्य श्रीशारिकामन्त्रनामसहस्रस्य श्रीमहादेव ऋषिः, अनुष्टुप् छन्दः श्रीशारिका देवता, शां बीजम्, श्रीं शक्तिः, ह्रां कीलकम्, श्रीविद्यासिद्ध्यर्थे धर्मकामार्थमोक्षार्थे पाठे विनियोगः ।

. . . .

ऐं ह्रीं श्रीं हुं ह्रां आं शां श्रीः शारिका श्यामसुन्दरी ।
शिला शारी शुकी शान्ता श्यामा श्यामपयोधरा ॥

End:

शक्तिं संपूज्य देवेशि पठेत् स्तोत्रपरामयम् (?) ।
इह लोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत् ॥
इति नामसहस्रं तु शारिकाया मनोहरम् ।
गोप्यं गुह्यतमं लोके गोपनीयं स्वयोनिवत् ॥

Colophon:

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये शारिकामन्त्रनामसहस्रकं संपूर्णं समाप्तम् ।

673

77585 श्यामलानामसारसहस्रनामस्तोत्रम्

Beginning:

सौभाग्यलक्ष्मीः सौन्दर्यनिधिः समरसप्रिया ।
सर्वकल्याणनिलया सर्वेशी सर्वमङ्गला ॥
सर्ववश्यकरी सर्वा सर्वमङ्गलदायिनी ।
सर्वविद्यादानदक्षा संगीतोपनिषत्प्रिया ॥

End:

इति ते कथितो लक्ष्मि नामसारस्तवः प्रिये ।
श्यामलाया महादेव्याः सर्ववश्यप्रदायकः ॥

. . . . .

उषःकाले समुत्थाय श्यामलानाम कामदम् ।
जपति श्रद्धया युक्तो यो नरः शुद्धमानसः ॥
स तु वाणीमवाप्नोति सर्ववश्यप्रदायिनीम् ।
पुत्रार्थी शयने काले स भार्यानिकटे जपेत् ॥
तस्य देवी ददात्येव पुत्रं सद्गुणसंयुतम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ŚIVA-STOTRA-S

679

77644 अक्षरमालिकास्तोत्रम्

The following verses are added after the colophon:

संसारे जनतापरोगसहिते तापत्रयाक्रन्दिते
नित्यं पुत्रकलत्रवित्तविलसत्पाशेन बद्धं दृढम् ।
निर्वान्तं बहुपापवर्गसहितं कारुण्यदृष्ट्या विभो
श्रीमृत्युंजय भक्तवत्सल सतां मां पाहि विश्वेश्वर ॥
रक्ताभामरुणाम्बुजाभनयनामानन्दपूर्णाननां
मुक्ताहारमनोहरां कुचभरक्लान्तां सकाञ्चीगुणाम् ।
देवीं दिव्यरसान्नपूर्णविभवामम्भोजदर्वीकरां
ध्यायेच्छंकरवल्लभां त्रिणयनामम्बां सदान्नप्रदाम् ॥

अन्नपूर्णाध्यानम्—

वन्दे शूलधरां वरां वरजनैर्वन्द्यां त्रिणेत्रां शिवां
वन्दे कुङ्कुमलेपनां वरकृतां वन्दे जगन्मोहिनीम् ।
वन्दे माहिषमर्दिनीं . . . . .

682

69522 अगस्त्याष्टकम्

End:

गौरीवल्लभ कामारे (काल)कूटविषाशन ।
मामुद्धरापदम्भोधेस्त्रिपुरघ्नान्तकान्तक ॥
अगस्त्याष्टक + + + मोदते ॥

684

TR1186 अपराधस्तवः

End:

पिता यथा रक्षति पुत्रमीश जगत्पिता त्वं हि जगत्सहायः ।
कृतापराधं तव सर्वकार्ये कृपानिधे मां शिव पाहि शंभो ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

यज्ञकर्ता च देवेन्द्रः सृष्टिकर्ता च वाक्पतिः ।
अहमेव जगत्कर्ता मम कर्ता महेश्वरः ॥
तस्य देवादिदेवस्य कर्ता कोऽपि न विद्यते ।
शिवेन पूजितः को वा वदन्ति प्रतिवादिनः (?) ॥

692

PM2595 अपराधस्तोत्रम् (अपराधसुन्दरस्तोत्रम्)

End:

करचरण + + + शंभो ॥
हर हरेति हरेति हरेति वा भव भवेति भवेति भवेति वा ।
शिव शिवेति शिवेति शिवेति वा भज मनः शिवमेव निरन्तरम् ॥

Colophon:

इति श्रीशंकराचार्यविरचितम् अपराधसुन्दरस्तोत्रं समाप्तम् ।

708

72986 अपराधाष्टकम्

Beginning:

नानायोनिसहस्रकोटिषु मुहुः संभूय संभूय तद्-
गर्भावासनिरन्तदुःखनिवहं वक्तुं न शक्यं च तत् ।
भूयो भूय इहानुभूय सुतरां कष्टानि नष्टोऽस्म्यहं
त्राहि त्वं करुणातरङ्गितदृशा शंभो दयाम्भोनिधे ॥

End:

माता वापि पिता सुतोऽपि न हितो भ्रात्रादयो बान्धवाः
सर्वे स्वार्थपरा भवन्ति खलु मां त्रातुं न केऽपि क्षमाः ।
दूतेभ्यो यमचोदितेभ्य इह तु त्वामन्तरा शंकर
त्राहि त्वं करुणातरङ्गितदृशा शंभो दयाम्भोनिधे ॥

710

71102 अरुणाचलेशनवरत्नमालिका

Beginning:

मुकुन्दसूकरौजसा गवेषिताङ्घ्रिपङ्कजं विरिञ्चिहंसमार्गितप्रशस्तजाटजूटकम् ।
विशालफालदग्धनंजयश्रितस्मराङ्गकं मुदारुणाचलं भजामि भुक्तिमुक्तिदायकम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

त्रिविष्टपप्रविष्टगोपुराग्रभू . . . लसद्विमानचित्ररत्नशोभिदिग्वधूमुखम् ।
अपीतपद्मकुड्मलं . . . समेतमीश्वरं मुदारुणाचलं भजामि भुक्तिमुक्तिदायकम् ॥
अरुणाचलेशस्तुतिपाठमीशशिवसंनिधौ प्रयया (?) ।
कुरुते समस्तविभवं यशोनतिं लभते चिराय स्मृतं स पण्डितः (?) ॥

Colophon:

इति नवरत्नमालिका संपूर्णा ।

711

66816 **अरुणाचलेशस्तोत्रम्**

Beginning:

हल्लकारुणसारसाम्बुदनीलनीलसरोरुहै-
मल्लिकाकरवीरचम्पकमालतीसुमनोहरैः ।
पल्लवारुणपाणिपङ्कजभारतीसुरसुन्दरी-
वल्लभैः परिपूजितारुणभूधरेश्वरमाश्रये ॥ १ ॥

End:

गर्वयुक्तजलंधरान्धकदक्षशिक्षकमक्षरं
सर्वभूतहितादराचलदापुरोजसुलाञ्छितम् ।
खर्वभूतगणाधिपावृतप्रेतभूकृतनर्तनं
शर्वरीपतिखण्डमण्डितशोणभूधरमाश्रये ॥ ९ ॥

712

66644 **अर्धनारीश्वराष्टकम्**

Beginning:

अम्बोधरश्यामलकुन्तलायै तटित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय ॥

End:

अन्तर्बहिश्चोर्ध्वमधश्च मध्ये पुरश्च पश्चाच्च विदिक्षु दिक्षु ।
सर्वं गतायै सकलं गताय नमः शिवायै च नमः शिवाय ॥
उपमन्युकृतं स्तोत्रमर्धनारीश्वराष्टकम् ।
यः पठेत् प्रयतो भूत्वा शिवलोके महीयते ॥

Colophon:

अर्धनारीश्वराष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

714

66800 **अर्धनारीश्वराष्टकम्**

Colophon:

अर्धनार्यष्टकं संपूर्णम् ।

Adds the following verse after the colophon:

नमः शिवाभ्यां नवयौवनाभ्यामशेषकल्याणविशेषिताभ्याम् ।
असंभवाभ्यां स्मृतिसंभवाभ्यामनीश्वराभ्यां जगदीश्वराभ्याम् ॥

उपमन्यु + + + माप्नुयात् ॥

716

68747 **अर्धनारीश्वराष्टकम्**

End:

कस्तुरिकाचन्दन + + + शिवाय ॥

अर्धनारीश्वरस्तोत्रं ब्रह्मणा समुदीरितम् ।
यः पठेत् प्रयतो भक्त्या सर्वकामफलं लभेत् ॥

718

75433 **अष्टमूर्त्यष्टकम्**

Beginning:

त्वं भामिराभिरभिभूय तमः समस्तमस्तं नयस्यभिमतानि निशाचराणाम् ।
देदीप्यसे दिनमणे गगने हिताय लोकत्रयस्य जगदीश्वर तन्नमस्ते ॥

End:

आत्मस्वरूप तव रूपपरंपराभिराभिस्ततं हर चराचररूपमेतत् ।
सर्वान्तरात्मनिलय प्रतिरूपरूप नित्यं नतोऽस्मि परमार्थतनोऽष्टमूर्ते ॥
इत्यष्टमूर्तिभिरिमाभिरुमाभिनन्द्य वन्द्याभिवन्द्य भव विश्वजनीनमूर्ते ।
एतत् ततः सुविततमणतप्रणीत सर्वार्थसार्थ परमार्थतनो नतोऽस्मि ॥

Colophon:

इत्यष्टमूर्त्यष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

719

69463 आख्याषष्टिः

End:

न संस्फुरतु + + + तर्जयन्त्यां त्वयि ॥

मेधे तवास्ति यदि मन्मथशासनाख्ये गाधेतरामृतसरस्वति खेलनेच्छा ।
बाधेत को नु भवतां रसनामपास्तबाधे तरङ्गय सुखं गिरिशाभिधाने ॥
मत्प्राणवल्लभ मदीयनिधे मदात्मन् साम्ब प्रभो शिव शशाङ्कविभूषणेति ।
तन्नामदीव्यदमृतोदधिवीचिडोलाडोलैर्विधेहि विरुजं कृपया विभो माम् ॥

Colophon:

इति श्रीधरवेङ्कटेश्वरपरमेशपादविरचितम् आख्यास्तवं संपूर्णम् ।

720

73248 आख्याषष्टिः

Ends with the following verse:

लभेत सुदृढं न संस्फुरणमीश्वराख्ये कथं
हृदि त्वदनुगान्वितभ्रुकुटिकिंकरः शंकरः ।
चरन्तु विषया हरस्फुरणरोधिनो ह्ययमी
कथं कथय गर्जनैर्जननि तर्जयन्त्यां त्वयि ॥

Colophon:

आख्याशतकं समाप्तम् ।

721

72439 आख्याषष्टिः

End:

महेशे + + + गतिः ॥ मेधे तवास्ति + + + गिरिशाभिधाने ॥ लभेत सुदृढं + + + तर्जयन्त्यां त्वयि ॥

परिधावत भो यमस्य दूता निकटे धूर्जटिरागतः स एव ।
परितो धवलन्ति पश्यतैतन्मकुटीचन्द्रकलामयूखपिञ्जैः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

722

PM2599 आख्याषष्टिः सव्याख्या

Beginning:

अविघ्नमस्तु । तत्कामस्याधिकारित्वं भगवन्नाम्नो देवतात्वं च भासते । तस्माद् विधिरेवेति संक्षेपः । तथाच शिवहरिनामकीर्तनस्यैव धर्मस्याङ्गराहित्येन स्वतन्त्रत्वात् . . . . तस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये शिवाख्यावन्दनैव प्रबलमङ्गलं भविष्यतीति मन्वानो लोकानुग्रहाय शिवाख्यास्तुतिरूपशिवाख्याशतप्रबन्धमारभमाणः प्रथमतः शिवादिदेवस्तुतिमपहाय किमिति तदाख्यास्तुतिः क्रियत इति शङ्कां परिहरन् तां स्तौति—शिवाख्ये + + + विभवाम् ॥ शिवस्य महेश्वरस्य आख्या नाम । 'शिवः शूली महेश्वरः' 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्युभयत्राप्यमरः । अथवा शिवैव भवान्येवाख्या तथोक्ता । 'शिवा भवानी रुद्राणी' इत्यमरः ।

End:

जगतीति । हे शिवाख्ये जननि जगति त्वद्व्यत्ययेन त्वद्विपर्ययेण उल्लसन्त्या विलसन्त्या वशिगिरा वाण्या . . . . जन्मजन्मान्तरेषु बहुषु नित्यनैमित्तिकादिस्वकर्मणां तद्भिन्नानां तीर्थस्नानादीनां स्वाचरितानां षड्विधसुकृतानाम् . . . .

723

PM2600 आख्याषष्टिः सव्याख्या

End:

मेधे तवास्ति यदि मन्मथशासनाख्ये गाधेतरामृतसरस्वति खेलनेच्छा ।
बाधेत को नु भवतीं रसनामपास्तबाधे तरङ्गय सुखं गिरिशाभिधाने ॥

हे मेधे हे धीः धीर्धारणावती मेधेत्यमरः । . . . . अत्र शिवस्य त्रिविधपरिच्छेदशून्यस्य अखण्डसच्चिदानन्दरूपस्य परिच्छिन्नत्वेन तादृशामृतसमुद्रस्यापारत्वेन तदुभयोरभेदाध्यवसायेन तस्य समुद्रत्वनिरूपणादभेदरूपकालंकारः । लक्षणं तूक्तमेव ।

Colophon:

श्री श्रीधरवेङ्कटेशाचार्यविरचिताख्याषष्टिः संपूर्णा ।

श्रीतरणिकुलतिलकश्रीरघुवरचरणारविन्दचञ्चरीकायमाणहृदयश्रीवेङ्कटेश्वरसूरिविरचितायामाख्याषष्टिव्याख्यायां तुरीयस्तरङ्गः समाप्तः ।

724

68816 आत्मार्पणस्तुतिः

Contains the following verse before the last verse of the printed edition:

नानापराधशतमन्वहमेव शंभो कुर्वंस्तथापि शरणं चरणं त्वदीयम् ।
यो दोषजातमपि रक्षति रक्षितासौ को वा न रक्षति निरागसमिन्दुमौले ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

731

PM80 आनन्देश्वरस्तोत्रम्

Beginning:

नमोऽघोराय घोराय चोग्राय भगरूपिणे ।
आनन्देश्वरदेवाय जगदानन्दकारिणे ॥
नमो भक्तजनानन्ददायिने विश्वभाविने ।
विश्वेशाय महेशाय विश्वरूपाय वै नमः ॥

End:

नमो नवे महते च बृहते परमार्थिने ।
परमानन्दरूपाय चिदानन्दाय ते नमः ॥
ओं नमो लघवे तुभ्यं गिरिशाय कपर्दिने ।
नम आपद्विनाशाय भूयो भूयो नमो नमः ॥

Colophon:

इति श्रीआनन्देश्वरस्तोत्रं समाप्तम् ।

736

TR350 आर्येशस्तवः

Beginning:

वारणदनुजविपक्षं विरचितविनतौघविघ्नविच्छेदम् ।
वेतण्डतुण्डमाद्यं विगलन्मदगण्डमण्डलं वन्दे ॥
अतुलिततुन्दिलविग्रहमनर्घतुहिनांशुशकलशेखरितम् ।
अमलैकरदमनोहरमविरतमाकण्ठकरिणमहमीडे ॥

End:

आर्येशस्तुतिरेषा त्वार्याभिधवृत्तविरचितग्रथिता ।
स्यादेव मोददा मे विदुषां शब्दार्थगूढसारविदाम् ॥

Colophon:

इत्यार्येशस्तवः समाप्तः ।

737

70257 इष्टलिङ्गाष्टकम्

Beginning:

सुरासुरेन्द्रमौलिजालशीलिताङ्घ्रिवारिजं करालफाललोचनं कपालमालिकाधरम् ।
त्रिशूलकृत्तमत्तहस्तिदैत्यकृत्तिवाससं नमामि हस्तपङ्कजस्थमिष्टलिङ्गमीश्वरम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

मुकुन्दवाग्वरामरेन्द्रसद्वरप्रदं प्रभुं त्रयीशिरःस्तवस्तुतं शिवं भवं भयापहम् ।
शरण्यमिन्दुमस्तकं धराधरेन्द्रमन्दिरं नमामि हस्तपङ्कजस्थमिष्टलिङ्गमीश्वरम् ॥

Colophon:

अष्टकम् ।

738

PM80 **ईश्वरस्तोत्रम्**

Beginning:

स्थानं न मानं न च नादबिन्दुः रूपं न रेखा न च धातुवर्णम् ।
द्रष्टा न दृष्टं न श्रुतं श्रुतेन तस्मै नमो देवनिरञ्जनाय ॥

End:

कुलं न जातिर्न च भेदभिन्नं पृथङ्न मिश्रं न च मानमेयम् ।
बालो न वृद्धो न च रूपयौवनं तस्मै नमो देव निरञ्जनाय ॥
सागरं पङ्कजं चैव नगरं क्षेत्रमेव च ।
अहं न त्वां पृथक् चैव तं नमामि निरञ्जनम् ॥

748

69488 **उमामहेश्वरस्तोत्रम्**

Beginning:

जय देव जगन्नाथ जय शाश्वत शंकर ।
जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥
. . . . . .
जय सर्वजगन्नाथे जय शाश्वति शंकरि ।
जय सर्वसुराध्यक्षे जय सर्वसुरार्चिते ॥

End:

महादारिद्र्यमग्नस्य महापापहतौजसः ।
महाशोकनिविष्टस्य महारोगातुरस्य च ॥
ऋणभारपरीतस्य दह्यमानस्य कर्मभिः ।
ग्रहैः प्रपीड्यमानस्य प्रसीद मम शंकरि ॥

749

66023 **एकाम्रनाथाष्टकम्**

Beginning:

आकाशमारुतशिखावलवारिभूमिराकाशशाङ्करविचेतनविग्रहाय ।
शोकान्धकारतपनाय शरीरभाजामेकाम्रमूलनिलयाय नमः शिवाय ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

पञ्चाननाय पशुपाशविमोचनाय पञ्चाद्रिमाधिक(?)कटाक्षसमीक्षणाय ।
पञ्चाक्षरीजपपराय विमुक्तिदात्रे एकाम्रमूलनिलयाय नमः शिवाय ॥

Colophon:

एकाम्रनाथाष्टकं संपूर्णम् ।

750

66150 **एकाम्रनाथाष्टकम्**

End:

पञ्चाननाय + + + शिवाय ॥

नागेश्वराय निगमागमपूजिताय नाट्यप्रियाय नवधान्यविवर्धनाय ।
नानापराधसहनाय सदाशिवाय एकाम्रमूलनिलयाय नमः शिवाय ॥

751

67258 **कालभैरवस्तोत्रम्**

Beginning:

रक्तमाल्याम्बरधरं (विष्णुं) किङ्किणीजालमण्डितम् ।
अष्टबाहुं त्रिणेत्रं च क्षेत्रपालं नमाम्यहम् ॥
करकलितकपालः कुण्डली दण्डपाणिः तरुणतिमिरनीलो व्यालयज्ञोपवीतः ।
क्रतुसमयसपर्याविघ्नविध्वंसहेतुर्जयतु वटुकनाथः सिद्धिदः साधकानाम् ॥

End:

य इदं कालनाथस्य पठेद् भक्त्याष्टकं सदा ।
स एव लभते काशीं प्रयागं च गयान्वितम् ॥
ततश्च काशीगमनं पुनर्भैरवदर्शनम् ।
चोरव्याघ्रभयं नास्ति व्याधीनां भयनाश(न)म् ।
अपारमृष्टमन्नं च (श्री)कालनाथः प्रयच्छति ॥
श्रीकालनाथः प्रयच्छत्योन्नमः ।
वाराणस्यां भैरवो देवः संसारभयनाशनः ॥
अनेकजन्मकृतं पापं स्मरणेन विनश्यति ।
कोटिजन्मकृतं पापं दर्शनेन विनश्यति ॥
दर्शनेन विनश्यत्योन्नमः ।

Colophon:

कालभैरवस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

752

66616 कालभैरवाष्टकम्

Beginning:

परेतभूतभेतालं करतालसमन्वितम् ।
प्रवर्तितमहानृत्यं कलये कालभैरवम् ॥
कपालमालिकाक्रान्तं ज्वलत्पावकलोचनम् ।
कपालकरमत्युग्रं कलये कालभैरवम् ॥

End:

इदं तु कालनाथस्य पठेद् भक्त्याष्टकं तथा ।
स एव लभते काशीं प्रयागं च गयां तथा ॥
वाराणस्यां भैरवो देवः संसारभयनाशनः ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ।
अनेकजन्मकृतं पापं दर्शनेन विनश्यति ॥

766

73245 कालहस्तीश्वरस्तुतिः

Beginning:

गण्डूषस्य समं न्यधायि भवता मन्दाकिनी मस्तके
क्रव्यस्य प्रतिपादनस्य सदृशो हस्ते मृगः स्थापितः ।
नेत्रस्यापि सदृक्षमक्षिदशकं प्रादायि पद्मोत्तरं
किं वर्ण्येत कृतज्ञता तव विभो श्रीकालहस्तीश्वर ॥

End:

नाहं विभूतिपरिकल्पितफालदेशो रुद्राक्षदामपरिवेष्टितकन्धरो वा ।
श्रीकालहस्तिनगरीश्वरदासदासदासानुदासजनकिंकरकिंकरोऽस्मि ॥

768

71102 कालहस्तीश्वराष्टकम्

Beginning:

श्रीपार्वतीवदनपङ्कजषट्पदाय दारिद्र्यदुःखघनसागरशोषणाय ।
रुद्राक्षरत्नवलयाङ्कितकन्धराय श्रीकालहस्तिनिलयाय नमः शिवाय ॥

End:

दक्षप्रजापतिमहाध्वरनाशनाय बृन्दारका(न्ति ? दि) मुनिपुङ्गवपूजिताय ।
भस्माङ्गरागपरिशोभितविग्रहाय श्रीकालहस्तिनिलयाय नमः शिवाय ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीकालहस्तिगिरिजा(धि)पतेः शिवस्य
नामाष्टकं पठति(यः) सततं प्रभाते।
प्राप्नोतु संश्रयमहाखिलराज्यभोगान् (?)
शत्रुं वि(चि ? जि)त्य परितः पुनरेति मोक्षम् ॥

Colophon:

इति श्रीकालहस्तीश्वराष्टकं संपूर्णम्।

769

69190 **कालहस्तीश्वराष्टकम्**

Beginning:

आकाशकेशमकुटाय हरिप्रियाय लोकाक्षपावकविशेषविलोचनाय।
एकान्तसन्मुनिमनःकमलालयाय श्रीकालहस्तिनिलयाय नमः शिवाय॥

End:

कलितिमिरपतङ्गं पुण्यजायाप्रसङ्गं सलिलनिधिनिपङ्गं जन्मनो नित्यसङ्गम्।
अजभुजगजटाङ्गं पार्वतीप्राणलिङ्गं कलयति धवलाङ्गं कालहस्तीशलिङ्गम्॥

Colophon:

श्रीकालहस्तीश्वराष्टकं संपूर्णम्।

771

66150 **कालहस्तीश्वराष्टकम्**

Beginning:

..... कलितपञ्चकृत्यं शुद्धेन्दुखण्डसुरसिन्धुजटाविभूषम्।
ज्ञानप्रसूनकलिकाकलितार्धदेहं श्रीकालह .... माश्रयामि॥

End:

पञ्चाननं कनकलोचनपुत्रिगात्रश्रृङ्गारितत्रिशिखिचारुकराम्बुजातम्।
वक्षःस्थलप्रलगवादिवराहश्रृङ्गं (?) श्रीकाल ...... यामि॥

772

69189 **कालहस्तीश्वराष्टकम्**

Beginning:

त्वत्पादभक्तिलवलाभविधूतपापभक्ताखिलार्थदकृपार्द्रविलोचनाय।
कालान्तकाय कवये सकलश्रुतीनां ज्ञानाम्बिकाप्रियतमाय नमः शिवाय॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

भूदारश्रृङ्गकमठानिमिषाक्षिनारसिंहत्वगादिपरिचिह्नितविग्रहाय ।
भावं भयं भव हर त्वमजाद्य तुभ्यं ज्ञानाम्बिकाप्रियतमाय नमः शिवाय ॥
एवं स्तुत्वा जगन्नाथं स्तवेनानेन शंकरम् ।
पादमूलं समाश्रित्य स्थितं दीर्घायुषं मुनिम् ॥

780

67731 **क्षमास्तोत्रम्**

Beginning:

शुभानामेकान्तं परमशिवपादाब्जयुगलं
गुरूणामाचार्यं शिरसि परिभाव्य स्मृतिशतैः ।
क्षमास्तोत्रं कर्तुं व्यवसितमतेः साहसमिदं
सहन्तां सन्तोऽमी भुवि सनकयोगीन्द्रसदृशाः ॥

End:

स्तोत्रं क्षमाविषयमात्मसुखैकहेतुं साक्षाच्चकार **परमेश्वरराजयोगी** ।
क्षाम्यन्ति तस्य पठनादपराधकोट्यो निःसंशयं भुवि भवन्ति च मङ्गलानि ॥

781

77644 **गङ्गाधराष्टकम्**

Beginning:

क्षीराम्भोनिधिमन्थनोद्भवविषात् संदह्यमानान् सुरान्
ब्रह्मादीनवलोक्य यः करुणया हालाहलाख्यं विषम् ।
निःशङ्कं निजलीलया कबलयन् लोकान् ररक्षादराद्
आर्तत्राणपरायणः स भगवान् गङ्गाधरो मे गतिः ॥

End:

गङ्गावेगमशक्यमन्यविबुधैः सोढुं पुरा याचितो
दृष्ट्वा भक्तभगीरथेन विनतो रुद्ध्वा जटामण्डले ।
कारुण्यादवनीतले सुरनदीमाप्लावयन् पावनी-
मार्तत्राणपरायणः स भगवान् गङ्गाधरो मे गतिः ॥

Colophon:

गङ्गाधराष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

788

73243 **गोकर्णेश्वरमानसिकाराधनस्तवः**

Beginning:

श्रीबृहदम्बाधिपते ब्रह्मपुरोगाः सुराः स्तुवन्ति त्वाम् ।
व्युष्टा रजनी शयनादुत्थायैषामनुग्रहः क्रियताम् ॥
गोकर्णनाथ गौर्या सहसुतयारुह्य पादुके हैमे ।
मौक्तिकमण्टपमेहि स्नातुमवष्टभ्य मामकं हस्तम् ॥

End:

सकलत्रपुत्रपौत्रं सहपरिवारं सहोपकरणं च ।
आत्मानमर्पयामि श्रीबृहदम्बेश पाहि मां कृपया ॥
कायकृतं वचनकृतं हृदयकृतं चापि मामकं मन्तुम् ।
परिहृत्य मामजस्रं त्वयि कृतभारं महेश परिपाहि ॥
नक्षत्रमालिकैषा . . .

789

77644 **गोष्ठीश्वरस्तोत्रम्**

Beginning:

देव देव महादेव भक्तानामार्तिभञ्जन ।
पुराण देव देवेश गोष्ठीश्वर नमोऽस्तु ते ॥
धर्मार्थकाममोक्षाणां संप्रदानाय शंकर ।
सांनिध्यं कुरु चैवात्र गोष्ठीश्वर नमोऽस्तु ते ॥

End:

सारूप्यं तव पूजने शिव महादेवेति संकीर्तने
सामीप्यं शिवभक्तियुक्तजनतासांगत्यसंभाषणे ।
सालोक्यं सचराचरात्मकतनुध्याने भवानीपते
सायुज्यं मम सिद्धमत्र भवति स्वामिन् कृतार्थोऽस्म्यहम् ॥

Colophon:

इति **गोष्ठीश्वरस्तोत्रं** संपूर्णम् ।

790

67674 **गोष्ठीश्वरस्तोत्रम**

End:

भस्माङ्गरागाय करीन्द्रचर्मकृतोत्तरीयाय नमः शिवाय ।
वृषेन्द्रवाहाय वृषध्वजाय श्रीगोष्ठिनाथाय नमः शिवाय ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

नमः शिवायामलचित्तवासप्रियाय नागेन्द्रसुभूषणाय ।
वामार्धगौरीपरिरम्भणाय श्रीगोष्ठिनाथाय नमः शिवाय ॥

अद्य मे सफलं जन्म . . . (5 verses of *Agastyāṣṭaka*) ।

808

71209 **चिदम्बरचिन्तामणिहृदयस्तोत्रम्**

Beginning:

ओं श्रीं ह्रीं क्लीं ।

अथातः संप्रवक्ष्यामि मन्त्रवर्णान् समात्रकान् ।
इत्युक्त्वा तु मुनिश्रेष्ठो रहस्यातिरहस्यकम् ॥
नटेशविद्याहृदयं नाम स्तोत्रं जपेन्नरः ।
सर्वपापविनिर्मुक्तः श्लोकैरेकपरायणः ॥
. . . . . .
ओंकारमन्त्रसंवेद्यमोतप्रोतजगत्त्रयम् ।
चिन्तयामि महादेवं चिदम्बरसभानटम् ॥

End:

श्रीमदभ्रसभाविद्यास्तुतिमिष्टार्थदायिनीम् ।
महतीं दृष्टवान् स्वप्ने मातृकासिद्धिदेशिकः ॥
नटेशविद्याहृदयं य इमं पठति स्तवम् ।
चित्ते नृत्यति तस्येशः चिदम्बरसभानटः ॥
श्वेतरक्तप्रभाहीनं शिवशक्त्यात्मकं परम् ।
वन्दे नाथपदद्वन्द्वं वाङ्मनोऽतीतगोचरम् ॥

Colophon:

चिदम्बरचिन्तामणिहृदयस्तोत्रं संपूर्णम् ।

809

70257 **चिदम्बरवरेण्याष्टकम्**

Beginning:

निर्जरपनित्यनुतभावितपदाब्जं निर्जितपुरारिसुरवैरिसमुदायम् ।
सज्जनदरिद्रहचिदम्बरवरेण्यं तं जगति यो जयति योजयति चित्ते ॥

End:

गिरिजया सञ्चरितमक्षितहषेशं नरहरे(?)हृत्कुमुदपूर्णरजनीशम् ।
सारतरमव्ययचिदम्बरवरेण्यं तं जगति यो जयति योजयति चित्ते ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

810

PM2622 चिदम्बरस्तवः

Below is given the Stotra in full:

कृपासमुद्रं सुमुखं त्रिणेत्रं जटाधरं पार्वतीवामभागम् ।
सदाशिवं रुद्रमनन्तरूपं चिदम्बरेशं हृदि भावयामि ॥
मञ्जीरपादाय महानटाय मुरारिनेत्रार्पितपादुकाय ।
चन्द्रार्धचूडाय जटाधराय चिदम्बरेशाय नमः शिवाय ॥
आनन्दनृत्तसमये नटनायकस्य पादारविन्दमणिनूपुरशिञ्जितानि ।
आनन्दयन्ति मदयन्ति विमोहयन्ति रोमाञ्चयन्ति नयनानि कृतार्थयन्ति ॥

811

66800 चिदम्बराष्टकम्

Beginning:

वाणरक्षणप्रसूनवाणशिक्षणं जगत्त्राणमद्वयं परं पुराणतत्त्वकारणम् ।
वेणुपाणिमीश्वरं क . . . (ताण्ड)वाकृतिं शिवं चिदम्बरेश्वरं भजे ॥

End:

पञ्चवक्त्रमीश्वरं प्रपञ्चनृत्तदायकं काञ्चनाद्रिकार्मुकं . . . पाणिनम् ।
क्रौञ्चभेदिमर्दनं कपर्दिनं महानटं ताण्डवाकृतिं शिवं चिदम्बरेश्वरं भजे ॥

Colophon:

चिदम्बराष्टकं समाप्तम् ।

812

67967 चिदम्बरेश्वरभुजङ्गाष्टकम्

Beginning:

परं निरन्तरं पुरंदरादिमृग्यवैभवं पतञ्जलिं मुनीन्द्रादियोगिमृग्यवैभवम् ।
झलझलमुखायमाननूपुराङ्घ्रिवैभवं चिदम्बरेशमम्बिकेशमाश्रये हृदम्बुजे ॥

End:

आनन्दनृत्यसमये नटनायकस्य पादारविन्दमणिनूपुरशिञ्जितानि ।
आनन्दयन्ति मदयन्ति विमोहयन्ति रोमाञ्चयन्ति नयनानि कृतार्थयन्ति ॥

Colophon:

इति चिदम्बरेश्वरभुजङ्गाष्टकं प्रयातवृत्तं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

813

71102 चिदम्बरेश्वराष्टकम्

Beginning:

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥
कृपासमुद्रं सुमुखं त्रिणेत्रं जटाधरं पार्वतिवामभागम् ।
सदाशिवं रुद्रमनन्तरूपं चिदम्बरेशं हृदि भावयामि ॥

End:

नटेश्वरं सुन्दरवन्दिताङ्गं जटेन्दुगङ्गास्थितमुत्तमाङ्गम् ।
घटोद्भवाराधितवैभवाङ्गं चिदम्बरेशं हृदि भावयामि ॥

Colophon:

इति चिदम्बरेश्वराष्टकं संपूर्णम् ।

815

66649 चिदम्बरेश्वराष्टकम्

End:

दिगम्बरं शासितुरट्टहासं त्रियम्बकं चन्द्रकलावतंसम् ।
महानुभावं महिमाभिरामं चिदम्बरेशं हृदि भावयामि ॥

Colophon:

चिदम्बराष्टकं संपूर्णम् ।

816

73242 चिदम्बरेश्वराष्टकम्

End:

पञ्चाक्षरमिदं पुण्यं पञ्चपातकनाशनम् ।
त्रयस्त्रिंशत्कोटिगुणितं चिदम्बरमिति स्मृशम् ॥ (?)
चिदम्बरमिति ब्रूयात् सकृज्जननवर्जितम् ।
मुक्तिघण्डामणिपदं मोक्ष एव न संशयः ॥ (?)

822

73243 तत्त्वार्यास्तवः

Beginning:

शिवकामसुन्दरीशं शिवगङ्गातीरकल्पितनिवेशम् ।
शिवमाश्रये द्युकेशं शिवमिच्छन्मा वपुष्यभिनिवेशम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

गीर्वाणचक्रवर्ती गीश्चेतोमार्गदूरतोवर्ती ।
भक्ताशयानुवर्ती भवतु नटेशोऽखिलामयनिवर्ती ॥

End:

सत्यं सत्यं गत्यन्तरमुत्सृज्य ते पदापात्यम् ।
अत्यन्तार्तं भृत्यं न त्यज नित्यं नटेश मां पाहि ॥
षट्त्रिंशता तत्त्वमयीभिराभिः सोपानभूताभिरुमासहायम् ।
आर्याभिराद्यं परतत्त्वभूतं चिदम्बरानन्दनटं भजध्वम् ॥

Colophon:

तत्त्वार्यास्तवं संपूर्णम् ।

825

PM2621 ताण्डवेश्वराष्टकम्

Beginning:

फाल्लोचन भूतिभूषण भूतनाथ जगत्पते
भक्तवत्सल भुक्तिमुक्तिद भोगिभूषण पाहि माम् ।
व्याघ्रपादपतञ्जलीडितपादपद्म सभापते
ताण्डवेश्वर देहि मे तव पादभक्तिमचञ्चलाम् ॥

End:

सत्यबोधसुखाद्वयात्मक कामहन् गिरिजापते
. . विग्रह चित्तविश्वर . . . . पाहि माम् ।
ब्रह्मविष्णुमहेश्वरार्चित . . . . . . पते
ताण्डवेश्वर देहि मे तव पादभक्तिमचञ्चलाम् ॥

Colophon:

ताण्डवेश्वराष्टकं संपूर्णम् ।

835

74102 तारावलीस्तुतिः

Beginning:

अश्वति निगमचतुष्के विश्वसृजाकलितसारथ्यम् ।
भूरथमारूढो यस्त्रिपुरं भसितं चकार हसितेन ॥
आभरणीकृतभुजगं सेभमुखस्कन्दशैलराजसुतम् ।
तमहमजस्रं कलये हिमरुचिशकलोल्लसच्छिरसमन्तः ॥

End:

देयात् सोऽहिर्बुध्न्यः कायार्धलसन्महीधरेन्द्रसुतः ।
श्रेयांसि हृदय सततं याया यदि तत्पदाब्जभृङ्गत्वम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तीरेऽवतीर्णमीशं तारेश्वरमौलिभूषणं गाङ्गे ।
नीरे कृतावगाहश्रीरेण पटी कदावद्रक्ष्यामि ॥
तारावलिरिति रचिता तारावलिनाथमौलिनुतिरेषा ।
जीयाच्चिरस्य कविना वेङ्कटरामाभिधेन कृतिः ॥

839

67633 **त्यागराजाष्टकम्**

Beginning:

नानारत्नविचित्रनिर्जितमहासिंहासनाधीश्वरं
गानानन्दनसाधुचित्तममलं गङ्गाधरं शंकरम् ।
मानामानविमानराजनिरतं (?) मार्ताण्डकोटिप्रभं
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

End:

राजद्राजतशैलराजवसितं राजाधिराजार्चितं
राजीवेक्षणराजमानमहितं राजस्सुराराजितम् ।
राजोनोहरराजमानसुमना श्रीराजसूर्याधरं
राजंराजशिखामणिं शिखरिजं त्यागाधिराजं भजे ॥ (?)

Colophon:

त्यागराजाष्टकं संपूर्णम् ।

840

66682 **त्यागराजाष्टकम्**

Beginning:

सुन्दरस्तुतिवैभवं सुरसुन्दरीजनवन्दितं
नन्दिकेश्वरवन्दितं नटनायकं हरिसायकम् ।
सान्द्रपापविनाशनं गुणसागरं परमेश्वरं
त्यागराजमुपास्महे परमेशमादिपुरीश्वरम् ॥

End:

शोकसागरशोषणं भवशोषणं विषपारणं
नागनायकसंस्तुतं वरनारदादिमुनिस्तुतम् ।
भोगमुक्तिफलप्रदं वरपुङ्गवेश्वरकेतनं
त्यागराजमुपास्महे परमेशमादिपुरीश्वरम् ॥

Colophon:

इत्यादिपुरित्यागराजाष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

843

68253 दक्षिणामूर्तिध्यानम्

Beginning:

गङ्गातरङ्गपरिचुम्बितमौलिभागविद्योतमानशशिखण्डविभूषणाय ।
आतङ्कहारिकरपङ्कजदृश्यमानशुभ्रांशुदन्तशकलाय नमः परस्मै ॥
ओं नमः परमार्थाय शुद्धज्ञानाय मूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥
यत्प्रसादेन भूतानामिष्टसिद्धिकरो भवेत् ।
तस्याहं दक्षिणामूर्तेर्ध्यानं वक्ष्याम्यनुत्तमम् ॥

End:

वामाङ्कोपरिसंयुक्तनगेन्द्रतनयान्वितम् ।
ध्यायेदभीष्टसिद्ध्यर्थमहर्निशमुमापतिम् ॥
सकृदेवंविधं ध्यात्वा सर्वज्ञो जायते क्षणात् ।
शिवध्यानमिदं पुण्यं सर्वाशुभनिबर्हणम् ॥
. . . . . .
वटतरुमूलनिवासबद्धतृष्णं मुनि(वर)निकराय विवेकमा(वि ? दि)शन्तम् ।
पशुपतिमगराजकन्यकायै स्मर हृदयाशु वितीर्णवाममागम् ॥

844

68309 दक्षिणामूर्तिस्तोत्रम्

Beginning:

जैमिनिः—

मार्कण्डेय महायोगिन् सकलागमवित्तम ।
स्तोत्रं वद परब्रह्मन् केन प्रोक्तं पुरातनम् ॥
येन तुष्टो भवेद् देवो दक्षिणामूर्तिरीश्वरः ।
तत् स्तोत्रं वद मे शीघ्रं भक्तानामुपकारकम् ॥

श्रीमार्कण्डेयः—

वक्ष्येऽहं दक्षिणामूर्तेः स्तोत्रमिष्टफलप्रदम् ।
पठनाच्छ्रवणादस्य सर्वाभीष्टं प्रजायते ॥
. . . . . .
नमो रुद्राय शर्वाय दक्षिणामूर्तये नमः ।
शंकराय शशाङ्काय शाश्वताय शिवात्मने ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

नमो वेदान्तवेद्याय सांख्यवेद्याय ते नमः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमोऽस्तु ते ॥
इदं श्रीदक्षिणामूर्तेः स्तोत्रमिष्टप्रदायकम् ।
यः पठेच्छुचितो भक्त्या सर्वदा मानवोत्तमः ॥
. . . . . .
इह भोगान् यथाकामान् भुक्त्वा देवेशदुर्लभान् ।
शिवसायुज्यमाप्नोति पवित्रश्च न संशयः ॥

Colophon:

इति श्रीमार्कण्डेयविरचितकाण्डशतके षड्विंशतिकाण्डे दक्षिणामूतिप्रशंसायां स्तोत्रकथनं नाम सप्तमः परिच्छेदः

846

66823 दक्षिणामूर्तिस्तोत्रम्

End:

श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्दुनन्द्यादयः
प्राचीना गुरवोऽपि यस्य करुणालेशाद्गता गौरवम्
तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालंकृतं
चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥

872

71556 दक्षिणामूर्त्यष्टकम्

Two additional verses are found at the end:

अङ्गुष्ठतर्जनीयोगमुद्राव्याजेन सेविना ।
श्रुत्यर्थं ब्रह्मजीवैक्यं दर्शयन् नोऽवताच्छिवः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

873

68294 दक्षिणामूर्त्यष्टकम्

The following verses are added at the end:

चिद्घनाय महेशाय वटमूलनिवासिने ।
सच्चिदानन्दरूपाय (श्री)दक्षिणामूर्तये नमः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

Colophon:

दक्षिणामूर्त्यष्टकं समाप्तम् ।

874

68336 दक्षिणामूर्त्यष्टकम्

A few additional stanzas are found at the end:

ओं नमः प्रणवार्थाय सिद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय (श्री)दक्षिणामूर्तये नमः ॥
अङ्गुष्ठतर्जनीयोगमुद्राव्याजेन सेविना ।
श्रुत्यर्थं ब्रह्मजीवैक्यं दर्शयन् नोऽवताच्छिवः ॥

गुरुर्ब्रह्मा + + + गुरवे नमः ॥ गुरवे + + + मूर्तये नमः ॥ चित्रं + + + संशयाः ॥

875

73918 दक्षिणामूर्त्यष्टकम्

The following verses are added at the beginning and end:

Beginning:

मन्दस्मितस्फुरितमुग्धमुखारविन्दं कंदर्पकोटिशतसुन्दरदिव्यमूर्तिम् ।
आताम्रकोमलजटाघटितेन्दुरेखामालोकये वटतलेनिलयं दयालुम् ॥

विश्वं + + + मूर्तये ॥

End:

यस्यान्तर्नादिमध्यं न हि करचरणं नाम गोत्रं न सूत्रं
नो जातिर्नैव वर्णा न भवति पुरुषो नो नपुंसं न च स्त्री ।
नाकारं नैवकारं न(हि) जननमरणं नास्ति पुण्यं न पापं
नो तत्त्वं तत्त्वमेकं सहजसमरसं सद्गुरुं तं नमामि ॥
सुनिर्मलज्ञानसुखैकरूपं प्रज्ञानहेतुं परमार्थदायिनम् ।
चिदम्बुधौ तं विहरन्तमाद्यमानन्दमूर्तिं गुरुराजमीडे ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

876

PM90 दक्षिणामूर्त्यष्टकम्

The following additional stanzas are written at the end:

चित्रं + + + संशयाः ॥ गुरुर्ब्रह्मा + + + श्रीगुरवे नमः ॥ अज्ञानतिमिरान्धस्य + + + श्रीगुरवे नमः ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
ओंकारवाच्यरूपाय तस्मै श्रीगुरवे नमः ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दभगवत्पादपूज्यशिष्यश्रीमच्छंकरभगवत्पादाचार्यविरचितं श्रीदक्षिणामूर्त्यष्टकं संपूर्णम् !

877

71546 दक्षिणामूर्त्यष्टकम्

The following verses are added at the end:

चित्रं + + + संशयाः ॥ गुरवे + + + नमः ॥

अद्वितीयापरिच्छिन्नसच्चिदानन्दमूर्तये ।
दक्षिणामूर्तिरूपाय मह्यमेव नमो नमः ॥
चिद्घनाय महेशाय वटमूलनिवासिने ।
ओंकारवाच्यरूपाय दक्षिणामूर्तये नमः ॥
श्रीदक्षिणास्यमखिलारमशमादिमूर्तिं विद्यालयं विविधभूषणभूषिताङ्गम् ।
ज्ञानाभयाक्षपटपुस्तकपद्महस्तं पूर्णेन्दुचूडधवलं हृदि भावयामः ॥

Colophon:

इति श्रीमत्परमहंसश्रीमच्छंकराचार्यविरचितं दक्षिणामूर्त्यष्टकं संपूर्णम् ।

881

71364 दक्षिणामूर्त्यष्टकं तत्त्वसुधाव्याख्यासहितम्

The followning two verses are seen after the colophon:

भास्वद्रत्नासनस्थं मणिनिकरलसत्सार्वभौमाङ्घ्रिभूषं
हैमाहीन्द्रत्रिसूत्रीविधृतकटिलसत्पादकौसुम्भचेलम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सान्द्रान(न्द स्फुरन्दं स्वभ)क्ताभयवरदकरं स्मेरवक्त्रं त्रिणेत्रं
साम्बं चन्द्रार्धमौलिं स्फटिकमरकतानन्दमूर्तिं भजामि ॥
वामेन सीतां परिरभ्य बाहुना वामाङ्कलीनां दृशि मुद्रयान्वितः ।
तत्त्वं करेणोपदिशन्तमद्वयं हनूमते दाशरथिं हरिं भजे ॥

886

PM2687 दक्षिणामूर्त्यष्टकं तत्त्वसुधाव्याख्यासहितम्

Beginning:

मौनव्याख्या + + + ईडे ॥
भूम्ने कस्मैचिदस्मासु कृपयोपात्तमूर्तये ।
भवातपार्तविश्रामतरवे गुरवे नमः ॥

कैवल्या + + + स्तुतेः ॥

887

71713 दक्षिणामूर्त्यष्टकं तत्त्वसुधाव्याख्यासहितम्

The following verse is written in the beginning:

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

मौनव्याख्या + + + ईडे ॥

Colophon:

दक्षिणामूर्त्यष्टकभाष्यं संपूर्णम् ।

888

75342 दक्षिणामूर्त्यष्टकं तत्त्वसुधाव्याख्यासहितम्

The following verse stating the name of the scribe and the date of copying is seen at the end after the colophon:

श्रीमत्यब्देऽक्षयाख्ये मकरमुपगते तीक्ष्णगौ कृष्णपक्षे
भूभूवारे चतुर्थ्यामलिखदनुपमां सत्सुधां विश्वनाथः ।
एतेन श्रीयशोदाकृतसुकृतफलं गोपिकाभागधेयं
प्रीणातु प्राणनाडिं मम वरमुरलीमोहनो बालकृष्णः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

895

75342 दक्षिणामूर्त्यष्टकं सुबोधिनीव्याख्यासहितम्

Beginning:

मौनव्याख्या + + + दक्षिणामूर्तिमीडे ॥

इह खलु सर्वज्ञो भगवान् भाष्यकारो लोकानुग्रहैकप्रयोजनोपात्तदिव्यमङ्गलविग्रहो निखिलवेदान्तदुग्धाब्धेर्न्यायमन्दरेण विचारनिर्मथनाविर्भूताद्वैतामृतस्य विन्यासकलशभूतं श्रीदक्षिणामूर्तिस्तोत्रं सकललोकानुजिघृक्षया भोक्तृजीवभोग्यजगद्भोगप्रदपरमेश्वरमोक्षप्रदगुरूणामत्यन्ताभेदबोधकं सकलजगदधिष्ठानत्वेन परमेश्वराभेदं दर्शयन् दक्षिणाशामुखं परमेश्वरं मनसा पूजयति—

End:

पुनर्भूयः अष्टधा परिणतं मायापरिणामरूपैश्वर्यं चाणिमादिकमव्याहतं क्वचिदप्यप्रतिहतं सिध्येत् । स एकधा भवति । स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिश्रुत्युक्तं सर्वं फलं भवेदित्यर्थः ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दपूज्यपादशिष्यपुरुषोत्तमानन्दमुनिविरचिता श्रीमच्छंकरभगवत्पादीयश्रीदक्षिणामूर्तिस्तुतिव्याख्या सुबोधिनीसमाख्या समाप्ता ।

901

PM2688 दक्षिणामूर्त्यष्टकं व्याख्यासहितम्

Beginning:

नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः । सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि । मौनव्याख्या + + + दक्षिणामूर्तिमीडे ॥ विश्वं दर्पण + + + श्रीदक्षिणामूर्तये ॥ एषास्य श्लोकस्याक्षरयोजना—तस्मै श्रीगुरुमूर्तये इदं नमः नमस्करणमस्त्विति क्रियाकारकयोजना । दक्षिणाभिमुखी मूर्तिर्यस्य सः शिवः दक्षिणामूर्तिः ।

End:

यत् पुनः प्रसिद्धम् अष्टधा परिणतमणिमाद्यैश्वर्यं तच्च सिध्येत् अनुषङ्गादेव । तच्चाव्याहतम् अप्रतिहतम् । अत इदं स्तोत्रमर्थतः पाठतः यत्नेन गुरुभ्योऽवगम्य तन्निष्ठो भवेन्मुमुक्षुः अभ्युदयार्थी चेत्यर्थः ।

वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं जननमरणदुःखच्छेददक्षं नमामि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥

Colophon:

आनन्दगिरीयं सव्याख्यानं श्रीदक्षिणामूर्त्यष्टकम् ।

902

PM90 दक्षिणामूर्त्यष्टकं व्याख्यासहितम्

Beginning:

अथ श्रीभगवत्पादाचार्यः शारीरभाष्यकृत् स्वभाष्याभिप्रायाज्ञानेन नाशीकृतब्रह्मविद्यान् पण्डितान् मन्वानः सकलवेदादिशास्त्रसमुदायरहस्यार्थं ब्रह्म युक्त्या सौलभ्येन किंचिदष्टकमिषेण प्रकटीकर्तुमारभते। परब्रह्मशब्देन अहमित्यध्यासवतः प्रमातुरेव बोधनं भवतु। अव्युत्पन्न-पण्डितसमधिगतदेहत्रयादित्रिविधपरिच्छेदशून्यं निर्विकारं चिन्मात्रमितोऽतिरिक्तं किंचिदस्ति विज्ञानम्। मा भूदिति पूर्वेण संबन्धः। तथाहि—मौनव्याख्याप्रकटितपरब्रह्मतत्त्वम्।

. . . एतेन मौनव्याख्येति प्राथमिकः श्लोको व्याख्यातः। अथाष्टकमारभते—ओं विश्वं।

End:

प्राक्तनपुण्यबलेन एतादृशार्थस्य श्रवणात् तदर्थमननाद् ध्यानाच्च संकीर्तनात् सर्वात्मत्व-महाविभूतिसहितं स्यादीश्वरत्वं ध्यातुरहमर्थस्येति शेषः ॥ स्वस्ति श्रीः ॥

ब्रह्मानन्दं + + + सद्गुरुं तं नमामि ॥ गुरवे + + + दक्षिणामूर्तये नमः ॥

यथेष्टं भुङ्क्ष्व मा भैषीः तक्रं सलवणं पिब ।
यथेष्टं चर मा भैषीः अन्ते ब्रह्मास्म्यहं वद ॥

909

PM644 दशश्लोकी

Beginning:

विष्ण्वाद्याश्च पुरत्रयं सुरगणा जेतुं न शक्ताः स्वयं
यं शंभुं भगवन् वयं तु पशवोऽस्माकं त्वमेवेश्वरः ।
तेन त्वां शरणागतान् पशुपते पाहीत्यवोचन् द्रुतं
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥

End:

विष्णुब्रह्मसुराधिपप्रभृतयः सर्वेऽपि देवासुराः
संभूता(धिजले ? जलधेः)विषात् परिभवं प्राप्ता यमेत्येश्वरम् ।
स्वस्वप्राणनियोजिता गतशुचः स्वस्था बभूवुर्ददं
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

911

PM1776 दशश्लोकी

End:

सृष्ट्वा यस्त्रिगुणान् स्वयंभुमधुभिच्छूलायुधेभ्य: शिवो
दत्त्वैतानथ तान् ग्रहीतुमनयो: शक्त्याखिलान् हीनयो: ।
ताभ्यां साकमहो गुणत्रयभृते रुद्राय साम्यं ददौ
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥

912

69249 दशश्लोकी

End:

ध्येयत्वे तव साक्षिणो मुनिगणा ज्ञानप्रदत्वे शुको
वन्द्यत्वे निगमा: स्वभक्तविपदक्रान्तौ कृतांन्तादय: ।
नित्यत्वे भगवन् पितामहशिर:स्रग्बृन्दमाद्यन्तयो:
शून्यत्वेऽपि वराहहंसवपुषौ पद्माक्षपद्मासनौ ॥

914

75734 दशश्लोकी (शपथपूर्वस्तुति:)

Beginning:

हरदत्ताचार्यशिवोत्कर्षप्रतिपाद्यशपथपूर्वस्तव: । विष्ण्वाद्याश्च + + + परब्रह्मणि ॥

End:

विष्वक्सेन(पती ? मपी)न्दिरापतिमहो तं रक्तभिक्षाच्छलात्
धिक्कृत्याथ स भैरव: शशिधरो यस्यांशभूतो जटी ।
ब्रह्माद्यामरशिक्षकस्य बलिनो विष्णोर्मदं चाहरत्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥
एवं पुराणैरखिलैश्च वेदै: शास्त्रागमैर्वैदिकभूषणोऽसौ ।
निश्चित्य साम्बं शिवमेव तत्त्वं विद्वज्जनाग्रे सुतरां व्यराजत् ॥
इत्थं स बाल: शपथात्मकं वचस्त्रिपादपीठे निवसन् जगाद ।
तदाभवत् सत्यबलेन पीडितो हुताशनश्चन्दनपङ्कशीतल: ॥

Colophon:

शपथपूर्वस्तुति: समा(प्त: ? प्ता) ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

915

77644 दाननाथस्तोत्रम्

Beginning:

शेष:—

वाचामगोचरसुवैभवसंयुतं त्वां नाहं समर्थ इह भामतिनाथ साम्ब ।
स्तोतुं सुबाल इव भक्तिलवात् प्रवृत्तं श्रीदाननाथ परिपाहि सदाम्बया माम् ॥
सस्कन्दविघ्नेश्वरसाम्बिकाय सनन्दिकेशाय सदाशिवाय ।
गङ्गेन्दुचूडाय गणैर्युताय श्रीदाननाथाय नमः शिवाय ॥
श्रीवंशकान्तारसुनायकाय श्रीवेदवंशामलमौक्तिकाय ।
श्रीभामतीमुखसरोजसुभास्कराय श्रीदाननाथाय नमः शिवाय ॥

End:

कर्मेश्वराय कलिकल्मषनाशनाय कारुण्यपूर्णहृदयाय सदामलाय ।
श्रीधर्मवाहाय भवामयभेषजाय श्रीमूर्तिदाननिरताय नमः शिवाय ॥

Colophon:

दाननाथस्तोत्रं संपूर्णम् ।

The following verses mentioning the seven sacred places of Śiva and seven congregational halls are added at the end with repeated colophon:

शक्तिस्थलं वेणुवनं श्रीहालास्यं द्वितीयकम् ।
तृतीयं पुण्डरीकाख्यं तुर्यं काञ्चीपुरं महत् ॥
त्रिकूटाचलमन्यच्च वेदारण्यं तु षष्ठकम् ।
शुचीन्द्रं सप्तमं प्रोक्तं सप्तस्थानं प्रकीर्तितम् ॥
आदिस्थले ताम्रसभा द्वितीया राजती सभा ।
कनकाख्या तृतीये तु नभोरूपा चतुर्थकम् ॥
चित्राख्या पञ्चमी ज्ञेया षष्ठी वेदसभाभिधा ।
देवा सभा सप्तमी च सर्वा भक्तिविमुक्तिदा: ॥

Colophon:

इति दाननाथस्तोत्रं संपूर्णम् ।

918

PM2111 दारिद्र्यदहनस्तोत्रम् (नमः शिवायाष्टकम्)

End:

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम् ।
सर्वकार्यप्रदानानां हत्याकोटिविनाशनम् ॥ (?)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ब्रह्मघ्नोऽपि सुरापी चाश्रयादिगुरुतल्पगः ।
यः . . . शिवसांनिध्यं शिवसायुज्यमाप्नुयात् ॥

920

PM81 दीनाक्रन्दस्तोत्रम्

Beginning:

गौरीश्वराय भुवनत्रयकारणाय भक्तिप्रियाय भवभीतिभिदे भवाय ।
शर्वाय दुःखशमनाय वृषध्वजाय रुद्राय कालदहनाय नमः शिवाय ॥
सर्वेश्वरत्वे सति भस्मशायिने ह्युमापतित्वे सति चोर्ध्वरेतसे ।
वित्तेशभृत्ये सति चर्मवाससे निवृत्तदुःखाय नमस्तपस्विने ॥

End:

जातस्य जायमानस्य गर्भस्थस्यापि देहिनः ।
मा भूत् तत्र कुले जन्म यत्र शंभुर्न दैवतम् ॥
शंकरस्य च ये भक्ताः शान्ता(स्त)द्गतमानसाः ।
तेषां दासस्य दासोऽहं भूयां जन्मनि जन्मनि ॥

Colophon:

इति श्रीलङ्केश्वरेण कृतं दीनाक्रन्दस्तोत्रं समाप्तम् ।

925

73242 धन्यद्वादशकम्

Beginning:

हे मुक्तिदायक महेश पिनाकपाणे शंभो गिरीश हर शंकर चन्द्रमौले ।
विश्वेश्वरान्धकरिपो पुरसूदनेति मामर्चयन्त्यनुवदन्ति त एव धन्याः ॥
हे शर्व फालनयनामल विश्वमूर्ते श्रीनीलकण्ठ वरदोत्तम विश्वबाहो ।
भर्ग त्रिलोचन भगाक्षिहराजरेति मामर्चयन्त्यनुवदन्ति त एव धन्याः ॥

End:

हे नीललोहित दिगम्बर कृत्तिवासः श्रीकण्ठ शान्त निरुपाधिक निर्विकार ।
मृत्युंजयाव्यय निधीश गणेश्वरेति मामर्चयन्त्यनुवदन्ति त एव धन्याः ॥

928

73243 नटेशाष्टकम्

Beginning:

यथेच्छं यत्किंचित् प्रलप शिवनामापि तु सकृत्
यथाच्छन्दं वित्तं वितर शिवकार्येऽपि कणिकाम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सदा स्वैरं भ्राम्य क्षणमपि शिवे तिष्ठ तदिदं
महादेवो जिह्वे कर हृदय दोनोऽर्थयति वः ॥

End:

नहि हितमहितं वा नाथ जानामि मूढस्तदिह वरद याचे त्वां सभानाथ किं बा।
सकृदवनतिमात्रात् सुप्रसन्नो दयालो मम भवति हितं यत् तद्विधेहि त्वमेव ॥
जटाञ्चटत्स्वास्वदशम्बरस्य परास्तपुष्पायुधडम्बरस्य।
भवाम दासा हरिदम्बरस्य गृहीभवद्दिव्यचिदम्बरस्य ॥

Colophon:

इति नटेशाष्टकं संपूर्णम्।

929

71102 नटेश्वराष्टकम्

Beginning:

मन्दस्मेरमुखाम्बुजं मधुरिपुब्रह्मेन्द्रमुख्यैः सुरै-
र्वेदैर्भूतगणैस्तथा मुनिगणैस्तत्त्वे स्थिते आगमे।
नन्याद्यैर्गणनायकैश्च विनुतां मध्ये विहीनोऽप्यहं
स्कां किंचित् स्तुतिभिर्यथामति गणा स्वां चामिति नुग्रहम् ॥ (?)
किंचित्कुञ्चितवामपादविलसन्मञ्जीरशिञ्जारवैः
पुञ्जीभूत . . . यं सुरगणैः कंजाक्ष . . . . . नुतम्।
पञ्चानां स्थितिसृष्टिसंहृतितिरोधानप्रसादात्मनां
कर्तारं शरणं भजामि सततं श्रीचित्सभानायकम् ॥

End:

यः स्तोत्रं कुरुते पुमाननुदिनं भक्त्या नटेशाष्टकं
शंभोस्ताण्डववैभवात्मकमशेषानन्दसंदायकम्।
तस्याभीष्टवरानुमापतिरसौ गत्वा मुनिभ्यां दृढं
. . . ताण्डवमद्भुतं सुललितं संदर्शयत्यादरात् ॥

आनन्दनृत्तसमये + + + नयनानि कृतार्थयन्ति ॥ (See No. 810 above)

Colophon:

इति नटेश्वराष्टकं संपूर्णम्।

930

69692 **नमःशिवायरगडा**

Beginning:

श्रीमदात्मने गुणैकसिन्धवे नमः शिवाय। धामलेशधूतलोकबन्धवे नमः शिवाय ॥
नामशोषितानमद्भवाम्बुधे नमः शिवाय। वामकेतरप्रधानबन्धवे नमः शिवाय ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

शूलिने नमो नमः कपालिने नमः शिवाय । पालिने विरिञ्चिरुण्डमालिने नमः शिवाय ॥
लीलिनेऽक्षसंजितेऽघिकीलिने नमः शिवाय । शीलिने नमः प्रपुण्यशालिने नमः शिवाय ॥

934

75478 निग्रहाष्टकम्

Beginning:

आरुह्याचलसंनिभं घणघणग्रैवेयघण्टारवै-
राहूताखिललोकपालविबुधैः प्रोद्गीयमानो वृषम् ।
आश्लिष्याचलराजराजतनयामानन्दकल्लोलिनी-
मानन्दामृतवारिधिर्विबुधराडस्मत्पुरो धावतु ॥

. . . . . .

विलिखेद्विधिर्विशाले फाले दुर्वर्णपङ्क्तिमाकर्णम् ।
तिष्ठति तत्परिहर्ता कर्तास्माकं मनोजमदहर्ता ॥

End:

आरुह्य प्रियशाकरं घणघणग्रैवेयघण्टारवं
तामालिङ्ग्य तलोदरीं त्रिजगतां साधारणीं मातरम् ।
मच्चेतः स्वपदाम्बुजे प्रवणयन् वाचाटयन् मां स्तवै-
र्यत्र कापि मम प्रयाणसमये याहि स्मरारे पुरः ॥

Colophon:

इति दीक्षितवर्यकृतदुर्मतितातविषयकनिग्रहाष्टकं संपूर्णम् ।

935

66616 निर्वाणषट्कम्

Adds the following verse at the end:

कस्त्वं हि शोकस्य कुतोऽसि जन्तो किं नाम ते त्वं कुत आगतोऽसि ।
ये धर्मयुक्तं निजशास्त्रकस्त्वमप्रीतियः प्रीतविवर्थो निनोऽसि (?) ॥

936

75135 नीलकण्ठस्तवः

Beginning:

विशुद्धरत्नाङ्गदभूषिताङ्गं शिलातले हेममये सुरम्ये ।
सुखोपविष्टं मदनाङ्गनाशनं जगाद वाक्यं गिरिराजपुत्री ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

देव्युवाच—

भगवन् भूतभव्येश गोवृषाङ्कितशासन ।
तव कण्ठे महादेव भ्राजतेऽम्बुदसंनिभम् ॥
नत्या ? नीलं शुभं शुभ्रं नीलाञ्जनचयोपमम् ।
किमिदं दीप्यते देव कण्ठे कामाङ्गनाशन ॥
. . . . . .

ईश्वर उवाच—

मथ्यमानेऽमृते पूर्वं क्षीरोदे सुरदानवैः ।
अग्रे समुत्थितं घोरं विषं कालानलप्रभम् ॥
. . . . . .
इदं स्तोत्रं समारेभे ब्रह्मा वेदविदां वरः ।

ब्रह्मोवाच—

नमस्तुभ्यं विरूपाक्ष नमस्ते दिव्यचक्षुषे ।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

End:

इत्येतत् परमं गुह्यं पुण्या(त्) पुण्यतरं शुभम् ।
तदा स्वयंभुवा प्रोक्तं स्तोत्रं पापप्रणाशनम् ॥
. . . . . .
स्त्रियः शूद्राश्च येऽपीह रुद्रलोकं व्रजन्ति ते ॥

Colophon:

इति श्रीस्कन्दपुराणेऽमृतमथने देवदेवीसंवादे नीलकण्ठस्तवः समाप्तः ।

937

68345 **नीलकण्ठाष्टकम्**

Beginning:

गङ्गाधर महादेव गौरीवल्लभ शंकर ।
हर स्यजनकन्द(?) नीलकण्ठ नमोऽस्तु ते ॥
सर्वज्ञ सर्वलोकेश सर्ववन्दित शाश्वत ।
शर्व रुद्र विरूपाक्ष नीलकण्ठ नमोऽस्तु ते ॥

End:

यक्षेशस्य च मित्राज दक्षयज्ञविनाशन ।
भिक्षाशन जगन्नाथ नीलकण्ठ नमोऽस्तु ते ॥
नीलकण्ठाष्टकमिदं निर्मलं भक्तितो नरः ।
यः पठेत् पापनिर्मुक्तः परमेश्वरमाप्नुयात् ॥

Colophon:

नीलकण्ठाष्टकम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

938

73244 **पञ्चनदेशस्तुतिः**

Beginning:

सुरथायात्मजार्थाय कैलासशिखरद्वयम् ।
आनीतमत्र कृपया पाहि पञ्चनदीपते ॥
शिलादजाय भक्ताय निजसारूप्यमप्यदाः ।
द्वाराध्यक्षाधिपत्यं च पाहि पञ्चनदीपते ॥

End:

श्लोकान् पञ्चनदक्षेत्रमाहात्म्यप्रतिपादकान् ।
ये वदन्त्यत्र तान् सर्वान् पाहि पञ्चनदीपते ॥
पञ्चापगेश जल्पेश(?जप्येश)प्रणतार्तिहरेति च ।
जपेन्नामत्रयं नित्यं पुनर्जन्म न विद्यते ॥
रक्ष पञ्चनदीनाथ दयासिन्धो परेश्वर ।
अनाथनाथ भक्तानामभयप्रद शंकर ॥

946

75135 **पञ्चमुखस्तोत्रम्**

End:

यद्देवासुरपूजितं मुनिवरैः सोमार्कतारागणैः
पुन्नागाम्बुजचम्प . . . वकुलैर्न्यासैः सुरैरर्चितम् (?) ।
नित्यं ध्याननिरस्तचित्तकुह(रे?)रध्वान्तं सदाहं भजे
तद्देवं परमं परात्परतरं पातालवक्त्रं मुखम् ॥

शान्तं पद्मासनस्थं + + + नौमि तत्त्वं शिवाख्यम् ॥
एतानि षड् + + + रुचिरैर्विमानैः ॥

पश्चिमस्य मुखं शंभु वेदाध्यायी सदा भवेत् ।
उत्तरे गायनं प्रोक्तं पूर्वे सयपमुच्यते ॥ (?)
संहारं दक्षिणे चैव नैवेद्यं शून्यमेव च ।
एतद्गोप्यं सदा दृष्टं मुच्यते च भवन्ति याः ॥ (?)
पञ्चाननं महेशश्च कथितं भुवमग्रतः ।
यद् दृष्ट्वा मुच्यते पापं सर्वतीर्थेषु यत् फलम् ।
तत्फलं लभते पुंसां पञ्चाननविलोकनात् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीशिवतन्त्रे हरपार्वतीसंवादे शिव(व)क्त्रनिर्णयः संपूर्णः ।

951

73243 **पञ्चाक्षरस्तोत्रम्**

Beginning:

नक्षत्रनाथोज्ज्वलशेखराय नगात्मजालाञ्छितविग्रहाय ।
नताभिलाषात् प्रतिवेष्टिताय तस्मै नकाराय नमः शिवाय ॥

End:

यक्षेश्वरेष्टाय यमान्तकाय यज्ञद्रुमद्रोहपरश्वथाय ।
यमादिमाष्टाङ्गकराङ्कुराय तस्मै यकाराय नमः शिवाय ॥
पञ्चाक्षरस्तोत्रमुमाधिपस्य भजन्ति ये पन्नगभूषणस्य ।
भजन्ति ते पुत्रकलत्रमित्रसौभाग्यपूर्णानि सदा फलानि ॥

956

71102 **पञ्चाक्षराष्टकम्**

Beginning:

मञ्जीरपादाय महानटाय मुरारिनेत्रार्चितपादुकाय ।
चन्द्रार्धचूडाय सदाशिवाय चिदम्बरेशाय नमः शिवाय ॥
देवेन्द्रवन्द्याय दयापराय दारिद्र्यरोगादिनिवारणाय ।
नागेन्द्रवन्द्याय निवारणाय चिदम्बरेशाय नमःशिवाय ॥

End:

कमलभवमुकुन्दनिर्जरेन्द्रस्तुतनतसंभ्रमनृत्तविभ्रमाय ।
अचलपतिसुतासहाय तुभ्यं कनकसमापतये (चिदम्बरेशाय) नमः शिवाय ॥

Colophon:

इति **पञ्चाक्षराष्टकं** संपूर्णम्

957

PM2609 **पञ्चाक्षरीस्तोत्रम**

Beginning:

नमो नमः कारणकारणाय जगन्मयायाहितरक्षकाय
त्वत्पादपद्माश्रितरक्षकाय श्रीनीलकण्ठाय नमः शिवाय ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ध्यायन्ति ये त्वां यतयः स्तुवन्ति हृदम्बुजे दीपसमप्रकाशम् ।
नासाग्रविन्यस्तवि(रो?लो)चनाय श्रीनीलकण्ठाय नमः शिवाय ॥

End:

स्वर्णाय शर्वप्रियदर्शनाय पिनाकिने बाणधराय तुभ्यम् ।
गौरीप्रियायाखिलपालकाय श्रीनीलकण्ठाय नमः शिवाय ॥

Colophon:

पञ्चाक्षरीस्तोत्रं संपूर्णम् ।

958

75135 **पञ्चाननाष्टकम्**

Beginning:

पञ्चाननं चारुविभूतिभूषितं नागेन्द्रहारं मणिकुण्डलान्वितम् ।
वामेन शैलेन्द्रसुतासमाश्रितं शिवं भजे पार्वतिवल्लभं हरम् ॥
त्रिलोचनं स्निग्धशरद्घनोपमं द्विपेन्द्रचर्मांशुकधारिणं प्रभुम् ।
नागोपवीतं वृषभेन्द्रकेतनं शिवं भजे पार्वतिवल्लभं हरम् ॥

End:

शिवाष्टकमिदं पुण्यं पावनं चिरसंचितम् ।
प्रज्ञाशक्तिकरं स्फीतमशोकविजयप्रदम् ॥
भूमिलाभं धनापत्यं पूजासत्कारभाजनम् ।
विजयं सर्वकार्येषु पापक्षयकरं परम् ॥

Colophon:

इति श्रीपञ्चाननाष्टकं संपूर्णम् ।

968

71137 **परशंभुमहिम्नःस्तुतिः**

Adds the following verse at the beginning:

अनेकशक्तिसंघट्टप्रकाशलहरीघनः ।
शुद्ध . . . . पायाच्छ्रीशंभुः परमेश्वरः ॥

End:

सदसदनुग्रहनिग्रहगृहीतमुनिविग्रहो भगवान् ।
सर्वासामुपनिषद . . . सा जयति देशिकः प्रथमः ॥

Colophon:

श्रीदुर्वासकृतशिवमहिम्नं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

976

72296 **प्रातःस्मरणीयश्लोकपञ्चकम्**

The following stanza is added at the end:

दुर्वासकाश्यपविरिञ्चिमृकण्डुपुत्रदेवेन्द्रबाणहरिशक्तिदधीचिरामान् ।
कण्वात्रिशुक्रगुरुगौतमकुम्भजादीन् पुण्यानिमान् परमपाशुपतान् स्मरामि ॥

985

PM81 **बहुरूपगर्भस्तोत्रम्**

Beginning:

ब्रह्मादिकारणातीतं स्वशक्त्यानन्दनिर्भरम् ।
नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥
कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पप्रच्छ प्रणता देवी भैरवं विगतामयम् ॥

श्रीदेव्युवाच—

प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च ।
महाभयेषु सर्वेषु तीव्रोपद्रवभूमिषु ॥
. . . . .

ईश्वर उवाच—

शृणु देवि परं गुह्यं रहस्यं परमाद्भुतम् ।
सर्वपापप्रशमनं सर्वदुर्गतिनाशनम् ॥
. . . . . .

ओं नमः परमाकाशशायिने परमात्मने ।
शिवाय परमं शान्तं नित्यानन्दप्रदायिने ॥

End:

प्रजानां मुक्तये घोरघोरसंसारदायिने ।
घोरातिघोरमूढानां त्रिरस्थात्रे(?) नमो नमः ॥
इत्येवं स्तवराजेशं महाभैरवभाषितम् ।
योगिनीनां परं स्थानं न दद्याद् यस्य कस्यचित् ॥
. . . . . .

गजव्याघ्रादयो भूताः पलायन्ते दिशो दश ।
सर्वे दुष्टाः प्रणश्यन्ति इत्याज्ञा पारमेश्वरी ॥

Colophon:

इति श्रीललित(?)स्वच्छन्दे परमरहस्ये बहुरूपगर्भस्तोत्रं समाप्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

986

66616 **बीजभैरवाष्टकम्**

Beginning:

मन्दारद्रुममूलभाजि महिते माणिक्यसिंहासने
दिव्यश्चाधरभिन्नचम्पकरुचा देव्या समालिङ्गिते (?त:) ।
भक्तेभ्य: कररत्नपात्रभरितस्वर्णं ददानो भृशं
स्वर्णाकर्षणभैरवो विजयते स्वर्गापवर्गैकभृत् ॥
यं यं यं यस्त्वलम्बं दशदिशि नमितं भूमिकम्पायमानं
सं सं संहारमूर्तिं शिरसि . . . जटाजूटितं चन्द्रबिम्बम् ।
दं दं दं दीर्घदेहं विकृतकृत . . . ज्वालमालाकरालं
फं फं फं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

End:

हं हं हं हास्यहास्यं जितगहगहनं घोरगम्भीरघोषं
फं फं फं फालनेत्रं कपिलमरुजटाटङ्कघण्टाक्षमालम् ।
खं खं खट्वाङ्गशूलं डमरुकसहितं वामहस्ते कपालं
धुं धुं धुं धूम्रवर्णं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

990

71102 **बीजभैरवाष्टकम् (भैरवाष्टकम्)**

End:

हूंकारं घोरनादं पृथु भवनिलयं चोग्रतेज:प्रभावं
श्रींकारं सिद्धयोगं सकलसुरमयं सर्वरक्षाधिपत्यम् ।
प्रेंकारं प्रेतनाथं पृथुवनदहनं भैरवं भद्रहस्तं
त्रैलो . . . वश्यं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

Colophon:

इति भैरवाष्टकं संपूर्णम् ।

991

74263 **बीजभैरवाष्टकम् (भैरवाष्टकम्)**

End:

हं हं हं हंसहंस सितकुहकुहान्मुक्तियोगामृहासं (?)
यं यं यं यक्षरूपं शिरकपिलजटाबन्धबन्धान्तहस्तम् ।
रं रं रं रङ्गरूपं प्रहसितवदनं पिङ्गकेशाङ्गरागं
सं सं सं साक्षनाथं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

भैरवाष्टकमिदं पुण्यं सर्वकाले पठेन्नरः।
सर्वव्याधिविनाशाय निश्चितार्थं महामुने ॥

Colophon:

भैरवाष्टकं परिसमाप्तम्।

992

PM2820 **बीजभैरवाष्टकम् (भैरवाष्टकम्)**

Beginning:

अस्य श्रीवटुकभैरवाष्टकस्तोत्रमन्त्रस्य ईश्वर ऋषिः, भैरवो देवता, अनुष्टुप् छन्दः, मम सर्वकामसिद्ध्यर्थे जपे विनियोगः . . .।

यं यं यं यक्षरूपं दशदिशि वशितं भूमिकम्पायमानं
सं सं संहारमूर्तिं सिरमकुटजटाशेखरं चन्द्रबिम्बम्।
दं दं दं दीर्घकायं विकृतरवमुखम् ऊर्ध्वरोमं करालं
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

End:

हं हं हं हंसः हसितकहकहमुक्तयोगीन्द्रहासं(?)
यं यं यं यक्षरूपं शिरकपिलजटाबन्धबन्धाग्रहस्तम्।
टं टं टकारवर्णं त्रिदशदशदलं कामदर्पोपहारं
भुं भुं भुं भूतनाथं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

ईशान्यां दिशि संहारभैरव(ाय न)मः मम रक्ष रक्ष कालकण्टकान्। भक्ष भक्ष आवाहयाम्यहं तिष्ठ तिष्ठ हुं फट् स्वाहा।

भैरवाष्टकमिदं पुण्यं षण्मासं यः पठेन्नरः।
स याति परमं स्थानं यत्र देवो महेश्वरः ॥

Colophon:

इति **भैरवाष्टकं स्तोत्रं** संपूर्णम्।

993

75135 **ब्रह्मगीता**

Beginning:

ब्रह्मोवाच—

ततः पुनरहं देवमस्तुवं परमेश्वरम्।
जगद्धीनिहरं भीमं कोटिभास्करवर्चसम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

नमः शिवाय शर्वाय सर्वरूपधराय च ।
भवोद्भवाय देवाय भवनाम्ने नमो नमः ॥

End:

य इमां जपते भक्त्या शृणुयाद् वा समाहितः ।
ब्रह्मगीतां प्रयत्नेन षण्मासात् सिद्धिमाप्नुयात् ॥

. . . . . .

चतुर्दश्यां विशेषेण पठेद्यस्तु शिवाग्रतः ।
स लभेच्छिवसायुज्यं सत्यं सत्यं हि पार्वति ॥

Colophon:

इत्येकात्मपुराणे प्रथमांशे ब्रह्मगीताकथनं नाम चतुर्थोऽध्यायः ।

1008

PM81 भैरवस्तोत्रम्

End:

वसुरसपौषे कृष्णदशम्यामभिनवगुप्तः स्तवमिममकरोत् ।
येन विभुर्भवमुरुसंतापं शमयति झटिति जनस्य दयालुः ॥
प्रभाते भैरवं रागं ये गायन्ति महीतले ।
तेषां दुःख न दारिद्र्यं भूयो जन्म न विद्यते ॥

Colophon:

इति श्री अभिनवगुप्ताचार्यकृतं भैरवस्तोत्रं समाप्तम् ।

1010

75433 भैरवाष्टकम्

Beginning:

जय यक्षपते . . . जय पिङ्गललोचन ।
जय पिङ्गजटाभार जय दण्डमहायुध ॥
अविमुक्तमहाक्षेत्रसूत्रधारोग्रतापस ।
दण्डनायक भीमास्य जय विश्वेश्वरप्रिय ॥

End:

प्रादुर्भावं दण्डपाणेः शृण्वन् स्तोत्रमिदं गृणन् ।
विपत्तिमन्यतः प्राप्य काशीं जन्मान्तरे लभेत् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रुत्वाध्यायमिमं पुण्यं दण्डपाणिसमुद्भवम् ।
पठित्वा पाठयित्वापि न विघ्नैरभिभूयते ॥

Colophon:

इति **भैरवाष्टकं** संपूर्णम् ।

1011

75135 **मञ्जुघोषनामनिर्वचनम्**

Beginning:

अनङ्गतनुनाशनं अवल एचनं(?)कामदं
अनन्तफणिभूषणं . . . मलविग्रहं भासुरम् ।
अनेकसुरसुन्दरी . . . सितचामरैर्वीजितं
. . . लोकगतिदं विभुं अभयदं तमीशं भजे ॥ (?)

End:

एतत् षडक्षरपदस्तवमुत्तमानां यो नित्यशः पठति तत्परचित्तवृत्तिः ।
तेषां कवीन्द्रभुवनाधिपतिं पदानां सत्येव(?)शैलतनयाधव आशु कुर्यात् ॥

Colophon:

इति **भैरवतन्त्रे मञ्जुघोषनामचतुर्वचनं(?)**समाप्तम् ।

1012

71941 **मध्यार्जुनेशस्तोत्रम्**

Beginning:

नतोऽस्मि देवाय गिरीन्द्रवासिने गिरीशकन्यार्धशरीररूपिणे ।
कालाय कल्पाय त्रिलोचनाय मध्यार्जुनेशाय नमः शिवाय ॥

End:

वृषाय विष्णवर्चितविग्रहाय पापाचलच्छेदकुठाररूपिणे ।
समस्तकल्याणगुणाकराय मध्यार्जुनेशाय नमः शिवाय ॥

1013

73243 **महिम्नःपीठिका**

Beginning:

पुरात्र पुष्पदन्तेन तपस्तप्तं दुरासदम् ।
तत्कृते नैव तपसा क्षुब्धमासीज्जगत्त्रयम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इन्द्रादयो लोकपालाः क्षुब्धाः सर्वे तदा मुने ।
विष्णुलोकं ययुः शीघ्रं ब्रह्मणापि समन्विताः ॥

End:

महेशान्नापरो देवो महिम्नो नापरः स्तवः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥
दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नःस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥
एतादृशैस्तपस्तप्तमत्रैव बहुभिः पुरा ।
ते महेशप्रसादेन मुक्ताश्च मुनिसत्तम ॥

1014

73401 महिम्नःस्तवः

Beginning:

महेशानन्ताद्य + + + नमोवेद्य शिव ते ॥

End:

य(?एत)न्मया पशुपतीश्वरसंनिधानं(?न)वासस्य सम्यगमले फलमुक्तमाद्यम् ।
का(?से)यं कथा सकलपापवनाग्निभूता श्राव्या सुधारसमयी शिवभक्तवर्यैः ॥

Colophon:

इति श्रीविष्णुकृतमहिम्नं संपूर्णम् ।

1019

TR831 महिम्नःस्तवः सव्याख्यः

Beginning:

ननु परमशिवमायामोहितयोः अत एव महत्तमगर्वपर्वताधित्यकारूढयोर्ब्रह्मनारायणयोर्मध्ये प्रादुर्भूतस्य महालिङ्गस्याग्रभागनिफालनासमर्थतया गर्वभङ्गे सत्यधःपतनमाशङ्कमाने नलिनासने भगवत्कृपासमासादितभक्तिमारावनम्रे तमेवं भगवन्तमवगिरमाणे सति किं नारायणे भगवतः परशिवस्य तादृशी कृपा नासीदिति सकलभूमारधारकस्य नागराजस्य हृदयगतमभिप्रायमधीत्य काशीक्षेत्रमध्यवर्तिपशुपतीश्वरस्थलवासी महाशैववर्यो नारायणकथां गद्येनावतारयति—विष्णुरुवाचेति . . . . अथ चत्वारिंशता शिखरिणीवृत्तभङ्ग्या विष्णुकृतमेव स्तोत्रमुपदिशति—महेशेत्यादि ।

End:

उपक्रान्तं पशुपतीश्वरस्थलमाहात्म्यमुपसंहरति—एतदिति वसन्ततिलकावृत्तेन । तथाहि—छन्दोविचितौ पैङ्गलसूत्रम्—वसन्ततिलका तभौ जौ गाविति । अमले हे मनोन्मनि । सकलेति

CC0. In Public Domain. Digitized by Muthulakshmi Academy

विशेषणादनिष्टनिवर्तकत्वम् । सुधारसमथी अमृतद्रवात्मकेत्यभीष्टप्रापकत्वम् । श्राव्या महावैदिकैः परमादरेण श्रोतव्या । अथेदानीं भगवान् जैगीषव्यो महायोगीश्वरेश्वरः श्रोतॄणामजामित्वाय गद्येन नवमानन्तरमध्यायं समापयति—इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादे काशीमाहात्म्ये पशुपतीश्वरेतिहासकथनं नाम दशमोऽध्यायः । इतिहासः शैवशेषसंवादलक्षणं पुरावृत्तमित्यर्थः ।

चिदम्बरब्रह्मकाशी श्रीचिदम्बरदीपिका ।
जयत्यद्वैतसदने सदनेकजनाश्रये ॥
जगत् सर्वमिदं जातं श्रीविद्यामयमद्भुतम् ।
श्रीमच्चिदम्बरब्रह्मदेशिकैरुपदेशकैः ॥
भस्मोद्धूलितगात्राय विद्यानेत्राय चित्पदे ।
श्रीमच्चिदम्बरब्रह्मगोत्राय गुरवे नमः ॥
विष्णुक्लेशस्तोत्रव्याख्या येनास्मद्वक्त्राब्जस्थेन ।
कृता तस्मै नित्यं मत्काः सन्नामाः सन्त्वेतेऽनन्ताः ॥
स्फुरदुपनिषद्व्याहाराहर्मणीमहनीयभा-
दलिततिमिरादेशा दिश्याद् दिवाकरसंहिता ।
परमकृपया चैदंपर्यापरात्ममतिं पुरा
स्फुटशिवरहस्यार्थश्रीमच्चिदम्बरदीपिका ॥
शिवरहस्यलैरिति हासकैः शिवरहस्यपदार्थविकासकैः ।
शिवरहस्यपरप्रथितं परं शिवरहस्यमिदं हि चिदम्बरम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मविद्यासंप्रदायप्रवर्तकातिवर्णाश्रमिचिदम्बरब्रह्मस्वामिप्रियतमान्तेवसदग्रेसरभरद्वाजकुलकलशाम्बुराभ्यभिनवराकासुधाकरदिवाकरसंहितायां श्रीमच्चिदम्बरदीपिकायां महता विस्तरेण विष्णुप्रोक्तमहेशस्तोत्रविवरणं नाम दशमोऽध्यायः ।

शिवप्रदाय सर्वेषामस्त्वरिष्टापहारिणे ।
श्रीमच्चिदम्बरसमानटराजाय मङ्गलम् ॥
सधनुर्मूलहिमांशुदिवाकरः परिसमापयदाशु दिवाकरः ।
दशमसर्गमहाम्बरदीपिकां शिवरहस्यचिदम्बरदीपिकाम् ॥

1022

73248 **महिम्नःस्तवः**

End:

दीक्षा दानं + + + षोडशीम् ॥
याचेऽहं याचेऽहं शिव तव चरणारविन्दयोर्भक्तिम् ।
याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

याचेऽहं याचेऽहं मनसि तरसा ध्यानममलम् ।
याचेऽहं याचेऽहं वचसि नितरां नाम रुचिरम् ॥
यस्मै नमो भवति यस्य गुणाः समग्रा नारायणोपनिषदा यदुपासनोक्ता ।
यो नः प्रचोदयति बुद्धिमधि क्रतौ यस्तं त्वामनन्यगतिरीश्वर संश्रयामि ॥

Colophon:

इति पुष्पदन्तमहिम्नस्तवं संपूर्णम् । नारायणय्यङ्गार् लिखितम् ।

1031

PM2871 महिम्नःस्तवः

Adds the following verses at the end:

दीक्षा + + + षोडशीम् ॥

भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं प्रभो ॥
उरसि महोरगहारः शिरसि च नीहारदीधिते रेखा ।
गरलं कण्ठललाटे त्रिणयनम(स्या)स्मि दासोऽहम् ॥
याचेऽहं याचेऽहं शिव तव चरणारविन्दयोर्भक्तिम् ।
याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥

कुसुमरदननामा + + + महिम्नः ॥ सुरवरमुनिपूज्यं + + + पुष्पदन्तप्रणीतम् ॥ श्रीपुष्पदन्तमुख + + + भूतपतिर्महेशः ॥ इत्येषा वाङ्मयी + + + च सदाशिवः ॥

शिवो गुरुः शिवो देवो शिवो बन्धुः शरीरिणाम् ।
शिव आत्मा शिवो जीवः शिवादन्यन्न किंचन ॥

Colophon:

इति श्रीकेदारखण्डे पुष्पदन्तविरचिते महिम्नःस्तोत्रं संपूर्णम् ।

1034

66067 महिम्नःस्तवः

Reads the fol owing stanzas at the end:

दीक्षा + + + षोडशीम् ॥ समाप्तोऽयं + + + गन्धर्वभाषितम् ॥ कुसुमदशननामा + + + दिव्यदिव्यं महिम्नः ॥ सुरवरमुनिपूज्यं + + + पुष्पदन्तप्रणीतम् ॥ श्रीपुष्पदन्त + + + भूतपतिर्महेशः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

रसने रचितोऽयमञ्जलिस्ते परनिन्दापरुषैरलं वचोभिः ।
नरकापहरं नमः शिवायेत्यमुमादिप्रणवं भजस्व मन्त्रम् ॥

याचेऽहं + + + पुनरपि तामेव तामेव ॥

Colophon:

महिम्नं संपूर्णम् ।

1041

67598 **महिम्नस्तवः सव्याख्यः**

Beginning:

महिम्नः + + + परिकरः ॥

अथ पुरा भट्टाचार्यो बौद्धैः सह निरीश्वरवादं कृत्वा तद्दोषपरिहारार्थमेतस्य स्तोत्रस्य प्रतिश्लोकं व्याख्यानं कृतवान् । यथा चाद्यश्लोके हरशब्दो यः संबोधनरूपेण प्रयुक्तस्तस्य हरशब्दस्यायमर्थः—हृञ् हरणे इत्यस्माद्धातोर्निष्पन्नत्वेन कायिकमानसिकवाचिकानि सर्वाणि पापानि हरतीति हरः । तस्य संबुद्धिः हे हर । ते तव महिम्नः ऐश्वर्यस्य पारम् अन्त्यपारं सम्यगविदुषोऽविज्ञातवतः स्तुतिः स्तोत्रम् असदृशी यदि अननुरूपा चेत् . . .

End:

महेशादिति । महेशादन्यो देवो नास्ति, महिम्नः अपरा स्तुतिर्नास्ति । अघोरान्मन्त्रादपरो मन्त्रो नास्ति । गुरोः परमन्यद्वस्तु नास्ति । यथा शिवः सर्वोत्तमः एवमियं स्तुतिरिति तात्पर्यार्थः ।

Colophon:

इति श्रीभट्टाचार्यविरचिता महिम्नःस्तुतिव्याख्या समाप्ता ।

1042

73404 **महिम्नःस्तवः सव्याख्यः**

End:

वपुःप्रादुर्भावात् + + + द्वयमपि ॥

वपुरिति . . . . अर्थान्तरमाह—हे पुरारे संप्रति नमन्मुक्तः । ईश्वरो नास्तीति वादो मयोक्तः सन् अग्रे पुरस्तात् अन्तर्धाने अतनु(?)दृष्टशरीरा भूतिरिति शेषः । . . .

. . . कथं पूर्वजन्मनि सदा नमस्काराकरणमिति चेत् वपुःप्रादुर्भावात् ईश्वर त्वद्वपुषो मां प्रति प्रत्यक्षत्वात् विहितापराधं हि मां परित्यक्तुमसहमानः पुनराविर्भूतः तस्मादनुमितम् अनुमानेन ज्ञातम् । तस्मादपराधद्वयं क्षन्तव्यं सोढव्यम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1045

71207 महिम्नःस्तवः कौमुदीटीकासहितः

Beginning:

महिम्नः + + + परिकरः ॥

श्रीचेन्नभट्टात्मजपेद्दसूरिणा टीका महिम्नो रचिता च कौमुदी ।
याभूच्चिरं तिष्ठतु मेदिनीतले नत्वा गणेशं प्रमथाधिनायकम् ॥

महिम्न इति। हे हर ते तव महिम्नः ऐश्वर्यस्य पारम् अन्तं परं सम्यग् अविदुषः अविज्ञातुः स्तुतिः स्तोत्रम् असदृशी यदि अनुरूपा न चेत् तत् तर्हि ब्रह्मादीनां गिरोऽपि श्रुतिरूपा वाचोऽपि त्वयि भवद्विषये अवसन्नाः कुण्ठिताः। सर्वः अशेषः जनो ब्रह्मादिः स्वमतिपरिणामावधि आत्मप्रज्ञा-परिपाकान्तं यथा भवति गृणन् स्तुवन् अवाच्योऽथ अनिन्द्यो यदि तर्हि मम स्तोत्रे एष परिकरः उद्योगोऽपि निरपवादः निन्दारहितः इत्यनुसंधेयम् ।

End:

नमो नेदिष्ठाय + + + सर्वाय च नमः ॥

नम इति । हे प्रियदव प्रियो दव अरण्यं यस्य स तथोक्तः । तस्य संबुद्धिः हे प्रियदव । नेदिष्ठाय अत्यन्तसंनिहिताय । अतिशायने तमबिष्ठनावितीष्ठन्प्रत्ययः । . . . . सर्वस्मै निखिलस्वरूपाय ते तुभ्यं नमः । अतिसर्वाय सर्वमतीत्य वर्तत इत्यतिसर्वः तस्मै नम इत्यर्थः ॥ ३० ॥ हरिः ओम् ।

बहलरजसे + + + नमो नमः ॥ ३१ ॥ कृशपरिणति + + + पुष्पोपहारम् ॥ ३२ ॥ वपुःप्रादुर्भावाद् + + + द्वयमपि ॥ ३३ ॥ असितगिरिसमं + + + न याति ॥ ३४ ॥ असुरसुर + + + चकार ॥ ३५ ॥ अहरहरनवद्यं + + + कीर्तिमांश्च ॥ ३६ ॥ महेशाद् + + + परम् ॥ ३७ ॥ दीक्षा + + + षोडशीम् ॥ ३८ ॥

Colophon:

महिम्नःस्तवं संपूर्णम् ।

1046

PM2873 महिम्नःस्तवः टीकासहितः

Beginning:

. . . प्रकटयन्नाह—खलु निश्चितम् । स धाता त्रिभुवनं सृजति । किमीहः का ईहा यस्य स किमीहः । स धाता किमीहः सन् विश्वं सृजति . . . क्रिया । अथ किंकायः सन् त्रिभुवनं सृजति । त्रिभुवनजनने किमुपादानम् । किं निमित्तम् अयमिति । . . .

End:

कृशपरिणति + + + पुष्पोपहारम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

हे वरद मदीयं चेतो मनः इदं क्व । क्व तव ऋद्धिः प्रभावः महदन्तरमेतयोः । कथंभूतं चेतः क्लशपरिणति स्तोकबुद्धिप . . . पुनः कथंभूतम् आधिभौतिकाधिदैविकाध्यात्मिकादिदुःखत्रयविक्षेप-पराधीनम् । . . . तव चरणयोर्वाक्यपुष्पोपहारं वाक्यमेव पुष्पदन्तस्य पुष्पोपहारः पूजा । वाक्य-पुष्पोपहारम् आधात् आरोपयेत् इति वाक्यार्थः ॥ ३१ ॥

असितगिरिसमं + + + पारं न याति ॥ असुरसुर + + + स्तोत्रमेतच्चकार ॥

Colophon:

इति पुष्पदन्तविरचितं महेशस्तोत्रं समाप्तम् ।

The following stanzas are also seen after the colophon:

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥
कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्तनात् ॥
जपहोमतपस्तीव्रयोगयागादिकाः क्रियाः ।
महिम्नःस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥
शिवे भक्तिः शिवे भक्तिः शिवे भक्तिर्भवे भवे ।
पुनरेव शिवे भक्तिः पुनरेव शिवे शिवे ॥
. . . . . .

1048

75135 महेशाष्टकम्

Beginning:

अनाथैकनाथं प्रभुं लोकनाथं विभुं भूतनाथं जलान्तर्गतस्थम् ।
जगन्नाथनाथं चिदानन्दगाथं हरं शंकरं शंभुमीशानमीडे ॥

End:

श्मशाने निवासं लसत्कृत्तिवासं महाट्टहासं निशेशावतंसम् ।
महाभोतिनाशं गिरीशं प्रकाशं हरं शंकरं शंभुमीशानमीडे ॥

Colophon:

इति श्रीमहेशाष्टकं संपूर्णम् ।

1049

75135 महेशाष्टकम्

Beginning:

महेशं हरं शंकरं चन्द्रचूडं गिरीशं शिवं पार्वतीशं सुरेशम् ।
विभुं वामदेवं परं विश्वरूपं त्रिनेत्रं त्रिलोकीपतिं नौमि नित्यम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

इति प्रीतये वार्चयेल्लोकनाथं पठेद् यस्तु भक्त्या नरः क्षेमयुक्तः।
दहेत् पातकं पापराशीन् निहन्यात् वरं पूर्णकामा परः पूतमूर्ते(?) ॥
इति शंकराचार्यभाव्यं भजस्व पठेद् विश्वनाथं नरो यः स धन्यः।
स यातीशलोको न याति न शोको हरेर्विश्वमूर्तौ वरं वामृतत्वै(?) ॥

Colophon:

इति श्रीशंकराचार्यविरचितं महेशाष्टकं संपूर्णम्।

1053

73248 मातृभूतशतकम्

End:

श्रीमातृभूत शिव चन्दनसारलिप्तां संक्षृतहेमलतिकां धृतपुष्पमाल्याम्
अक्ष्णामुना तव तनुं पिबतोऽक्ष्युदन्या स्यान्मे यथाशु फलिनीश तथा दयेथाः ॥
सकृदपि शिव पाहीत्येतदाकर्ण्य दूरात् सरभसमुपयान्त्योस्त्वत्कृपावीक्षयोः किम्।
मदवनविधिकेल्यां मातृभूतेश्वरासीदहमहमिकया जिस्तेन मन्ये विलम्बम् ॥

1064

73510 मृत्युंजयस्तोत्रम्

Beginning:

ओंकाराक्षर दिव्याङ्ग सर्वेश सर्वकारण।
प्रणवाख्य परं तत्त्व मृत्युंजय नमोऽस्तु ते ॥
नकाराक्षर दिग्वक्त्र शरच्चन्द्रांशुराजित।
सद्योजात महाब्रह्म मृत्युंजय नमोऽस्तुते ॥

End:

सद्यादिपञ्चब्रह्माख्यतत्त्वमूर्ते महेश्वर।
नादबिन्दुकलातीत मृत्युंजय नमोऽस्तु ते ॥
शिवया कथितं स्तोत्रमिदं मृत्युंजयं परम्।
यः पठेत् प्रयतस्तस्य नास्ति मृत्युभयं महत् ॥

1069

72193 मेधादक्षिणामूर्तिस्तवराजः

Beginning:

निरवधिकमेकसत्त्वं निरुपमविज्ञानमपगतध्वान्तम्।
परमानन्दघनं तत् प्रकचति परवस्तु किमपि निजधाम्नि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वटभूरुहतटवासं निटिलाम्बकमेकमम्बिकाश्लिष्टम् ।
विद्युत्पिङ्गजटोज्ज्वलमस्तकमाभाति निस्तुलं वस्तु ॥

End:

नमस्ते प्रत्यगद्वैतपरमानन्दविग्रह ।
इति श्रीदेवदेवस्य स्तवराजमनुत्तमम् ॥
गुह्याद् गुह्यतरं पुण्यं सर्वाभीष्टप्रदायकम् ।
यो जपेत् प्रयतो नित्यं महादेवस्य संनिधौ ॥
स सर्वभोगान् भुक्त्वाथ कैवल्यं प्रतिपद्यते ।
चिन्मुद्रितकरकमलं चिन्तितभक्तेष्टदं विमलम् ॥
गुरुवरमाद्यं कंचन निरवधिकानन्दनिर्भरं वन्दे ॥

Colophon:

इति श्रीमेधादक्षिणामूर्तिस्तवराजः समाप्तः ।

1071

77644 लिङ्गाष्टकम्

Adds the following verse after the colophon:

वन्दे शूलधरां वरां वरजनैर्वन्द्यां त्रिनेत्रां शिवां
वन्दे कुङ्कुमलेपनां वरकृतां वन्दे जगन्मोहिनीम् ।
वन्दे माहिषमर्दिनीं वरकृतां वन्दे मुकुन्दप्रियां
वन्दे शंकरदूदितां(?)भयहरां वन्दे उदीचोन्मुखीम् ॥

1076

75135 लिङ्गोद्भवस्तोत्रम्

Beginning:

एतत् पुराणं परमं पवित्रं पापापहं पुण्यविवर्धनं च ।
परं च सूक्ष्मं मुनिभिश्च गीतं परापरज्ञं परमं च शाश्वतम् ॥
नमोऽस्तु ते दैत्यसमानवक्त्र नमोऽस्तु ते दैत्यसमानमौले ।
नमोऽस्तु ते देव पिनाकधारिन् नमो हितार्थं जगतोपधारिन् ॥ (?)
नमोऽस्तु ते भूषणवेशधारिन् नमोऽस्तु ते भस्मविभूषिताङ्ग ।
नमोऽस्तु ते कामशरीरनाशिन् नमोऽस्तु ते सूक्ष्म अनन्तशक्ते ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

एष संक्षेपत: प्रोक्त: प्रभावस्तस्य योगिन: ।
तेन सर्वमिदं सृष्टं हेतुभ्य ह्रा तु सर्वजित् (?) ॥
स्वर्ग्यमारोग्यमायुष्यमेष शाक्तकरस्तथा ।
तस्य विघ्नं न कुर्वन्ति दानवा यक्षराक्षसा: ॥
पिशाचा यातुधानाश्च गुह्यका भुजगास्तथा ।
य: पठेत शुचि: प्रातर्ब्रह्मचारी जितेन्द्रिय: ॥
अभग्नयोगो माहात्म्यमश्वमेधफलं लभेत् ।

Colophon:

इति श्रीशिवपुराणे पूर्वखण्डे लिङ्गोद्भवो नामाष्टादशोऽध्याय: ।

1077

67160 **वामदेवनवरत्नमालिकास्तुति:**

Beginning:

त्र्यक्षाय नृत्तविधिदक्षाय मोहहरभिक्षाटनाय मदभृद्-
दक्षादिदुष्टजनशिक्षाय शिष्टजनरक्षाय मे नतिरियम् ।
उक्षाग्रगाय विषभक्षाय भक्तिनतयक्षाधिपेडितपदे
लक्षाण्डकोटिजनपक्षाय संभवतु तक्षादिभोगिवपुषे ॥

End:

सोमाय मौलिधृतसोमाय साधुजनकामाभिवर्षिकरुणा-
भूमाब्धये विविधसामाभिगानरसरोमाञ्चितात्मवपुषे ।
भीमार्चिताय युधि भोमाय पाणिधृतहेमाद्रिधुर्यधनुषे
प्रेमास्पदात्ममयधामाङ्घ्रये . . . . ॥

1078

67170 **वाश्चारेडिति श्लोक: सव्याख्य:**

Beginning:

वाश्चारेड्ध्वजधग् धृतोड्वधिपति: कुभ्रेड्जजानिर्गणेड्
गोराडारुड्रुर:सरेड्रुतरग्रैवेयकभ्राडरम् ।
उड्वीड्रुङ् नरकास्थिधृत् त्रिदृगिभेडार्द्राजिनाच्छच्छद:
स स्तादम्बुमदम्बुदालिगलरुग् देवो मुदे वो मृड: ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अस्य वाक्यार्थो वर्ण्यते—मृडयतीति मृडः सकलजगत्संरक्षक इत्यर्थः। यः वक्ष्यमाण-विशेषणविशिष्टः स एव देवः सर्वजनोपास्यः परमेश्वरः वः मुदे संतोषाय अरम् अत्यर्थं स्तात्भवता-दित्याशीरुक्तिः।

End:

एवंविधपूर्वोपन्यस्तासाधारणविशेषविशिष्टः परमेश्वरः श्रीगौरीसहायः वः छत्रचामरान्दोलिकादि-निखिलश्रियांशीद(? श्रेयांसि दत्त्वा) अव्यादित्याशीर्वादः।

1086

75135 **विश्वनाथाष्टकम् (शिवाष्टकम्)**

End:

श्रीविश्वनाथ करुणाकर शूलपाणे शंभो गिरीश शिव शंकर चन्द्रमौले।
श्रीनीलकण्ठ मदनान्तक विश्वमूर्ते गौरीपते मयि निधेहि कृपाकटाक्षम्॥

Colophon:

इति **श्रीशिवाष्टकं** संपूर्णम्।

1094

73916 **विश्वनाथाष्टकम्**

Beginning:

दासदोषवेषतूलराशिवह्निमाशु कैलासशैलवासमभ्रकेशमम्बिकेश्वरम्।
वासवाम्बुजाशयाब्जवासिनं कृपाकरं काशिकापुरीशमीशविश्वनाथमाश्रये॥

End:

वारणासुरेन्द्रगर्ववारिणं विहारिणं वारणेन्द्रवै(रि)नक्रहारिणात्मचारिणम्।
वारणाशिकारणं प्रवीणमुक्तिकारणं काशिकापुरीशमीशविश्वनाथमाश्रये॥

1096

PM2111 **वीरभद्रभुजङ्गस्तवः**

Beginning:

शिवं कालरुद्रं . . . चण्डमुद्रं महाभीमरौद्रं हृतारातिनिद्रम्।
दयासत्समुद्रं कचिद्भारु . . . ध्रिं भयोग्रप्रसार्थं भजे वीरभद्रम्॥(?)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

करालं क्वचित्क्रूरदंष्ट्रं स्फुलिङ्गं स्फुरद्वक्त्रजिह्वारिसंहारदक्षम् ।
क्षणध्वस्तदक्षं क्षणात्क्षुण्णरक्षःकुलं कालरुद्रं भजे वीरभद्रम् ॥

End:

दरिद्रं ममाद्रावय दंह्यमानं भयं नाशय त्रासयाक्रान्तलोकम् ।
कटाक्षानुकम्पारसं वर्णयित्वा मयि श्रीमहावीर धन्योऽस्मि तस्मिन् ॥(?)
भुजङ्गस्तवं रामचन्द्रेण क्लृप्तं त्रिसंध्यं पठन्तो नरास्ते लभेयुः ।
प्रभुत्वं विभुत्वायुरारोग्यभाग्यं श्रियः श्रीमहावीरभद्रप्रसादात् ॥

Colophon:

इति श्रीरामचन्द्रेण विरचितं वीरभद्रभुजङ्गस्तवं संपूर्णम् ।

1097

73248 वेदपादस्तवः

Beginning:

पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।
किं चकार महायोगी सूत नो वक्तुमर्हसि ॥

End:

लभन्ते पठन्तो मतिं बुद्धिकामा लभन्ते चिरायुस्तथायुष्यकामाः ।
लभन्ते तथैव श्रियं पुष्टिकामा लभन्ते ह पुत्रान् लभन्ते ह पुत्रान् ॥
इत्यनेन स्तवेनेशं स्तुत्वासौ जैमिनिर्मुनिः ।
स्नेहाश्रुपूर्णनयनः प्रणनाम सभापतिम् ॥
मुहुर्मुहुः पिबन्नीशताण्डवामृतमङ्गलम् ।
सर्वान् कामानवाप्यान्ते गाणपत्यमवाप ह ॥
कमलभवविरिञ्चिनिर्जरेन्द्रस्तुतिनुतिसंभ्रमनृत्तविभ्रमाय ।
अचलपतिसुतासहाय तुभ्यं कनकसभापतये नमः शिवाय ॥
पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
यस्तु धारयते नित्यं शिवलोकं स गच्छति ॥
कृपासमुद्रं सुमुखं त्रिणेत्रं जटाधरं पार्वतिवामभागम् ।
सदाशिवं रुद्रमनन्तरूपं चिदम्बरेशं हृदि भावयामि ॥

1102

67564 वेदपादस्तवः

Adds the following verses in the beginning:

आनन्दनृत्तसमये + + + नयनानि कृतार्थयन्ति ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

यस्मात् सर्वं समुत्पन्नं चराचरमिदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्यमूर्तये ॥
पुण्डरीकपुराधीशं पुण्डरीकाजिनाम्बरम् ।
पुण्डरीकरुचिं वन्दे पुण्डरीकाक्षपूजितम् ॥
पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।

1103

73783 वेदपादस्तवः

Reads the following additional verses at the end:

लभन्ते + + + पुत्रान् ॥ इत्यनेन + + + सभापतिम् ॥ मुहुर्मुहुः + + + मवाप ह ॥ पादं + + + महीयते ॥

अधीतविस्मृतो वेदो वेदपादस्तवं पठन् ।
स चतुर्वेदसाहस्रपारायणफलं लभेत् ॥
एवं ध्यात्वा दृढं शक्तः पूजयेद्भक्तिसंयुतः ।
वेदाश्च सर्वशास्त्राणि विद्याश्चान्ये सहस्रशः ।
भवन्ति तत्परान्येकं किमापुः सर्वसिद्धयः ॥ (?)
विश्वं सृजन्ति रक्षन्ति संहरन्त्यात्मलीलया ।
हृदम्बुजे रहस्यन्ति चिदम्बरनटस्यति ॥ (?)
चिदम्बरेशो भुवि नीलकण्ठः पयोधरं दिक्षु समुन्नतं ते ।
अजस्रमानन्दवशाद्विचित्रं करोति नृत्यं गिरिशे सभायाः ॥ (?)
पुण्डरीकपुरे मर्त्याः क्षणमात्रं वसन्ति ये ।
शिव(लोके मही)यन्ते सततं ते महामते ॥
ह्रिया धिया भिया वापि कामात् क्रोधाच्च मोहतः ।
(यद)च्छया वा पश्यन्ति ये तत्र मम ताण्डवम् ॥
तेऽपि दर्शनमात्रेण मुक्ता एव न संशयः ।
यानि पापानि मर्त्यानां संचितानि भवे भवे ॥
सद्यस्तानि विनश्यन्ति स्मृते जाते चिदम्बरे ।
ब्राह्मणो वा क्षत्रियो वा वैश्यो वा शूद्र एव वा ॥
चण्डालः पतितो वापि संकरो वान्य एव वा ।
सभापतिं सकृद् दृष्ट्वा स मुक्तो नात्र संशयः ॥
पादे नूपुरकिङ्किणी कटितटे व्याघ्राजिनालंकृतं
हस्ते शूलकपालढक्कडमरुं कण्ठे च हालाहलम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कर्णे पन्नगकुण्डलं त्रिणयनं फाले लसत्पावकम्
एवं ताण्डवमम्बिकापति महः संभावयामोऽनिशम् ॥
आपाटलाकुञ्चितवामपादमम्बामुखालोकनलोलनेत्रम् ।
आनन्दमुद्रामनुभावयन्तमाद्यं चिदानन्दनटं भजामि ॥
कमलभवमुकुन्दनिर्जरेन्द्रस्तुतिनुतिसंभ्रमनृत्तविभ्रमाय ।
अचलपतिसुतासहाय तुभ्यं कनकसभापतये नमः शिवाय ॥
. . . ततमन्तकप्रदमनं नदर्धकामेक्षणं
विध्वस्तत्रिपुरं जलंधररिपुं प्र . . . खाङ्घ्रिकम् ।
विष्वक्सेनविघातशूलफलकं कण्ठे धृताशीविषं
भोगीन्द्राभरणं परार्धविरमे ब्रह्माण्डभित्ताण्डवम् ॥

Colophon:

इति श्रीरुद्रसंहिता . . . . . जैमिनिकृतस्तोत्रे वेदपादस्तवः संपूर्णः ।

1104

73449 **वेदपादस्तवः**

Beginning:

ओंनमोऽहंपदार्थाय लोकानां सिद्धिहेतवे ।
सच्चिदानन्दरूपाय शिवाय परमात्मने ॥
मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥
पुण्डरीकपुराधीशं पुण्डरीकाजिनाम्बरम् ।
पुण्डरीकरुचिं वन्दे पुण्डरीकाक्षसेवितम् ॥

1105

67633 **वेदपादस्तवः**

Reads the following verses at the end:

लभन्ते + + + पुत्रान् ॥ इत्यनेन + + + सभापतिम् ॥ मुहुर्मुहुः + + + मवाप ह ॥ कमलभव + + + शिवाय ॥

मधुरिपुविधिशक्रमुख्यदेवैः सततनमस्कृतपादपङ्कजाय ।
कनकगिरिशरासनाय तुभ्यं कनकसभापतये नमः शिवाय ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

हालास्यनाथाय महेश्वराय हालाहलालंकृतकन्धराय ।
मीनेक्षणायाः पतये शिवाय नमो नमः सुन्दरताण्डवाय ॥
आपाटलकुञ्चितवामभागमम्बामुखालोकनलोलदृष्टिम् ।
आनन्दमुद्रामनुभावयन्तमाद्यं चिदानन्दनटं भजामि ॥
सालोक्यकामी सालोक्यं सामीप्यमथवा व्रजेत् ।
सारूप्यमथ सायुज्यं वेदपादस्तवं पठन् ॥
पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
यस्तु धारयते मर्त्यः शिवलोके महीयते ॥
वेदानधीत्य विस्मृत्य वेदपादस्तवं पठन् ।
स चतुर्वेदसाहस्रपारायणफलं लभेत् ॥

आनन्दनृत्तसमये + + + कृतार्थयन्ति ॥

1106

71230 वेदपादस्तवः

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
सोममानन्दसंपूर्णं सोमार्धकृतशेखरम् ।
दक्षिणाभिमुखं वन्दे दक्षिणामूर्तिरूपिणम् ॥
ध्यानं प्रथममाचष्टे सूतः पौराणिकोत्तमः ।
प्रत्यक्षे जैमिनिस्तुत्ये नृणां दानं महत् फलम् ॥
सप्तार्णवपरिक्षिप्तां द्वीपैः सप्तभिरङ्किताम् ।
पञ्चाशत्कोटिविस्तीर्णां ध्यायेत् सर्वसहां महीम् ॥
तस्याश्च हृदयाम्भोजे मातृकाक्षरकेसरम् ।
ध्यायेदष्टदलं धीमान् महाहृदयपङ्कजम् ॥
तस्य मध्ये त्रिकोणे तु तरुणेन्दुशिखामणिम् ।
चारुदीर्घजटापाशं लसद्भोगीन्द्रकुण्डलम् ॥
त्रिपुण्ड्रविलसत्फालं चन्द्रार्कानललोचनम् ।
वामभागे स्थितां देवीं लक्षयन्तमपाङ्गतः ॥
अधरोल्लङ्घनकलासंदिहानस्मिताङ्कुरम् ।
कस्तूरिकायितोद्दामकालकूटलसद्गलम् ॥
महाडमरुकात्तोर्ध्वदक्षपाणिसरोरुहम् ।
तदन्यकरपद्मान्तज्वलदुत्थितपावकम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

दक्षाधःकरपद्मेन हरन्तं देहिनां भयम् ।
विक्षिप्तान्यकरं तिर्यक् कुञ्चितेनाङ्घ्रिणा (वसं ? समम्) ॥
वामेतरप्रकोष्ठान्ते नृत्यत्फणधरेश्वरम् ।
कल्पब्रह्मकपालानां मालया लम्बमानया ॥
स्वातन्त्र्या(? स्वतन्त्र)मात्मनो रूपमाचक्षाणं स्वभावतः ।
व्याघ्रचर्माम्बरधरं कटिसूत्रितपन्नगम् ॥
दक्षपादाब्जविन्यासादधःकृततमोगुणम् ।
भस्मोद्धूलितसर्वाङ्गं परमानन्दताण्डवम् ॥
एवं ध्यायेत् परेशानं पुण्डरीकपुरेश्वरम् ।
पुण्डरीकपुराधीशं पुण्डरीकाजिनाम्बरम् ।
पुण्डरीकरुचिं वन्दे पुण्डरीकाक्षसेवितम् ॥

ऋषय ऊचुः ।

End:

लभन्ते + + + पुत्रान् ॥ इत्यनेन + + + समापतिम् ॥ मुहुर्मुहुः + + + मवाप ह ॥ पादं वा+ + + स गच्छति ॥ कमलभव + + + शिवाय ॥

पायादायासखेदभ्रमितफणिफणारत्ननिर्युक्तनिर्य-
च्छायामायापतङ्गद्युतिमुदितवियद्वाहिनीचक्रवाकम् ।
अभ्रान्तभ्रान्तचूडातुहिनकर(-करालोकना-)लीकनाल-
च्छेदामोदप्रधावद्द्रुहिणरथखगं धूर्जटेस्ताण्डवं नः ॥

Colophon:

इति भविष्योत्तरपुराणे सूतऋषिसंवादे जैमिनिभासे वेदपादस्तवो नाम द्वादशोध्यायः ।

1109

69968 वेदपादस्तवः सव्याख्यः

Beginning:

नमस्ते मुनिवर्याय नमस्ते वेदरूपिणे ।
नमो ब्रह्मादिरूपाय बादरायण ते नमः ॥
प्रह्लादोक्तेरलीकत्वं मा भूदित्युदियाय यः ।
स्तम्भे स्तभ्नातु मे विघ्नान् लक्ष्मीनरहरिः सदा ॥
कामहाप्यखिलकामदो नृणां (भूतिधार्यपि विभूतिदायकः) ।
शूलधार्यपि रुजा विवर्जितः शंकरो दिशतु मे धियं कृतौ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

आसीत् (कुन्द)वराभिधे कुलवरे श्रीकृष्णयज्वाभिधः
श्रीवत्सान्वयगोत्रजो बुधनुतो रामाख्यविप्रात्मजः ।
तत्सूनुर्नरसिंहपादकमलध्यानात्तसर्वेहितः
श्रोरामेशबुधाग्रजो विजयते श्रीविश्वपत्याह्वयः ॥
तत्(पुत्रेण) नृसिंहेण वेदपादस्तवो मया ।
व्याख्यायते यथाबुद्धि संतोषाय विपश्चिताम् ॥

इह खलु सकलशमधनवरिष्ठस्य वसिष्ठस्य प्रपौत्राद् वेदव्यासादधीतसकलविद्यो जैमिनिर्नाम मुनिः कर्ममीमांसायां द्वादशाध्यायपरिमितायां कर्मण एव यागादेरलौकिकश्रेयःसाधनत्वं विध्यादिगताग्न्यादिशब्दस्यैव देवतात्वं सृष्टिप्रलयप्रति(पादक)वाक्यानामर्थवादतया स्वार्थे तात्पर्याभावं सगुणनिर्गुणात्मप्रतिपादकानां वेदान्तवाक्यानामप्युभयविधोपासनाविध्यपेक्षितत्वेन स्वार्थपराणामेव . . . हेतुत्वमिति च प्रतिपादयामास । एवमीश्वरतिरस्करणेन संजातचित्तकालुष्यः सन् तत्र तत्र पर्यटन् पुण्डरीकपुरं गतः तत्र सभायां प्रदोषे ब्रह्मविष्णव . . . सुरमहर्षिगन्धर्वकिंनरकिंपुरुषयक्षादिसकलसंसेव्यमानं नृत्यन्तं सकलजगदुत्पत्तिस्थितिलयहेतुं श्रीरुद्रं ददर्श। ततोऽपहतपाप्मासौ मुनिः स्वापराधपरिहारा . . . पेतैः श्लोकैर्भगवन्तं श्रीरुद्रं साम्बं सस्तुतमस्तौषीत् । तं च स्तवं सकलवेदान्तसारार्थप्रतिपादकतया सकलपुराणश्रेष्ठे स्कन्दपुराणे भविष्योत्तरखण्डे निबध्नन् वेदव्यासः दीर्घसत्राय दीक्षि . . . कादिमुनीनां सूतस्य च प्रश्नोत्तरे उपन्यस्यति । ऋषय ऊचुः ।

पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।
किं चकार महायोगी सूत नो वक्तुमर्हसि ॥

हे सूत रोमहर्षणपुत्र । मु(निस)त्तमः मुनिश्रेष्ठः महायोगी । योगो विषयेषु चित्तवृत्तिनिरोधः । 'योगश्चित्तवृत्तिनिरोधः' इति पातञ्जलसूत्रात् । सोऽस्यास्तीति योगी । ततो महच्छब्देन कर्मधारयः । जैमिनिर्व्यासशिष्यः । पुण्डरीकपुरं नाम शिवस्थानं पट्टणं प्राप्य किं चकार । नोऽस्माकमस्मभ्यम् अस्मान् प्रतीति वा । वक्तुम् आवेदयितुम् अर्हसि । न तूपेक्षितुमर्हसीति भावः ।

End:

किमनेन तत्तदभीष्टं देहि तत्तदनिष्टं परि(ह)रेति विशिष्य प्रार्थनाकरणेन। सर्वथा त्वमेवास्माकं रक्षको वयं तव रक्षणीया इत्यमुमर्थं सहेतुकं वदन् प्रकृतमुपसंहरति—तदिति (?त्वदिति) . . . स्मसि भवामः 'इदन्तो मसि' इति स्म इत्यस्य स्थाने स्मसीति छान्दसं रूपम् । सूरभट्टेन तु स्मसीत्यत्र स्म असीति पदद्वयमित्युक्त्वा तव वयं स्मः त्वमस्माकमसीति व्याख्यातम् । तदयुक्तम् । ए . . . .

1110

75135 वैराग्याष्टकम्

Beginning:

लोकारण्याधिवासे स्थितमितरसुखाभोगभाग्यादिहीनं
नानाक्लेशादियुक्तं गुरुतरकलुषासक्तमीशेतराशम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ध्यानासङ्गादित्यक्तं शिवमनुभजनात्यन्तमूढं प्रबुद्धं
द्रक्ष्याम्येवं कदा मां शिवगणसहितं भस्मरुद्राक्षभूषम् ॥

End:

लोके पापादियुक्ते परमसुखहते जन्मनाशानुरक्ते
व्यस्तं योगादिभ्रष्टं कलिकलुषयुतं ध्यानमार्गातिरिक्तम् ।
नानालोकापवादादिभिरनुकलितं वंशधर्मादिनिष्ठं
द्रक्ष्याम्येवं कदा मां शिवगणसहितं भस्मरुद्राक्षभूषम् ॥
पठेद् योऽष्टकमीशस्य वैराग्याख्यं सदा शुभम् ।
सोऽभीष्टफलमाप्नोति शिवलोके महीयते ॥

Colophon:

इति श्रीवैराग्याष्टकं संपूर्णम् ।

1111

75135 शंकराष्टकम्

Beginning:

त्रिलोचनं भस्मकृताङ्गलेपनं त्रिशूल . . . शशिखण्डशेखरम् ।
सुरासुरैर्वन्दितपादपङ्कजं न पुण्यहीनाः प्रणमन्ति शंकरम् ॥

End:

मृदङ्गखट्वाङ्गवराङ्गधारिणं परात्परं सर्वजगत्सदाशिवम् ।
विशुद्धदेहं रविचन्द्रवन्दितं न पुण्यहीनाः प्रणमन्ति शंकरम् ॥
इदं परं शंकरनामकीर्तनं प्रणीतनीतं सकलाघनाशनम् ।
विशुद्धदेहः पठतीह यो नरः स याति मुक्तिं न पुनः प्रसूयते ॥

Colophon:

इति श्रीशंकराष्टकं संपूर्णम् ।

1112

75135 शिवकर्पूरस्तवः

Beginning:

कर्पूरं वर्णमाद्यं प्रणवशिवमयं बिन्दुरूर्ध्वं त्रिकोणं
तस्यार्धं बह्निबीजं रविशशिहुतभुक् तस्य चोर्ध्वं त्रिवृत्तम् ।
तथारूपं व्योम स्फटिकमणिकोटिस्मितमुखं
सहस्रारे पद्मे विदितमखिलं शंभु परमम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

भूतात्मा भूतनाथो गणपतिसहितो भूतप्रेते प्रसिद्धे
चामुण्डे दर्पदण्डे स्फटिकरिपहरं(?) यक्षरक्ष:पिशाचैः ।
सर्वज्ञत्वं प्रशान्तं सकलशिवमयं सूर्यकोटिप्रकाशं
वन्दे त्रैलोक्यवन्द्यं दशदिशगमनं तत्त्वरूपं महेशम् ॥

End:

यथाशक्ति जपं कुर्यात् पूजां शक्त्यनुसारतः ।
पञ्चोपचारैर्दशभिः षोडशैः पूजनं ततः ॥
वाञ्छितं फलमाप्नोति प्राप्नुयान्नात्र संशयः ।
विमुक्तः सर्वपापेभ्यो महादेवप्रसादतः ॥

Colophon:

इति श्रीबृहन्नन्दिकेश्वरकृतौ शिवकर्पूरं समाप्तम् ।

1115

PM2384 शिवगौरीस्तोत्रम्

Beginning:

सृणिपाशपुष्पशरपुण्ड्रचापकैः करपङ्कजैः कलितभक्तवाञ्छिताम् ।
तरुणारुणारुणतनुं त्रिलोचनां ललितां भजे ललितचन्द्रचूलिकाम् ॥
ललिताविभूषितनिजाङ्गमूर्तये ललितेषुचापसृणिपाशपाणये ।
उदयारुणद्युतिमुषे दयाजुषे मदनेश्वराय महते नमो नमः ॥

End:

कुलाचलकुतूहलं कुसुमचापसंजीवनं
कुचे कलितवल्कलं गुरुकृपारसं लोचने ।
जपासहृदयं रुचौ जपवटाभिरामं करे
जटानिबिडितं कचे जयति जीवितं शांभवम् ॥
दत्तात्रेयं शिवं शान्तमिन्द्रनीलनिभं प्रभुम् ।
आत्ममायारतं देवमवधूतं दिगम्बरम् ॥
भस्मोद्धूलितसर्वाङ्गं जटाजूटधरं विभुम् ।
चतुर्बाहुमुदाराङ्गं प्रफुल्लकमलेक्षणम् ॥
ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियम् ।
भक्तानुकम्पिनं सर्वसाक्षिणं सिद्धसेवितम् ॥
एवं यः सततं ध्यायेद् देवदेवं सनातनम् ।
स मुक्तः सर्वपापेभ्यो निःश्रेयसमवाप्नुयात् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1116

66005 शिवचूर्णिका

Beginning:

जय जय विजयी भव श्रीमद्दक्षाधिपोत्तंस रक्षाधुना मां सपक्षामराणां विपक्षाघतो नित्यमुक्षाधिराजाङ्क रक्षाविलिताङ्ग भक्षायितक्ष्वेल भिक्षाकलालील सक्षान्तिसद्वाक्यशिक्षामृतौघापरिक्षालितानार्यपक्षाहिताकार्य दक्षाहिताक्रौर्यदक्षाध्वराहार्य . . . .

End:

शंभो दयाम्भोनिधे हीनभावस्थितेऽस्मिन् दयाम्भोनिधे हीनभावस्थितेऽस्मिन् नमस्ते नमस्ते नमः ।

1117

77644 शिवताण्डवस्तोत्रम्

End:

नमामि पार्वतीपतिं नमामि जाह्नवीपतिं नमामि भक्तवत्सलं नमामि रक्तलोचनम् ।
नमामि चन्द्रशेखरं नमामि दु:खमोचनं त्वदीयपादपङ्कजं स्मराम्यहं महेश्वरम् ॥
रावणेन कृतं स्तोत्रं यः पठेच्छिवसंनिधौ ।
पुत्रपौत्रादिकं सौख्यं लभते मोक्षमेव च ॥

Colophon:

इति श्रीदशवदनेन कृतं शिवताण्डवस्तोत्रं संपूर्णम् ।

1124

75270 शिवपूजास्तोत्रं सव्याख्यम्

Beginning:

शिवं सदाशिवं रुद्रं सदेशादीन् गुरूनपि ।
नत्वेशपूजास्तोत्रस्य विवृतिः कथ्यते मया ॥

तत्र तावदाचार्यः श्रीगोळकिमठनिवासी (व)ज्ञानशिवः स्वसंतानागमभूतवातुलभेदद्विशतिकालोत्तरार्थं विविच्य ज्ञानरत्नावलिं सप्तसहस्रग्रन्थपरिमितामुक्त्वा तत्र प्रमाणश्लोकैरनेकैर्निर्मितां नित्यानुष्ठानवासनापूजास्तवव्याजेन समुच्चिनोति । स्तोत्रप्रतिपाद्यमर्थं प्रातरित्यादिना सूचयति—

प्रातः शंकरचिन्तनस्नपनसंसेकासुसंरोधनैः
संध्यासंस्मृतिमार्जनाघशमनोपस्थानसंतर्पणैः ।
द्वारस्थार्चनयागधामगतविघ्नोद्वासनाद्यैः प्रभो
यः श्रीमान् यजनं करोति भवतस्तस्यैव सिद्धिद्वयम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

प्रातः शंकरचिन्तनं प्रातः स्मरामीत्यादिना वक्ष्यति। स्नपनं वारुणमाग्नेयं च। अष्टविधस्नानेषु तयोरेव मुख्यत्वात्। तथा ज्ञानरत्नावल्यां—वारुणं स्नानं गृहस्थलिङ्गिनोः साधारणं, तपस्विनां भस्मस्नानं वेति।

End:

एवमनलशिवधर्मेदेवत्र्यम्बकशिवसदाशिव .... तत् तस्मात् ज्ञानशिवो ज्ञानपादपतनेन। दैव्येति मन्तव्यम्। शिवोक्तागमप्रकारेण पवित्रं . . . तोन्तरोक्तक्रियामिश्राहितत्वात् पवित्रं शंभोरेतत् स्तोत्रं भक्तये मुक्तये च चक्रे। एतत् स्तोत्रं जपतां भक्तिमुक्ति भक्तये मुक्तये च। पूजा वासना ज्ञेया। ज्ञातवासनस्यामोघफले भवत इत्याशयः। यद्वा प्रदमित्यर्थः।

Colophon:

पूजास्तोत्रं व्याख्यानं संपूर्णम्।

1128

PM2609 शिवभुजङ्गप्रयातस्तोत्रम्

Adds the following four verses of *Vināyakabhujaṅga* in the beginning:

उमाप्रेमबालं लसत्सामलोलं कनद्रत्नचेलं विराजत्कपोलम्।
जगज्जन्ममूलं जगद्द्वेषिकालं नमाम्येकदन्तं नतानेकदं तम्॥
विहङ्गे वृषाङ्गे भुजङ्गे मखाङ्गे तुरङ्गे गजाङ्गे मदीयान्तरङ्गे।
चरन्तं वसन्तं नितान्तं महान्तं नमाम्येकदन्तं नतानेकदं तम्॥
मृदङ्गं मुदङ्गं सुवीणान्तरङ्गं तुरङ्गं तुरङ्गं गजाङ्गाङ्गलिङ्गम्।
दधन्निश्चलाङ्गं परीक्षार्थमङ्गं नमाम्येकदन्तं नतानेकदं तम्॥
मुखे मन्दहासं करे चन्द्रहासं वरे सद्विलासं पुरे चिद्विलासम्।
मुदा चिद्विलासं सदा सूर्यभासं नमाम्येकदन्तं नतानेकदं तम्॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिते शिवभुजङ्गस्तोत्रं संपूर्णम्।

1129

71230 शिवभुजङ्गप्रयातस्तोत्रम्

The following stanza is written after the colophon:

यदा दुर्निवारव्यथोऽहं शयानो लुठन् निःश्वसन् निःसृताशक्तवाणिः।
तदा जह्नुकन्याजलालंकृतं ते जटामण्डलं मन्मनोमन्दिरं स्यात्॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1135

PM2745 शिवभुजङ्गप्रयातस्तोत्रम्

Beginning:

भुजङ्गम्—भजे चन्द्रमौलिं + + + शिवं साम्बमीडे ॥

सहस्राक्षमुख्यामराधीश्वरालीस्फुरद्रत्नजालप्रभाभासिताङ्गम् ।
अपर्णाकलत्रं कुवेरातिमित्रं सुधाशुभ्रगात्रं सिताम्भोजनेत्रम् ॥

End:

अनन्तं हसन्तं भजे लोककान्तं दुराराध्यदक्षाध्वरध्वंसकं तम् ।
जगद्रक्षकं सर्वभक्तप्रतुष्टं महादेवमीडे शिवं साम्बमूर्तिम् ॥

Colophon:

श्रीमच्छंकराचार्यरचितं शैवभुजङ्गस्तोत्रं संपूर्णम् ।

1138

67414 शिवमानसपूजा

Adds one verse at the beginning and three at the end:

Beginning:

धवलपुरुषमिन्दोर्मण्डले संनिषण्णं भुजगवलयहारं रक्तदिग्धाङ्गमीशम् ।
अरुणपरशुपाणिं चारुचन्द्रार्धमौलिं हृदयकमलमध्ये संततं चिन्तयामि ॥

End:

मन्माता शशिशेखरो मम पिता मृत्युंजयो मद्गुरु-
न्र्यग्रोधद्रुममूलवासरसिको मत्सोदरः शंकरः ।
मद्बन्धुस्त्रिपुरान्तको मम सखा कैलासशैलाधिपो
मत्स्वामी परमेश्वरो मम गतिः साम्बे परब्रह्मणि ॥
सौवर्णस्थालिवर्ये मणिगणखचिते गोघृताक्तान् सुपक्वान्
भक्ष्यान् भोज्यांश्च लेह्यानपरिमितमिदं चोष्यमन्नं निधाय ।
नानाशाकैरुपेतैर्गुडमधुदधिक्षीरपानीययुक्तं
ताम्बूलं चापि शंभो . . . मानसं कल्पयामि ॥
रामेति वर्णद्वयमादरेण सदा जपन् मुक्तिमुपैति जन्तुः ।
कलौ युगे कल्मषमानुषाणामन्यत्र धर्मे खलु नाधिकारः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1139

75135 **शिवमानसपूजा**

End:

व्यासेन रचितां पूजां नित्यं यः स्मरते नरः ।
शिवस्य प्रीतिमाप्नोति व्यासस्य वचनं यथा ॥

Colophon:

इति श्रीव्यासरचिता शिवमानसिकपूजा समाप्ता ।

1141

73394 **शिवमानसपूजा**

The following stanza is added at the beginning:

चारुस्मेराननसरसिजं चन्द्रलेखावतंसं
फुल्लन्मल्लीकुसुमकलिकादामसौभाग्यचोरम् ।
अन्तः पश्याम्यचलसुतया रत्नपीठे निषण्णं
लोकातीतं शिवद सततं रूपमप्राकृतं ते ॥

1152

PM81 **शिवशंकराष्टकम् (शंकरस्तोत्रम्)**

End:

शंभो महेश शिव शंकर चन्द्रमौले हे विश्वनाथ मदनान्तक योगमूर्ते ।
आनन्दधाम शितिकण्ठ पिनाकपाणे गौरीपते मयि निधेहि कृपाकटाक्षम् ॥

Colophon:

इति श्रीशंकरस्तोत्रं समाप्तम् ।

1155

70257 **शिवशंकराष्टकम् (मार्कण्डेयस्तोत्रम्)**

End:

किंचिन्मुदञ्चितसदञ्चितसव्यपादं किंचिन्नपिञ्जरजटामकुटाभिरामम् ।
जाम्बूनदाभरणभा(स्क?सु)रसर्व(पा?गा)त्रं साम्बं चिदम्बरनटं सततं स्मरामि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1178

TR824 शिवस्तुतिः सव्याख्या

Beginning:

नत्वा नृसिंहः परदैवमेकं विघ्नापहं भक्तजनप्रियं च।
विघ्नेशपूर्वा अपि यस्य नेत्रकटाक्षतः श्रेष्ठमनाः सदैव ॥
श्रीमदानन्दतीर्थार्यगुरून् नत्वा महामतीन्।
शिवस्तुतेर्हि व्याख्यानं करिष्ये भक्तितः स्वयम् ॥
त्रिविक्रमार्यतनुजान् नारायणसनामकान्।
पण्डितान् यत्कृता दिव्या स्तुतिरेषा तनोम्यहम् ॥

स्फुटं स्फटिक + + + वीक्षणम् ॥ तत्र सेतुबन्धगतैर्नारायणपण्डितैः पिहितं कवाटं दृष्ट्वा तद्विवृत्यर्थं रामेश्वरस्य स्तुतिः कृता तत्रायमाद्यः श्लोकः स्फुटमिति।

End:

सतां श्रवण + + + सुधीः ॥ . . . कथंभूता स्तुतिः संनतोक्ता सम्यङ् नतेन नमस्कारात्मना स्तोत्रेण उक्ता इत्यलंकारार्थः।

लक्ष्मीधराख्यभट्टानां पुत्रेण गुरुभक्तितः।
नीरानृसिंहनाम्ना च जामदग्न्योद्भवेन च।
अंबंशिरास्थविप्रेण टीकेयं वै कृता शुभा ॥

1179

73242 शिवस्तोत्रम्

Beginning:

क्रूरं दुष्टतमं विनष्टमनसं भ्रष्टं शठं निष्ठुरं
निर्लज्जं कृपणं कृतघ्नमशुचिं बह्वाशनं हिंसकम्।
आशापाशशतप्रबद्धमनसं दुष्कीर्तिभाजं जडं
कारुण्याकर भोः पितः पशुपते दोषाकरं पाहि माम् ॥

End:

दुष्पूरस्वककुक्षिपूरणपरं भारं भुवः केवलं
मायामेषखरस्वभावमपटुं संमाननाभाजिनम्।
रिक्तं बालमतीव सूत्रिणमल(व)न्यत्यल्पभूतं सतां
कारुण्याकर भोः पितः पशुपते दोषाकरं पाहि माम् ॥

Colophon:

इति श्रीशिवरह(स्यं?स्ये) चतुर्था(शं?शे) भृङ्गिरिटिस्तोत्रं संपूर्णम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1180

PM80 शिवस्तोत्रम्

Beginning:

अनाथस्य जगन्नाथ त्राणं कुरु महेश्वर ॥
संसारपाशदृढबन्धनपीडितस्य मोहान्धकारविषयेषु निपातितस्य ।
कामार्पितस्य भयरागखिलीकृतस्य दीनस्य मे कुरु दयां परलोकनाथ ॥
दीनोऽस्मि मन्दधिषणोऽस्मि निराश्रयोऽस्मि दासोऽस्मि साधुजनतापरिवर्जितोऽस्मि ।
दुष्टोऽस्मि दुर्भगतमोऽस्मि गतत्रपोऽस्मि धर्मोज्झितोऽस्मि विकलोऽस्मि कलङ्कितोऽस्मि ॥

End:

शंकरस्य च ये भक्ताः शान्तास्तद्गतमानसाः ।
तेषां दासस्य दासोऽहं भूयां जन्मनि जन्मनि ॥
नमस्कारादिसंयुक्तं शिव इत्यक्षरद्वयम् ।
जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम् ॥
यत् कृतं यत् करिष्यामि तत् सर्वं न मया कृतम् ।
त्वया कृतं त्वं फलभुक् त्वमेव परमेश्वर ॥
यदक्षरपरिभ्रष्टं मात्राहीनं च यद् गतम् ।
त्वया तत् क्षम्यतां देव कृपया परमेश्वर ॥

Colophon:

इति श्रीलङ्केश्वरकृतं शिवस्तोत्रं समाप्तम् ।

1181

PM81 शिवस्तोत्रम्

Beginning:

जयत्यनन्यसामान्यप्रकृष्टगुणवैभवः ।
संसारनाटकारम्भनिर्वाहणकविः शिवः ॥
ओं नमः शिवाय भूतभव्यभाविभावभाविने ।
ओं नमः शिवाय सार्धमानमेयकल्पनाजुषे ॥
ओं नमः शिवाय भीमकान्तशान्तशक्तिशालिने ।
ओं नमः शिवाय शाश्वताय शंकराय शंभवे ॥

End:

शिव भव रुद्र शर्व हर शंकर भूतपते
गिरिश गिरीश भर्ग शशिशेखर नीलगल ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

त्रिणयन वामदेव गिरिजाधव माररिपो
जय जय देव देव भगवन् भवतेऽस्तु नमो नमः ॥
एतामष्टोत्तरशतनमस्कारसंस्कारपूतां
भूतार्थव्याहृतिनुतिमुदाहृत्य मृत्युंजयस्य ।
कश्चिद् विद्वान् यदिह कुशलं संचिनोति स्म किंचित्
तेनान्येषां भवतु पठतामीप्सितस्यार्थसिद्धिः ॥

Colophon:

इति श्रीव्यासस्य नन्दिना प्रोक्तं शिवस्तोत्रं समाप्तम् ।

1182

75135 शिवस्तोत्रम्

Beginning:

वागीशो दक्षिणाङ्गादजनि सुररिपुर्वामतो यस्य वेदा
बाह्या यो वै मुनीन्द्रैरवगतहृदयैर्गीयते सामगानैः ।
गीर्वाणाः शक्रमुख्या दितिसुतसहिता यं विदुर्नो स्वरूपाद्
यः कर्ता पाति भोक्ता सकलजगदिदं शंभवेऽस्मै नमोऽस्तु ॥

श्रीसदाशिवाय नमः । नन्दिकेश्वर उवाच—

नमो देवादिदेवाय महादेवाय वै नमः ।
नमः कालाञ्जनाशाय नीलकण्ठाय वै नमः ॥

End:

स कृत्यकृत्यो द्विजपुङ्गवो हि गृहस्थधर्मापि ततो वरिष्ठः ।
स स्वर्गलोकादिषु पूज्यते हि शक्रादिभिर्देववरैरनेकैः ॥
स्तव एष महापुण्यः सर्वकल्मषनाशनः ।
एष मन्त्रश्च जप्यश्च संसारविनिकर्तनः ॥

Colophon:

इति श्रीशिवपुराणे पूर्वखण्डे नन्दिकृतस्तवो नाम चत्वारिंशोऽध्यायः ।

1184

71202 शिवस्तोत्रम्

End:

यथा मृकण्डोस्तनयं यमारे यथैव पाण्डोस्तनयं मृगारे ।
यथा शिलादस्य सुतं कृपाब्धे तथैव मां पाहि पिनाकपाणे ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1185

75135 शिवस्तोत्रम्

End:

मदननाशनपुण्य . . . नं चन्द्रशेखरगुणानुकीर्तनम् ।
नीलकण्ठ तव पादसेवनं संभवन्तु मम जन्मजन्मनि ॥

Colophon:

इति श्री-उपमन्युकृतं शिवस्तवं संपूर्णम् ।

1186

PM2879 शिवस्तोत्रम्

Beginning:

श्रीकालीश लसत्कटाक्षगलदस्तोकानुकम्पाझरी-
सेकामृष्टसमस्तखेदविनमल्लोकाद्य विश्वाधिप ।
राकाब्जानन योगिसत्कृतिपरीपाकायुतार्कोज्ज्वला-
लोकास्मद्धृदयाम्बुजे वस चिरं हे कामितार्थप्रद ॥

End:

अक्षोभ्योग्रभवार्तपालनकलादक्षोऽनुलिप्ताद्रिजा-
वक्षोजद्वयमुद्रितप्रविलसद्वक्षोऽभिरामः प्रभुः ।
स क्षोणीध्रगृहो ममाशु दुरितं प्रक्षोदयित्वाखिलं
रक्षोनाथनुतस्तनोतु नमतां ह्यक्षोभहारी मुदम् ॥
शंभो वेङ्कटसुब्ब एष भवरुग्भीत्येत्थमत्यद्भुता-
स्थानं त्वत्सुगुणौघव.रिधिकणस्तोत्रं परं तारकम् ।
अष्टप्रासयुताष्टकाधिकशतश्लोकैरतानीत् प्रभो
स्वामिन् त्वं प्रतिगृह्य सादरमिदं रक्षानुकम्पानिधे ॥

1187

71507 शिवस्तोत्रम् (नववर्णरत्नमाला)

Beginning:

ऐन्द्रं पदमपि मनुते नैव वरं यस्य पदरजःस्पर्शात् ।
सान्द्रसुखोदधिमेकं चन्द्रकलोत्तंसमीशमाशास्ये ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

शिशिरारुणकञ्जदृशं शिष्टेष्वणमेकमगसुताजानिम् ।
पशुपाशपाटनपटुं वशिनं सर्वस्वमीशमाशास्ये ॥

1188

73243 **शिवस्तोत्रम्**

Beginning:

हर हर भव भव शरणं भवतु सदा तव स्मरणम् ।
गङ्गाधर चन्द्रचूड शिव मङ्गल सर्वलोकनीड ॥

End:

सकलागमसंवेद्य शिव सकलमुनिजनहृद्य ।
नवव्याकरणस्वभाव श्रीमन्नारायणतीर्थ देव ॥

मन्माता + + + मम गतिः साम्बः शिवो नेतरः ॥ (See No. 1138 above.)

1189

73394 **शिवस्तोत्रम्**

Beginning:

प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह ।
को देवः सर्वदेवे . . . सर्वशः श्रुतः ॥
कस्य शुश्रूषणान्नित्यं प्रीता देवा भवन्ति मे ।
तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकम् ॥

श्रीवेदव्यास उवाच—

सर्वदेवात्मको रुद्रः सर्वे देवाः शिवात्मकाः ॥

End:

रुद्रो मोक्षमुमा सिद्धिः तस्मै तस्यै नमो नमः ।
सर्वदेवात्मकं रुद्रं नमस्कुर्यात् पृथक् पृथक् ॥
एभिर्मन्त्रपथैरेव नमस्यामीशपार्वतीम् ।
यत्र यत्र भवेत् सार्धमिमं मन्त्रमुदीरयेत् ॥

1190

66064 **शिवस्तोत्रम्**

Beginning:

जय देव जगन्नाथ जय शंकर शाश्वत ।
जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

जय भस्ममहादेव जय भस्मावगुण्ठन ।
जय भस्मरतानन्त दाशभङ्गपरायण ।
जय हृत्पङ्कजे नित्यं यतिभिः पूज्यविग्रह ॥

1192

66071 शिवस्तोत्रम्

Beginning:

द्रुतकनकभासुराङ्गं कुमुदवनीबन्धुपाकचूडालम् ।
स्मेरलवमञ्जुलास्यं शैलसुताश्लिष्टमाश्रये देवम् ॥
करुणारसार्द्रनयनं करधृतविज्ञानमुद्रमतिभद्रम् ।
न्यग्रोधमूलभवनं न्यक्कृतनतमोहमानमामीशम् ॥

End:

धीरे जलधिगभीरे करुणासारे परीतसुरवारे ।
गौरे विषयविदूरे जलधरचिकुरे हरे मनो मेऽस्तु ॥
शूरे संवित्सारे क्षितिभृद्गारे फणीन्द्रकृतहारे ।
मस्तकधृतजलपूरे सर्वोदारे ममास्तु नतिवाक्ः ॥

1193

PM94 शिवस्तोत्रम्

Beginning:

जय देव महादेव जय कारुण्यविग्रह ।
जय भूमिरुहावास जय वीरासने स्थित ॥
जय कुन्देन्दुपाटीरपाण्डुराङ्गागजापते ।
जय विज्ञानमुद्राक्षमालावीणालसत्कर ॥

End:

जयाच्युत जयातर्क्य जयानन्य जयाव्यय ।
जयामूर्त जयाचिन्त्य जयाग्राह्य जयाद्भुत ॥
इति श्रीदेशिकेन्द्रस्य स्तोत्रं परमपावनम् ।
पुत्रपौत्रायुरारोग्यसर्वसौभाग्यवर्धनम् ॥
सर्वविद्याप्रदं सम्यगपवर्गप्रदायकम् ।
यः पठेत् प्रयतो भूत्वा स सर्वं फलमश्नुते ॥
दाक्षायणीपतिदयार्द्रनिरीक्षणेन साक्षादवैति परतत्त्वमिहैव धीरः ।
न स्नानदानजपहोमसुरार्चनादिपुण्यैरशेषनिगमार्थनिरूपणैर्वा ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1194

68225 **शिवस्तोत्रम्**

Beginning:

नमस्ते देवदेवेश नमस्ते जगतां पते ।
नमस्ते चन्द्रचूडाय नमस्ते शूलधारिणे ॥
नमस्ते कालकालाय नमस्त्रैलोक्यधारिणे ।
नमस्ते वेदवेद्याय नमस्ते पुण्यमूर्तये ॥

End:

नमः शिवाय त्रिदशार्चिताय विनष्टदोषाय गुणाश्रयाय ।
विमुक्तिमार्गप्रतिबोधनाय देवादिदेवाय नमः शिवाय ॥

1195

PM2797 **शिवस्तोत्रम्**

Beginning:

संसारघोरविपिने चरितं वृथापि सं(?ना)सेवितं तव पदाम्बुरुहं कदापि ।
पापं मया बहु कृतं प्रणतार्तिहारिन् प्राणप्रयाणसमये परिपाहि शंभो ॥

End:

कान्तालंकृतवामभागविलसत्कस्तूरिपङ्कं मुनिं
शान्ताम्भोजविलासहंसनटनं लासोत्सुकं सोन्मुखम् (?) ।
शान्ताकारमनेकलोकजनकं प्रत्यक्षमोक्षप्रदं
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

1196

66062 **शिवस्तोत्रम्**

Beginning:

ईशं सुरप्रणतपादं निरस्तभवखेदं सदोरुकरुणा-
ह्लादं स्फुरत्प्रणवनादं श्रुतिस्थिरविवादं गिरीशमभवम् ।
भेदंगतागमविनोदं जगज्जनकुसीदं विभूतिदकला-
स्वादं स्वलंकरणनादं मुदादिमनिषादं स्मरामि मनसा ॥

End:

रङ्गं सुधीहृदयरङ्गं च यस्य चतुरङ्गं पिशाचनिचयं
तुङ्गं तु सैन्यममलाङ्गं सुरेश्वरतुरङ्गं नदत्सुमनसाम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

शृङ्गं तदम्बुधिनिषङ्गं पृथुक्षितिशताङ्गं गिरीशतनया-
लिङ्गं कपर्दमृगलिङ्गं मृदूल्लसितलिङ्गं स्मरामि मनसा ॥

1197

67780 शिवस्तोत्रम्

Beginning:

श्रीमद्वस्तु समस्तं व्याप्याकाशं निदानमानन्दम् ।
उपशमतः शिवमेकं सततं हृद्येव भावयेऽनन्तम् ॥

End:

प्रतरन्ति जन्मजलधिं न तरन्तीशाङ्घ्रिसेवकेभ्योऽन्ये ।
देहादिवासनाब्धिं यद्वद् यमिनो यथा त(था)न्ये न ॥

1198

PM2111 शिवस्तोत्रम्

Beginning:

परानन्दकन्दं चिदाकाशरूपं सहस्रारविज्ञानज्योतिःप्रकाशम् ।
हरीन्द्रादिसेव्यं विज्ञाने मुनीन्द्रं निरञ्जन्यलिङ्गं भजेऽहं भजेऽहम् ॥(?)
लसच्चन्द्रतुण्डं शिरश्चन्द्रखण्डं गले ब्रह्मरुण्डं ललाटे त्रिपुण्ड्रम् ।
नवं सर्वजाण्डं विराजेमखण्डं निरञ्जन्यलिङ्गं भजेऽहं भजेऽहम् ॥(?)

End:

सुगन्धं सुमाल्यं सुदीपं सुधूपं सुनैवेद्यताम्बूलपुष्पाञ्जलिं च ।
मनीषाक्रमार्ध्यं करोमि महेशं निरञ्जन्यलिङ्गं भजेऽहं भजेऽहम् ॥

Colophon:

इति भृङ्गराज(श्रीशैलाचार्य)विरचितं शिवस्तोत्रं संपूर्णम् ।

1199

70055 शिवस्तोत्रम्

Beginning:

. . . परममुपदेशं शृणु मम स्मगरेरर्चायां पटुषु करणेषु स्मर फलम् ।
अमीषां प्रेष्याणामुपरतकृती . . . . ॥
. . . फीतानपि शिखरिणः पश्य चलितान्
कियन्तं वा कालं किसलयमृदु स्थास्यति वपुः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

असादेऽस्मिन् पूजा मयि हृदय शंभोर्न कुरुषे
कदेहङ् . . . . ॥

End:

महादेवध्याना . . . .
. . . . वेगानधिभुवः ।
प्रसीद प्रावण्यं तदिह परिगृह्याद्य महतो
भयात् त्रायस्वैनं भगवति नमस्तेऽस्तु धिषणे ॥

Colophon:

इति श्रीनीलकण्ठदीक्षितकृतमा . . .

1200

PM2384 शिवस्तोत्रम्

Beginning:

नमस्ते भीमाय श्रुतिशिखरसीमाय च नमो
नमस्ते शर्वाय क्षपितयमगर्वाय च नमः ।
नमस्ते रुद्राय स्फुरदवनमुद्राय च नमो
नमस्ते साम्बाय त्रिजगदवलम्बाय च नमः ॥
अमूर्तं परं वा परं वाथ मूर्तं परं वापि यत्ते वपुर्यच्च नाम ।
दिशैकत्र तत्रानिशैकाग्रतां मे तदभ्यर्थये त्वां दयस्वेन्दुमौले ॥

End:

परमधने पुरमथने खरमथनेये स्मृतेऽन्यगामिन्या ।
कामनयाकामनया कामनयापेतया श्रियं यायाः ॥
अन्तक दुरहंता ते माभूदन्तश्चकास्ति पुरहन्ता ।
चिन्तय मनसि पतन्तं दक्षमखान्तेऽपि दुर्दान्तम् ॥

1203

67509 शिवानन्दलहरी

Adds the following stanza at the end:

महाप्रभोः साम्बशिवस्य शंभोः करावलम्बात् कविताकुमारी ।
आसीत् कृतार्था महतां सभायामहं कृतार्थोऽस्मि किमत्र चित्रम् ॥

1205

73248 शिवानन्दलहरी

The following verse is added at the end of the work:

सेतुर्वेदितलं पयोधियुगलं निर्माल्यपात्रं महत्
पीठं पावनगन्धमादनगिरिर्गङ्गा नवाम्भोघटः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ब्रह्मैवौदनपाचको रघुपतिर्यस्यार्चको विद्यते
सोऽयं चन्द्रशिखामणिर्भुवि मया रामेश्वरः सेवितः ॥

1213

66049 शिवानन्दलहरी

Contains the following additional stanza at the end:

यस्य कण्ठे महानीलं भूषा यस्य भुजंगमाः ।
अस्य देवस्य तेजांसि शान्तिं कुर्वन्तु मे सदा ॥

1216

PM2884 शिवानन्दलहरी

Adds the following verse at the end before the last verse:

प्रतिपदमृदुवाचा माधुरीसाधुरीतिप्रकटितकविता मे शंभुनाङ्गीकृतासीत् ।
सफलमभवदस्मज्जन्मकर्मापि चैतत् परमशिवदयायाः पात्रमेवाहमस्मि ॥

1218

PM255 शिवाष्टकम्

Beginning:

व्युत्पत्तिर्नैव शास्त्रेषु तथा काव्येषु चापि न ।
केवलं शिवपादाब्जस्मरणात् कवयाम्यहम् ॥
विनम्य विपथाग्रजीविहितलिप्सवीक्षालवं
विनम्रजनसंततेर्विहितसंततज्ञानकम् ।
विभुं विमलयामिनीविधुकिशोरकेशावलिं
गणेशविदुषाधुना निजकृतिस्तु लेलिख्यते ॥
पाकारिप्रभृतीन् सुरानवति यो नाकारिसंघात् सदा
पाकात् पुण्यकृतेः स्वपादयुगलीस्वाकाङ्क्षचिन्ताय यः ।
स्वाकारं ददते सतोषमधुनोमाकामुक त्वं प्रभो
मा कार्षीर्मयि कोपलेशमपि यल्लोकानुकम्पी भवान् ॥

End:

रसलेशविवर्जितां प्रभो नुतिनाम्नीमधुना प्रलापवाचम् ।
स्तुतिमेव गृहाण धूर्जटे निजभक्ताधिकतोषदानदक्ष ॥

इति श्रीमच्छिवाष्टकम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

चरणहसितपद्मा चारुपद्मासनस्था चिकुरजि(तसु)मेघा चारुचन्द्रावतंसा ।
चरणहरणतापा चारुमुक्तिप्रदार्या चरतु हृदि ममैषा चारणैः पूज्यमाना ॥

Colophon:

इति श्रीमच्छिवाष्टकं संपूर्णम् ।

1220

68221 शिवाष्टकम्

End:

एकं पादमुदस्य कुञ्चितपदं विन्यस्य भूमौ स्थितं
व्यत्यासेन भुजं प्रसार्य डमरुं व्यावर्तयन् पाणिना ।
अम्बावक्त्रसरोरुहेक्षणवशात् सानन्दनम्रस्मितं
हैमे संसदि ताण्डवं प्रकटयन् सद्यो नटः पातु नः ॥

1222

71102 शोणाद्रिनाथाष्टकम्

Beginning:

श्रीनाथादिगुरुक्रमैकसुलभं श्रीराजराजेश्वरं
श्रीचक्राकृति शोणशैलवपुषं श्रीषोडशार्णात्मकम् ।
श्रीषोडादिषडध्वसौधसदनं ब्रह्माण्डकोट्योत्थितं
क्रीडन्तं श्रुतिवागगोचरपदं सेवे पदं दैवतम् ॥

End:

एकाकारसमस्तलोकजनकं हेमाद्रिबाणासनं
नागावासकिरीटकुण्डलधरं नागेन्द्रभूषोज्ज्वलम्
राकाचन्द्रसमानकान्तिवदनं राजीवनेत्रार्चितं
शोकारण्यदवानलं . . . . शोणाद्रिनाथं भजे ॥

Colophon:

शोणाद्र्यष्टकं संपूर्णम् ।

1223

75135 सदाशिवस्तोत्रम्

Beginning:

ईश्वर उवाच—

ओं नमः कामरूपाय नमो मोक्षवपुर्भृते ।
नमो नन्दात्मने तुभ्यं नमो बिन्दुकलात्मने ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

नमोऽस्तु लिङ्गरूपाय लिङ्गातीतात्मने नमः।
त्वं माता सर्वलोकानां त्वमेव जगतः पिता ॥

End:

उग्राय यजमानाय नमस्ते कर्मयोगिने।
पार्थिवानां च लिङ्गानां मृन्मयानां च पूजनम् ॥
तेन मे भगवान् रुद्रो वाञ्छितार्थं प्रयच्छतु।
चक्रवर्ती भवेद्राजा चान्ते शिवपुरं व्रजेत् ॥

Colophon:

इति श्रीरुद्रयामले तन्त्रे सदाशिवस्तोत्रं संपूर्णम्।

1224

66682 **सदाशिवस्तोत्रम्**

Beginning:

सुराधिपं नमस्कृत्य शशाङ्ककृतशेखरम्।
कपालमालिनं देवं प्रणतोऽस्मि सदाशिवम् ॥
कालेश्वरं महाकालं कालञ्जरनिवासिनम्।
कालकृत्कालवेत्तारं प्रणतोऽस्मि सदाशिवम् ॥

End:

सूक्ष्मं सर्वगतं नित्यं सर्वतत्त्वेश्वरेश्वरम्।
सर्वतत्त्वाश्रयं देवं प्रणतोऽस्मि सदाशिवम् ॥

The following verses are also added at the end:

भूमिरापोऽग्निरनिलः खमात्मा चन्द्रभास्करौ।
मनोबुद्धिरहंकारः परा प्रकृतिरेव च ॥
यस्येच्छामनुवर्तन्ते भावाभावविकारिणः।
तस्मै परमदेवाय पराय परमात्मने ॥
महद्भ्यश्चातिमहते महामायादिमायिने।
सूक्ष्मेभ्योऽप्यतिसूक्ष्माय नमस्कृत्यामितात्मने ॥
नमस्ते बोधरूपाय कालान्तक नमोऽस्तु ते।
कलाधिप नमस्तेऽस्तु सर्वकालप्रवर्तक ॥
कलासकलरूपेण कलाभिर्विश्वरूपधृत्।
विश्वेश्वर नमस्तेऽस्तु आदिकालप्रवर्तक ॥
रौरवे . . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1225

67323 साम्बभुजङ्गम् (उमामहेश्वरभुजङ्गम्)

Beginning:

कदा वा सुभक्तिः कदा वा विरक्तिः कदा वा महायोगिसंसेव्यमुक्तिः ।
हृदाकाशमध्ये सदा संवसन्तं चिदानन्दरूपं शिवं साम्बमीडे ॥
सुधीराजहंसैः सुपुण्यावतंसैश्श्रिरश्रीसमेतैः सदाचारपुष्टैः ।
उदारैर्गतासूयसंसक्तभावैरदीनैर्गतक्रोधलोभप्रचारैः ॥

End:

सदा चन्द्रचूडं भजेऽहं भजेऽहं सदा व्योमकेशं भजेऽहं भजेऽहम् ।
सदा पार्वतीशं भजेऽहं भजेऽहं सदा साम्बमूर्तिं भजेऽहं भजेऽहम् ॥
भुजङ्गप्रयातस्तवं साम्बमूर्तेरिदं ध्यानरूपं तदेकाग्रचित्तः ।
पठेद्यस्तु भक्त्या स मुक्तः कृतार्थः सदा तस्य साक्षात् प्रसन्नः शिवः स्यात् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितमुमामहेश्वरभुजङ्गं समाप्तम् ।

1227

70257 सिद्धलिङ्गाष्टकम्

Beginning:

जगज्जालपालं जनस्तुत्यशीलं भवारण्यदावं भृतस्वानुभावम् ।
शिवानन्दकोशं दिनेशप्रकाशं महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥
स्वतन्त्रस्वलीलं गणेन्द्रानुकूलं विलन्मूलमन्त्रं प्रणीतेशतन्त्रम् ।
शिवध्यानशक्यं पराधीनमुक्तं महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥

End:

भुजङ्गप्रयातस्तवं सिद्धलिङ्गं प्रभोर्मूलमन्त्राभिधानेन क्लृतम् ।
भुजङ्गात्रयोत्रस्य यो वा पठेजो(?)वाप्नोत्यभीष्टं च भोगं च मोक्षम् ॥

1228

73243 सुन्दरेश्वरताण्डवस्तुतिः

Beginning:

परिपूर्णं परानन्दं सत्यं ज्ञानमयात्मकम् ।
भजामि सुन्दरेशस्य महदद्भुतताण्डवम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीमत्पञ्चाक्षरमयं पञ्चकृत्यैककारणम् ।
भजामि सुन्दरेशस्य महदद्भुतताण्डवम् ॥

End:

सर्वसंपत्प्रदं सद्यः सर्वापद्भञ्जनक्षमम् ।
भजामि सुन्दरेशस्य महदद्भुतताण्डवम् ॥
वीताघसंघैर्विबुधैर्विशिष्टैर्विद्याविशेषार्चितपादपद्म ।
हालास्यनाथाय नमोऽस्तु तुभ्यं श्रीसुन्दरेशाद्भुतताण्डवेश ॥

1229

73280 सुन्दरेश्वरदण्डकम्

Beginning:

जय जय महादेव अनित्याशुचिदुःखरूपविचित्रविविधप्रपञ्चनिर्माणोपा(नभ्रात ? दानभूता) नाद्यनिर्वचनीयाविद्याख्यमहानर्तकीनटनसूत्रधार विष्ण्वाद्यखिलदेवताशक्यब्रह्मदत्तवरोद्धतगगनचारित्रिपुरवास्यनेककोट्यसुरयूथपसंहारसंजातविजयकीर्तिमङ्गलपरिशोभमानवैभव ।

End:

जय जय पिनाकपाणे जय जय त्रिशूलधर जय जय नागाभरण जय जय व्याघ्रचर्माम्बरधर जय जय नागाजिनोत्तरीय जय जयानेकब्रह्मकपालरचितमालाविराजितोरःस्थल जय भस्माङ्गराग जय जय मधुरापुरीपते नमस्ते नमस्ते ।

1230

66023 सुन्दरेश्वराष्टकम्

Beginning:

मतङ्गजेन्द्रवैरिणं भुजङ्गराजभूषणं कुरङ्गचिह्नशेखरं पतङ्गकोटितेजसम् ।
सुतुङ्गपुङ्गवध्वजं पुरारिमन्तकान्तकं सुमीनलोचनापतिं नमामि सुन्दरेश्वरम् ॥

End:

निकृष्टघृष्टिरूपमूकदानवेशखण्डनं नगेशकन्यकाप्रियं ध्यपल्गुनाजिकारणम् (?) ।
सुकुण्डलीशकुण्डलश्रिया लसत्कपोलकं सुमीनलोचनापतिं नमामि सुन्दरेश्वरम् ॥
सुमीनलोचनासमेतसुन्दरेश्वराष्टकं पठेद् य ईशभक्तिमान् त्रिसंधिम(षु) प्रयत्नतः ।
ददाति म(ङ्ग)लानि तस्य सोमसुन्दरेश्वरो निजाङ्घ्रिपद्मभक्तिमप्रमेयमोक्षदां सदा ॥

1231

68956 सोमसुन्दरस्तोत्रम् (इन्द्रस्तोत्रम्

Beginning:

इन्द्रः—

एकं ब्रह्माद्वितीयं च परिपूर्णं परात्परम् ।
इति यो गीयते वेदे तं वन्दे सोमसुन्दरम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ज्ञातृज्ञानज्ञेयरूपं विश्वं व्याप्य व्यवस्थितम् ।
स्वयं सर्वैरदृश्यो यस्तं वन्दे सोमसुन्दरम् ॥

End:

अणोरणुस्त्वं महतो महांस्त्वं सर्वात्मभावात् परिपूर्ण एकः ।
त्वयैव शंभोरुपमां त्वदीयां सर्वो वक्तुं कः कृतीह क्षमस्व ॥

Colophon:

इन्द्रस्तोत्रं संपूर्णम् ।

1234

72439 स्तुतिपद्धतिः

End:

त्वं कोटीरे सह समदधाः किंकरास्तस्य शंभो
गण्डूषं न त्रिदशसरितोपानहं चेन्दुना वा ।
भक्त्या क्रीतो भवसि भगवन् सा च भावप्रभेद-
स्तस्यामस्यां मम विमुखतैतावती हन्त धिङ्माम् ॥

1236

77442 स्मरगौरीशस्तोत्रम्

Beginning:

भगवत्पादयतीश्वरममलं परशिवलीलाकलितशरीरम् ।
परमतभेदनिरासनचतुरं परमं गुरुवरमाश्रय इह तम् ।
स्मर गौरीशं स्मर गौरीशं स्मर गौरीशं पापमते ॥
यस्मादेतद् विश्वमशेषं समभूद् येन समन्वितमन्ते ।
लयमपि गच्छेत् परमानन्दे परशिवरूपपरात्परतत्त्वे ।
स्मर गौरीशं + + + पापमते ॥

End:

भजगौरीश(?गोविन्द)स्तुतिरिह कथिता भगवत्पादयतीश्वरगुरुभिः ।
तत्कृपयैव शिवस्तवनं मे कृतमिति सन्तः करुणां कुर्युः ।
स्मर गौरीशं + + + पापमते ॥
सोमकलाधरशंभोरेतत् स्तोत्रं यः पठति मनुष्यः ।
स हि भुवि धन्यः स हि भुवि मान्यः स हि भुवि भक्तः स हि भुवि मुक्तः ।
स्मर गौरीशं + + + पापमते ॥

Colophon:

स्मरगौरीशं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1240

PM2906 हरस्तुतिः

Beginning:

प्राग् दयतां गणनाथो विघ्नां वितरितुमुदारकालीनाम् ।
आद्रियतां गणनाथो बहुधा वृन्दारकालीनाम् ॥
हिमकरकलिकोत्तंसः शमयति तापं हृदि प्रवृत्तं सः ।
शुचमनिराकुर्वाणैर्मितनिर्वाणैः किमन्यगीर्वाणैः ॥

End:

शैलदुहित्रा तारं समुपदिशसि यो भवाम्बुधित्रातारम् ।
गतकिल्बिषभारोऽहं हृदये त्वां भावयामि वृषभारोहम् ॥
अनधिष्ठितकैलासो दीनोद्धारैकनिश्चितविलासः ।
उमया सदा विहरसे ममापि चिन्तां त्वमेव परिहरसे ॥

Colophon:

इति श्रीनिवासविरचिता हरस्तुतिः संपूर्णा ।

1241

66595 हालास्यनाथदण्डकम्

Beginning:

शुभसमुदयमन्दिराम्भोजसंभूतवृन्दारकेन्द्रादिवृन्दारकप्राज्ञवृन्दारकाश्रान्तमन्देतरानन्दसंदोह - संदायिहृद्यानवद्याद्भुताधित्यकाभागसंरूढमन्दारकल्पद्रुमोद्यानसंफुल्लपुष्पासवासारधारासरत्सारिणीधार - णीवारसंपातभूरीकृतावार्यमाधुर्यसौरभ्यरङ्गत्तरङ्गातिसंबाधगङ्गाझरीतीरगाङ्गेयसत्सैकतश्रेणिकाश्रेणिकासं- विशद्भूरिभूत्यङ्गरागाङ्कभद्रालयीभूतरुद्राक्षदामाभिरामोज्ज्वलद्भक्तिभारार्जिताग्रीयगाङ्गेयजाम्बूनदाम्भो - जमुख्यप्रसूनाधिकारब्धचन्द्रावतंसाच्छलिङ्गार्चनासक्तगौरीशभक्ताग्रणीमण्डलीमण्डिते सर्वसर्वंसहाभृत्प्र- तीतप्रभावाञ्चिते ।

End:

. . . सुन्दरेशालयाग्रीयभूषायिते दिव्यसन्मन्दिरे सुन्दरे सुस्थिरामासिकामात्मनीनैरशेषैर्मुदा- सामदेभाननस्कन्दमुख्यैः स्वशक्त्या महत्या पराशक्तिमूर्त्या समासाद्य साकं चिदानन्दरूपः शिवो विश्वनाथः सपर्याभिरार्याभिराराधितः सुप्रसन्नः कृपासारदृष्ट्या सदा संदिशन् राजते नित्यकल्याण- पारंपरीं तादृशं देवमुद्यन्तमेवाद्य हृद्यं प्रपद्येऽनवद्यान्तरात्मानमाद्यं हृदा भूयसे श्रेयसे ।

गौरीं रावणबाहुकम्पितमहाकैलासशैलासिका-
निर्विण्णां गिरिशो विचिन्त्य यवनाक्रान्तेति वाराणसीम् ।
हित्वासौ निजमुद्दुरामरचिते सौधे वसन् मोदते
हालास्येऽखिलपूजितो गिरिजया श्रीविश्वनाथोऽधुना ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1244

73243 हालास्यनाथाष्टकम्

Beginning:

कुण्डोदरः—

शैलाधीशसुतासहाय सकलाम्नायान्तवेद्य प्रभो
शूलास्त्राग्रविदारितान्धकसुरारातीन्द्रवक्षःस्थल ।
कालातीत कलाविलासकुशल त्रायेत ते संततं
हालास्येश कृपाकटाक्षलहरी मामापदामास्पदम् ॥

End:

लीलानादरमोहतः कपटतो यद्वा कदम्बाटवी-
हालास्याधिपतीष्टमष्टकमिदं सर्वेष्टसंदोहनम् ।
आलापानफलान् विहाय सततं संकीर्तयन्तीह ये
ते लाक्षार्द्रपदाबलाभिरखिलान् भोगान् लभन्ते सदा ॥

1247

67633 अर्धनारीश्वराष्टोत्तरशतनामावलिः

Beginning:

अखण्डानन्दसंयुक्ताय नमः—अखिलार्थप्रदायिन्यै नमः । अखिलामरपूज्याय नमः—अखिलामररक्षिण्यै नमः । आनन्दताण्डवासक्ताय नमः—आनन्दामृतदायिन्यै नमः । अखिलेन्द्रादिदेवेड्याय नमः—आराधितपदद्वयायै नमः ।

End:

हरिब्रह्मेन्द्रवन्दिताय नमः—हरविग्रहसंस्थितायै नमः । क्ष्माभिद्राजादिसंसेव्याय नमः—क्षोमजालविनाशिन्यै नमः । क्षेमजालप्रदात्रे नमः—क्षौमजालविराजितायै नमः । अर्धनारीश्वराय नमः ।

Colophon:

अर्धनारीश्वराष्टोत्तरं संपूर्णम् ।

1248

PM2597 अर्धनारीश्वराष्टोत्तरशतनामावलिः

Beginning:

श्रीशिवाय गुरवे नमः । श्रीमत्त्रिपुरसुन्दर्यै नमः । ऐं ह्रीं श्रीं ओं नमस्त्रिपुरसुन्दर्यै नमः स्वाहा—त्रिपुरसुन्दराय नमः स्वाहा । हृदयदेव्यै नमः—हृदयदेवाय (नमः) । शिरोदेव्यै (नमः)—शिरोदेवाय (नमः) । शिखादेव्यै (नमः)—शिखादेवाय (नमः) ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

महास्कन्दायै (नमः)—महामहास्कन्दाय (नमः)। महामहाशयायै (नमः)—महामहाशयाय (नमः)। महाश्रीचक्रनगरसाम्राज्यै (नमः)—महाश्रीचक्रनगसम्राजे नमस्ते नमस्ते नमस्ते स्वाहा। ऐं ह्रीं श्रीं ओम्।

1249

68860 आपदुद्धारकवटुकभैरवस्तोत्रम्

Beginning:

उद्यद्भास्करसंनिभं त्रिनयनं रक्ताङ्गरागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः।
नीलग्रीवमुदारभीषणधरं शीतांशुखण्डोज्ज्वलं
बन्धूकारुणवाससं भयहरं वन्दे महाभैरवम्॥
मेरुपृष्ठे सुखासीनं देवदेवं त्रिलोचनम्।
शंकरं परिपप्रच्छ पार्वती परमेश्वरम्॥

पार्वत्युवाच—

भगवन् सर्वशास्त्रज्ञ सर्वशास्त्रागमादिषु।
आपदुद्धारणं मन्त्रं सर्वसिद्धिप्रदं नृणां॥
. . . .
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद।

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः।
आपदुद्धारकस्यैव नामाष्टशतमुत्तमम्॥
. . . .
भैरवो भूतनाथश्च भूतात्मा भूतभावनः।
क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षेत्रजो विराट्॥

End:

सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णुपतिः शिवः।
अष्टोत्तरशतं नाम भैरवस्य महात्मनः॥
मया ते कथितं देवि रहस्यं सर्वकामदम्।
. . . .
एवं श्रुत्वा ततो देवी नामाष्टशतमुत्तमम्॥
संतोषं परमं प्राप्य भैरवस्य महात्मनः।
जजाप परया . . . सदा सर्वेश्वरेश्वरी॥

Colophon:

इति विश्वसारोद्धारे रुद्रयामले उमामहेश्वरसंवादे आपदुद्धारकवटुकभैरवस्तोत्रं नाम चतुर्दशोऽध्यायः।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1251

75201 आपदुद्धारकवटुकभैरवस्तोत्रम् (भैरवस्तवराजः)

End:

एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमम् ।
भैरवाय प्रसन्नाभूत् स्वयं चैव महेश्वरी ॥
करकलितकपालः कुण्डली दण्डपाणिस्तरुणतिमिरनीलो व्यालयज्ञोपवीती ।
क्रमसमयसपर्याविघ्नविच्छेदहेतुर्जयति वटुकनाथः सिद्धिदः साधकानाम् ॥

Colophon:

इति श्रीविश्वसारोद्धारे आपदुद्धारमहाकल्पे भैरवस्तवराजः समाप्तः ।

1253

73246 चिदम्बरसंमेलनाष्टोत्तरशतनामस्तोत्रम्

Beginning:

अस्य श्रीचिदम्बरसंमेलनाष्टोत्तरशतनामात्मकमहामन्त्रस्य सदाशिव ऋषिः, महाविराट् छन्दः, श्रीचिदम्बरेश्वरो देवता, बीजम्, सः शक्तिः, सोऽहं कीलकम्, मम इष्टकाम्यार्थसिद्ध्यर्थे नटेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः . . . .

चिदम्बरेश्वरो हेमसभेशश्चित्सभेश्वरः ।
चिदम्बरसभानाथश्चिदम्बरसभापतिः ॥

End:

भुवनेशो विश्वनाथः शिवस्त्रिपुरसुन्दरः ।
त्रैलोक्यसुन्दरस्तिल्लवनस्तिल्लपुरेश्वरः ॥

Colophon:

इति चिदम्बरसंमेलनाष्टोत्तरशतं संपूर्णम् ।

1255

73242 चिदम्बराष्टोत्तरशतनामावलिः

Beginning:

चिदम्बरेश्वर्यैनमः—चिदम्बरेश्वराय नमः । हेमसभेश्वर्यै नमः—हेमसभेश्वराय नमः । चित्सभेश्वर्यै नमः—चित्सभेश्वराय नमः। चिदम्बरसभानाथायै नमः—चिदम्बरसभानाथाय नमः।

End:

शिवायै नमः—शिवाय नमः । त्रिपुरसुन्दर्यै नमः—त्रिपुरसुन्दराय नमः । शिवकामीसमेत-श्रीचिदम्बरेश्वराय नमः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1257

71210 **चिदम्बरेश्वरसहस्रनामस्तोत्रम्**

Beginning:

कैलासशिखरे रम्ये रत्नसिंहासने स्थितम् ।
शंकरं करुणामूर्तिं प्रणम्य परया मुदा ॥
विनयावनता भूत्वा पप्रच्छ परमेश्वरी ।
भगवन् भव सर्वज्ञ भवतापहराव्यय ॥
त्वत्तः श्रुतं मया देव सर्वं नामसहस्रकम् ।
नटेशस्य तु नामानि न श्रुतानि मया प्रभो ॥
. . . . . .

अस्य श्रीनटेशसहस्रनाममहामन्त्रस्य ईश्वर ऋषिः, विराट् छन्दः, नटेश्वरो देवता . . .

श्रीशिवः श्रीशिवानाथः श्रीमान् श्रीपतिपूजितः ।
शिवंकरः शिवकरः शिष्टहृष्टः शिवागमः ॥

End:

चिदानन्दनटाधीशश्चित्केवलवपुर्धरः ।
चिदेकरससंपूर्णः श्रीशिवः श्रीमहेश्वरः ॥
इति ते कथितं देवि नटराजस्य सुन्दरम् ।
नाम्नां सहस्रमत्यन्तं गोप्यं नेदं प्रकाशयेत् ॥
. . . . . .
एतन्नामसहस्रस्य पठनात् सकृदेव हि ।
महापातकयुक्तोऽपि शिवसायुज्यमाप्नुयात् ॥

Colophon:

इत्याकाशभैरवकल्पे उमामहेश्वरसंवादे चिदम्बरेश्वरसहस्रनाम संपूर्णम् ।

1259

73806 **चिदम्बरेश्वरसहस्रनामस्तोत्रम् (नटेशनामसहस्रस्तोत्रम्)**

Beginning:

स्वराडाख्य(स्य)देवस्य हृत्पद्मकोशे सभानायकं सच्चिदानन्दनृत्तम् ।
उपासे महामन्त्रविद्यास्वरूपं त्रिसाहस्रविप्राग्रणीभागधेयम् ॥
यस्मात् सर्वं समुत्पन्नं चराचरमिदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्यमूर्तये ॥

ओं श्रीशिवः + + + शिवागमः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

चिदानन्द + + + महेश्वरः ॥

Colophon:

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शंकरेण विरचिते पञ्चविंशतिमूर्तिस्वरूपनिर्वचनप्रकरणे नटेशनामसाहस्रस्तोत्रं संपूर्णम् ।

कलियुगस्य ४९९३ वत्सरे खराख्यसंवत्सरे कर्कटमासे पञ्चदशदिने सौम्यवासरे एतत् पुस्तकं चिदम्बरीयेण चि . ता . नटेशशास्त्रिदीक्षितेन लिखित्वा समापितम् ।

1260

67815 दक्षिणामूर्तिचतुःशतनामस्तोत्रम्

Beginning:

यस्य संस्तुतिमात्रेण मुक्ताः स्युर्भवबन्धनात् ।
अगस्त्याद्या नमस्तस्मै शंभवे परमात्मने ॥

मार्कण्डेय उवाच—

श्रुत्वा शिवकथाः सर्वाः सनकाद्या मुनीश्वराः ।
पुनः पप्रच्छुरीशानं दक्षिणामूर्तिमव्ययम् ॥

. . . . . .

सनकाद्या ऊचुः—

तत्प्रापक महादेव वटमूलनिवासक ।
वयं तच्छ्रोतुमिच्छामः स्तोत्रं ब्रूहि दयानिधे ॥

दक्षिणामूर्तिरुवाच—

शृणुध्वं दिव्यनाम्नां मे चतुःशतमनुत्तमम् ।
अस्ति लोके मुनीन्द्रास्त(?)नृसिंहेन प्रकीर्तितम् ॥
योगसारं वेदसारं तत्त्वसारं शिवात्मकम् ।

. . . . . .

ऋषिरस्य गुरुः प्रोक्तश्छन्दोऽनुष्टुबुदीरितः ॥
देवता दक्षिणामूर्तिः प्रणवो बीजमुच्यते ।
पञ्चाक्षरैः करन्यासमङ्गन्यासं तथैव च ॥
कृत्वा सदाशिवं शंभुं ध्यायेत् सर्वशुभाप्तये ।

. . . . . .

एवं ध्यात्वा महादेवं जपेन्नामचतुःशतम् ॥

. . . . . .

हंसमण्डलवासाय साम्बाय परमात्मने ।
नीलग्रीवाय देवाय नमो वेदान्तवेदिने ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

इतीदं कीर्तनीयस्य शंकरस्य महात्मनः ।
नाम्नां चतुःशतं दिव्यं नृसिंहेन प्रकीर्तितम् ॥

. . . . . .

शिवज्ञानविहीनाय शिवभक्तापराधिने ।
गुरुभक्तिविहीनाय न दातव्यं शठाय च ॥
शिवभक्ताय दान्ताय शिवध्यानरताय च ।
स्वधर्मैकर्मनिष्ठाय प्रदातव्यं प्रयत्नतः ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे गौरीशंकरसंवादे नृसिंहप्रोक्ते दिव्यमङ्गलशिवध्यानवर्णनं नाम पञ्चदशोऽध्यायः ।

1261

66770 दक्षिणामूर्तिमन्त्रार्णस्तवः

Beginning:

भगवन् देवदेवेश मन्त्रार्णस्तवमुत्तमम् ।
दक्षिणामूर्तिदेवस्य कृपया वद मे प्रभो ॥

श्रीशिवः—

साधु पृष्टं महादेवि सर्वलोकहिताय ते ।
वक्ष्यामि परमं गुह्यं मन्त्रार्णस्तवमुत्तमम् ॥

. . . . . .

ओंकाराचलसिंहेन्द्र ओंकारोद्यानकोकिलः ।
ओंकारनीरशुकराडोंकारारण्यकुञ्जरः ॥

End:

हाटकाभजटाजूटो हासोदस्तारिमण्डलः ।
हालाहलोज्ज्वलगळो हालायुतमनोहरः ॥
इतीदं दक्षिणामूर्तेर्मन्त्रार्णस्तवमुत्तमम् ।
अशेत्तरशतं दिव्यं श्रीमन्नामात्मकं शुभम् ॥

. . . . . .

अतिशीतलमतिमृदुलं मञ्जुलतरममलमतिसुगन्धितमम् ।
श्रीगुरुपदयुगलाब्जं धारयतो मेऽद्य धन्यता प्रबा ॥

Colophon:

अष्टोत्तरं समाप्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1262

73247 दक्षिणामूर्तिसहस्रनामस्तोत्रम्

Beginning:

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
मेरुपृष्ठे समासीनं शंकरं लोकशंकरम् ।
प्रणता परिपप्रच्छ गिरिजा प्रेमसंयुता ॥

पार्वती—

देव देव जगन्नाथ भक्तानुग्रहविग्रह ।
इदानीं श्रोतुमिच्छामि दक्षिणामूर्तिपावनम् ॥
स्तोत्रं सहस्रनामाख्यं देवस्यैव सुबुद्धिदम् ।
सद्यः प्रत्ययकामाहं ब्रूहि मे करुणाकर ॥

ईश्वर उवाच—

. . . . . .

दक्षिणो दक्षिणामूर्तिरादिदेवः सनातनः ।
योगीशो योगगो योगी योगशायी सदाशिवः ॥

End:

सर्वभूतहितार्थानामादिदेवेश्वरेश्वरः ।
ओंकारकन्दरहरिरोंकारारामकोकिलः ॥
य इदं परमं गुह्यं दिव्यं नामसहस्रकम् ।
पठेद् वा पाठयेद् वापि त्रिसंध्यं श्रद्धयान्वितः ॥

. . . . . .

नारायणः श्रिया युक्तो गायत्रीसहितो विधुः ।
अहं सावित्रिसहितो दक्षिणामूर्तिपूजनैः ॥
उच्यते बाहुमुद्धृत्य किं बहूक्तेन पार्वति ।
येन संपूजितो दक्षमूर्तिर्देवैः स पूज्यते ॥

Colophon:

इत्युत्तरवटागमे नागेन्द्रप्रयाणतन्त्रे महोग्रभैरवतारासंवादे ईश्वरप्रोक्तं दक्षिणामूर्तिसहस्रनामस्तोत्रं संपूर्णम् ।

1263

68309 दक्षिणामूर्तिसहस्रनामस्तोत्रम्

Beginning:

श्रीपार्वत्युवाच—

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
सुगुप्तमपि देवेश कथयस्व महेश्वर ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ईश्वर उवाच—

रहस्यातिरहस्यं च गोप्याद् गोप्यं महत्तरम् ।
न कुत्रापि मया प्रोक्तं सर्वस्वमपि पार्वति ॥
. . . . . .
दक्षिणो दक्षिणामूर्तिर्दयाळुर्दीनवल्लभः ।
दीनार्तिहृद्दीननाथो दिननाथो दयापरः ॥

End:

स्थाणुरूपो महेशानि प्रोक्तं नामसहस्रकम् ।
गोप्याद् गोप्यं महेशानि सारात् सारतरं परम् ॥
. . . . . .
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
स्वयोनिरिव गोप्तव्यं न देयं यस्य कस्यचित् ।
इति संक्षेपतः प्रोक्तः किमन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इति श्रीचिदम्बरनटनतन्त्रे दक्षिणामूर्तिसहस्रनामस्तोत्रं संपूर्णम् ।

1264

66770 दक्षिणामूर्तिसहस्रनामस्तोत्रम्

Beginning:

श्रीमेधादक्षिणामूर्तेर्नामसाहस्रकस्य च ।
ऋषिर्ब्रह्मा महेशानि गायत्री छन्द ईरितम् ॥
. . . . . .
दक्षिणो दक्षिणामूर्तिर्दयाळुर्दीनवल्लभः ।

End:

धिमिं धिमिं धरिग्रूपो धैं धैं धैं नाट्यनायकः ।

1265

68244 दक्षिणामूर्तिसहस्रनामावलिः

Beginning:

आदिदेवाय नमः । दयासिन्धवे नमः । अखिलादिमदेशिकाय नमः । दक्षिणामूर्तये नमः । अतुलाय नमः । शिक्षितासुरविक्रमाय नमः । कैलासशिखरोल्लासिकमनीयनिजाकृतये नमः ।

End:

चण्डीहृदयनन्दनाय नमः । चित्रार्चिताय नमः । चित्रमायिने नमः । चिन्तिताय नमः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1266

66266 दक्षिणामूर्त्यष्टोत्तरशतनामावलिः

Beginning:

निर्गुणाय नमः। निर्मलाकाराय नमः। निष्कलाय नमः। निरञ्जनाय नमः। नित्यानन्दाय नमः। निराकाराय नमः। निःसङ्गाय नमः।

End:

सर्वबन्धविवर्जिताय नमः। सर्वाधाराय नमः। सदा पूज्याय नमः। सर्वाकाराय नमः। श्रीसदाशिवाय नमः। श्रीदक्षिणामूर्तिस्वामिने नमः।

Colophon:

अष्टोत्तरशतं संपूर्णम्।

1268

71546 दक्षिणामूर्त्यष्टोत्तरशतनामावलिः

Beginning:

महाकैलासशिखरनिलयाय नमो नमः। हिमाचलेन्द्रतनयावल्लभाय नमो नमः॥
वामभागकलत्रार्धशरीराय नमो नमः। विलसद्दिव्यकर्पूरगौराङ्गाय नमो नमः॥
कोटिकन्दर्पसदृशलावण्याय नमो नमः। रत्नमौक्तिकवैडूर्यकिरीटाय नमो नमः॥

End:

इच्छाज्ञानक्रियाशक्तिनिर्मुक्ताय नमो नमः। मणिदर्पणदर्पघ्नकपोलाय नमो नमः॥
भवाब्धिमग्नभक्तौघतारकाय नमो नमः। निजभक्तमहापापसंहाराय नमो नमः॥
दारिद्र्यदुःखसंहारकारणाय नमो नमः। अष्टोत्तरशतं नाम दक्षिणामूर्तये नमः॥

Colophon:

इति श्रीदक्षिणामूर्त्यष्टोत्तरं संपूर्णम्।

1269

73902 दक्षिणामूर्त्यष्टोत्तरशतनामावलिः (दिव्याष्टोत्तरशतनामावलिः)

End:

अनित्यदेहविभ्रान्तिवर्जिताय (नमो नमः।) सकृत्प्रपन्नदौर्भाग्यभेदनाय (नमो नमः॥)
षट्त्रिंशत्तत्त्वप्रासादभुवनाय (नमो नमः।) आदिमध्यान्तरहितदेहस्थाय (नमो नमः॥)
परानन्दस्वरूपार्थबोधनाय नमो नमः। ज्ञानशक्तिक्रियाशक्तिसंयुताय नमो नमः॥
पराशक्तिसमायुक्तपरेशाय नमो नमः। श्रीसाम्बसदाशिवाय नमो नमः॥

Colophon:

दिव्याष्टोत्तरं संपूर्णम्।

क्रोधननामसंवत्सरं मार्गशिरख. २ सोमवारं नाडुकंनिलो व्राशिन दिव्याष्टोत्तरं श्रीशिवार्पणमस्तु।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1270

71547 दक्षिणामूर्त्यष्टोत्तरशतनामावलिः (नाथाष्टोत्तरम्)

End:

आदिमध्यान्तरहितदेहस्थाय नमो नमः। महाशक्तिसमायुक्तमहेशाय नमो नमः॥
शुद्धस्फटिकसंकाशदिव्यदेहाय ते नमः। महापातकशैलेन्द्रकुलिशाय नमो नमः॥
समस्तदेवतास्तोमसंस्तुताय नमो नमः। सनकादिमहायोगिवन्दिताय नमो नमः॥
सर्वभूषणालंकाराय नमो नमः।

1271

71729 दक्षिणामूर्त्यष्टोत्तरशतनामावलिः

End:

पराशक्तिसमायुक्तपरमेशाय ते नमः। सहस्रारमहापद्ममन्दिराय नमो नमः॥
अनन्तानन्दबोधाम्बुनिधिस्थाय नमो नमः। अखण्डचिद्घनानन्दस्वरूपाय नमो नमः॥

1272

73916 दक्षिणामूर्त्यष्टोत्तरशतनामावलिः

End:

पराशक्तिसमायुक्तपरेशाय नमो नमः। षट्त्रिंशत्तत्त्वप्रासादभूनाथाय नमो नमः॥
महाकैवल्यसाम्राज्यदायकाय नमो नमः।

1274

PM2053 पञ्चाक्षरनामस्तोत्रम्

Beginning:

ओंकारगम्य ओंकारवाच्य ओंकारविग्रहः। ओंकारशुक्तिकामुक्तामणिरोंकारवल्लभः॥
ओंकारबिलपञ्चास्य ओंकारसुषिरोरगः। ओंकारपञ्जरशुक ओंकारान्तर्निवासकृत्॥

End:

याताश्रितजनक्लेशो यज्ञसंदर्भ्यविग्रहः। यमप्रहर्ता यक्षेशस्निग्धो यातुगणान्तकः॥
यमाद्यष्टाङ्गिसंदृश्यो यतिविश्रान्तिभूरुहः। यतीशो यतिचित्ताब्जसदावृत्तविधायकः॥

1275

PM2053 पञ्चाक्षरनामावलिः

Beginning:

ओंकारगम्याय नमः। ओंकारवाच्याय नमः। ओंकारविग्रहाय नमः। ओंकारशुक्तिकामुक्तामणये नमः। ओंकारवल्लभाय नमः। ओंकारबिलपञ्चास्याय नमः।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

यतिविश्रान्तिभूरुहाय नमः । यतीशाय नमः । यतिच्चित्ताब्जसदानृत्तविधायकाय नमः ।

1276

71729 **पञ्चाक्षरनामावलिः**

End:

यतिच्चित्ताब्जसदानृत्तविधायकाय नमः । अणोरणीयसे नमः । महतो महीयसे नमः । परमेश्वराय नमः । शिवभूतिनिधिश्रीमच्छ्रीमहातीर्थनायकाय नमः । अन्तरात्मने नमः । परमात्मने नमः । आदिकैलासनायकाय नमः ।

The scribe adds the following verse:

परमशिवभक्तिभाजां वीक्षणमात्रेण यत् प्रमोदकरम् ।
तदिदं लिखितं सुकृतात् वेङ्कटरामेण केनचित् सुधिया ॥

1277

71547 **परमेश्वराष्टोत्तरशतनामावलिः**

Beginning:

ओं परमेश्वराय नमः । जयप्रदाय नमः । सर्वपुराणगुह्याय नमः । पापौघहराय नमः । पवित्राय नमः । जयदाय नमः । सर्वविपत्प्रमोचनाय नमः ।

End:

सर्वतोमुखाय नमः । संजीवनाय नमः । श्रीपरमेश्वराय नमः । आदिमध्यान्तरहिताय नमः । वेदवेद्याय नमः । वेधसे नमः । कन्दर्पप्राणापहराय नमः ।

Colophon:

परमेश्वराष्टोत्तरं संपूर्णम् ।

1278

PM2727 **प्रातःस्मरणीयशिवद्वादशनामस्तोत्रम्**

The following is the full text of the Stotra:

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोंकारममलेश्वरे ॥
केदारं हिमवत्पृष्ठे डाकिन्यां भीमशंकरम् ।
वाराणस्यां च विश्वेशं त्र्यम्बकं गौतमीतटे ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वैद्यनाथं चिताभूमौ नागेशं दारुकावने ।
सेतुबन्धे च रामेशमुमेशं च शिवालये ॥
द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत् ।
सर्वपापविनिर्मुक्तः सर्वसिद्धफलो भवेत् ॥

Colophon:

इति शिवपुराणे ।

1279

75135 भुवनेश्वराष्टोत्तरशतनामस्तोत्रम्

Beginning:

वामदेव उवाच—

वक्ष्येऽत्र भुवनेशस्य नाम्नामष्टोत्तरं शतम् ।
सर्वपापप्रशमनं मोक्षैकफलदायकम् ॥
महासारस्वतकरं सर्वविघ्नविनाशनम् ।
सर्वकामप्रदं धन्यं चिरजीविकरं सदा ॥
ऋषिः सनत्कुमारोऽस्य ततश्छन्दो विराट् स्मृतम् ।
देवता पद्मगर्भस्तु वाञ्छितार्थे नियोजयेत् ॥

. . . .

शिवः शक्रादिसंस्तुत्यो दिव्यरूपधरो हरः ।
सनत्कुमारवरदो गौरीप्रश्नोत्तरप्रदः ॥

End:

आत्मच्छायाप्रियश्चैव ललाटेन्दुर्वरप्रदः ।
त्रिपुरारिस्त्रिलोकेशो भगवांश्च सदाशिवः ॥
एतदष्टोतरशतं नाम्नां श्रीकृत्तिवाससः ।
प्रोक्तं परमगोप्यं च मुक्तिपारमनुत्तमम् ॥

. . . .

एवं तण्डे मया प्रोक्तं नाम्नामष्टोत्तरं विभोः ।
श्रुत्वा त्रिभुवनेशस्य किमन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इति श्रीशिवपुराणोत्तरखण्डे भुवनेश्वराष्टोत्तरनामशतकमूनत्रिंशोऽध्यायः ।

1280

PM2752 भैरवसहस्रनामस्तोत्रम्

Beginning:

कैलासशिखरे रम्ये देवदेवं जगद्गुरुम् ।
पप्रच्छ पार्वती शंभुं शंकरं लोकशंकरम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीपार्वत्युवाच—

देव देव महादेव सर्वज्ञ सुखदायकम् ।
आपद्दुःखदरिद्रादिपीडितानां नृणां विभो ॥
. . . . . .

ईश्वर उवाच—

स्तवराजं महामन्त्रं भैरवस्य शृणु प्रिये ।
बालग्रहादिशमनं नानासिद्धिकरं नृणाम् ॥
. . . . . .
ओं भैरवो भूतनाथश्च भूतात्मा भूतभावनः ।
भूतावासो भूतपतिर्भूरिदो भूरिदक्षिणः ॥

End:

सर्वाभिचारहन्ता च सर्वकृत्यानिषूदनः ।
आन्त्रमाली सर्वमाली स्वर्णाकर्षणभैरवः ॥
नाम्नां सहस्रं दिव्यानां भैरवस्य महात्मनः ।
मया ते कथितं देवि रहस्यं सर्वकामदम् ॥
. . . . . .
सत्कुलीनाय शान्ताय ऋजवे सत्यवादिने ।
स्तोत्रदानात् संप्रहृष्टो भैरवोऽभून्महेश्वरः ॥

Colophon:

इति श्रीमद्भैरवतन्त्रे उमामहेश्वरसंवादे श्रीमद्भैरवस्य दिव्यनामसहस्रं समाप्तिमगमत् ।
धातृनामसंवत्सरमार्गशिरशुद्ध ५. मङ्गलवासरे गोतीराख्यग्रामे श्रीसदाशिवशास्त्रिहस्तेन स्वार्थं परार्थं चं लिखितम् ।

1281

70640 भैरवाष्टोत्तरशतनामस्तोत्रम्

Beginning:

ओं ह्रां भैरवाय नमः । भूतनाथाय नमः । भूतात्मने नमः । भूतसंभवाय नमः । क्षेत्रज्ञाय नमः । क्षेत्रपालाय नमः । क्षेत्रजाय नमः । क्षत्रियाय नमः । त्रिराजे नमः ।

End:

चण्डभैरवाय नमः । क्रोधभैरवाय नमः । उन्मत्तभैरवाय नमः । कपालभैरवाय नमः । भीषणभैरवाय नमः । संहारभैरवाय नमः । कालभैरवाय नमः । मन्त्रपुष्पं समर्पयामि ।

Colophon:

भैरवाष्टोत्तरशतकं समाप्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1282

71547 **महादेवाष्टोत्तरशतनामावलिः**

Beginning:

महादेवाय नमः । शिवाय नमः । नीलकण्ठाय नमः । वृषवाहनाय नमः । चतुर्बाहवे नमः । पञ्चवक्त्राय नमः । त्रिलोचनाय नमः । महारुद्राय नमः । महानन्दिने नमः ।

End:

सर्वपापहराय नमः । हराय नमः । उमामहेश्वराय नमः । सूत्राधारि . . नमः । सुखरूपाय नमः । सुनिष्ठाय नमः । सुलोचनाय नमः ।

Colophon:

महादेवाष्टोत्तरं संपूर्णम् ।

1283

66737 **मेधादक्षिणामूर्तिसहस्रनामस्तोत्रम्**

Beginning:

आदिदेवो दयासिन्धुरखिलागमदेशिकः ।
दक्षिणामूर्तिरतुलः शिक्षितासुरविक्रमः ॥
कैलासशिखरोल्लासी कमनीयनिजाकृतिः ।
वीरासनसमासीनो वीणापुस्तोल्लसत्करः ॥

End:

क्षेत्राधिपः स्वसंवेद्यः श्रीप्रदो विभवप्रदः ।
सर्ववश्यकरः सर्वदोषहा पुत्रपौत्रदः ॥
इत्युक्तं परमेशानि स्तोत्रं नामसहस्रकम् ।
यः पठेत् प्रयतो भूत्वा भस्मभूषितविग्रहः ॥
रुद्राक्षमालाभरणो भक्तिमान् जपतत्परः ।
सर्वसिद्धिमवाप्नोति साक्षात्कारं च विन्दति ॥
बहुनात्र किमुक्तेन यद्यत् कामयते नरः ।
तत्तत् सर्वमवाप्नोति नामसाहस्रजापकः ॥

Colophon:

मेधादक्षिणामूर्तिसहस्रनामस्तोत्रं संपूर्णम् ।

1285

66823 **मेधादक्षिणामूर्तिदिव्याष्टोत्तरशतनामस्तोत्रम्**

Beginning:

श्रीमहेश्वर उवाच—

अथातः संप्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तस्य श्रीदक्षिणामूर्तेः शृणु देवि जगद्धितम् ॥

. . . . . .

देवदेवो महादेवो देवानामादिदेशिकः ।
दक्षिणामूर्तिरीशानो दयापूरितदिङ्मुखः ॥

End:

सच्चिदानन्दपूर्णात्मा स्वे महिम्नि प्रतिष्ठितः ।
सर्वभूतान्तरः साक्षी सर्वज्ञः सर्वकामदः ॥
इत्युक्तं देवदेवस्य नाम्नामष्टोत्तरं शतम् ।
अनेन सदृशं स्तोत्रं न भूतं न भविष्यति ॥

. . . . . .

स्वाज्ञानेन विवर्तते त्रिभुवनाकारेण यः सर्वतः
स्वस्मै यः स्वयमेव चोपदिशति स्वं शिष्यगुर्वात्मना ।
स्वज्ञानेन च योऽद्वितीयसुखसद्बोधात्मना शिष्यते
तस्मै विस्मयनीयशक्तिनिधये कस्मैचिदस्मै नमः ॥

Colophon:

इति श्रीमेधादक्षिणामूर्तिदिव्याष्टोत्तरशतं नाम स्तोत्रं संपूर्णम् ।

1286

71168 रुद्रदशाक्षरीत्रिशतीस्तोत्रम्

Beginning:

अस्य श्रीशैवत्रिशतीस्तोत्रमहामन्त्रस्य अन्तर्यामी ऋषिः, गायत्री छन्दः, शीघ्रवरप्रसादसुन्दरीमहेश्वरो देवता, अकारो बीजम्, उकारः शक्तिः, मकारः कीलकम्, मम समस्तपापक्षयार्थे श्री उमामहेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः . . .

नम ओंकाररूपाय ओंकारनिलयाय च ।
ओंकारजपसुप्रीतो नादरूपस्तथैव च ॥

End:

युगाद्युत्पत्तिरूपश्च यक्षसिंहासनस्तथा ।
योगावर्तश्च नामानि त्रिंशदेवं(?) प्रकीर्तितम् ॥

Colophon:

इति श्रीशैवागमे रुद्रदशाक्षरीत्रिशती समाप्ता ।

Adds the following verses after the colophon:

इदं स्तोत्रं पठेन्नित्यं भोगमोक्षप्रदं नृणाम् ।
त्रिकालं यो जपेद् भक्त्या सर्वान् कामानवाप्नुयात् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

बिल्वपत्रैश्च पद्मैश्च तुलसीमल्लिकादिभिः ।
तिलाक्षतैर्द्रोणपुष्पैर्दूर्वाभिश्च तथैव च ।
अर्चयेन्नित्यमीशं यो जीवन्मुक्तो न संशयः ॥

1287

71168 रुद्रदशाक्षरीत्रिशतीनामावलिः

Beginning:

ओंकाररूपाय नमः । ओंकारनिलयाय नमः । ओंकारजपसुप्रीताय नमः । ओंकारनादरूपाय नमः । ओंकारबीजरूपाय नमः । ओंकारबिन्दुरूपाय नमः ।

End:

योगनिष्ठाय नमः । योगिगम्याय नमः । योग्याय नमः । युगन्धराय नमः । युगाद्युत्पत्तिरूपाय नमः । यक्षसिंहासनाय नमः । योगावर्ताय नमः ।

Colophon:

त्रिशति संपूर्णम् ।

1288

71548 रुद्रद्वादशनामस्तोत्रम्

The following is the full text of the Stotra:

शंकर उवाच—

प्रथमं तु महादेवं द्वितीयं परमेश्वरम् ।
तृतीयं शंकरं प्रोक्तं चतुर्थं वृषभध्व(जम्) ॥
पञ्चमं शूलपाणिं च षष्ठं कामाङ्गनाशनम् ।
सप्तमं देवदेवेशं श्रीकण्ठं चाष्टमं तथा ॥
नवमं चेश्वरं प्रोक्तं दशमं पार्वतीप्रियम् ।
एकादशं महारुद्रं द्वादशं शिवमुच्यते ।
एतानि द्वादश नामानि त्रिसंध्यं यः पठेन्नरः ॥
गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गुरुपातकः ।
स्त्रीबालघातकश्चैव सुरापो वृषलीपतिः ।
मुच्यते सर्वपापेभ्यः शिवलोकं स गच्छति ॥

1289

70315 वीरभद्रसहस्रनामस्तोत्रम्

Beginning:

अस्य श्रीवीरभद्रसहस्रनामस्तोत्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीवीरभद्रो देवता, श्रीं बीजम्, वीं शक्तिः, रं कीलकम्, ममोपात्तदुरितक्षयार्थं चिन्तितमनोरथावाप्त्यर्थं धर्मार्थकाममोक्षचतुर्विधफलपुरुषार्थसिद्ध्यर्थं श्रीवीरसहस्रनामस्तोत्रमन्त्रजपं करिष्ये ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

शंभुः शिवो महादेवो नीलकण्ठो वृषध्वजः ।
दक्षाध्वरहरो दक्षः क्रूरदानवभञ्जनः ॥
कपर्दी कालविध्वंसी कपाली करुणार्णवः ।
शरणागतरक्षैकनिपुणो नीललोहितः ॥

End:

अकल्पितामरतरुरकामितसुकामधुक् ।
अचिन्तितमहाचिन्तामणिर्देवशिखामणिः ॥
एतत् सहस्रनामाङ्कं वीरभद्रस्य कीर्तनम् ।
एकैकाक्षरमहत्यं(!)महापातकनाशनम् ॥
. . . . . .
एककालं द्विकालं वा त्रिकालं नित्यमेव वा ।
यः पठेद् वीरभद्रस्य स्तोत्रमन्त्रमिदं नरः ।
इह भुक्त्वाखिलान् भोगानन्ते शिवपदं व्रजेत् ॥
रुद्रं रुद्रावतारं हुतवहनयनं चोर्ध्वकेशं सुदंष्ट्रं
भीमाङ्गं भीमरूपं खिणिखिणिरभसं ज्वालमालावृताङ्गम् ।
भूतप्रेताधिनाथं करकमलमहाखड्गपात्रे वहन्तं
वन्दे लोकैकवीरं त्रिभुवननमितं श्यामलं वीरभद्रम् ॥

Colophon:

इति श्रीपद्मपुराणे उपरिभागे दक्षाध्वरे श्रीमहाशरभनृसिंहयुद्धे नरहरिरूपनारायणप्रोक्तं श्रीवीरभद्रसहस्रनामस्तोत्रं संपूर्णम् ।

श्रीवीरभद्रसहस्रनाम विरोधिनामसंवत्सरद वैशाख १० यल्लु ।

1297

73246 वेदसारशिवसहस्रनामस्तोत्रम्

Beginning:

श्रीमत्पाद्मे पुराणे उत्तरखण्डे नवतितमेऽध्याये श्रीकृष्णमार्कण्डेयसंवादे ऋषीन् प्रति व्यास उवाच—

ततः सहस्रनामेदं पठितव्यं मुमुक्षुभिः ।
सर्वकार्यकरं पुण्यं महापातकनाशनम् ॥
सर्वगुह्यतमं दिव्यं सर्वलोकहितप्रदम् ।
मन्त्राणां परमं मन्त्रं भवदुःखपङ्कर्मिमत् ॥
वेदेषु सारभूतत्वाद् वेदसारमिहोच्यते ।
यतः पञ्चाक्षरो वेदः वेदान्तेषु प्रतिष्ठितः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सोऽयं पञ्चाक्षरो नाम्नि वेदसारे सहस्रके।
वर्तते तद् विविच्याथ निरूप्यन्ते हि तानि वै ॥
एकैकस्याक्षरस्यात्र नामानि द्विशतानि तु ।
एवं क्रमेण कथितमिदं दिव्यं सनातनम् ॥

अस्य श्रीवेदव्यास(?सार) शिवसहस्रनामस्तोत्रमहामन्त्रस्य . . . ।

नमः पराय देवाय शंकराय महात्मने + + + ॥

1300

72920 वेदसारशिवसहस्रनामस्तोत्रव्याख्या

Beginning:

ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानामनाधारमविक्रियम् ॥
. . . .
नत्वा गणेश्वरं स्कन्दं साम्बं सद्गुरुमेव च ।
वेदसारसहस्राख्याव्याख्या सम्यग् विरच्यते ॥
. . . .
एकदा मुनयः सर्वे द्वारकां द्रष्टुमागताः ।
वासुदेवं च सोत्कण्ठाः कृष्णदर्शनलालसाः ॥
ततः स भगवान् प्रीतः पूजां चक्रे यथाविधि ।
तेषामाशीस्ततो गृह्य बहुमानपुरःसरम् ॥
तैः पृष्टः कथयामास कुमारप्रभवं च यत् ।
चरितं भूमिभारघ्नं लोकानन्दकरं परम् ॥

कुमारप्रभवं तपःकरणशिवप्रसादपूर्वकं साम्बोत्पत्त्यादिप्रकारं भूमिभारघ्नं भूमिभाररूपकंसजरासन्धदुर्योधनादिसंहाराङ्कितम् अत एव लोकानन्दकरं चरितं पृष्टः सन् कथयामासेति संबन्धः । उक्तं च—

जातः कंसवधार्थाय भूभारोद्धरणाय च ।
कौरवाणां विनाशाय दैत्यानां निधनाय च ॥

इति ।

End:

सकलकल्याणदायिने सकलमङ्गलप्रदानशीलः सकलकल्याणदायी ।

अशुभानि निराचष्टे तनोति शुभसंततिम् ।
स्मृतिमात्रेण यः पुंसां ब्रह्म तन्मङ्गलं विदुः ॥

इति । शिवो नः सुमना भव . . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1301

73902 **वेदसारशिवसहस्रनामावलिः**

The date of the MS. and the name of the scribe:

विभवनामसंवत्सरं फाल्गुनबहुल ३. सोमवारं गुण्टूरु वेङ्कट्रामय्यकौमारुडु लक्ष्मीनरसय्य श्रीशिवार्पणंगा व्राशिन शिवसहस्रनामालु ।

1303

PM2883 **वेदसारशिवसहस्रनामावलिः**

Beginning:

अस्य श्रीवेदसाराख्यपरमदिव्यसहस्रनामावलीमहामन्त्रस्य श्रीभगवान् नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीसाम्बसदाशिवपरमात्मा देवता . . . . ओं पराय देवाय नमः। ओं शंकराय नमः।

Colophon:

इति श्रीवेदसारोक्तशिवसहस्रनामावली समाप्ता ।
शके १७६१ विकारिनामसंवत्सरे भाद्रपदशुद्ध १३ मन्दवासरे दिने लेखनं समाप्तम् ।

1304

75135 **शिवशतनामस्तोत्रम्**

Beginning:

पार्वत्युवाच—

देव देव महादेव संसारार्णवतारक ।
शिवलिङ्गार्चनं सर्वं श्रुतं तव मुखात् प्रभो ॥
इदानीं श्रोतुमिच्छामि शिवस्य शतनामकम् ।
यस्य स्मरणमात्रेण मुच्यते भवबन्धनात् ॥
सारात् सारं महादेव कथयस्व दयानिधे ।

श्रीसदाशिव उवाच—

श्रृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण संसारान्मुच्यते नरः ॥
. . . . . .
महाशून्यो महाकालो महाबलियुतः सदा ।
देहमध्ये महेशानि लिङ्गाकारेण वेष्टितः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

योगिनां योगसारश्च भोगिनां भोगदः स्मृतः ।
एककालं द्विकालं वा त्रिकालं वा पठेद् यदि ॥
. . . . . .
अपुत्रो लभते पुत्रं धनार्थी लभते धनम् ।
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात् ॥
बहु किं कथ्यते देवि शृणु मत्प्राणवल्लभे ।
असाध्यं साधयेत् सर्वं स्तवस्यास्य प्रसादतः ॥

Colophon:

इति महालिङ्गेश्वरतन्त्रे शिवपार्वतीसंवादे शिवस्य शतनामस्तोत्रं संपूर्णम् ।

1305

73530 शिवसहस्रनामस्तोत्रम्

Beginning:

ऋषय ऊचुः—

सुदर्शनाख्यं यच्चक्रं लब्धवांस्तत् कथं हरिः ।
महादेवाद् भगवतः सूत तद् वक्तुमर्हसि ॥

सूतः—

देवासुराणामभवत् संग्रामोऽद्भुतदर्शनः ।
देवा (वि)निर्जिता दैत्यैर्विष्णुं शरणमागताः ॥
. . . . . .

अस्य श्रीशिवसहस्रनामस्तोत्रमहामन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीरुद्रो महेश्वर-सदाशिवो देवता, . . .

भवः शिवो हरो रुद्रः पुष्कलो मुद्गलो बलः ।
अग्रगण्यः सदाचारः शर्वः शंभुर्महेश्वरः ॥

End:

धुर्योऽग्रधुर्यो धात्रीशः शाकल्यः शार्वरीपतिः ।
परमार्थगुरुर्व्याप्तः शुचिराश्रितवत्सलः ॥
रसो रसज्ञः सारज्ञः सर्वतत्त्वावलम्बनः ।

Scribal remark:

शिवपूजनरसंभट्टु व्राशिन शिवसहस्रनामस्तोत्रपुस्तकम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1308

67076 शिवसहस्रनामस्तोत्रम्

Beginning:

ऋषय ऊचुः—

सूत वेदार्थतत्त्वज्ञ शिवध्यानपरायण ।
मुक्त्यु(पायं वदा)स्मभ्यं कृपालो मुनिसत्तम ॥
कः सेव्यः सर्वदेवेषु को वा जप्यो मनुः सदा ।
स्थातव्यं कुत्र वा नित्यं किं वा सर्वार्थसाधकम् ॥
. . . . . .

अस्य श्रीहिरण्यबाहुरित्यादिनामावलीस्तोत्रमहामन्त्रस्य शंभुर्ऋषिः, अनुष्टुप् छन्दः, शिवो देवता । . . .

हिरण्यबाहुः सेनानीर्दिक्पतिस्तरुराड्ढरः ।
हरिकेशः पशुपतिर्महान् सस्पिञ्जरोऽमृतः ॥

End:

महेश्वरो महादेवः परब्रह्मा सदाशिवः ।
एवमेतानि नामानि मुख्यानि मम षण्मुख ॥
. . . . . .
सुभगा जननी तस्य तस्यैव कुलमुत्तमम् ।
तस्यैव जन्म सफलं यस्य भक्तिः सदाशिवे ॥
ये शंभुं सुरसत्तमं सुरगणैराराध्यमीशं विभुं
शैलाधीशसुतासमेतममलं संपूजयन्त्यादरात् ।
ते धन्याः शिवपादपूजनपरा धन्या न चान्ये जनाः
सत्यं सत्यमिहोच्यते मुनिवराः सत्यं पुनः सर्वदा ॥

Colophon:

इति श्रीशिवरहस्ये सप्तमांशे षण्मुखसदाशिवसंवादे शिवाष्टोत्तरसहस्रदिव्यनामस्तोत्रं संपूर्णम् ।

1311

PM2881 शिवसहस्रनामस्तोत्रम्

End:

ऋषिरुवाच—

तत्प्रसादादिदं सूत विश्वसन्तो न संशयः ।
धन्याः कृतास्त्वया नूनं सर्वथा श्रवणाद् वयम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीरुद्रयामले शिवरहस्ये सप्तमांशे कुमारशिवसंवादे शिवसहस्रनाम प्रथमोऽध्यायः।

1314

PM632 शिवसहस्रनामस्तोत्रम्

Beginning:

युधिष्ठिरः—

यैर्नामधेयैः स्तुतवान् दक्षो देवः प्रजापतिः।
वक्तुमर्हसि मे तात श्रोतुं श्रद्धा ममानघ ॥

भीष्मः—

श्रूयतां देवदेवस्य नामान्यद्भुतकर्मणः।
गूढव्रतस्य गुह्यानि पुराणानि च भारत ॥
नमस्ते देवदेवेश देवारिबलसूदन।
देवेन्द्रबलविष्टम्भ देवदानवपूजित ॥

End:

मृतश्च स्वर्गमाप्नोति तिर्यक्षु च न जायते।
इत्याह भगवान् व्यासः पराशरसुतः प्रभुः ॥

Colophon:

इति श्रीमोक्षधर्मेषु दक्षप्रोक्तशिवसहस्रनामस्तवसमाप्तिर्नाम नवाधिकशततमोऽध्यायः।

1322

73906 शिवसहस्रनामावलिः

End:

अनाकुलाय नमः। निर्वन्द्याय नमः। विद्याराशये नमः। अकृत्रिमाय नमः। प्रशान्तदृष्टये नमः। अक्षुद्राय नमः। श्रीविश्वेश्वराय नमः।

... पराभवनाम संवत्सर आश्विज शुद्ध ७ सोमवारं शुभमस्तु।

1327

73905 शिवसहस्रनामावलिः

End:

अर्थाय नमः। अनर्थाय नमः। महाकाशाय नमः। सर्वकार्यैकपण्डिताय नमः। निष्कलङ्काय नमः। कृतानन्दाय नमः। निर्व्याजाय नमः। श्रीसाम्बसदाशिवाय नमः।

विश्वावसु नाम संवत्सर गुण्टूरु सुब्बनारायणय्यकुमारुडु वेङ्कट्रामुडु व्राशिन शिवसहस्रनाम।

15

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1328

71985 शिवसहस्रनामावलिः

Beginning:

ओं पराय नमः । शिवाय नमः । परंधाम्ने नमः । परमेष्ठिने नमः । परात्पराय नमः। परात्मने नमः । परंदिशाय नमः । परमाय नमः । परविग्रहाय नमः ।

End:

सर्वर्तुपरिवर्तकाय नमः । सप्तजिह्वाय नमः । सहस्रशीर्ष्णे नमः । भूतभव्यभवन्नाथाय नमः । प्रभवाय नमः । भ्रान्तिनाशाय नमः । अर्थाय नमः । अनर्थाय नमः । महाकाशाय नमः । सर्वकार्येषु पण्डिताय नमः ।

1329

66043 शिवसहस्रनामावलिः

Beginning:

हिरण्यबाहवे नमः । सेनान्ये नमः । दिक्पतये नमः । तरुराजे नमः । हराय नमः । हरिकेशाय नमः । पशुपतये नमः । महते नमः । सस्पिञ्जराय नमः । मृडाय नमः ।

End:

लोकज्ञाय नमः । परमार्थात्मने नमः । ब्रह्मानन्दाश्रयाय नमः । विभवे नमः । महेश्वराय नमः । महादेवाय नमः । परब्रह्मणे नमः । सदाशिवाय नमः । श्रीसाम्बपरमेश्वराय नमः ।

1331

66040 शिवसहस्रनामावलिः

End:

मृगव्याधाय नमः । धर्मधाम्ने नमः । प्रच्छिन्नस्फटिकाय नमः । सर्वज्ञाय नमः ।

1339

73904 शिवाष्टोत्तरशतनामस्तोत्रम् (शिवाष्टोत्तरशतकल्पलतिका)

Beginning:

पार्वत्युवाच—

शरीरार्धमहं शंभोर्येन प्राप्स्यामि केशव ।
तदिदानीं समाचक्ष्व स्तोत्रं शीघ्रफलप्रदम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

विष्णुरुवाच—

शरीरार्धं महेशस्य प्राप्तमेव त्वया शिवे ।
तथापि पृच्छसे देवि ततो वात्सल्यभावतः ।
त्वया ततोऽहं वक्ष्यामि स्तोत्रमेकं शिवप्रदम् ॥

End:

धन्यः स एव लोकेंऽस्मिन् यस्य भक्तिः शिवे भवेत् ।
समाराध्य सदा साम्बं ब्रह्म विन्दति शाश्वतम् ॥
सकृद्वा पूजयेल्लिङ्गं यस्तु भक्तिसमन्वितः ।
कुलकोटिं समुद्धृत्य स याति परमां गतिम् ॥
बिल्वपत्रैः प्रशस्तैर्वा पुष्पैश्च तुलसीदलैः ।
तिलाक्षतैर्यजेत्तैभिर्जीवन्मुक्तिर्न संशयः ॥
नाम्नामेषां पशुपतेरेकमेवापवर्गदम् ।
अन्येषां चैव शिष्टानां फलं वक्तुं क ईशते ॥

Colophon:

इति श्रीस्कान्दे पुराणे शंकरसंहितायां पार्वतीविष्णुसंवादे शिवाष्टोत्तरशतकल्पलतिका संपूर्णा ।

1340

71548 शिवाष्टोत्तरशतनामस्तोत्रम्

Beginning:

शरीरार्धं कथं शंभोर्येन प्राप्स्यामि केशव ।
तदिदानीं (प्रवक्ष्यामि? समाचक्ष्व) स्तोत्रं शीघ्रफलप्रदम् ॥

नारायण उवाच—

अस्ति गुह्यतमं गौरि नाम्नामष्टोत्तरं शतम् ।
(शंभो)रहं प्रवक्ष्यामि पठतां शीघ्रकामदम् ॥

अस्य श्रीशिवाष्टोत्तरशतदिव्यनामामृतस्तोत्रमहामन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीसदाशिवो देवता, ओं बीजम्, गौरी शक्तिः, नारायणेति कीलकम्, सदाशिवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

नाम्नामेषां पशुपतेरेकमेवापवर्गदम् ।
अन्येषां चैव शिष्टानां फलं वक्तुं न शक्यते ॥

Colophon:

इति शिवरहस्ये गौरीनारायणसंवादे शिवाष्टोत्तरशतनामस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1341

75135 **शिवाष्टोत्तरशतनामस्तोत्रम्**

Beginning:

अस्य श्रीशिवाष्टोत्तरशतनामस्तोत्रस्य, नारायण ऋषिः, पङ्क्तिश्छन्दः, श्रीसदाशिवो देवता, नं बीजम्, मं शक्तिः, श्रीसदाशिवस्य चरणारविन्दप्रीतये विनियोगः, ध्यानम् . . .

End:

एतदष्टोत्तरशतं नाम्नामाम्नायसंमितम् ।
. . . . . .
अन्येषां सावशेषाणां फलं वक्तुं क ईशते ॥

Colophon:

इति श्रीशिवरहस्ये गौरीनारायणसंवादे शिवस्याष्टोत्तरशतदिव्यनामस्तोत्रं संपूर्णम् ।

1343

73243 **शिवाष्टोत्तरशतनामस्तोत्रम्**

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
तत् त्वयैव ध्रुवं दत्तं सर्वकल्याणसंश्रया(त्) ।
रत्नराशेर्मनोज्ञानि रत्नानीव मया पुरा ॥
वेदराशेर्गृहीतानि शिवनामानि शोभने ।
. . . . . .
अस्ति गुह्यतमं देवि नाम्नामष्टोत्तरं शतम् ।
शंभोरहं प्रवक्ष्यामि पठतां शीघ्रकामदम् ॥

End:

इमानि दिव्यनामानि जप्यन्ते सर्वदा मया ।
नामकल्पलतेयं मे सर्वाभीष्टप्रदायिनी ॥
. . . . . .
शिवमाराधयन्ती सा गिरिजापि ततः शिवम् ।
संप्राप शिवरूपा सा भूयः प्राप्तशिवापि सा ॥

1355

73904 **शिवाष्टोत्तरशतनामव्याख्या शिवनामकल्पलतिकालवालः**

The following verses belonging to the comm. *Sudhāpūra* of Veṅkaṭapati (see MT. 4278) are found in the MS. which contains only the incomplete text of Bhāskararāya's work (up to 49th verse) without comm. thereon.

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वेदान्तगीतविभवं पुरुषं पुराणमात्मानमाद्यमनघं करुणावतीर्णम् ।
यस्यावलम्बनवशाद् विलयं प्रयाति विघ्नान्धकारनिचयस्तमहं भजामि ॥
आनन्दवनजानन्दलहरीजालनिर्भरः ।
मोक्षैकपदवीनाथः श्रीनाथोऽस्तु गतिर्मम ॥
अद्वैताब्धिगलत्सुधारसयुतैर्द्वैतप्रभावोद्भवैः
पद्यैः सूक्तिनिरुक्तिवाक्यरचनैर्न्यायामृताप्लावितैः ।
विद्याबोधनतः प्रसिद्धविभवान् विद्वत्समाजोल्लसद्-
गोपालेन्द्रयतीन्द्रपूज्यचरणान् श्रीबालपूर्वान् भजे ॥
मुक्तापीतपयोदमौक्तिकजपावर्णैर्मुखैः पञ्चभिः
त्र्यक्षैरञ्चितमिन्दुकुन्दधवलच्छायं निजाङ्गावृतम् ।
घण्टाशूलकृपाणपाशहुतभुक्टङ्काहिवज्राङ्कुशा-
भीतिद्योतकराब्जमण्डिततनुं वन्दे मुदे शंकरम् ॥
स्कान्दाद्रौ शिवनामकल्पलतिकां रूढां पुमर्थैः फलै-
रानम्रामुपलभ्य भास्करमखी रत्नालवालं व्यधात् ।
वृत्तानां शतकं ससप्तदशकं यत्राभितस्तत्सुधा-
सारैः पूरयति स्म वेङ्कटपतिः काशीपतिप्रीतये ॥
क्वाहं मूढः क्व शिवमहिमा भारतीभावदूरः
क्वाहं शंभोः परमधुरिमोद्दामनामस्तवेऽर्हः ।
स्वामिन् भूयो विषमविषया वैखरीयं मदीये-
त्यारम्भेऽस्मिन्नवनगतिरस्त्वद्रिकन्यैव धन्या ॥

. . . . . .

ओं शिवाय नमः ।

प्रकृत्या नैर्मल्यादमलगुणयोगादपि शमा-
जगत्याधारत्वाद् भजदमृतदानाच्च भवतः ।
बलादिच्छाशक्तेः प्रथितपुरि भद्रश्रव इति
प्रतीतस्त्वं लिङ्गे त्रिपुरहर तस्मादसि शिवः ॥

शिखरिणीवृत्तम् ।

End:

ओं हविषे नमः ।

दुग्धमात्रस्य कुहरे यथा घृतं प्राणिमात्रस्य दहरे तथा भवान् ।
चेतसा संमथित एव लभ्यते दूयमानं त्वमखिलं ततो हविः ॥

दुग्धाख्यं वृत्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1383

67061 सुन्दरेश्वराष्टोत्तरशतनामावलिः

Beginning:

सुन्दरेशाय नमः। मुराराध्याय नमः। शफराक्षीमनोहराय नमः। कदम्बगहनान्तस्थाय नमः। कर्पूरनिभविग्रहाय नमः। देवाय नमः। देवेन्द्रदोषघ्नाय नमः।

End:

शिवाय नमः। अक्षराय नमः। गिरीशाय नमः। गिरिजानाथाय नमः। परस्थाय नमः। परमेश्वराय नमः। श्रीसुन्दरेश्वराय नमः।

Colophon:

श्रीसुन्दरेश्वराष्टोत्तरशतं संपूर्णम्'

VIṢṆU-STOTRA-S

1404

TR753 अनुस्मृतिव्याख्या

Beginning:

नारायणं हृदि ध्यात्वा जगजन्मादिकारणम्।
विवृणोमि मुमुक्षूणां बोधायाहमनुस्मृतिम्॥

इह खलु रजस्तमस्तिमितिमिंगिलघूर्णमानमायामहार्णवमग्नजनानाम् उद्दिधीर्षया समवतीर्णः साक्षान्नारायणो भगवान् बादरायणः सकलचातुर्वर्ण्यचातुराश्रम्यधर्ममणिगर्भां चतुर्वर्गफलप्रदां शतसहस्रसंख्यापरिमितां महाभारतसंहितां प्रणिनाय। . . . मोक्षधर्मेषु षट्त्रिंशाध्यायमनुस्मृतिं व्याख्यास्यामि। पितामह महाप्राज्ञेति। भीष्मं प्रति युधिष्ठिरप्रश्नः। हे महाप्राज्ञ! तत्त्वदर्शिभिः यथार्थज्ञानिभिः प्रयाणकाले प्राणवियोगकाले किं जप्यं किमनुस्मरेदित्यर्थः।

End:

इमामिति। यो वा भक्त इमां प्रतिपादितां रहस्याम् उपदेश्यार्थसंपन्नां परमां श्रेष्ठाम् अनुस्मृतिम् अधीत्य नैष्ठिकीं दृढतरां बुद्धिं ज्ञानं लभते सः ज्ञानानन्तरं च दुःखानि द्वन्द्वदुःखानि विहाय संकटान् एषणादिजनितसंकटान् (ये?)विमुच्य परित्यज्य वीतरागः सन् गतकामव्यथादिः सन् इमां महीं विचरेदित्यर्थः।

यथा हृद्देशसदनः प्रेरयामास केशवः।
तथैवैषा मया व्याख्या कल्पिता न स्वतन्त्रतः॥

Colophon:

इति श्रीमद्भारद्वाजगोत्रपवित्रेण सुब्रह्मण्यविदुषा विरचिता अनुस्मृतिव्याख्या समाप्ता।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1421

67625 आपदुद्धारक-(राम-)स्तोत्रम्

Beginning:

श्रीशिव:—

श्रृणु वक्ष्यामि गिरिजे आपदुद्धारणं मनुम् ।
पूर्वं देवासुरे युद्धे कुम्भजेन प्रचोदितम् ॥ १ ॥
आपदुद्धारकं नाम रामस्याद्भुतविग्रहम् ।
तस्य ध्यानं प्रवक्ष्यामि श्रृणु तेऽद्भुतकर्मणि ॥ २ ॥
गुह्याद्गुह्यतमं ध्यानं मम चाभीष्टसिद्धिदम् ।
श्रृण्वतां पातकहरमज्ञानतिमिरापहम् ॥ ३ ॥
अयोध्यानगरे रम्ये चित्रसौवर्णमण्टपे ।
मन्दारपुष्पैराबद्धे विताने तोरणान्विते ॥ ४ ॥

End:

सर्वान् कामानवाप्नोति (श्री)रामसायुज्यमाप्नुयात् ।
एवं ते कथितं देवि रहस्यमतिदुर्लभम् ।
गुह्याद्गुह्यतमं लोके सर्वत्र विजयी भवेत् ॥

Colophon:

इति उमामहेश्वरसंवादे अगस्त्यप्रोक्त-आपदुद्धारकं संपूर्णम् ।

सिद्धार्थ्यब्दे ज्येष्ठमासे असिते च तृतीयके ।
(श्री)वैकुण्ठरामनामार्य: लेखनं पूरयेद्बुध: ॥

1422

73915 आपन्निवारणस्तोत्रम् (आपदुद्धारकस्तोत्रम्)

Beginning:

नम: कोदण्डहस्ताय संधीकृतशराय च ।
दण्डिताखिलदैत्याय रामायापन्निवारिणे ॥
नम: शुद्धान्तरङ्गाय तारकब्रह्ममूर्तये ।
संसारबन्धमोक्षाय रामायापन्निवारिणे ॥

End:

नम: सीतासमेताय साकेतपुरवासिने ।
कृतपट्टाभिषिकाय रामायापन्निवारिणे ॥
प्रात:काले पठेन्नित्यं यात्राकाले विशेषत: ।
भयानि तस्य नश्यन्ति सर्वत्र विजयी भवेत् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

आपन्निवारणस्तोत्रं संपूर्णम् ।

1425

72299 आपन्निवारणस्तोत्रम् (आपदुद्धारकस्तोत्रम्)

Beginning:

मूले कल्पद्रुमाद्याखिलमणिविलसद्रत्नसिंहासनस्थं
कोदण्डद्वन्द्व(पा? बा)णोल्लसितकरयुगेनान्वितं लक्ष्मणेन ।
वामाङ्कन्यस्तसीताभरतधृतमहामौक्तिकच्छत्रकान्ति
शत्रुघ्नं चामराभ्यां विलसितमनिशं रामचन्द्रं भजेऽहम् ॥
नमः काकुत्स्थवंशाय कौसल्यातनयाय च ।
सूर्यवंशप्रदीपाय रामायापन्निवारिणे ॥

1432

73917 आर्तत्राणपरायणस्तोत्रम्

End:

योऽदाशीत् भुवनत्रयं मघवते पत्ये सुराणां बले-
रादायार्तिमतेऽदितेरपि(नयः? मनः)पूर्त्यै सुरेन्द्रानुजः ।
योऽरक्षीदतिदीनपाण्डुतनयान् युद्धेन भीतिं गता-
नार्तत्राणपरायणः स भगवान् नारायणो मे गतिः ॥

1438

73243 आर्तत्राणपरायणस्तोत्रम्

Beginning:

यौ तौ शङ्खकपालभूषितकरौ मुक्तास्थिमालाधरौ
देवौ द्वारवतीश्मशाननिलयौ नागारिगोवाहनौ ।
द्वित्र्यक्षौ बलिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ
पापं मे हरतां जनार्दनहरौ श्रीवत्सगङ्गाधरौ ॥
यो धर्मराजरचितां ललितप्रबद्धां नामावलीं सकलकल्मषबीजहन्त्रीम् ।
धीरो हि कौस्तुभभृतः शशिभूषणस्य नित्यं जपन् स्तनरसं न पिबेत् स मातुः ॥

End:

हरे हरे मे हर पातकानि हरे हरे मे कुरु कौतुकानि ।
हरे हरे मे त्वयि देहि भक्तिं हरे हरे मे सततं प्रसीद ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कर्म त्यजेम यदि नूनमधः पतेम यद्याचरेम न कदापि भवं तरेम।
कर्म त्यजेदिति चरेदिति च प्रवृत्ता भावेन केन निगमा इति न प्रतीमः ॥

1450

70871 कृपासागरस्तवः

Beginning:

प्रपद्ये श्रीनृसिंहस्य चरणाम्बुरुहद्वयम् ।
अपारघोरसंसारतारसारतरप्लवम् ॥
प्रप(न्न)जनिरक्षादिप्रपञ्चनकुतूहलम् ।
प्रपद्ये प्रणमद्वृन्दनन्दनं नन्दनन्दनम् ॥
श्रीमच्छ्रीनिधियोगीन्द्रश्रीरङ्गेशयतीश्वरौ।
प्रणम्य शिरसा कुर्वे श्रीकृपासागरस्तवम् ॥

End:

दयया विराजदयया दयाम्बुधे यदि मामशेषहृदि माधवोज्ज्वल।
अवलोकसे हि भवलोपकारकं त्रिदिवेश्वरेण .... ॥

1451

TR809 कृष्णचारित्रमञ्जरी

This Stotra is printed in the *Stotramañjarī*, pp. 197-204 and also published separately by Parimala Publishing House, Nanjangudu (Mysore State).

Beginning:

विष्णुर्ब्रह्मादिदेवैः क्षितिभरहरणे प्रार्थितः प्रादुरासीद्
देवक्यां नन्दनन्दी शिशुवधविहितां पूतनां यो जघान ।
उत्थानौत्सुक्यकाले रथचरणगतं चासुरं पादघातै-
श्चक्रावर्तं च मात्रा गुरुरिति निहितो भूतले सोऽवतान्माम् ॥ १ ॥

End:

रक्षन् लोकान् समस्तान् निजजननयनानन्दकारी निरस्ता-
वद्यः सौख्यैकमूर्तिः सुरतरुकुसुमैः कीर्यमाणोऽमरेन्द्रैः ।
सिद्धैर्गन्धर्वपूर्वैर्जयजयवचनैः स्तूयमानोऽत्र कृष्णः
स्त्रीभिः पुत्रैश्च पौत्रैः स जयति भगवान् सर्वसंपत्समृद्धः ॥ २८ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इति श्रीकृष्णचारित्रमञ्जरी लेशतः कृता ।
राघवेन्द्रेण यतिना भूयात् कृष्णप्रसाददा ॥

Colophon:

इति श्रीकृष्णचारित्रमञ्जरी समाप्ता ।

1460

PM2611 कृष्णमङ्गलम्

Beginning:

मङ्गलं यादवेन्द्राय महनीयगुणात्मने ।
वसुदेवकुमाराय वासुदेवाय मङ्गलम् ॥
नीलाम्बुदशरीराय नित्याय शुभदाय च ।
नलकूबरमणिग्रीवशापमोक्षाय मङ्गलम् ॥

End:

मङ्गलं भगवन् कृष्ण मङ्गलं यदुभूषण ।
मङ्गलं गोपिकानाथ मङ्गलं श्यामसुन्दर ॥
इदं लक्ष्मीनृसिंहेन कथितं श्रद्धया हरे ।
देवदेव जगन्नाथ स्वीकुरुष्व श्रियः पते ॥

1462

73438 कृष्णमङ्गलाशासनम्

Beginning:

अस्तु गोपालबालाय नित्याय परमात्मने ।
भक्तवात्सल्यनिधये नित्यभोग्याय मङ्गलम् ॥
चित्तदङ्मोहनाङ्गाय श्रीमते नन्दसूनवे ।
रुक्मिणीसत्यभामाभ्यां नित्ययुक्ताय मङ्गलम् ॥

End:

सह गोपैर्गवां पश्चात् सवेणुध्वनिसंभ्रमम् ।
आपूर्य वीथिमानन्दादागतायास्तु मङ्गलम् ॥
श्रीवादिभीकरार्येण श्रीसौम्यवरयोगिनः ।
लब्धाय गोपबालाय नित्यश्री(र्नि)त्यमङ्गलम् ॥

Colophon:

प्रतिवादिभयंकरमण्णार् तिरुप्पेरनार् अप्पय्यङ्गार् अरुळिचेयूत मङ्गलाशासनम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1465

PM2611 कृष्णशरणाष्टकम्

Beginning:

इन्दीवरदलश्यामः पुण्डरीकनिभेक्षणः ।
धृतचक्रधनुःशार्ङ्गः (श्री)कृष्ण एव गतिर्मम ॥
दुष्टकष्टनिकृष्टेन कौरवेणापहारिणा(?) ।
पाञ्चाल्या वस्त्रदाता च कृष्ण एव गतिर्मम ॥

End:

गोपीनामुत्तरीयैस्तु कल्पितासनमास्थितः ।
आत्मारामः पूर्णकामः कृष्ण एव गतिर्मम ॥
अज्ञानभवतापेन अन्धेन तमसावृतम् ।
लक्ष्मीनरसिंहं दीनं कृष्णोद्धारय मादरात् ॥

1467

73483 कृष्णसंस्मरणम्

Beginning:

श्रीस्तनस्तबकन्यस्तकस्तूर्यध्यस्तकौस्तुभम् ।
निस्तुलोरःस्थलं शस्तं वस्तु स्वस्तिकृदस्तु वः ॥ १ ॥
लक्ष्मीनृसिंहकरुणारसलब्धसर्वतन्त्रस्वतन्त्रकवितार्किकसिंहलक्ष्मा ।
श्रीशैलबुक्कनगरान्वयवेङ्कटार्यः श्रीकृष्णसंस्मरणमातनुते मिषेण ॥ २ ॥

End:

सकलभुवनमध्ये सर्वदा सर्वदा ते न किमपि तुलनार्हं वस्तु सर्वाङ्गकेषु ।
इति मधुमथनेन श्लाघिता नाभिमेने तिलकमलिकदत्तं चन्द्रिकासेविनी सा ॥ ८२ ॥
अयि दयित बलं ते दर्शयस्वेति गाढं स्मयवति भुजयन्त्रे सत्यया यन्त्रितस्य ।
अशकदथ मुरारेर्मोचनाय क्षणेन (स्तनघनपुलकाग्रं गाढसंश्लेष एव) ॥ ८३ ॥

1476

72293 कृष्णस्तोत्रम्

Beginning:

कृष्ण त्वद्गुणबृन्दवर्णनपरा दृष्ट्वा श्रुतीनां गणा
यैर्निर्लज्जमफाणि वाङ्मनसयोर्नो गोचरस्त्वं ततः ।
ध्यानं संस्तवमर्चनं प्रविनतिं कर्तुं न शक्तोऽस्म्यहं
तस्मादेव कृपां कुरुष्व भगवन्नापन्नबन्धो मयि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

मूढान् दुर्धनगर्वितान् प्रतिदिनं धिक्कुर्वतः सज्जनान्
स्तुत्वाभीक्ष्णमहो वृथैव रसने श्रान्तासि मर्त्याधमान् ।
लक्ष्मीनायकमब्जभूहरमुखैः संसेविताङ्घ्रिद्वयं
कृष्णं संस्तुहि धन्यतां गमय मां किं त्वस्त्यसाध्यं तव ॥

1477

67160 **कृष्णस्तोत्रम्**

Beginning:

. . . .
दधिस्फीतभाण्डं तदीयान्तरस्थं विडालाय गव्यं दिशन्तं समीडे ॥ ६ ॥
समाकृष्य चोलूखलं दामबद्धं स्वकट्यां जनन्यैव गत्वा बहिष्ठम् ।
सुभङ्क्त्वार्जुनोर्वीरुहद्वन्द्वमग्रे हसन्तं मुदा वासुदेवं भजेऽहम् ॥ ७ ॥

End:

समीकृत्य कुब्जां पथि प्राप्तवस्त्रस्रगादी महासुन्दराकारदेहौ ।
पुरस्त्रीभिरालोकितौ रामकृष्णौ महाक्लेशशान्त्यै . . . . . . ॥ १८ ॥

1478

66143 **कृष्णस्तोत्रम्**

Beginning:

अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥
वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥

End:

ध्यानगम्याय पूर्णाय कृष्णाय हरये नमः ।
सप्तजन्मकृतं पापं बाल्ययौवनवार्धिकैः ।
तत् सर्वं क्षीणमाप्नोति त्वत्प्रसादाज्जनार्दन ॥

1487

74287 **कृष्णाष्टकम्**

The scribe adds the following two verses at the beginning:

कुरङ्गमातङ्गपतङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्याद् यथैव ते पञ्चभिरेव पञ्च ॥
कृष्ण त्वदीय + + + स्मरणं कुतस्ते ॥ (see मुकुन्दमाला)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1493

PM2611 कृष्णाष्टकम्

Beginning:

नीलजीमूतसंकाशं पद्मपत्रायतेक्षणम् ।
नित्यानन्दकरं रामं कृष्णं वन्दे जगद्गुरुम् ॥
बालक्रीडनकं कृष्णं लोकक्रीडनकं विभुम् ।
नारायणं नरसखं कृष्णं वन्दे जगद्गुरुम् ॥

End:

गोपगोपीसमुल्लासं यशोदानन्दवर्धनम् ।
गोवर्धनाचलोद्धारं कृष्णं वन्दे जगद्गुरुम् ।
कृष्णाष्टकमिदं लक्ष्मीनृसिंहेन प्रकीर्तितम् ।
श्रोतव्य: कीर्तितव्यश्च नर: पापाद् विमुच्यते ॥ (?)

1495

77644 कृष्णाष्टकम् (कृष्णखण्ड:)

Beginning:

वाग्दोषकर्मचयचिन्तितमायपाशं (?) तापत्रयं कनकतस्करवेदवाह्यम् ।
अज्ञानकालभयदं विषयाविकारं कृष्णं स्मरामि सततं दुरितानिखण्डम्(?) ॥

End:

कामान्धकारगुरुतल्पग(प ? म)द्यपा(नि ? न) गोब्रह्महत्यबहुकण्टकपापदग्धम् ।
सर्पादिभीतिविषकर्कटवृश्चिकादि कृष्णं स्मरामि सततं दुरितानिखण्डम्(?) ॥
कृष्णाष्टकमिदं पुण्यं य: पठेत् सतत नर: ।
सर्वपापविनिर्मुक्तो विष्णो: सायुज्यमाप्नुयात् ॥

Colophon:

कृष्णखण्डं समाप्तम् ।

1496

77644 कोदण्डपाणिस्तोत्रम्

Beginning:

साकेतपुर्यां निवसन् जनानामानन्दयन् कौशिकयज्ञपालाम्(ल:) ।
पादेन पुण्यां कलयन्नहल्यां कोदण्डपाणि: कुलदैवतं न: ॥
चापं च भङ्क्त्वा वसुधातनूजां जायामवाप्याथ भृगो: कुमारम् ।
निरोधयन् प्राप्तनिजाधिवास: कोदण्डपाणि: कुलदैवतं न: ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

संशोधयन् भूमिसुतां हुताशात् संजीवयन् सर्वहरीनयोध्याम् ।
प्रविश्य चासादितपट्टवन्धः कोदण्डपाणिः कुलदैवतं नः ॥

Colophon:

इति कोदण्डपाणिस्तोत्रं संपूर्णम् ।

1503

73954 क्षमाषोडशी सव्याख्या

Beginning:

वन्दे गुरुं दयार्धीशं वात्स्यं गुरुगुणाकरम् ।
यत्सूक्तिर्यतिराजोक्तिकेकिन्याः कालकालिमा ॥
श्रुतप्रकाशिकाचार्यसुतेन रचिता स्तुतिः ।
श्रीरङ्गेशक्षमालम्ब्या गम्भीरार्था विविच्यते ॥

आदौ मङ्गलमाचरति—श्रीरङ्गेश इति । श्रीरङ्गेश + + + क्षेमाय सर्वात्मनाम् । हे रङ्गेश ! श्रीरङ्गाख्यदिव्यधामपते । अनेन सर्वसुलभत्वं व्यज्यते । यया श्रुत्या प्रसिद्धया क्षान्त्या सहितस्त्वं जगतां महदादिपृथिव्यन्तानां ब्रह्मादिस्थावरान्तानां च कार्याणां सृष्टिप्रतिष्ठाक्षयान् सर्गस्थितिलयान् करोषि ।

End:

स्तोत्रार्थस्य सांप्रदायिकत्वं प्रबन्धकरणस्य सप्रयोजनत्वं सूचयन् समापयति—

श्रीमान् कूरान्ववाये कलशजलनिधौ कौस्तुभाभोऽवतीर्णः
श्रीवेदव्यासभट्टारकतनयवरो रङ्गराजस्य हृद्यः ।
वेदाचार्याग्र्यनामा विदितगुणगणो रङ्गिणः स्तोत्रमेत-
च्चक्रे नित्याभिजप्यं सकलतनुभृतां सर्वपा(पा)पनुत्यै ॥

. . . .

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

Colophon:

सर्वजिन्नामसंवत्सरे मेषमासि क्षमाषोडशोऽयं ग्रन्थः समाप्तः ।

1505

66056 गजराजवरदस्तोत्रम्

Beginning:

हृदये अष्टदलपद्मकर्णिकामध्यविद्युत्स्फाटिकमयशतस्तम्भहैमचतुरश्रमण्डपे आदिकूर्मरथाष्टदिग्दन्तिमस्तकोपरि विराजमाननवरत्नखचितचामीकरचारुसिंहासने समासीनं नवनीरदमध्यविद्युल्लतेवोभयपार्श्वगतश्रीभूमिसमेतं . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

अभीष्टफलदायिनं अनुपमाद्यन्तहिरण्मयशरीरम् अप्रमेयमनिर्वचनीयम् अतीतार्णवसेनासमेतम् असंख्याण्डनायकम् आदिपुरुषोत्तमं चिन्तितार्थफलप्रदं श्रीम(द्)गजराजवरदं चेतसि सदा भावयामि।

1520

67752 गद्यत्रयम्

Adds the following two verses after the colophon:

रामानुजार्यमुनये नम उक्तिमात्रं कामातुरोऽपि कुमतिः कलयन्नभीक्ष्णम्।
यामामनन्ति यमिनां भगवज्जनानां तामेव विन्दति गतिं तमसः परस्तात्॥
वन्दे वेदान्तकर्पूरचामीकरकरण्डकम्।
रामानुजार्यमार्याणां चूडामणिमहर्निशम्॥

1541

PM2333 गोकुलेशाष्टकम्

Beginning:

व्रजराज्ञीमहाभाग्यकल्पपादपसत्फलम्।
गोपिकानेत्रपीयूषं गोकुलेशं भजेऽनिशम्॥
गोवर्धनाद्रिशिखरे क्रीडन्तं गोगणावृतम्।
गोपालाश्वासनकरं गोकुलेशं भजेऽनिशम्॥

End:

गोकुलाष्टकमेतत् तु यः पठेत् तदनन्यभाक्।
गोकुले सच्चिदानन्दे रघुनाथस्य वाञ्छितम्॥

Colophon:

इति श्रीरघुनाथकृतौ गोकुलेशाष्टकं संपूर्णम्।

1544

70787 गोपालविंशतिः

Adds the following verse at the end:

रविसदृशतनुः श्रीवेङ्कटाचार्यपादः करकलितपवित्रः स्वोत्तरीयस्वभावः।
सरसिजमणिमालामूर्ध्वपुण्ड्रं दधानो मनसि मम विभाते संततं संनिधत्ताम्॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1549

69422 गोपालशतकम्

Beginning:

श्रीशश्रीपृतनाधिपाननुकलं सेवे शठारिं भजे
नाथाब्जाम्बकरामयामुनमहापूर्णानजस्रं भजे ।
सम्यग् देशिकपङ्क्तिहारतरलं रामानुजं संश्रये
यत्कारुण्यसुखाप्तिसर्वधिषणैरार्यैरहं वीक्षितः ॥
उद्यद्गोवेषभूमिव्यसनपरिहृतिप्राप्तलोकेशशंभु-
स्वर्गस्वाम्यादिदेवप्रणतिनुतिततिप्राप्तवाग्वृत्तिरीशः ।
देवः क्षीराब्धिशायी जगदवनपरः स्वीयमङ्घ्रेन साकं
देवक्याः पुत्रतां यः समभजदवनेर्भारहान्यै भजे तम् ॥
अष्टम्यां कृष्णपक्षे नभसि बुधदिने प्रोच्यमाने शशाङ्के
प्राजापत्ये शुभर्क्षे वृषभमुपगते देवकीजातमीशम् ।
कृष्णं वन्दे स्वभूषोपलतरणिहतध्वान्तभास्वद्गृहान्त-
र्देदीप्यच्छङ्खचक्रोज्ज्वलितशुभतनुं स्तूयमानं पितृभ्याम् ॥

End:

प्राप्ते हेतिगणे विमुक्तिपदवीं भित्वा रवेर्मण्डलं
पुर्यामज्जनमम्बुधौ स्वगमनं स्वानां परिज्ञाप्य यः ।
लुब्धोत्सृष्टशराहताङ्घ्रिकमलः स्वः प्रापयन् तं (क्षणात्)
प्रायाद्धाम निजं हृतावनिभरं नारायणं तं भजे ॥
श्रीवासुदेवचरितानि मलापहानि पुण्यानि मुक्तिफलदान्यतिमानुषाणि ।
यो वेत्ति चिन्तयति वक्ति शृणोति नित्यं प्राप्नोति मुक्तिमचिरात् स मुकुन्ददृष्टः ॥

Colophon:

अशोकरघुनाथाचार्येण विरचितगोपालशतकं संपूर्णम् ।

1552

73438 गोविन्दराजप्रपत्तिः

Beginning:

यश्चैकशैलनिकटे कमलापुरीशगोविन्दराजपदयोरकरोत् प्रपत्तिम् ।
तं वादिभीकरगुरोश्चरणं प्रपद्ये पात्रं गुरुं वरवरं परमं गुरूणाम् ॥
श्रीमन् निदान जगतां निखिलाण्डजातनिर्वाहशक्तिमुख दिव्यगुणैकतान ।
अत्यन्तभोग्यनतदोष निरस्तदोष गोविन्दराज चरणौ शरणं प्रपद्ये ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

अस्मद्गुरुप्रभृतिभिः कमलावसानैरादर्शितौ करुणया मम देशिकेन्द्रैः ।
सत्त्वोत्तरैः सकलजीवदयापरैस्तैः गोविन्दराज चरणौ शरणं प्रपद्ये ॥
अस्मत्पितामहमशेषगुणाभिराममाचार्यरत्नमयि वादिभयंकरार्यम् ।
गोवर्धनाद्रिधृतिधारित गोप वीक्ष्य गोविन्दराज मम दुर्लपितं क्षमस्व ॥

1553

73438 गोविन्दराजमङ्गलाशासनम्

Beginning:

अस्तु गोविन्दराजाय कल्याणगुणसिन्धवे ।
बन्धवे सर्वलोकानां श्रियः कान्ताय मङ्गलम् ॥
चित्रकूटनिवासाय चित्रानन्तविभूतये ।
श्रीमद्गोविन्दराजाय श्रीवत्साङ्काय मङ्गलम् ॥

End:

दृग्भ्यां दीर्घानुकम्पाभ्यामस्मद्गुरुपरंपराम् ।
प्रेम्णा गोविन्दराजाय प्रेक्षमा(णा)य मङ्गलम् ॥
गोविन्दराजपादाब्जदिव्यैश्वर्याभिवृद्धये ।
वक्तारं मङ्गलाशास्तिं वादिभीकृद्गुरुं भजे ॥

1554

77644 गोविन्दाष्टकम्

Beginning:

हा कृष्ण विष्णो मधुकैटभारे भक्तानुकम्पिन् भगवन् मुरारे ।
त्रायस्व नः केशव लोकनाथ गोविन्द दामोदर माधवेति ॥

End:

प्रवालशोभारुणदीर्घकेशा वाताम्बुपर्णाशनजीर्णदेहाः ।
मूले तरूणां मुनयः पठन्ति गोविन्द दामोदर माधवेति ॥

Colophon:

इति गोविन्दाष्टकं संपूर्णम् ।

1558

73915 गोविन्दाष्टकम्

Adds the following stanzas at the beginning:

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अन्तर्हृदि नियन्तारं बहिश्च गुरुरूपिणम् ।
उभयत्रापि कृष्णाख्यं तं वन्दे देवकीसुतम् ॥
सततसरभसभ(? च)रणनिपतितसंघृणन्मणिनूपुरं
प्रकटकटितटघटितकलरवकिङ्किणीमुखरारवम् ।
विविधपतयुगचरणनवनवगीतनृत्यमनोहरं
स्मरत कथ(य)त नमत भजत (च) नन्दगोपकुमारकम् ॥

Adds the following verse at the end:

गोकोटिदानं ग्रहणेषु काले प्रयागगङ्गायुतकल्पवासि(? सः) ।
यज्ञायुतं मेरुसुवर्णदानं गोविन्दकीर्त्या न समं (शतांशि: ?) शतांशम् ॥

1559

67565 गोविन्दाष्टकम्

Adds the following verses at the beginning:

भूतानि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ॥
अहं हरिः . . . तो नान्यस्ततः कारणकार्यजातम् ।
ईदृङ् मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगता भ(वन्ति) ॥
सततसरभसचरणनिपतितसंघृणन्मणिनूपुरं
प्रकटकटितटघटितकलरवकिङ्किणीमुखरारवम् ।
विविध . . . गीतनृत्तमनोहरं
स्मरत कथयत नमत भजत च नन्दगोपकुमारकम् ॥

Adds the following stanzas at the end:

गोविन्दो दुःखनाशाय भयनाशाय माधवः ।
वामनः पापनाशाय केशवः क्लेशनाशनः ॥
गोकोटिदानं . . . . . काले प्रयागगङ्गायुतकल्पवासम् (? सः) ।
यज्ञायुतं मेरुसुवर्णदानं गोविन्दकीर्त्या न समं शतांशम् ॥
. . . . . . गोविन्दं नम गोविन्दं नम गोविन्दम् ।
श्रीहरिहरिहरिगोविन्दं नम गोविन्दं परमानन्दम् ॥

1560

70242 गोविन्दाष्टकं सभाष्यम्

Beginning:

इह खलु परमकारुणिको भगवान् व्यासमुनिः अतिविनतबहुलधर्मब्रह्मप्रतिपादकवेदवेदान्त-स्मृतीतिहासपुराणादिग्रन्थपरिशीलनालसान् केवलसंगीतसाहित्यादिलोकसांसारिकसुखहेतुकान् जना-

CC0. In Public Domain. Digitized by Muthulakshmi Academy

-नालोच्यताननुग्रहीतुकाम: . . . . नामगुणकीर्तनलक्षणसहितां शब्दाभिधेयां वन्दनलक्षणां भक्ति-मुपदिशति—सत्यमित्यादिना। सत्यं ज्ञान + + + परमानन्दम् ॥ सत्यं यथार्थम्। अनारोपित-मित्यर्थ:। किं घटादिवज्जडं, नेत्याह—ज्ञानमिति।

End:

गोविन्दाष्टकमेतदिति—गोविन्दाष्टक + + + समभ्यैति . . . . अन्त:स्थम् अन्त:-ध्यातुर्हृदये स्थितं वर्तमानम्। पुन: कीदृशं, परमानन्दामृतं परममुत्कृष्टं भोक्तृजीवभोगोपाधिकर्तृ-त्वादिरहितम् आनन्दमेवामृतं सुधा यस्य तं तथोक्तं स्वरूपत: आनन्दवन्तमिति सच्चिदानन्द-रूपत्वादनन्तकल्याणगुणवत्त्वाच्चेति भाव:।

Colophon:

श्रीमच्छंकराचार्यगुरुविरचिते गोविन्दाष्टकश्लोके व्यासविरचिते भाष्यग्रन्थे सुगुणनगर सद्गुरुवरेण्यशिवरामलिखिते पुस्तकम्।

प्रजोत्पत्तिनामसंवत्सरं निजभाद्रपदं व. १० सोमवारं वरकु गोविन्दाष्टकं व्रायतं संपूर्णम्।

1561

73731 गोविन्दाष्टकव्याख्या

Beginning:

. . . . . .

प्रणम्य क्रियते टीका गोविन्दाष्टकगामिनी ॥

इह खलु सकललोकहितावतारो भगवान् भूतनिचयाभ्यर्थितोऽत्र भूभारपरिजिहीर्षया यदुकुले किलावतीर्य सनकादिभिर्मुनिजनैरनुदिनमनुगीयमानस्वचरितो भगवान् नन्दगोपसद्मनि विजहार। तमेव विहारमष्टभि: श्लोकै: सत्यमित्यादिभिरुपवर्णयन् भगवत्पूज्यपादमुनिर्निरस्तसमस्तविशेषं सच्चिदानन्दाद्वयपदं परमात्मानमभिष्टौति—सत्यमिति।

End:

यस्तु निरन्तरं गोविन्दार्पितचेता: सन् गोविन्दाष्टकमधींत गोविन्दाच्युत माधव विष्णो गोकुल-नायक कृष्ण इत्येवमादिनामानि कीर्तयन् गोविन्दाङ्घ्रिसरोजध्यानसुधाजलधौतसमस्ताघ: प्रक्षालिता-शेषपापो निर्मलो भूत्वा गोविन्दं परमानन्दामृतं मरणादिरहितम् अन्त:स्थं समभ्यैति सम्यक् निरुपद्रव: सन्नाप्नोति। मद्भक्ता यान्ति मद्गतिमिति वचनात्।

Colophon:

इति गोविन्दाष्टकं सं . . . . . इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दाचार्य-भगवत्पूज्यशिष्यश्रीमच्छंकराचार्यविरचितं गोविन्दाष्टकं संपूर्णम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1562

73979 घटिकाद्रिनाथशतकम्

Beginning:

श्रीवेंकटार्यचरणौ शिरसि करोमि सिताब्जसुहृदौ तौ ।
पृथुतरमपि भवजलधिं पिबतितरां यत्परागपरमाणुः ॥ १ ॥
व्यत्यस्तचरणकमलां विनिहितभुजयुगलमित्रजानुयुगाम् ।
विलसितरथाङ्गशङ्खां व्यक्तिमुपासे विरुद्धजातिमतीम् ॥ २ ॥

End:

स्वामिन एव कृतिर्मे सूक्तिस्तोषाय तदपि तस्यैषा ।
स्वोक्तमनुवदति बाले सुतरां तातो हि तोषमुपयाति ॥ १०० ॥
भक्तोचितोपयुक्तां भक्त्या सौम्यवरकिंकरोपहृताम् ।
अमृतफलावलिमनघां मृदुलामास्वाद्य मृत्युमतियन्ति ॥ १०१ ॥

1563

67160 चक्रपाण्यष्टकम्

Beginning:

सतोयतोयदालिनीलदिव्यविग्रहोपरि स्फुरद्धिरण्यकान्तिजालशोभिपीतवाससे ।
किरीटरत्नरोचिषा विनिर्जितोष्णरश्मये नतिर्ममास्तु संततं हृदिस्थचक्रपाणये ॥

End:

अमायिकस्वरूपभूतपारमार्थिकाश्रयादखण्डसच्चिदात्मकस्वरूपमात्रशोभिने ।
अथापि तत्तदुत्सवाय तत्तदात्मकाय ते नतिर्ममास्तु संततं हृदिस्थचक्रपाणये ॥
चक्रपाण्यष्टकस्तोत्रमिदं भक्त्यैव यः पठेत् ।
विपच्चकान्न तस्यास्ति भयलेशोऽपि सर्वदा ॥

1568

70703 जितंतेस्तोत्रम्

Colophon: 1st chapter:

इत्यध्यायः पाञ्चरात्रे जितंतेस्तोत्र आदितः ।

2nd—

इति द्वितीयोऽध्यायस्तु जितंतेसंस्तुतौ शुभे ।

3nd—

इति श्रीपाञ्चरात्रे तु जितंतेस्तोत्र उत्तमे ।
दीर्घागमे समासोऽभूत् तृतीयोऽध्याय उत्तमः ॥

5th—

पाञ्चारात्रागमे दिव्ये जितंतेस्तोत्र उत्तमे ।
पञ्चमस्तु समासोऽभूदध्यायः शुभलक्षणः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1570

70951 जितंतेस्तोत्रम्

Colophon:

इति श्रीपाञ्चरात्रे श्रीमदष्टाक्षरकल्पे ब्रह्मनारदसंवादे ब्रह्मस्तुतिषु द्वितीयोऽध्यायः ।
इति श्री . . . . ब्रह्मस्तुतिषु तृतीयोऽध्यायः ।

1598

PM2691 दशावतारस्तोत्रम्

Beginning:

वेदापहारकपते(? महा)-सुरमर्दनाय भूदेवदेवकुलसौख्यसुकारणाय ।
औदार्यकीर्तिसुखसंपदकारणाय मत्स्यावतार सततं मम सुप्रभातम् ॥

End:

उग्रप्रचण्डघनतु(र)ङ्गमहाबलाय षड्गुगु(? खड्गेन) घोरकलिदूषणदूषणाय ।
औदार्यकीर्तिसुखसंपदकारणाय कल्कयावतार सततं मम सुप्रभातम् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे अगस्त्यनारदसंवादे दशावतारस्तोत्रं संपूर्णम् ।

1606

TR804 दशावतारस्तोत्रम्

Beginning:

त्रय्या दुर्जयदानवेन्द्रहृतया वैयाकुलीं प्रापिते
नालीकासनमानसे सरसिजे भानोरपायेन वा ।
मध्येऽम्भोनिधि यः प्रहृत्य तमरिं वाणीं पुराणीं पुनः
प्रादात् तस्य यथापुरं स तनुतां श्रीमत्स्यमूर्तिः श्रियम् ॥

End:

राजन्यापशदैर्जगद्विपदलंकर्मीणचर्यापदै-
र्निर्मूले निखिले कलेरुपचयाद् धर्मे महीमण्डले ।
प्रादुर्भूय कृपाणपाणिरथ तान् निर्धूय भूयः पुरा
धर्मं कार्तयुगं प्रवर्तयति यः कल्की श्रियै कल्पताम् ॥
इति कौशिकरङ्गनाथसूरिः सुकुमारैः पदगुम्भनैः स्तुवन् सन् ।
परमं पुरुषं दशावतारं . . . . . शोभते कृतार्थः ॥

Colophon:

इति दशावतारप्रार्थना समाप्ता ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1607

73498 दशावतारस्तोत्रव्याख्या

Beginning:

श्रीशुद्धसत्त्वगुरवे महते विदधे नमः ।
यत्कटाक्षवशाल्लोका लभन्ते विद्वदग्र्यताम् ॥
कवितार्किककेसरिणे नमोऽस्तु मह्यं च मूढकेसरिणे ।
यदहं गूढं स्तोत्रं निर्लज्जं (प्रय)तेऽद्य विवरीतुम् ॥

अथ तत्रभवन्तः श्रीमन्तः सर्वतन्त्रस्वतन्त्रा वेदान्ताचार्याः स्वाचार्यपरंपरेष्टदैवतं श्रीरङ्गनाथं दशरूपकेण तुष्टूषवस्तन्मूलत्वेन तमेव प्रथमतः स्तुवन्तः तन्मूलतया स्वस्य शुभप्राप्तिमाशासते—देवो नः शुभं + + + नायिका ॥ भूमिकां स्त्रीपुंसस्थावरजङ्गमादिभेदभिदुरप्रपञ्चोत्पत्तिविलयादिहेतु-भूतसंकल्पविकल्पावतारलक्षणवेषम् अनुकार्यरामादिवेषं च दशधा मत्स्यादिदशप्रकारेण धीरो-दात्तादिदेवगन्धर्वादिरूपेण बहुधा च निर्वर्तयन् निर्विघ्नं तत्तदभिलषितदानेन समापयन् सम्यक् परिगृहंश्च रङ्गे धामनि सर्वदिव्यदेशावताराभिलाषमूलभूते ।

End:

ततश्च शुभतमत्वमस्य । तदुक्तमभियुक्तैः—

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ।
तथा चेत् तत्प्रबन्धस्य मुखं लक्षणवद् भवेद् ॥

इति । अत्र संक . . . षयं विवेकी ।

शब्दार्थगुणदोषज्ञो महाकविमतानुगः ।
शास्त्रालंकारसंस्कारी विवेकी कविपुङ्गवः ॥

इत्यभियुक्तोक्तेः । शार्दूलविक्रीडितं वृत्तम् । सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम् इति लक्षणात् । अन्यत् तु विस्तरभयान्न लिख्यते । श्रीरस्तु ।

1609

70862 दिव्यदेशमङ्गलाशासनम्

Adds the following verses at the end:

देशान्तरगतो वापि द्वीपान्तरगतोऽपि वा ।
श्रीरङ्गाभिमुखो भूत्वा प्रणिपत्य न सीदति ॥
विमानं प्रणवाकारं वेदश्रृङ्गं महत्कृतम् ।
श्रीरङ्गशायी भगवान् प्रणवार्थप्रकाशकः ॥
अनन्तानन्तशयन पुराण पुरुषोत्तम ।
(श्री)रङ्गनाथ-जगन्नाथ नाथ तुभ्यं नमो नमः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1611

70862 दिव्यदेशमङ्गलाशासनम्

Beginning:

सप्तप्राकारमध्ये सरसिजमुकुलोद्भासमानेऽसमाने
कावेर्या मध्यदेशे मृदुतरफणिराड्भोगपर्यङ्कभागे ।
निद्रामुद्राभिरामं कटिनिकटशिरःपार्श्वविन्यस्तहस्तं
पद्माधात्रीकराभ्यां परिचितचरणं रङ्गनाथं भजेऽहम् ॥

End:

कल्याणीसरसीतटे यदुगिरेः प्रोत्तुङ्गश्रृङ्गाङ्कणे
प्रेम्णानन्दमये विमानतिलके विद्योतमानं मणिम् ।
कंदर्पायुतसुन्दरं मणिगणद्योतत्किरीटाङ्गदं
वन्देऽहं सनकादिसेवितपदं नारायणं श्रीसखम् ॥

Adds the following stanza at the end:

कृष्णः करोतु कल्याणं कंसकुञ्जरकेसरी ।
कालिन्दीजलकल्लोलकोलाहलकुतुहली ॥

1612

73438 देवराजप्रपत्तिः

Beginning:

लक्ष्मीकपोलतलकल्पितपत्रलेखाकस्तूरिकासुरभिसुस्मितवक्त्रचन्द्र ।
श्रीहस्तिभूमिधरभूषण तावकीनौ श्रीदेवराज चरणौ शरणं प्रपद्ये ॥
सर्वाभिवाञ्छितसमस्तवरप्रदानात् विख्यातिमद्वरदराजमहाभिधान ।
सर्वाङ्गसुन्दर विमृग्यसमाधिकार्थं श्रीदेवराज चरणौ शरणं प्रपद्ये ॥

End:

सत्त्वोत्तरैः सततसेव्यपदाम्बुजेन संसारतारकदयार्द्रदृगञ्चलेन ।
सौम्योपयन्तृमुनिना मम दर्शितौ ते श्रीदेवराज चरणौ शरणं प्रपद्ये ॥
श्रीश श्रिया घटकया त्वदुपायभावे प्राप्ये त्वयि स्वयमुपेयतया स्फुरन्त्या ।
नित्याश्रिताय निरवद्यगुणाय तुभ्यं स्यां किंकरः करिगिरीश न जातु मह्यम् ॥

1620

71430 देवराजाष्टकम्

Beginning:

श्रीमान् वेङ्कट + + + हृदि ॥
श्रीमत्काञ्चीमुनिं वन्दे कमलापतिनन्दनम् ।
वरदाङ्घ्रिसदासङ्गरसायनपरायणम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

देवराजदयापात्रं श्रीकाञ्चीपूर्णमुत्तमम् ।
रामानुजमुनेर्मान्यं वन्देऽहं सज्जनाश्रयम् ॥
नमस्ते हस्तिशैलेश श्रीमन्नम्बुजलोचन ।
शरणं त्वां प्रपन्नोऽस्मि प्रणतार्तिहराच्युत ॥

End:

त्वदीक्षणसुधासिन्धुवीचिविक्षेपशीकरैः ।
कारुण्यमारुतानीतैः शीतलैरभिषिञ्च माम् ॥

कवितार्किक + + + वेदान्तगुरवे नमः ॥

1623

66187 देवराजाष्टकम्

End:

त्वदीक्षण + + + रभिषिञ्च माम् ॥

गङ्गाया दक्षिणे भागे योजनानां शतद्वये ।
. . . योजनमात्रेण पूर्वाम्भोधेस्तु पश्चिमे ॥
वेगवत्युत्तरे तीरे पुण्यकोट्यां हरिः स्वयम् ।
वरदः सर्वभूतानामद्यापि परिदृश्यते ॥
वपापरिमलोल्लासवासिताधरपल्लवम् ।
मुखं वरदराजस्य मुग्धस्मितमुपास्महे ॥

Colophon:

इति श्रीमत्काञ्चीस्तोत्रं संपूर्णम् ।

1627

PM2111 देवादिदेवस्तोत्रम्

Beginning:

नमो देवदेवं नमो गरुडगामि नमो वेदिनाथं नमोऽलं व्रजामि ।
नमो शङ्खचक्रं गदापद्मधारि नमो मत्स्यकच्छं वराहाङ्गधारि ॥(?)

End:

नमो देवदेवं नमो देवपारं . . . मद्देवमातापितानाथसारम् ।
नमो देव चरणं कलानिवाशि नमो देव भो देव वैकुण्ठमेति ॥(?)

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं देवादिदेवस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1641

66901 द्वादशमञ्जरिकास्तोत्रम्

The following verses are added at the end:

विविधशुनकमोहान्मण्डपे रत्नवर्ये सततकलहशीलो ग्रामसिंहो यथा स्यात् ।
स्वपरमतिविमोहो यत्स्वरूपाविवेकात् तमहमतुलमेकं राममाद्यं प्रपद्ये ॥
श्रवणमननकालं ध्यानमेकान्तवासं विमलसुखमहाब्धौ मग्नचित्तो न जाने ।
मुनिगण इव दृष्टे दण्डकारण्यचारे त्वयि करधृतचापे जानकीप्राणनाथे ॥
यच्छ्रीसूक्तिर्जननहरिणी श्रीपतेः पादजाता
चित्रं विद्वद्वदनमवनिं प्राप्य गङ्गेव भाति ।
तं सेवेऽहं त्रिभुवनगुरुं शंकराचार्यमीशं
मारोन्मूलं मथिततमसं मस्करीन्द्रालिभाग्यम् ॥
यत्कृपासिन्धुमग्नेषु लब्धो ज्ञानमणिर्मया ।
तं वन्दे भगवत्पादशंकरं लोकशंकरम् ॥
मञ्जरीभिर्द्वादशभिर्मकरन्दविभूतिभिः ।
पूजितो भगवानस्तु हरिः सर्वजगद्गुरुः ॥

द्वादशमञ्जर्याः स्वयंप्रकाशकृतमकरन्दव्याख्यानश्लोकाः ।

1643

67262 द्वादशमञ्जरिकास्तोत्रम्

Adds the following stanzas at the beginning:

श्रुतिस्मृति + + + लोकशंकरम् ॥
शंकरं शंकराचार्यं + + + पुनः पुनः ॥
वेदान्तार्थविभासकाय गुरवे शा(न्ता)य संन्यासिने
नानावादिनगेन्द्रसंघपवये योगीन्द्रवन्द्याय च ।
मोहध्वान्तदिवाकराय भगवत्पादाभिधां बिभ्रते
तस्मै भाष्यकृते नमोऽस्तु सततं पूर्णाय बोधात्मने ॥
सर्वापत्परिहर्तृभ्यां नमतां प्राणिनां सकृत् ।
विद्यादानरताभ्यां च चरणाभ्यां नमो नमः ॥
वेदार्थपरमाद्वैतकैवल्यश्रीस्वरूपतः ।
यच्चकास्ते परं ब्रह्म चिन्मात्रमहमस्मि तत् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1651

PM2409 द्वादशमञ्जरिकास्तोत्रम् आमोदव्याख्यासहितम्

Beginning:

एकदा सर्वज्ञः श्रीमत्सदाशिवः अगाधाविद्यान्धकूपे पतमानानज्ञानिनः ज्ञानालम्बनेनोत्तारयितुमालोच्य श्रीशंकरभगवत्पादरूपेण क्षिताववतीर्णः सन् सर्वाशासु स्वसिद्धान्ताशां लक्षीकृत्य कदाचित् पद्मपादादिचतुर्दशान्तेवासिभिः सह अविमुक्तक्षेत्रगमनकाले तत्र शब्दशास्त्रान्तर्भूतडुकृञ्करण इति तिङ्मात्रपठनपरमेकमज्ञानिनं विप्रं दृष्ट्वा अव्याजप्रसादतस्तं मुक्तिं प्रापयिष्यन् स्वमुखेरितद्वादशश्लोकोपदेशेन तस्य तरणसरणिं दर्शयति—संप्राप्त इत्यादिना। संप्राप्ते संनिहिते + + + करणे॥ मूढ जहीहि + + + विनोदय चित्तम्॥ भज गोविन्दं + + + मूढमते॥ हे मूढमते अविवेकचित्त। हे विप्र। एतद्विशेषणद्वयं प्रतिश्लोकादावनुसंधेयम्।

After the comm. of 13th verse (द्वादशमञ्जरिकाभिरशेष . . .):

तत आचार्यानुग्रहेण विप्रः कृतार्थ इति मत्वा पद्मपादादयः आचार्यानुज्ञया पुनरुपदेशं कर्तुमभिमुखाः सन्तः। तत्रादौ पद्मपादस्तस्य उपदेशमारभते—का ते इति।

End:

मूढः कश्चन वैयाकरणो डुकृञ् करणाध्ययन . . . .।
श्रीमच्छंकरभगवच्छिष्यैर्बोधित आसीच्चोदितकरणः॥

. . . चोदितकरणः (चोदि)तं भेदज्ञानान्निवर्तितं करणं मन आदिर्यस्य सः। करणं साधकतमक्षेत्रगात्रेन्द्रियेष्वपीत्यमरः। आसीत् सर्वं विस्मृत्य ब्रह्मैवाहमस्मीत्याकारज्ञानवानासीदित्यर्थः।

Colophon:

. . . मत्परमहंसपरिव्राजकाचार्यशंकरपादकल्पतरोः तच्छा(घा ? खा) प्रायच्छात्रे . . . त्पन्नषड्विंशन्मञ्जरीमालिकाया इयमामोदाख्या व्याख्या संपूर्णा।

1656

PM2702 द्वादशस्तोत्रं सटीकम्

Beginning:

उत्पत्तिस्थितिसंहृतिप्रणियतिज्ञानानि बन्धावृती
मोक्षश्चेति यतो भवन्ति जगतो भावाः स्वतन्त्रात् परात्।
तं वन्दे निरवद्यसद्गुणतनुं लक्ष्मीधरालिङ्गितं
दोर्भिश्चक्रदराम्बुजाभयभृतं भक्तैकगम्यं हरिम्॥

. . . . अथ कलिकालावतीर्णदुर्मतिदैतेयप्रसञ्जितदुर्मतध्वान्तनिरासिज्ञानालोकप्रवर्तनाय श्रीभगवदाज्ञया भुवि गृहीतमनुष्यविग्रहः साक्षान्मरुदेव श्रीमदानन्दतीर्थमुनिः श्रीहरिस्तवनमेव कलौ परमधर्मं मन्वानः सज्जनानुग्रहाय श्रीकृष्णं तुष्टूषुः . . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

हे आनन्दचन्द्रिकास्यन्दक आनन्दज्योत्स्नाया: स्यन्दक वर्षणशील परमकृपालो आनन्दतीर्थ-परानन्दवरद त्वामहं वन्दे। तस्माद्भक्तेभ्योऽलौकिकानन्दप्रदत्वान्मुमुक्षुभि: स एवाहर्निशं स्तोतव्य इति सिद्धम्।

परमानन्दगोविन्दकृपाबलमुपाश्रित:।
स्तुतीर्द्वादश गङ्गाम्बुमिश्रो व्याख्यन्मुरद्विष:॥
क्षमन्तु हन्त मे मन्तुं महान्त: कृतबुद्धय:।
यदत्राज्ञानत: किंचिन्मया नाधिकमारचि॥
क्वानन्दतीर्थयोगीन्द्रवाचो देवै: सुदुर्विदा:।
क्वाहमल्पमति: कृष्णानुग्रह: साधयेन्न किम्॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितद्वादशस्तोत्रटीकायां द्वादशोऽध्याय:।

1658

PM2701 द्वादशस्तोत्रं सव्याख्यम्

Adds following verses after the colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य द्वादशस्तोत्र(स्य) व्याख्या तिरुमलाचार्यकृतद्वादशस्तुति: समाप्ता।

विपश्चिता तिरुमलभट्टाख्येन यथामति।
कृतेयं द्वादशस्तोत्रव्याख्यास्तु प्रीतये हरे:॥
य: सर्वगुणसंपूर्ण: सर्वदोषविवर्जित:।
प्री(य)तां प्रीत एवालं विष्णुर्मे परम: सुहृत्॥
आनन्दतीर्थवशयदानवार्णवपावका।
यज्ञानदानिने सर्वेशाय श्रीनिवासाय नम:(?)॥

Scribal note:

कलियुगादि संवत्सर ४९५७ व्यवहारिक नलनाम संवत्सर आश्वीज शुद्ध २ सौम्यवासरदल्लि उदयत्तूरु राघवेन्द्ररायरु नारायणाचार्यरिगे बरदु कोट्टदु।

1659

PM2703 द्वादशस्तोत्रव्याख्या

Beginning:

प्रणम्य श्रीनिवासस्य चरणाम्बुरुहद्वयम्।
व्याकुर्वे श्रीमदाचार्यरचितां द्वादशस्तुतिम्॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अतिविततगहनगम्भीरार्थशास्त्रार्थबोधेऽक्षमान् सज्जनाननुजिघृक्षुः तेषामपवर्गहेतुज्ञानोपाय-भूतभगवदनुग्रहस्य स्तुतिं विनानुपपत्तेस्तां चिकीर्षुर्भगवान् श्रीमदानन्दतीर्थाचार्यवर्यः स्वयमन्तराय-विधुरोऽपि शिष्यान् शिक्षयितुं प्रारिप्सितनिर्विघ्नपरिसमाप्त्यादिप्रयोजनकम् अविगीतशिष्टाचार-परंपराप्राप्तं विशिष्टेष्टदेवतामङ्गललक्षणं परममङ्गलं वन्दनमादावाचरति वन्दे इति। वासुदेवं वन्दे इति क्रियाकारकयोजना। वसति सर्वत्रायमिति वा, वासयति सर्वं स्वस्मिन्निति वा वासुः। . . .

End:

मन्दिरेति। मन्दिरे त्वद्गृहे स्यन्दितेषु सेचनादिकर्मणि प्रवृत्तेषु ब्रह्मरुद्रपरिचारकेषु स्यन्दक करुणारससेचक। आनन्देति। आनन्दचन्द्रिकायाः परमानन्दलक्षणज्योत्स्नायाः स्यन्दक प्रवर्तक। आनन्दतीर्थपरानन्दवरद। त्वां वन्दे।

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितद्वादशस्तुतौ तिरुमलाचार्यविरचितद्वादश-स्तवनव्याख्यानं समाप्तम्।

The scribe adds:

सकलभुवनरक्षादक्षसंपूर्णबोधप्रणिहितशुभशास्त्रार्थो रुपीयूषधाराः।
श्रुतिभिरभिपिबन्तः संततामोदमस्मत्करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

1661

67323 **नक्षत्रमालिकानामावलिः**

Beginning:

जय नारायण माधव दनुजवंशारण्यदावानल।
जय हेमाम्बर देवदेव जितकंस कृष्ण विष्णुप्रभो॥
जय रामानुज भक्तवत्सल हरे चन्द्रार्कनेत्रद्वय।
जय गोगोपकगोपिकानिवहराजत्पूर्वपुण्योदय॥

काम्बोदिरागम्—

केशव मुनिजनगेय नमो नमो कृष्ण पाहि।
भवपाशविमोचन भक्तजनावन कृष्ण पाहि॥

End:

कौत्सविनुत रविकुलसौम्य रामकृष्ण पाहि माम्।
सच्चरित्रबुद्धस्वरूप कल्किनाम कृष्ण पाहि॥
स्वयंप्रकाशयतिसंनुत शिवरामकृष्ण पाहि।
भवभयविदूरीकृतभक्तजनस्तोम कृष्ण पाहि॥

Colophon:

इति नक्षत्रमालिकानामावलिः समाप्ता।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1662

PM80 नरकोत्तारणस्तोत्रम्

Beginning:

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
नारायणं जगद्बीजं पुराणं पुरुषोत्तमम् ।
पर्यपृच्छत धर्मात्मा पाण्डुपुत्रो युधिष्ठिरः ॥

युधिष्ठिर उवाच—

किं जपन् पुरुषो मुच्येद्यमलोकैकशासनम् ।
तन्मे कथय तत्त्वेन भक्तोऽस्मि तव केशव ॥

श्रीभगवानुवाच—

शृणु राजन् महाबाहो धर्मात्मन् पाण्डुनन्दन ।
अहं ते कथयिष्यामि नरकोत्तारणं महत् ॥
ओंकारात्मन् नमस्तेऽस्तु ऋग्यजुःसामरूपिणे ।
यज्ञात्मने नमस्तेऽस्तु सर्वशास्त्रात्मने नमः ॥

End:

नरकोत्तारणस्तोत्रं ये पठिष्यन्ति मानवाः ।
गच्छन्ति परमं स्थानं यत्र देवोऽपि केशवः ॥

Colophon:

इति श्रीकृष्णेन प्रोक्तं नरकोत्तारणस्तोत्रं समाप्तम् ।

1664

70690 नवनीतकृष्णाष्टकम्

Beginning:

मन्दस्मितं मधुरकोमललास्यलीलं कंदर्पकोटिकमनीयकिशोरमूर्तिम् ।
कुन्दस्फुरद्दशनकं कुटिलालकान्तं वन्देय नन्दतनयं नवनीतकृष्णम् ॥

End:

तुङ्गं गणैरनुपमैरनवद्यगन्धैः सङ्गं श्रितेषु सततं स्वयमादधानम् ।
अङ्गं वहन्तमतुलं नवमेघनीलं त्वं गन्तुमर्हसि मनो नवनीतकृष्णम् ॥
नवनीतकृष्णविषयामवनीसुरभावुकां स्तुतिं कथयन् ।
अवनीसंपन्नः स्यात् स वनी स यतिः स एव मुक्तश्च ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1668

71350 **नृसिंहदण्डकम्**

Beginning:

श्रीधामवत्सं स्वमेधाविधानादि साधार (नाण्यं?णान्यं) बुधानं निधानं दधानं प्रधानत्यगाधा सुधासिक्तसौधाशलोकं सुबोधायनाबाधबोधानरोधा विरोधात्मकाराधनादानबद्धं प्रसिद्धं विदग्धं सुमुग्धं . . . (?)

End:

मुनीनां महान्तं महिम्ना वलन्तं चलन्तं कचान्तं श्रितं त्वासुरैरग्निकुण्डे दृढं कीलतोऽहं सदा नारसिंहं भजेऽहं भजेऽहं भजेऽहम् ॥ (?)

1669

PM2715 **नृसिंहनखस्तोत्रं मन्दबोधिनीव्याख्यासहितम्**

Beginning:

लक्ष्मीनारायणं देवं व्यासमध्वजयादिकान् ।
गुरून् मूलादिपरमान् वन्दे विद्यागुरूंश्च मे ॥
छलारिनरसिंहार्यशिष्यः शेषाभिधो बुधः ।
नरसिंहनखस्तोत्रपञ्चिकां कुरुतेऽञ्जसा ॥

अत्र किल कथां कथयन्ति । कदाचित् त्रिविक्रमपण्डिताचार्यवर्यः श्रीमध्वाचार्यैः सह बदरिकाश्रमं प्रति जगाम । . . . सर्वानिष्टनिवर्तकश्रीनृसिंहनखस्तुतिप्रतिपादकश्लोकद्वयं विरचय्य मङ्गलाचरणरूपत्वेन तदादौ निबन्धनं कुरु । संपुटाकारेण आदौ अन्ते च पठतां फलं भविष्यतीत्युक्त्वा श्लोकद्वयं ददुरिति । तत्रायमाद्यः श्लोकः—पान्त्वस्मानिति । हे प्रतत प्रकर्षेण ततः देशतः कालतः गुणतश्च व्याप्तः ।

End:

तस्मात् सकलकल्याणगुणपूर्णत्वेन निर्दोषत्वेन ब्रह्मादिध्यानविषयत्वेन सकलाभीष्टप्रदत्वेन सर्वानिष्टनिवर्तकत्वेन सदागमैकविज्ञेयो भगवान् लक्ष्मीनृसिंह एव स्वस्य प्रेमास्पद इति तमेव श्लोकद्वयेन प्रार्थितवानानन्दतीर्थमुनिरित्यशेषमतिमङ्गलम् ।

नरसिंहनखस्तोत्रगूढभावार्थवर्णनात् ।
लक्ष्मीनृसिंहः प्रियतामस्मदाचार्यहृद्गतः ॥
छलारिनरसिंहार्यशिष्यस्य कृतिमुत्तमाम् ।
विदांकुर्वन्तु विद्वांसः किमन्यैः कैतवैरिह ॥

Colophon:

इति श्रीमद्विद्वच्चकचूडामणिश्रीमच्छलारिनरसिंहाचार्याणां निजशिष्येण शेषेण विरचिता मन्दबोधिनीनामिका नृसिंहनखस्तोत्रपञ्चिका समाप्ता ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

The scribe adds:

आङ्गीरसाब्दे कार्तिके चतुर्थ्यां भानुवासरे ।
सं . . जाख्यपुरे चैव पिनाकिन्यास्तटे तथा ॥
वेदगर्भकुलोत्पन्नरामाचार्यस्य सूनुना ।
तीर्थाभिधेन बालेन लिखिता परमा मया ॥
श्रीमद्वायुस्तुतेष्टीका मन्दबोधिनिनामिका ।
अनेन लेखनेनास्मद्गुरुवर्यः प्रसीदतु ॥

1670

73563 नृसिंहप्रातःस्मरणीयश्लोकत्रयम्

The following is the full text of the Stotra:

प्रातःस्मरामि नृहरिं रमया समेतं सचक्रकार्मुकवराभयहस्तमीशम् ।
वर्णान्तरेफसुमनुस्मरबिन्दुयुक्तबीजस्वरूपममलं ध्रुवकर्णिकायाम् ॥
प्रातर्भजामि षडरे वरचक्रराजं नारायणं वसुदलेऽर्कदले तथैव ।
श्रीवासुदेवमथ षोडशपत्रपद्मे संसारदावदहने पुरुषं नृसिंहम् ॥
प्रातर्नमामि नृहरेः सुपवित्रचक्रं द्वात्रिंशदक्षरयुतैरभिवन्द्यमानम् ।
मायामयं सकलदेवमयं तदेतच्छन्दोमयं सततसुन्दरमात्मसिद्ध्यै ॥

1671

PM2111 नृसिंहभुजङ्गम्

Beginning:

भजे नारसिंहं भजे नारसिंहं भजे नारसिंहं सरोजाक्षमीळे ।
भजे कुण्डलान्तं भजे कुण्डलान्तं भजे कुण्डलान्तं भजे कुण्डलान्तम् ॥
सुषुम्नान्तसंस्थं परब्रह्मरूपं मुनिस्वात्मवेद्यं महापद्मपीठम् ।
निशान्तं दिनान्ते त्रिकाले वसन्तं प्रशान्तं तमीळे गुरुं हंसमूर्तिम् ॥

End:

विशुद्धे सदा षोडशारे स्वदाद्ये खतत्त्वस्तुबन्धं कराग्रस्वरूपे ।
स्फुरज्जीवितेशं जगन्मोहकान्तिं सदासन्नवह्निं भजे कुण्डलान्तम् ॥

1672

71576 नृसिंहभुजङ्गप्रयाताष्टकम्

Beginning:

श्रीमान् वेङ्कट + + + हृदि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

नमः सर्वगीर्वाणकोटीरकोटिस्फुरद्रत्ननिर्यन्नीराजिताङ्घ्रिम् ।
शरच्चन्द्रकोटिप्रभाभासुराङ्गं नमस्कुर्महे वीरलक्ष्मीनृसिंहम् ॥

End:

नमस्ते नमस्ते सदा भक्तबन्धो नमस्ते नमस्ते कृपासारसिन्धो ।
नमस्ते नमस्ते महावीरलक्ष्मीनृसिंहापराधीश देव प्रसीद ॥
भुजङ्गप्रयाताष्टकं पुष्टिकामं परं श्रीनृसिंहाकृतिस्तोत्रमेतत् ।
पठेद् भक्तियुक्तो लभेन्मोक्षलक्ष्मीं महावीरलक्ष्मीनृसिंहप्रसादात् ॥

कवितार्किक + + + गुरवे नमः ॥

Colophon:

नृसिंहस्तोत्रं संपूर्णम् ।

1675

PM697 नृसिंहभुजङ्गप्रयाताष्टकम्

End:

नमस्ते नमस्ते + + + देव प्रसीद ॥

वराधीशदेवप्रसिद्धाष्टकं यः पठेत् (श्री)नृसिंहाकृतिस्तोत्रमेतत् ।
नतीत्कादिपाद्योदरालिं(?)समग्रं समस्तायुरारोग्यमैश्वर्यमेति ॥

1679

73563 नृसिंहमन्त्रराजपदस्तवः

End:

अट्टास्यगण्डभेरुण्डरूपायाग्निप्रभाय ते ।
कल्पान्तमेघनिर्घोषगर्जितायोग्ररूपिणे ॥
अनेककोटिशरभभक्षणाय महात्मने ।
अनेककोटिहस्ताय अनन्तायुधधारिणे ॥
महातेजःस्वरूपाय महोग्रवपुषे सदा ।
भयंकराणां भीमाय वीरसिंहाय ते नमः ॥

1680

73563 नृसिंहमानसिकपूजास्तवः

Beginning:

श्रीलक्ष्मीरुवाच—

नारसिंह महादेव महाबलपराक्रम ।
हृदये मानसीं पूजां कथं कुर्वन्ति मे वद ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीनृसिंह उवाच—

श्रृणु देवि प्रवक्ष्यामि मम पूजां सुभक्तिमान् ।
हृत्पद्मकर्णिकामध्ये उपचारान् प्रकल्पयेत् ॥

मार्कण्डेयः—

श्रृणु नारद वक्ष्यामि नृसिंहेन कृता पुरा ।
हृदये मानसी पूजा सर्वलोकोपकारका ॥

End:

इत्येवं नारसिंहेन रमायाः कथितं पुरा ।
एतत् समस्तं संगृह्य आत्मपूजा यथाविधि ॥

Colophon:

इति अथर्वणसारे नृसिंहस्तम्भोद्भवे मार्कण्डेयनारदसंवादे अष्टमोऽध्यायः ।

1682

73563 **नृसिंहस्तवराजः**

Beginning:

श्रृणुध्वमृषयः सर्वे नृसिंहस्याशु तोषकम् ।
प्रह्लादेनोदितं पुण्यं स्तवराजं ब्रवीमि वः ॥
नृसिंहं स्तुवतां नृणां नाधिव्याधिभयं क्वचित् ।
सिध्यन्ति सर्वश्रेयांसि मनसा चिन्तितान्यपि ॥

. . . . . .

प्रह्लादः—

नमस्ते नारसिंहाय लोकरक्षणहेतवे ।
दैतेयान्तकरूपाय कालाग्निसमतेजसे ॥
मदार्तिहरणासक्तचेतसे चित्स्वरूपिणे ।
नमस्तुभ्यं नृसिंहाय हिरण्यकशिपुच्छिदे ॥

End:

नमो भगवते तस्मै नारसिंहाय भास्वते ।
उग्रवीर्याय महते विष्णवे मृत्युमृत्यवे ॥
नृसिंहस्तवराजोऽयं भवद्भ्यः कथितो मया ।
श्रृण्वतां पठतां वापि सर्वाभीष्टफलप्रदः ॥
पठन् स्तवमिमं मर्त्यः सायं प्रातः समाहितः ।
सर्वापद्भ्यो विमुक्तोऽन्ते विष्णुसायुज्यमाप्नुयात् ॥

Colophon:

इति नृसिंहपुराणे प्रह्लादप्रोक्तं स्तोत्रमिदं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1683

PM2545 **नृसिंहस्तवराजः**

Beginning:

ओं अस्य श्रीनृसिंहस्तवराजस्तोत्रमन्त्रस्य महेश्वर ऋषिः, श्रीनृसिंहो देवता, अनुष्टुप् छन्दः, मम सर्वाभीष्टकामनासिद्ध्यर्थे जपे विनियोगः ।

ओंकारममृतं ब्रह्म नृसिंहमक्षरं परम् ।
यद्रूपं परमं ज्ञेयं तं नमामि नरोत्तमम् ॥
उग्रमूर्तिर्ध्येयमूर्तिर्ध्यानगम्यनिरन्तरम् ।
हुंकाराद्यक्षरात् सर्वे तत्रैवं प्रणमाम्यहम् ॥

End:

य इदं स्तवराजं तं नृसिंहं सिद्धिदायकम् ।
शिवेन कथितं सारं पार्वत्यग्रे विशेषतः ॥
यो जपेत् श्रृणुयाद् वापि भावयुक्तः सुधीतमः ।
स साम्राज्यमवाप्नोति सत्यं जानीहि पार्वति ॥
शौर्यं वीर्यं बलं तेजः पुत्रपौत्रं च शाश्वतम् ।
संभोगं प्राप्नुयाच्छीघ्रं नृसिंहस्य प्रसादतः ॥
य इदं जपते नित्यमिह लोके परं सुखम् ।
अन्ते जगाम मोक्षं च शिवस्य वचनं यथा ॥

Colophon:

इति परमगुह्यसारमन्त्रराजं शिवेनोदितं श्रीनृसिंहस्तवराजं संपूर्णम् ।

1686

66644 **नृसिंहस्तोत्रम्**

Beginning:

गोविन्द केशव जनार्दन वासुदेव विश्वेश विश्व मधुसूदन विश्वरूप ।
श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष नारायणाच्युत नृसिंह नमो नमस्ते ॥
देवाः समस्ताः खलु योगिमुख्या गन्धर्वविद्याधरकिंनराश्च ।
यत्पादमूलं सततं नमन्ति तं नारसिंहं शरणं गतोऽस्मि ॥

End:

स्वप . . . नित्यं जगतामशेषं त्राता च हन्ता विभुरप्रमेयः ।
एकस्त्वमेव त्रिविधो विभिन्नस्त्वां सिंहरूपं सततं नतोऽस्मि ॥

Colophon:

नृसिंहस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1687

67271 नृसिंहस्तोत्रम्

End:

हर्षं सुराणां च शुभं च दत्त्वा पुण्यप्रदेशे स्थितदिव्यरूपम् ।
त्वामुग्रमूर्ते सततं नतोऽस्मि प्रसीद देवेश जगन्निवास ॥
इति स्तुत्वा रघुश्रेष्ठः पूजयामास तं हरिम् ।
पुष्पवृष्टिः पपाताशु नारसिंहस्य मूर्धनि ॥
साधु साध्विति तं भूयो देवा ऋषिगणैः सह ।
राघवेण कृतं स्तोत्रं पञ्चामृतमिति स्मृतम् ।
पठन्ति ये द्विजवरास्तेषां लोकस्तु शाश्वतः ॥

1689

PM2333 नृसिंहाष्टकम्

Beginning:

वन्दे लक्ष्मीनृसिंहं सुरनरमुनिभिः स्तूयमानं प्रसन्नं
स्फूर्जच्चन्द्रार्ककोटिद्युतिनिभमहसं स्वर्णसिंहासनस्थम् ।
आरोप्य स्वाङ्कदेशे दितिसुततनयं जिह्वया लेलिहानं
भक्तासक्तिप्रसिद्ध्यै निजजनजनकस्यान्त्रदाम्ना लसन्तम् ॥
भवानेव नारायणः सृष्टिकर्ता भवानेव पद्मा भवानेव धाता ।
त्वदन्यं न किंचिद् जगद् वर्तते वै परब्रह्ममूर्तिर्भवान् श्रीनृसिंह ॥

End:

भवानेव माता भवानेव तातो भवानेव दाता भवानेव पाता ।
त्वदन्यन्न किंचिद् जगद् वर्तते वै परब्रह्ममूर्तिर्भवान् श्रीनृसिंह ॥
पठेच्छ्रीनृसिंहाष्टकं मानवो यः स वै भक्तियुक्तो भवेद् वीतभीतिः ।
वदान्यः स कोशाश्वसंतानयुक्तः प्रतापाधिकः शत्रुगर्वापहारी ॥

Colophon:

इति श्रीमद्-गास्वामिगिरिधरजीकृतं नृसिंहाष्टकं संपूर्णम् ।

Adds the following stanza after the colophon:

नमः श्रीनृसिंहाय तुभ्यं प्रभाते नमः श्रीनृसिंहाय तुभ्यं दिवा वै ।
नमः श्रीनृसिंहाय तुभ्यं च सायं नमः श्रीनृसिंहाय तुभ्यं निशायाम् ॥

1690

71350 नृसिंहाष्टकम्

Beginning:

श्रीवत्साङ्कं त्रिनेत्रं शशिसमधवलं चक्रहस्तं सुरेशं
वेदाङ्गं वेदनादं विलसितवदन वेदरूपस्वरूपम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ओं ह्रीं . . . कारमन्त्रं हुतवहसदृशं प्रज्वलत्पावकाक्षं
क्ष्रां क्ष्रीं क्ष्रौं बीजरूपं नरहरिसदृशं पातु मां नारसिंहः ॥

End:

जं झं जं झं झकारं झपझपझपितं जानुदेशं झकारं
हां हां हां हरितक हहाहासमिन्द्रादिशैवम् ।
वं वं वं वदनदलितं वाममक्षं सलक्ष
लं लं लं लालितास्यालघुगुणविदितः पातु मां नारसिंहः ॥
भूतप्रेतपिशाचशाकिनिडाकिनिगणानां तथोच्चाटनं
चोराद् वादिज्वरोरगभयं शत्रुक्षयं निश्चयम् ।
संध्याकालजपं तदष्टकमिदं सद्भक्तिपूजादिभिः
प्रह्लादेन मयः(?)पठन्ति जपतां सत्पूजिता भूतले ॥

Colophon:

इति प्रह्लादकृतं नृसिंहाष्टकं संपूर्णम् ।

1701

70653 न्यासतिलकव्याख्या

Beginning:

श्रीमान् वेङ्कट + + + हृदि ॥
गुरुभ्यस्तद्गुरुभ्यश्च + + + जगतां पती ॥

सद्भिरभ्यर्थ्यमानो यो वेदान्ताचार्यशेखरः ।
न्यासस्य तिलकं चक्रे तद् व्याख्यास्यामि संग्रहात् ॥

श्रीमान् वेदान्ताचार्यः सद्भिरभ्यर्थ्यमानोऽकिंचनजनानुजिघृक्षया प्रपत्तिशास्त्रेषु प्रकीर्णप्रतिपादितान् प्रपत्त्युपयुक्तानर्थविशेषान् सुखग्रहणाय एकत्र संजिघृक्षुः प्रथमं न्यासविंशतौ प्रपत्तिशास्त्रार्थान् प्रायशः संगृह्य . . . . न्यासविद्याया विद्यान्तरव्यावृत्तिं प्रपदने विश्वासहीनानां मूढत्वं महाविश्वासजननहेतुं प्रपन्नस्यानुदिनानुसंधेयार्थविशेषांश्च प्राचीकशत् । तत्रादौ गुरुपरंपरां नमस्करोति—

गुरुभ्यः + + + जगतां पती ॥ गुरुभ्यः अव्यवहितगुरुभ्योऽस्मद्गुरुभ्यस्तद्गुरु . . . . चार्येभ्यः । चकारात् सर्वगुरुभ्यश्च नमोवाकं नमोवचनम् ।

1718

TR845 परमपुरुषप्रार्थना

Beginning:

सेवाहेवाकदेवाधिपमकुटतटीस्रस्तमन्दारमाला-
लीलामालम्बमाना मधुरसपृषतश्रेणिकेनाङ्घ्रिपद्मे ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

गङ्गाभङ्गानुषङ्गादिव दनुजरिपोः पाण्डिमानं वहन्ती
पायादस्मानपायान्नखमणिसरणिस्तारकाकारकान्ता ॥
सेवाघूर्णन्मृडानीपरिवृढमकुटीकोटिकान्तारवाटी-
लीलालोलोर्मिमालोच्चलदमरसरित्पूरबिन्दुप्रबन्धाः ।
शोभन्ते हंसशाला इव नलिनधिया यत्र संश्लेषभाजो
राजीवाक्षस्य दद्यात् किसलयसदृशं तत्पदं संपदं नः ॥

End:

त्रिदशकदम्बमान्यमपि मानुषजन्म हरे
सुकृतशतैर्वितीर्णमधिगम्य जनो भवता ।
अहह न चिन्तयत्ययमुपायमपायहरं
वनभुवि चन्द्रिकामिव तनोति तवोपकृतिम् ॥
त्रिविधदुरन्ततापबडवार्चिरसह्यतनो-
र्विषयजलभ्रमैरविकलं परिमोहयतः ।
ननु भवतो वृणे परमपूरुष लिप्सुरहं
भवगुरुसागरस्य तरणं चरणं शरणम् ॥

Colophon:

इति **परमपुरुषप्रार्थना** समाप्ता ।

1731

67160 **प्रतापनरसिंहाष्टकम्**

Beginning:

प्रह्लादार्तिनिवारणाय दितिजेन्द्राघट्टितात्युन्नत-
स्तम्भादाविरभूदनादिनिधनो योऽशेषवेदैर्नुतः ।
स्वार्भाटध्वनिपूरिताण्डकुहरो दंष्ट्राकरालाननः
पायान्नः सततं प्रतापनरसिंहाख्यः स लक्ष्मीपतिः ॥

End:

देवानां स्तुतयोऽपि यस्य विभवं नानाप्रमाणैर्मुहुः
स्तुत्वा पारमसंनिरीक्ष्य विनिवृत्यान्तर्लयं प्रापिरे ।
अल्पीयस्यपि भक्तवागिह भुवि स्याद् यस्य संतुष्टये
पायान्नः सततं प्रतापनरसिंहाख्यः स लक्ष्मीपतिः ॥
यो वा को वापि **प्रतापनरसिंहाष्टकं** त्विदम् ।
पठति श्रद्धया नित्यं स प्रह्लादसमो भवेत् ॥

1733

69493 **प्रह्लादस्तुतिनवरत्नमालिका**

Beginning:

सर्वलोकनिवासाय नित्यकल्याणमूर्तये ।
चतुराननपूज्याय श्रीरङ्गब्रह्मणे नमः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

मुक्तादामाभिरामाय भक्तसाम्राज्यसिद्धये ।
इक्ष्वाकुकुलदेवाय श्रीरङ्गब्रह्मणे नमः ॥

End:

नित्यलक्ष्मीनिवासाय सत्यसंकल्पसिद्धये ।
सद्भक्तचिन्तामणये श्रीरङ्गब्रह्मणे नमः ॥
प्रणवस्यादिरूपाय प्रणवान्तःस्थशक्तये ।
प्रणवोपरिसंस्थाय श्रीरङ्गब्रह्मणे नमः ॥

Colophon:

इति प्रह्लादस्तुतिनवरत्नमालिका संपूर्णा ।

1736

73921 प्रातःस्तुतिः

Beginning:

अथ श्रीमदुद्यानसंवीतहेमस्थलोद्भासिरत्नस्फुरस्तम्भपान्तः(?) ।
लसत्कल्पवृक्षादधो दीप्तरत्नं स्थलाभीष्टिताम्भोजपीठाधिरूढम् ॥

End:

अह्नो मुखेऽनुदिनमित्यभिपूज्य शौरिं दध्नाथवा गुडयुतेन निवेद्य तोयैः ।
श्रीमन्मुखे . . . मतर्प्य च तवियातुं(?) जप्यात् सहस्रमथवाष्टकमादरेण ॥

Colophon:

इति प्रातःस्तुतिः समाप्ता ।

1737

PM2611 प्रातःस्मरणीयपञ्चरत्नम्

Beginning:

श्रीकृष्णं परमानन्दं जगज्जन्मादिकारणम् ।
सत्यज्ञानानन्दरूपं प्रणमामि जगद्गुरुम् ॥
प्रातर्नमामि यदुनाथपदारविन्दं पद्मामरार्चितमणिप्रवरैकभूषम् ।
पद्मप्रियप्रतिनिभं फणिशीर्षभूषं पाराशरादिमुनिसेवितपारिजातम् ॥

End:

प्रातर्जपामि परमेश्वरदिव्यमन्त्रं संसारकूपपतितोत्तरणैकमन्त्रम् ।
भक्तिप्रदं भवविरिञ्चिनुतं मनोज्ञं गोपालकृष्णचरणैकपरार्धमन्त्रम् ॥
यः पञ्चरत्नानि यदूद्वहस्य श्रुत्वा प्रणीतं कविलक्ष्मिनरुसुना ।
पठन्ति ये पापविमोक्षणं सदा प्राप्नोति वैकुण्ठपदं दुरापम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1739

PM2611 प्रातःस्मरणीयपञ्चरत्नम्

Beginning:

प्रातर्नमामि यदुनाथपदारविन्दं पद्मालयार्चितकदम्बमनोभिरामम् ।
ब्रह्मेन्द्ररुद्रवरवन्दितराजमानश्रीमत्किरीटतटपीडितपादपीठम् ॥

End:

प्रातर्वदामि यदुराजगुणानुवादं संप्रार्थनीयशुभदं शुकवागुदारम् ।
शोभायमानमहदं श्रुतिवादबोधं भागवतनामकथितं भवसिन्धुपोतम् ॥
इदं पञ्चरत्नं मनोबोधरूपं(कृतं) लक्ष्मिनरसिंहकविना प्रणीतम् ।
सदा भक्तियुक्तः पठेद् यः प्रयत्नः(?त्नात्) परानन्दभावश्चिदानन्दकृष्णम् ॥

1757

70314 बालकृष्णस्तोत्रम्

Beginning:

अनन्तदेवं सुरपक्षरक्षकं सुखप्रदं गोपविभुं बवाम्बकम् । (?)
सुरप्रभानन्तरविप्रभासं नमामि कंसासुरमर्दनान्तकम् ॥
तमच्युतं पाण्डवपक्षपातिनं सुकेकिपिञ्छान्वितकाकपक्षकम् ।
लक्ष्मीपतिं मूढचयस्य पातिनं नमामि कञ्जाक्षमजाण्डकुक्षिकम् ॥

End:

अच्चपथ दयासिन्धो गाढावाहस्फुटक्षणम् ।
खण्डिताघं रेशनीशं बालकृष्णं भजाम्यहम् ॥ (?)

1758

68226 बालकृष्णाष्टकम्

Beginning:

स्मितविकसितवक्त्रं रक्तमौलिं सुवेणुं सुललितमणिहारं वारिजाक्षं वदान्यम् ।
तरुणजलदनीलं गीतगोपालवृन्दं परमपुरुषमीशं बालकृष्णं नमामि ॥

End:

सकलनिगमवाक्यैः संततं ब्रह्मरूपं सकलजननिवासं योगिनां रक्षितारम् ।
अकलितकरुणाब्धिं वन्दितं योगिवृन्दैः परमपुरुषमीशं बालकृष्णं नमामि ॥
त्रिविधकरणभक्त्या बालकृष्णाष्टकं यः पठति तरति दुःखं सर्वसौभाग्यसिद्धिम् ।
विदितपरमपुरुषं प्राप्नुयाच्चिन्तितार्थं स पुरुणनरकहारे शाश्वतं स्थाणुमाद्यम् ॥ (?)

Colophon:

बालकृष्णाष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1776

PM2741 **भगवद्विचारललितार्या**

Beginning:

निगमागमप्रबोधं विबुधनुतं वासुदेवपदवाच्यम् ।
देवं गुरुं च वन्दे श्रीहरिसर्वोत्तमत्वचिदवाप्त्यै ॥ १ ॥
ब्रह्माद्यमरसमूहान् नारदमुख्यान् समस्तदेवर्षीन् ।
ब्रह्मर्षीनपि वन्दे वर्णोचितकर्मरतिकृते मनसः ॥ २ ॥

End:

त्वं निखिलदोषरहितो व्याप्तश्च सकलजगदीशः ।
कालत्रयनिरपायः सर्वज्ञो विजयसे सदात्मरतिः ॥ ४९ ॥
गोविन्दाचार्येण श्रीकौलगिवासुदेवगुरुकृपया ।
प्रीत्यर्थमेव हि हरेर्ग्रथिता **भगवद्विचारललितार्याः** ॥ ५० ॥
रचिता वसता स्वार्याः चेरकेरलदेशयोः ।
भगवद्विचारललिताः कलिमाने शुभे धवे ॥

Colophon:

इति **श्रीभगवद्विचारललितार्याः** संपूर्णाः ।

1780

69488 **मङ्गलं भगवानितिश्लोकव्याख्या**

Beginning:

मङ्गलं भगवान् विष्णुर्मङ्गलं मधुसूदनः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलं गरुडध्वजः ॥

अस्यार्थः—विष्णुः श्रीमन्नारायणः वः मङ्गलं सकलकार्यप्राप्तिहेतुभूतं श्रीमद्विष्णवाराधनात्मकं कर्मविशेषं ददात्वित्याशीर्वादः । विष्णुशब्दः विष्लृ व्याप्तावित्यस्माद् धातोः स्नुप्रत्यये कृते निष्पन्नः नारायणवाचकः । विष्णुर्नारायणः कृष्ण इति कोशात् विष्णुपदस्य भगवति नारायणे शक्तिग्रहात् ।

End:

अत्र पुण्डरीकपदमपि योगरूढम् । रूढ्यर्थे योगार्थस्यापि संभवात् । तदुक्तं माघकविना निदाघधामानमित्यादि । अत्र श्रीकृष्णं मुदं प्रति को हेतुरित्याकाङ्क्षायां माघकविनैव उक्तं युगान्तकालेत्यादिना । पुनः कीदृश इत्याकाङ्क्षायामाह—गरुडध्वज इति । गरुडः ध्वजे यस्य सः । एतादृशमहिमायुतः श्रीमच्छङ्खचक्रगदापाणिः वः धनकनकवस्तुवाहनाद्यनेकदुर्गाधिपत्यं दत्त्वा युष्मान् पात्वित्याशीः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

The following two verses are added at the end:

सौभाग्यं सविता तनोतु सततं चेन्दुर्यशो निर्मलं
भूतिं भूमिसुतो बुधस्तु बुधतां जीवश्चिरंजीवितम् ।
साम्राज्यं भृगुजोऽर्कजो विजयतां राहुर्महाधैर्यतां
केतुः सर्वशुभं तनोतु सततं सर्वे ग्रहास्त्वद्विधे ॥
गाम्भीर्ये सरितांपतिर्हिमगिरिर्धैर्ये च कर्णोऽपर-
स्त्वौदार्ये रघुवंशमौक्तिकमणी रामश्च शौर्येऽपरः ।
काव्यालंकृतिशब्दतर्कविषये वाचस्पतिर्नेतरः
श्रीहर्याख्यमहीसुरो विजयते श्रीमद्दयासागरः ॥

1787

66843 मुकुन्दप्रसादस्तोत्रराजः

Beginning:

अलंकारमोंकारमञ्जूषिकायास्त्रिलोकीनिधानं त्रिवेदीनिधानम् ।
मणिं कंचिदीडे सुमङ्गल्यशीलं यशोदानशूरं यशोदाकिशोरम् ॥ १ ॥
सान्द्राभमिन्दीवरश्यामगात्रं सनन्दादियोगीन्द्रवन्द्यं पवित्रम् ।
शरण्यं सहस्रांशुशीतांशुनेत्रं प्रपद्येऽनवद्याङ्गमक्रूरमित्रम् ॥ २ ॥

End:

नमेदेष मूर्धा पदाम्भोरुहं ते तवैवार्चयेत्ताविमौ चापि हस्तौ ।
त्वदीयानि पुण्यानि धामानि गच्छेत् पदद्वन्द्वमेतन्ममानन्त विष्णो ॥ ४० ॥
पुरे वा वरे वा गिरौ वा समुद्रे यदा यत्र कुत्रापि यायाज्जनोऽयम् ।
तदा तत्र तत्रापि पक्षीन्द्रकेतो भवानेव भद्रं विधेयादमेयम् ॥ ४१ ॥
तनोति श्रियं तावदाधिं धुनीते करोति द्रुतं शर्म कर्माणि दोग्धि ।
प्रतापं दुरापं च विज्ञानरत्नं प्रदत्ते च मुक्तिं मुकुन्दप्रसादः ॥ ४२ ॥

Colophon:

इति मुकुन्दप्रसादो नाम स्तोत्रराजः संपूर्णः ।

1812

69730 यदुगिरिनारायणस्तवः

Beginning:

तर्कातर्किमुधाग्रहप्रतिवदद्दुर्वादिदुर्वारदु-
गर्वोर्वीधरकूलकुट्टनकलादम्भोलिवाग्गुम्भनः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

व्यासोन्नीतनिशातनीतिदलितप्रच्छन्नबौद्धव्रजः
श्रीरामावरजो मुनिर्विजयते सिद्धान्तजैत्रध्वजः ॥ १ ॥
आशासे षट्पदामोदवहां गुरुपरंपराम् ।
श्रीनारायणपादाब्जमधुधारामिवापराम् ॥ २ ॥
एधतां यतिराजस्य साम्राज्यं सर्वतोमुखम् ।
यत्र संपत्कुमारोऽपि युवराजपदास्पदम् ॥ ३ ॥
वन्दे भगवतः पादूं वकुलामोदमेदुराम् ।
तत्पदामर्शसंपन्नमञ्जुशिञ्जामनोरमाम् ॥ ४ ॥
स्वामी सुशीलः सुलभः सर्वज्ञः सर्वशक्तिधृक् ।
वत्सलो यत्सहायस्तां वन्दे यदुगिरीश्वरीम् ॥ ५ ॥

End:

जनो यत्सीमान्ते यतिनृपतिवार्तामहिमवित्
कुटिं कुर्वन्नीष्टे परमपदवाटीवितरणे ।
तदार्यागारान्तावक्रमपनेतुः किल समाः
शतं भोगस्थानं मम भवतु नारायणपुरम् ॥ ७७ ॥
अचिन्तयित्वा मच्चित्तमालोक्याचार्यसंततिम् ।
दयानिधे निधेहि त्वद्दासदास्यश्रियं मयि ॥ ७८ ॥

Colophon:

इति श्रीयदुगिरिनारायणस्तवं संपूर्णम् ।

The following is the end of 20 verses of *nīti* added after the colophon:

नैषा पश्यति राक्षस्यो नेमान् पुष्पफलद्रुमान् ।
एकस्थहृदया नूनं राममेवानुपश्यति ॥
परद्रव्येषु जात्यन्धाः परदारेष्वपुंसकाः ।
परिवादेषु ये मूकास्तेऽतीव दयिता मम ॥
प्रयच्छति यशस्त्यागः सत्यं धर्मं प्रयच्छति ।
प्रयच्छति श्रियं नीतिरायुरन्नं प्रयच्छति ॥

1813

73488 **यदुगिरिनारायणस्तवव्याख्या**

This is a comm. on the Stotra described in MD. 10223 (not 10222) and identical with MD. 10225.

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1814

TR818 यदुनाथसुप्रभातम्

Beginning:

यामिन्यपैति यदुनाथ विमुञ्च निद्रा-
मुन्मेषमृच्छति तवोन्मिषितेन विश्वम् ।
जातः स्वयं खलु जगद्धितमेव कर्तुं
धर्मप्रवर्तनधिया धरणीतले त्वम् ॥ १ ॥
अश्रान्तसंततिभिराभरणप्रकाशै-
रारात्रिकं प्रमुखयन्त्य इवोपचारम् ।
इच्छन्ति ते प्रथमदृष्टिमनन्यलभ्यां
पद्माननाः पदनिवेशितधन्यहस्ताः ॥ २ ॥

End:

दिनमुख इति नाम श्रावितः सूतपुत्रैः
अभजत जितनिद्रो जागरं यादवेन्द्रः ।
सरिदुपगमकाले साधुसंरक्षणार्थी
मुनिभिरिव स एव स्तूयमानो मुकुन्दः ॥ ८१ ॥
धनमिव निगमानां धर्ममुत्तम्भयिष्यन्
त्रिजगदनुविधेयं कर्म निष्पाद्य सांध्यम् ।
सितगुणपरिधानैः सेवितो मन्त्रिमुख्यैः
अलमकुरुत नाथो हैममास्थानपीठम् ॥ ८२ ॥

Colophon:

इति यदुनाथसुप्रभातं समाप्तम् ।

1830

TR315 रघुवीरसुप्रभातम्

Beginning:

परिणतिपरिशंसी मन्दमन्दं निशायाः
मृदुमधुरनिनादो जृम्भतेऽयं मृदङ्गात् ।
करतलपरिमृष्टाद् बन्दिनामागतानां
रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ १ ॥
मुहुरविकलगीतैर्मोहयन्निन्द्रियौघं
श्रुतिपुटविवराभ्यां मन्दमन्तः प्रविश्य ।
अयमपहरति द्राक् मानसं वेणुनादो
रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

तव चरणसरोजद्वन्द्वसंवाहनेन
ह्ययमपि गमयित्वा शर्वरीं निर्निमेषम् ।
अरुणनयनकोणः प्राञ्जलिर्वायुसूनुः
रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ ८ ॥
कमपि कुलिशपाणेरायुधेनाप्यभेद्यं
रचयसि यदि सेतुं देव संसारसिन्धोः ।
तरति सुखमिदानीं सर्व एवात्र लोके
रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ ९ ॥

Colophon:

रघुवीरसुप्रभातं समातम् ।

1836

70910 रङ्गनाथस्तोत्रम्

Beginning:

सतप्राकारमध्ये सरसिजमुकुलोद्भासमाने विमाने
कावेरीमध्यदेशे पृथुलतरलसच्छेषपर्यङ्कभागे ।
निद्रामुद्राभिरामं कटिनिकटशिरःपार्श्वविन्यस्तहस्ते
पद्माधात्रीकराभ्यां परिचितचरणं रङ्गनाथं भजामि ॥ '
किरीटकेयूरसुवर्णकुण्डलं प्रलम्बमुक्तामणिहेमभूषणम् ।
विशालवक्षःस्थलशोभिलक्षणं श्रिया च देव्याध्युषितोरुविग्रहम् ॥
प्रततचार्मीकरचारुवाससं सुमेखलं नूपुरशोभिताङ्घ्रिकम् ।
सुवर्धनीजातमृणालकोमलं दधानमच्छच्छवियज्ञसूत्रकम् ॥

End:

कौसल्या सुप्रजा + + + दैवमाह्निकम् ॥

यस्य प्रसादकलया बधिरः श्टणोति पङ्गुः प्रधावति जवेन च वक्ति मूकः ।
अन्धः प्रपश्यति सुतं लभते जयश्रीस्तं देवदेवशरणं शरणं गतोऽस्मि ॥

ततस्तु + + + न्यवेशयत् । तं दृष्ट्वा + + + परिषस्वजे । तासा + + + मन्मथः ॥

1840

PM2621 राघवाष्टकम्

This is same as MD. 10272 and printed in the edition of *Viṣṇusahasranāmastotra*, Sastrasanjivini Press, Madras, 1909 (Gr.).

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1854

PM2593 **रामचन्द्रचरणारविन्दस्तोत्रम्**

Beginning:

श्रीजानकीकरसरोरुहलालनीयं सुग्रीवमारुतिविभीषणकाङ्क्षणीयम् ।
ब्रह्मादिदेवसनकादिभिरर्चनीयं वन्दे सदा रघुपतेश्चरणारविन्दम् ॥ १ ॥

End:

ध्येयं सदा मुनिगणैः सुरसिद्धसेव्यमायुष्करं हरिगणेशगुपूजनीयम् ।
वाञ्छास्पदं भुवनमङ्गलहेतुभूतं वन्दे सदा रघुपतेश्चरणारविन्दम् ॥ १६ ॥

Colophon:

इति श्रीरामचन्द्रचरणारविन्दस्तोत्रं संपूर्णम् ।

1857

75590 **रामचन्द्रमानसिकम्**

Beginning:

यत्प्रसादादहं स्वल्पः साक्षाद्भूमा भवाम्यहम् ।
तं नमाम्यौपनिषदं रामं सच्चित्सुखात्मकम् ॥ १ ॥
यं मत्वा मुनयः सर्वे तन्मयाः स्युस्तपोधनाः ।
तं त्वामहं परात्मानं रामचन्द्राभिवादये ॥ २ ॥
सर्वोपनिषदामर्थं नित्यमुक्तमविक्रियम् ।
ब्रह्मैवास्मीति निश्चित्य गुरोर्वाक्यं समाश्रये ॥ ३ ॥

End:

श्रीरामचन्द्रपरमहंसपादाब्जसेविना ।
भाविता **शिवरामेण** समाधौ सविकल्पके ॥ ३८ ॥
येनेत्थं रामचन्द्रीयभावना भाविता भवेत् ।
स निस्त्रैगुण्यतामेत्य साक्षाद्रामो भवेदिह ॥ ३९ ॥

1858

71576 **रामचन्द्रस्तोत्रम्**

Beginning:

इन्दीवरश्यामलमायताक्षं धनुर्धरं नीलजटाकलापम् ।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां निषेव्यमाणं प्रणतोऽस्मि रामम् ॥ १ ॥
नमस्ते रामचन्द्राय लोकानुग्रहकारिणे ।
अरावणं जगत्कर्तुमवतीर्णाय भूतले ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

लङ्केश्वरवधाद्राम पालितं हि जगत् त्वया ।
रक्ष रक्ष जगन्नाथ पाह्यस्मान् जानकीपते ॥ १२ ॥
स्तुत्वैवमृषय: सर्वे तूष्णीं तस्थुर्द्विजोत्तमा: ।
य इदं रामचन्द्रस्य स्तोत्रं मुनिभिरीडितम् ॥ १३ ॥
त्रिसंध्यं पठते भक्त्या भुक्तिं मुक्तिं च विन्दति ।
प्रयाणकाले पठत: न भीतिरुपजायते ॥ १४ ॥
एतत्स्तोत्रस्य पठनात् भूतवेतालकादय: ।
नश्यन्ति रोगा नश्यन्ति नश्यते पापसंचय: ॥ १५ ॥
पुत्रकामो लभेत् पुत्रं कन्या विन्दति सत्पतिम् ।
मोक्षकामो लभेन्मोक्षं धनकामो धनं लभेत् ।
सर्वान् कामानवाप्नोति पठन् शृण्वन्निमां स्तुतिम् ॥ १६ ॥

Colophon:

इति सेतुमाहात्म्ये रामचन्द्रस्तोत्रं संपूर्णम् ।

1860

PM2780 रामचारित्रमञ्जरी

This Stotra is printed in *Stotramañjarī*, pp. 195-7 and also published by Parimala Publishing House, Nanjangud (Mysore State).

Beginning:

श्रीमान् विष्णु: प्रजातो दशरथनृपते रामनामाथ नीतो
विश्वामित्रेण मन्त्राह्वदनुजसहितस्ताटकाघातकोऽस्त्रम् ।
ब्रह्माख्यं प्राप्य हत्वा निशिचरनिकरं यज्ञपालो विमोच्या-
हल्याशापं च भङ्क्त्वा शिवधनुरुपयन् जानकीं न: प्रसीदेत् ॥ १ ॥

End:

यज्ञांस्तन्वंस्त्रिकोटीन् व्यतनुत भरताद्य: सुरानीकवाक्या-
द्यास्यन् धामात्रिपुत्रं भुजिसमयमयन्नात्मसूनुं स्वराज्ये ।
कृत्वा श्रीह्रीहनूमद्धृतिविमलचलच्चामरच्छत्रशोभी
ब्रह्माद्यै: स्तूयमानो निजपुरविलसत्पादपद्मोऽवतान्माम् ॥ ११ ॥
इति श्रीरामचारित्रमञ्जरी लेशत: कृता ।
राघवेन्द्रेण यतिना भूयाद्रामप्रसाददा ॥

Colophon:

इति श्रीराघवेन्द्रतीर्थयतिकृता राममञ्जरी समाता ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1862

67633 रामचूर्णिका

Beginning:

श्रीमदखिलाण्डकोटिब्रह्माण्डभाण्डतण्डोपतण्डकरण्डमण्डलशान्तोद्दीपितसगुणनिर्गुणातीतसच्चिदानन्दपरात्परतारकब्रह्माह्वयदशदिशप्रकाशं, सकलचराचराधीशं कमलसंभवभवपाशच्छेदननिखिलमुनिजनप्रमुखबृन्दारकबृन्दवन्दनीयसंदीप्तदिव्यचरणारविन्दं श्रीमुकुन्दं सुरबृन्दवन्दितपादारविन्दमुकुन्दकृतावतारं श्रीरघुवीरम्।

End:

सकललोकजनपरिपालनं भरतशंभुकासुरसंहारराज्याभिषेकप्रदं शत्रुघ्नलवणासुरसंहारराज्याभिषेकप्रदं शताश्वमेधसकलक्रतुकृतमहत्प्रतापं दशवर्षसहस्राणि दशवर्षशतम् एकच्छत्राधिपत्यराज्यपरिपालनं कौसल्याकैकेयीसुमित्रासकलजनसकलसेनसकलवानरसीतासमेतवैँकुण्ठमोक्षप्रदायकम् अनन्तकल्याणगुणाभिरामम् आश्रितमनोऽभीष्टकल्याणफलप्रदं नवमिकल्याणराम(म)हं भजेऽहं भजेऽहं भजेऽहम्। श्रीरामजयम्।

Colophon:

रामचूर्णिकै।

1863

71547 रामचूर्णिका

End:

. . . गर्भसंदर्भनिजकथाङ्कृतमेधासुधि . . . र्वपार्वतीजपपरिपावितितारकब्रह्मनाम . . . मम्। सरससद्गुणाभिरामम्। संपूर्ण . . . पासमुद्रम्। भवजनितोपद्रवच्छिदम् . . . भक्तफलप्रदज्ञानमुद्रम्। भद्राचल . . . भजेऽहम्। श्रीरामाय गुरवे नमः।

1864

PM915 रामध्यानम्

Beginning:

श्रीरामागच्छ भगवन् रघुवीर नृपोत्तम।
जानक्या सह राजेन्द्र सुस्थिरो भव सर्वदा॥ १॥
सर्वलोकैकजननीं सीतां काञ्चनसंनिभाम्।

End:

रघुनन्दन मे देव श्रीरामाभिमुखो भव॥ ५॥
प्रसीद जानकीनाथ प्रसीद सुरनायक।
प्रसन्नो भव मे राजन्नासीनो भव राघव॥ ६॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1865

PM915 **रामध्यानम्**

Beginning:

मन्त्रपुष्पानन्तरध्यानस्तुतिः—

शरणं मे जगन्नाथ शरणं भक्तवत्सल ।
वरदो भव मे नाथ शरणं करुणानिधे ॥ १ ॥
नमो रामाय महते मङ्गलाय महात्मने ।
ससीताय नमस्तुभ्यं ज्योतिषां पतये नमः ॥ २ ॥

End:

श्रीरामाच्युत विश्वेश श्रीधरानन्त राघव ।
श्रीगोविन्द हरे कृष्ण नमस्ते जानकीपते ॥ १४ ॥
ब्रह्मानन्दैकविज्ञानं त्वन्नामस्मरणं परम् ।
त्वत्पदाम्भोजभक्तिं च देहि मे रघुनन्दन ॥ १५ ॥

1866

77644 **रामध्यानम्**

Beginning:

साकेते जननीकरार्पितलसत्कस्तूरिकासुन्दरे
फाले मौक्तिकशोभितं शशिनिभं स्वर्णाङ्कितं वर्तुलम् ।
चूडालम्बिमनोज्ञहारकलितं बिभ्राणमत्युज्ज्वलं
रामं कोसलमातृजं करगतं स्तन्यं पिबन्तं भजे ॥
बालं राममहं भजामि सततं फाले ललामोज्ज्वलं
नीलेन्दीवरलोचनं मरतकश्यामं मनोज्ञस्मितम् ।
कौसल्याशयने शयानमभितो देवैरदुष्टैः सदा
लोकान् पालय पाहि नो रघुपते मायार्भकेत्यद्भुतम् ॥

End:

सीताराममनर्घ्यरत्नखचिते सिंहासने संस्थितं
नाट्यैरप्सरसां मृदङ्गनिनदैर्गन्धर्वगानैः शुभैः ।
पुष्पैः स्वस्तरुसंभवैः क्रतुभुजामाशीर्वचोभिर्गिरा
(स्वस्त्यार्थैष्ट) विश्वामित्रवसिष्ठमुख्यमुनिभिः पट्टाभिषिक्तं भजे ॥ १० ॥

Colophon:

रामध्यानं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1889

73243 **राममत्तेभम्**

Beginning:

श्रीकामुको निखिलनाकाल्यैर्विपुलशोकाकुलैरभिनत:
रेखारथाङ्गवरशङ्खाङ्कित: कपटशाखामृगै: सह सुरै: ।
यो गामुपेत्य वहुवेगान्वित: कलितयागात् स्वयं दशरथात्
श्लाघाशतैर्दिविप्रदोघार्पितै: सजलमेघाकृति: समजनि ॥ १ ॥

End:

मत्तेभयूथमिदमुत्तेजिताशुगनिकृत्तेन्द्रवैरिशिरसे
त्रस्तापतज्जनसमस्तावनप्रणयविस्तारितात्मयशसे ।
श्रीजानकीसहितराजाधिराजतनवे जायतां सदुपदा
पादेऽर्पितं ननु महादेवनामकविना देवतार्चितपदे ॥ ९ ॥

Colophon:

राममत्तेभं संपूर्णम् ।

1890

72368 **राममानसिकम् (राममानसपूजा)**

Beginning:

सुतीक्ष्ण उवाच—

हृदये मानसी पूजा कीदृशी वा वर प्रभो ।
उपचारै: कतिविधै: पूज्यते रघुनन्दन: ॥

अगस्त्य उवाच—

रामं पद्मपलाशाक्षं कालाम्बुदसमप्रभम् ।
स्मितवक्त्रं समासेन चिन्तयेच्चिन्तितातये ॥
रागादिकलुषं चित्तं वैराग्येण सुनिर्मलम् ।
कृत्वा ध्यायेत् सदा रामं भवबन्धविमुक्तये ॥

End:

जातिभ्रष्टोऽतिपाप्मा(ति) परधनपरदारेषु नित्योद्युक्त: (?)
स्तेयी ब्रह्मघ्नमातापितृवधनिरतो योगिबृन्दापकारी ।
य: संपूज्याभिरामं पठति च हृदयं रामचन्द्रस्य भक्त्या
योगीन्द्रैरप्यलभ्यं पदमपि लभते सर्वदेवैश्च पूज्य: ॥

Colophon:

इति अगस्त्यसंहितायाम् अगस्त्यसुतीक्ष्णसंवादे श्रीराममानसपूजाविधानं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1897

67625 **रामशतकम्**

Beginning:

श्रीरामचन्द्रः श्रितपारिजातः + + + आतनोतु ॥ १ ॥

श्रीरामं जनकक्षितीशजमुखाम्भोजोल्लसत्षट्पदं
श्रीमद्भानुकुलाब्धिकौस्तुभमणिं श्रीचिह्नवक्षःस्थलम् ।
श्रीनाथं सुरवृन्दरत्नमकुटालंकारपादाम्बुजं
श्रीवत्सोज्ज्वलमिन्द्रनीलसदृशं श्रीरामचन्द्रं भजे ॥ २ ॥

End:

भङ्गोत्तुङ्गमयामृताब्धिलहरीमध्ये विराजार्चिते
द्वीपे निर्जरपादपैः परिवृते कर्पूरदीपोज्ज्वले ।
ओंकारान्तरमन्दिरे मणिमये शेषान्तरे शायिनं
लक्ष्मीयुक्तमपारचित्सुखपदं रामं भजे तारकम् ॥ ९९ ॥
वैकुण्ठे नगरे सुरेन्द्रमहिते चानन्दवप्रान्तरे
नानारत्नविनिर्मितस्फुटपटुप्राकारसंवेष्टिते ।
सौधेन्द्रोपलशेषतल्पललिते नीलोत्पलच्छादिते
पर्यङ्के शयनं रमादिसहितं रामं भजे तारकम् ॥ १०० ॥

1905

67953 **रामस्तुतिः**

Beginning:

रामो न गच्छति न तिष्ठति नानुशोचेन्नाकाङ्क्षति त्यजति नो न करोति किंचित् ।
आनन्दमूर्तिरचलः परिणामहीनो मायागुणाननुगतो हि तथा विभाति ॥ १ ॥
जातिभ्रष्टोऽतिपापी परधनपरदारेषु नित्योद्यतो वा
स्तेयी ब्रह्मघ्नमातापितृवधनिरतो योगिवृन्दापहारी ।
योऽयं संपूज्य रामं पठति च हृदये रामचन्द्रस्य भक्त्या
योगीन्द्रैरप्यलभ्यं पदमपि लभते सर्वदेवैः स पूज्यः ॥ २ ॥

End:

हत्वा युद्धे दशास्यं त्रिभुवनविषमं वामहस्तेन चापं
भूमौ विष्टभ्य तिष्ठन्नितरकरधृतं भ्रामयन् बाणमेकम् ।
आरक्तोपान्तनेत्रः शरदलितवपुः सूर्यकान्तिप्रकाशो
वीरश्रीमासुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥ ७ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1906

67953 रामस्तुतिः

Beginning:

कल्याणं कलयन्त्वपाङ्गनिवहाः कन्दर्पकोटिद्युतेः
सीतायाः कुचवक्त्रचन्द्रकबरीष्वन्योन्यमालोकने ।
मुक्ताहारमरीचिफुल्लसुमनःशोभाकृतो लज्जिता
रामस्य स्मितचन्द्रिकासहचराः सीताविवाहोत्सवे ॥ १ ॥

End:

त्वन्नामामृतदुग्धसिन्धुलहरीमग्नान्तरङ्गः सदा
शंभुस्त्वद्विभवं हि वेत्ति भगवान् श्रीराम रामा मुनेः ।
त्वत्पादाब्जरजःकणश्रियमहं कीदृक् सदोषा गिरः
स्वीकृत्याप्यव किं शिशोर्न पितुरप्यर्थं वचः स्यान्मुदे ॥ १४ ॥
पञ्चत्रिंशद्व्यनामानुवृत्ता पञ्चाघानि ध्वंसयन्ती स्तुतिस्ते ।
श्रीरमेयं सर्वदाभीष्टदात्री जीयाल्लोके त्वत्प्रसादान्महात्मन् ॥

1907

PM2608 रामस्तोत्रम्

Beginning:

रामं रत्नकिरीटकुण्डलधरं केयूरहारान्वितं
सीतालंकृतवामभागममलं सिंहासनस्थं विभुम् ।
सुग्रीवादिसमस्तवानरवरैः संसेव्यमानं सदा
विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं भजे ॥
आयुर्द्रोणसुते श्रियं दशरथे शत्रुक्षयं राघवे
शौर्यं शान्तनवे बलं हलधरे सत्यं च कुन्तीसुते ।
ऐश्वर्यं नहुषे क्रतुं शतमखे मानं च दुर्योधने
विज्ञानं विदुरे भवन्तु भवतात् कीर्तिस्तु नारायणे ॥

End:

(यः पारि ? यं प्रव्र)जन्तमनुपेतमपेतकृत्यं
द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवो विनेदु-
स्तं सर्वभूतसुहृदं मुनिमानतोऽस्मि ॥ (भागवतम् १.२.२)
वैदेहीसहितं च लक्ष्मणयुतं कैकासुतं सानुजं
सुग्रीवेण विभीषणानिलसुतं नीलं नलं साङ्गदम् ।
विश्वामित्रवसिष्ठगौतमभरद्वाजानुसंसेवितं
रामो मारुतिसेवितः स्फुरतु नः साम्राज्यसिंहासने ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1910

72359 रामस्तोत्रम्

Beginning:

श्रीमीनादिदशावतारकृतगोभूमीसुरेन्द्रावनः
सामीर्याशयमन्दिरः क्षितिसुताकामी दशास्यान्तकः ।
वामीवह्निनिवासशिक्षणचणश्रामीकराच्छादनः
सामीप्यं प्रददातु मे रघुकुलस्वामी जगन्नायकः ॥ १ ॥

End:

दात्रं जन्मलताततेर्मम तव स्तोत्रं नतिं चित्तरो-
श्चैत्रं काममुखेभशिक्षणविधौ तोत्रं त्वदीयं यशः ।
क्षेत्रं मुक्तिवधूं च पावनतमं गात्रं भवन्मूर्तिगं
नेत्रं मां रघुराम तावकदयापात्रं कुरुष्व प्रभो ॥ ३० ॥

1914

67323 रामाष्टकम्

Beginning:

इन्दीवरदलश्यामः पुण्डरीकनिभेक्षणः ।
धृतकोदण्डतूणीरो राम एव गतिर्मम ॥ १ ॥
हारकङ्कणकेयूरमालिकानूपुरादिभिः ।
सीतादेवीसमाश्लिष्टो राम एव गतिर्मम ॥ २ ॥

End:

शङ्खचक्रगदाशार्ङ्गबाणतूणीरशोभितः ।
चतुर्भुजः खरध्वंसी राम एव गतिर्मम ॥ ८ ॥
रामाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
अभयं संपदं चैव तस्मिन् दद्याच्छ्रियं हरिः ॥ ९ ॥

Colophon:

इति श्रीरामाष्टकं संपूर्णम् ।

1916

77644 रामाष्टकम्

Beginning:

अनेकवन्द्ये जगदेकवन्द्ये जैत्रे पवित्रे जगरात्रयात्रे (?) ।
दूरे विदूरे भवदूरदूरे रामेति रामे रमतां मनो मे ॥ १ ॥
अम्भोरुहाक्षे कृतयज्ञरक्षे वियातरोषे विलसत्प्रकोष्ठे ।
भग्नेशचापे प्रदत्राणचापे रामेति रामे रमतां मनो मे ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

सुचारुजङ्घे भृददैत्यसंघे सदारदारेऽनिशमत्युदारे ।
संप्राप्तसीते सुरबृन्दगीते रामेति रामे रमतां मनो मे ॥ ८ ॥
रामाष्टकमिदं पुण्यं य: पठेद्भक्तिसंयुत: ।
चिन्तयेत् प्रातरुत्थाय पठन् कैवल्यसिद्धिदम् ॥

Colophon:

रामाष्टकं संपूर्णम् ।

1917

68345 रामाष्टकम्

Beginning:

आदित्यकोटिविलसत्किरीट पिञ्छालकप्रस्फुरदास्यपद्म ।
(सु)सुन्दरभ्रूकमलायताक्ष श्रीराम विष्णो भगवन् नमस्ते ॥ १ ॥
सरासभृङ्गाश्रितकर्णपूर कर्णस्फुरत्कुण्डलमण्डितास्य ।
तिलप्रसूनोपमचारुनास श्रीराम विष्णो भगवन् नमस्ते ॥ २ ॥

End:

सुकेतकीकोरकचारुजङ्घ माणिक्यमञ्जीरयुताङ्घ्रिपद्म ।
नतामर श्यामल लोकनाथ श्रीराम विष्णो भगवन् नमस्ते ॥ ८ ॥
श्रीरामाष्टकं य: पठतीत्यह: स भक्त्या सकृत्सन्यमये तणम् (?) ।
आगोहरं ज्ञानकरं पवित्रं विद्यां च लक्ष्मी: सुयशश्च मुक्तिम् ॥

Colophon:

रामाष्टकम् ।

1918

77644 रामाष्टकम्

Beginning:

माता रामो मत्पिता रामचन्द्रो भ्राता रामो मत्सखा राघवेश: ।
सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं जाने नैव जाने न जाने ॥
सिंहासनस्थं सुरसेवितव्यं रत्नाङ्कितालंकृतपादपद्मम् ।
सीतासमेतं शशिसूर्यनेत्रं रामं भजे राघवरामचन्द्रम् ॥ १ ॥
सुग्रीवनाथं सुजनात्मरूपं लङ्काहरं राक्षसवंशनाशम् ।
शरश्रियात्तं विपुलायताक्षं रामं भजे राघवरामचन्द्रम् ॥ २ ॥

End:

पद्मासनस्थं गणसेवितव्यं पद्मालयानन्दकटाक्षवीरम् ।
गन्धर्वसिद्धैरभिगीयमानं रामं भजे राघवरामचन्द्रम् ॥ ८ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

रामाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं तत्क्षणेन विनश्यति ॥

Colophon:

रामाष्टकं संपूर्णम् ।

1923

74000 **रामाष्टप्रासस्तवः**

The MS. contains the following verses which are not found in the printed edition:

देहातीतयतिप्ररूढमहिमा मोहाब्धिसंतारणे
हाहानाविकधोरणीमधिकृतो बाहालतायामवान् ।
स्वाहाभर्तृभवाधिकस्तनुरुचा नीहारशैलो धृतौ
हाहाभिष्टुतवैभवो नियमिनां गेहातिथिः कानने ॥ ११६ ॥
चूडाबद्धसुरापगेन सततं क्रीडारसज्ञोऽधिकं
व्रीडानम्रितमार्गवो रघुभुवां राडाविरस्त्वग्रतः ।
क्रोडावन्महिलमुखाग्निविलसद्वीडाकरेषू रणे
नीडावासजटायुवर्णिततुराषाडातिजन्मश्रवः ॥ ११७ ॥
षोढाचोदितकर्मसु त्रिषु रतः सोढा रिपूणां रणे
मूढाग्रेसरराक्षसाधिपबलप्रौढाहवेष्वग्रणीः ।
गाढालिङ्गनतत्परैर्मुनिजनैर्गूढाशयैर्वन्दितः
लीढाब्धिः शरवह्निनावतु विभुर्वोढा भरस्य क्षितेः ॥ ११८ ॥
पारावारमदावभञ्जनपटुर्नाराचसंस्पर्शनात्
स्फाराहंकृतिगोत्रभिद्भवतिरस्काराय मूर्च्छत्तृणः ।
धारादत्तनतापवर्गविभवो धाराधरश्यामलो
वीराग्रेसरमण्डलीपरिवृढः श्रीराघवः पातु नः ॥ ११९ ॥
नन्ता यत्पदपद्मयोरिह जनोऽनन्तागमालम्बनी
गन्ता काममपि नैपुणीं न पुनरागन्ता च गर्भाशयम् ।
संतापं सततस्रवन्मदझरीसंतानराजत्करो
दन्ताग्रेण हिनस्तु विघ्नजनितं दन्तावलास्यः स नः ॥ १२० ॥
क्षेमाणि स्वयमातनोतु जगतां कामाभिरामाकृतिः
भूमा कोऽपि भुजङ्गभूधरशिरःसीमातमालोपमः ।
हेमाडम्बरपश्यतोहररुचिं वामालकां काममपि
प्रेमावेशवशेन वक्षसि वहन् वैमानिकेन्द्रार्चितः ॥ १२१ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1626

67012 लक्ष्मीनृसिंहध्यानम्

स्फटिकविमलदेहं दीप्तनासं त्रिनेत्रं त्रिदशगणशरण्यं दिव्यसिंहासनस्थम् ।
धृतरथपदशङ्खं सिन्धुकन्यासमेतं वरदकरमुपासे चेतसा श्रीनृसिंहम् ॥

1935

TR808 लक्ष्मीनृसिंहसुप्रभातम्

Beginning:

अम्ब प्रसन्नशरदिन्दुमुखि प्रपन्नपङ्कच्छटादलनपादसरोजयुग्मे ।
लक्ष्मीनृसिंहपरिरम्भणरम्यगात्रे लक्ष्मीनृसिंहदयिते तव सुप्रभातम् ॥ १ ॥
भानुः स्वभानुपरिरम्भणजृम्भदब्जपालिर्बलारिहरिदङ्गणमेति दीव्यन् ।
शश्वद्विनश्यति च नैशमिदं तमिस्रं लक्ष्मीनृसिंह भगवन् तव सुप्रभातम् ॥ २ ॥

End:

झष कूर्म वराह वटोऽरिपटो भृगुनन्दन राघव धेनुकहन् ।
वसुदेवसुतानघ कल्कितनो विजयी भव देव रमानृहरे ॥ २० ॥
रङ्गाधिराजशठजिद्गुरुपादपद्मभृङ्गः पराङ्कुशयतीन्द्रतपोधनेशः ।
हृद्यं ततान नतमङ्गलदायि पद्मासद्माश्रिताङ्कनरकेसरिसुप्रभातम् ॥ २१ ॥

Colophon:

इति लक्ष्मीनृसिंहसुप्रभातविंशतिः समाप्ता ।

1945

75692 लिङ्गभङ्गमुक्तिशतकव्याख्या

Beginning:

ओम् । श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः ।

यत्र देहत्रयारूढाहंभावो विलयं गतः ।
यद्वस्तुतो निराधानं तत्त्रैपदसुखं भजे ॥
नत्वा गुरुं लिङ्गभङ्गमुक्तिसाम्राज्यमिच्छताम् ।
विदेहमुक्तिशतकव्याख्येयं संप्रणीयते ॥

इह खलु स्वाविद्यापादालंकारानन्तकोटिब्रह्माण्डसदनप्राणिकदम्बहृदयसरोवरालंकारचरण-कमलेयं भगवती लीलाविभूतिः आपण्डितपामरं ब्रह्ममात्रमसन्नहीति श्रुत्यनुरोधेन निर्विशेषब्रह्ममात्रे भावरूपं तदतिरिक्तमत्यन्ताभावरूपं तस्य निष्प्रतियोगिकाभावरूपत्वेन न तयोराधाराधेयतेति . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

मायिकपदापह्नवसंसिद्धेयं विकलेबरमुक्तिस्तत्प्रापकपरमाद्वैतप्रकरणशतकं जातमाविर्भूतं संपन्नं संपूर्णमित्यर्थः।

परमाद्वैतप्रकरणशतकार्थविशारदः।
सर्वापह्नवसंसिद्धब्रह्ममात्रोऽवशिष्यते ॥
श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
शतप्रकरणव्याख्या लिखिता विदुषां मुदे ॥
परमाद्वैतप्रकरणशताख्याग्रन्थविस्तरः।
पञ्चत्रिंशत्प्रट्शताधिचतुःसाहस्रमण्डितः ॥

ओं श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्रार्पणमस्तु। श्रीरामजयम्। श्रीगुरुभ्यो नमः।

Colophon:

लिङ्गभङ्गमुक्तिशतकविवरणम्। समाप्तोऽध्यायः।

1958

TR823 वराहस्तुतिः

Beginning:

अथातः संप्रवक्ष्यामि श्रीवराहस्तुतिं बुधाः।
यस्याः श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥
शत्रवो घोरकर्माणो ये चान्ये भयहेतुकाः।
ते विद्रवन्ति नष्टाश्च जायन्ते मङ्गलान्यपि ॥
आधिव्याधिविनिर्मुक्ताः ग्रहपीडादिवर्जिताः।
भुक्त्वा भोगाननेकांस्तु मोक्षमन्ते भजेद् ध्रुवम् ॥
नमः श्वेतवराहाय महाकोलाय भूभृते।
यज्ञाङ्गाय शुभाङ्गाय विष्णवेऽमिततेजसे ॥
परब्रह्मस्वरूपाय शङ्खचक्रादिधारिणे।
भूदेवीविलसत्स्वीयकटये परमात्मने ॥

End:

कल्याणभाक् निरस्तापद्राजते नात्रसंशयः।
अतः सर्वैः सेवनीयं पठनीयं च भक्तितः ॥
श्रीवराहो हरिः साक्षात् प्रसीदति दयानिधिः।
तस्य पत्नी महालक्ष्मीर्नित्यं तस्य गृहे स्थिरा ॥
तद्वंश्यानां च बन्धूनां कृतकल्याणसंततिः।
तस्माच्छुभप्रदं स्तोत्रमेतद्देवेशतुष्टिदम्।
श्रेयोऽर्थिभिर्नरैः पाठ्यं नित्यक्षेमाय भूतले ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीवराहस्तुतिः संपूर्णा ।

1959

67160 वामनाष्टकम्

Beginning:

अथ पूर्वोत्तरपीठिकासहितं वामनाष्टकमालिख्यते—

कोयम्पुर्याः पुरस्ताद् द्वययुगघटिकादूरसीम्नि प्रसिद्धा
काञ्चीनद्युत्तरस्यां दिशि दुरितहरा या पुरी शिङ्गलाख्या ।
तस्यां श्रीवामनो यत् सतत(म)खिलवेदैकमृग्यो विभाति
प्रत्यक्षीकृत्य साक्षात् तदिह निवसतां हन्त सद्भाग्यलक्ष्मीः ॥ १ ॥
स्वकीयस्तुतिनिर्माणे यतमानस्य मेऽधुना ।
सहायभूतो भवतु करुणाब्धिः स वामनः ॥

End:

. . . . विषये मुख्याश्रयो वस्तुतो
यः सच्चित्सुखरूप . . . . परब्रह्मात्मकः संततम् ।
यो मायामयलोकनाट्यविभवप्रख्यातिमानप्यजः
सोऽजस्रं भुवि शिङ्गलापुरपतिः श्रीवामनः पातु नः ॥ ८ ॥
श्रीवामनाष्टकमिदं यो वा को वा दिने दिने ।
पठति श्रद्धया तस्य निवसेद्हृदि वामनः ॥

1961

72845 वासुदेवध्यानम्

श्रीभूम्यां नीलया च श्रितममल . . . सूरिभिः सेव्यमानो
दिव्ये श्री . . . . . भोगे . . चिदचिदा . . . . पविष्टम् ।
श्रीवैकुण्ठाधिना . . . . . जठरधागाद्भुतं दिव्यभू . . . .
. . . च्छ्रीवासुदेवं घनरुचिममल . . . . . . जुष्टम् ॥

1962

68345 वासुदेवाष्टकम्

Beginning:

आदिदेव महादेव देवदेव दयापर ।
जगन्मय जगन्नाथ वासुदेव नमोऽस्तु ते ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अनन्ताच्युत गोविन्द सनन्दादिजनप्रिय ।
मुकुन्द पुण्डरीकाक्ष वासुदेव नमोऽस्तु ते ॥ २ ॥

End:

भक्तप्रिय हृषीकेश मुक्तिप्रद जनार्दन ।
सत्यव्रत दयाशील वासुदेव नमोऽस्तु ते ॥ ७ ॥
लक्ष्मणाग्रज लक्ष्मीश लक्ष्मी . . . . धर ।
सूक्ष्मरूप महारूप वासुदेव नमोऽस्तु ते ॥ ८ ॥
वासुदेवाष्टकं पुण्यं भक्तितो यः प्रकीर्तयेत् ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

1963

67778 **विष्णुगद्यम्**

Beginning:

श्रीमदाखण्डलविधुशेखरविधिमुख्याखिलविनमल्लेखनिवहचूडाखचितदिव्यमणिनिचयोपचित-चकचकरुचिदीपिकाराजिनीराजितमञ्जुलमञ्जुकरतलतुलाकोटिकिंकिणीकटकाद्यलंकृतमुमुक्षुजनरक्षण-विचक्षणशुभलक्षणदक्षिणाभिमुखाङ्कुलिनखरेखादक्षितमहिमामन्दसुन्दरचरणारविन्दयुगलं विस्तारित-मुस्तपरिमलम् ।

End:

श्रीमदम्बुजवल्लीहृदयाम्बुजविचरत्कादम्बराजं खगराजवाहं संततं शरणं भजामि ।

1964

72845 **विष्णुध्यानम्**

विष्णुं शारदकोटिचन्द्रसदृशं शङ्खं रथाङ्गं गदा-
मम्भोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम् ।
आवद्धाङ्गदहारकुण्डलरमाशोभास्फुरद्वक्षसं
श्रीवत्साङ्कमुदारकौस्तुभधरं वन्दे मुनीन्द्रावृतम् ॥

1967

69447 **विष्णुपादादिकेशान्तस्तुतिः सव्याख्या**

Beginning:

शुक्लाम्बरधरं + + + शान्तये ॥

नाभिनालीकलोलम्बभङ्गिवाणीतपःफलम् ।
कुटुम्बि कलशाम्भोधेः कन्यया कलये महः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अलीकलोचनाटोपादलीकं रतये ददत् ।
विप्रलम्भं पुरस्त्रीणां पुष्णत्तेजो भजामहे ॥
गिरिपाथोधिपाथोजसदनानन्दधोरणीः ।
पदं कुर्वे नमस्यानामुमालक्ष्मीसरस्वतीः ॥
भगवत्पादपादादिकेशस्तुत्या मधुस्रुतः ।
व्याख्या वितन्यते रम्या नाम्नासौ सुखबोधिनी ॥

इह खलु सकलजगदनुग्रहाय स्वेच्छाकृतलीलाविग्रहपरिग्रहाः परमकारुणिकाग्रगण्याः सर्वज्ञ-शिखामणयः श्रीशंकरभगवत्पूज्यपादाः . . . ।

1968

75652 विष्णुपादादिकेशान्तस्तुतिः सव्याख्या

Beginning:

(र)मापतिपदाम्भोजपरिस्फुरितमानसम् ।
सेनापतिमहं वन्दे विष्वक्सेनं निरन्तरम् ॥

यस्य द्विरदवक्त्राद्याः + + + आश्रये ॥

सच्चिदानन्दरूपाय भक्तहृत्पद्मवासिने ।
श्रीमद्गोपालयोगीन्द्रगुरवे करवै नमः ॥

नाभीनालीक + + + महः . . . . ॥

1975

67765 वीरराघवस्तोत्रम्

Beginning:

श्रीमन्नृसिंहचरणाब्जनखेन्दुभासो भान्तु स्वयं मम समीहितसाधनेऽद्य ।
श्रीवासयोगिवरदेशिकशुद्धमुग्धहृत्पद्मसद्मवसतेरिव शुभ्रभूताः ॥ १ ॥
विपक्षपक्षविक्षोभदीक्षादक्षेण धीमता ।
शोध्यते राघवार्येण दशवारजपोऽनघः ॥ २ ॥
. . . .
श्रीमन् वीररघूद्वहाद्य भवतः स्तुत्यां प्रवर्तामहे
त्वन्माहात्म्यमवेक्ष्य मन्दमतयो लज्जामहे सांप्रतम् ।
स्तोतुं त्वां प्रभवन्ति नो पटुधियः प्राञ्चो विरिञ्चादयः
लज्जां निह्नुमहेतरां तत इह त्वस्मत्प्रयत्नः फली ॥ ९ ॥

End:

श्रीमन् हृत्तापनाशिन्यभिधकमलिनीनीरकल्लोलमाला-
लोलत्पाथोजजालप्रसृतमधुझरीशीकरामोदयुक्ते ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

रोघस्यादीन्यसि त्वं प्रदिशसि सकलं वाञ्छितं किंगृहेश
त्वत्तोऽप्येषाञ्झरी संदिशति किल फलानीप्सितान्यञ्जसाहो ॥
मूको जल्पाकति त्वच्चरणनलिनसंसेवनात् कोसलेन्दो
काणोऽप्यक्ष्णाभिपश्यत्यखिलमपि जगत्यञ्ज . . . . ।

1976

77644 **वीररामध्यानम्**

Beginning:

दिव्यस्यन्दनमध्यगं झणझणच्चापाञ्चितं भीषणं
कालाग्निप्रतिमानबाणकलितं घोरास्त्रतूणिद्वयम् ।
सौमित्रार्कजरावणानुजमरुत्पुत्रादिभिः सेवितं
रामं राक्षसवीरकोटिहरणं रक्ताम्बुजाक्षं भजे ॥
कोदण्डकोटिविनिवेशितबाहुदण्डमाखण्डलाद्यमरवर्षितपुष्पवर्षम् ।
आयोधनक्षितिरजःपरिधूसराङ्गमप्यस्तरं(?)रघुपतेरवसन्नशत्रोः ॥

End:

पटुजलधरधीरध्वानमादाय चापं पवनजवनमेकं बाणमाकृष्य तूणात् ।
अभयवचन (-दायी सानुजः सर्वतो मे रणहत-) दनुजः श्रीरामचन्द्रः सहायः ॥

Colophon:

वीरराघवध्यानं संपूर्णम् ।

1986

70257 **वेङ्कटेशमङ्गलाष्टकम्**

Beginning:

श्रीलक्ष्मीकुचकुम्भकुङ्कुमरजःपङ्काङ्कवक्षोज्ज्वल-
स्तारानाथदिवाकराक्षियुगलः संसेव्यमानः सुरैः ।
सेवानम्रसुरेन्द्रमस्तकलसन्माणिक्यदीप्ताङ्घ्रिकः
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्यात् सदा मङ्गलम् ॥ १ ॥

End:

श्रीमद्रामपदारविन्दमधुहृद्भृङ्गेण वैवाहिकं
श्रीलक्ष्मीपतिधीमता विरचितं श्लोकाष्टकं मङ्गलम् ।
नानावेदपुराणशास्त्रकुशलाः सम्यक् पठन्ति द्विजाः
तेषां वेङ्कटनायकेन्द्रवरदः कुर्यात् सदा मङ्गलम् ॥ ८ ॥

Colophon:

श्री वेङ्कटेशाष्टकम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

1996

67335 वेङ्कटेशस्तोत्रम्

Beginning:

स्वामिन्ननन्त पुरुषोत्तम पुष्कराक्ष भक्तार्तिभञ्जन हरे भगवन् मुरारे ।
श्री(मन्)नृसिंह नरलोकविडम्बनार्तलीलावतार तरुणेन्दुविलोचनेश ॥
लक्ष्मीमहीकरसरोरुहलालित.ङ्घ्रिपद्माप्रमेय मधुभञ्जन मञ्जुवेष ।
सन्मङ्गलप्रद विभो भजतां तवाङ्घ्रिपङ्केरुहस्मरणमर्थिभवार्तिनाशः ॥

End:

मायावी परमानन्दं त्यक्त्वा वैकुण्ठमुत्तमम् ।
स्वामिपुष्करणीतीरे रमया सह मोदते ॥
कल्याणाद्भुतगात्राय कामितार्थप्रदायिने ।
श्रीमद्वेङ्कटनाथाय श्रीनिवासाय ते नमः ॥

Colophon:

इति श्रीवराहपुराणे वेङ्कटगिरिमाहात्म्ये वेङ्कटेशस्तोत्रं नाम चतुर्दशोऽध्यायः ।
श्रीअलमेलुमङ्गासमेतश्रीवेङ्कटाचलस्वामिने नमः । श्रीवेङ्कटेशस्तोत्रं संपूर्णम् ।

1998

67338 वेङ्कटेशस्तोत्रम्

Beginning:

श्रीश श्रिया घटकया + + + जातु मह्यम् ॥

श्रीकान्ताकुचकुम्भकुङ्कुमरजःपङ्काङ्कितोरःस्थलं
नानाभूषणभूषितं नवघनश्यामं प्रसन्नाननम् ।
क्षीराम्भोनिधिवासिनं सुरगुरुं वैकुण्ठकण्ठीरवं
वन्दे केशवमादिदेवमनिशं श्रीवेङ्कटेशं भजे ॥ १ ॥
सम्यग्वीतकलङ्कषोडशकलासंपूर्णचन्द्राननं
हेलाप्रोद्धृतफुल्लसारसदलं राजीवपाणिद्वयम् ।
शोभानिर्जितपुष्पसायकधनुःसुभ्रूयुगं धिक्कृतं
नासादञ्जलि(?)कम्बुकण्ठमनिशं श्रीवेङ्कटेशं भजे ॥ २ ॥

End:

श्रीमद्रत्नकिरीटकुण्डलधरं श्रीशङ्खचक्राङ्कितं
श्रीवत्सोज्ज्वलदिव्यकौस्तुभरमासंशोभवक्षःस्थलम् ।
विस्ताराभयहस्तनिस्तुलकटीहस्तं सुवर्णाम्बरं
ब्रह्मेशार्चितपादपद्ममनिशं श्रीवेङ्कटेशं भजे ॥ १० ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

मञ्जीरस्फुटमानपादकमलं पीताम्बरेणोज्ज्वलं
काञ्चीदामनिबद्धखङ्गतिलकं कालाम्बुदश्यामलम् ।
लक्ष्म्यालंकृतवक्षसं भुजलसच्चक्राम्बुजं साधरं
पूर्णेन्दुप्रतिमानवक्त्रमनिशं श्रीवेङ्कटेशं भजे ॥ ११ ॥

1999

71422 वेङ्कटेशस्तोत्रम्

Beginning:

सुनाभ उवाच—

नमो नमः शेषगिरीन्द्रवासिने नमो नमो वेङ्कटनायकाय ।
नमः कुमाराद्वयदिव्यमूर्तये नमोऽस्तु लक्ष्मीपतये मुहुर्मुहुः ॥ १ ॥
नमोऽस्तु शेषाचलमौलिगाभ्यां सरोजमत्स्यध्वजलाञ्छिताभ्याम् ।
निजप्रपन्नाखिलसौख्यदाभ्यां श्रीवेङ्कटेशाङ्घ्रिसरोरुहाभ्याम् ॥ २ ॥

End:

कलौ युगे कामितदानधुर्यात् प्रत्यक्षसिद्धिप्रददिव्यलीलात् ।
श्रियः पतेर्वेङ्कटशैलनेतुर्बिभेति मृत्युर्न हि भक्तलोकः ॥ १० ॥

नारद उवाच—

इति स्तुतः सुनाभेन वेङ्कटेशो जगत्पतिः ।
ददावभीप्सितायुष्यमन्ते च निजसंनिधिम् ॥ ११ ॥

Colophon:

इति श्रीब्रह्मवैवर्ते शङ्खराजनारदसंवादे वेङ्कटेशस्तोत्रं संपूर्णम् ।

2000

71548 वेङ्कटेशाष्टकम्

Beginning:

मुखे चारुहासं करे शङ्खचक्रं गले रत्नमालं स्वयं मे प्रसन्नम् ।
करौ . . . व्यशस्त्रं प्रिये वक्त्रयुक्तं धरन्तं मुरारिं भजे वेङ्कटेशम् ॥ १ ॥

End:

घनश्यामलं रूपमध्याधरं(?)तं सदा भक्तवात्सल्यहेतुं सुराद्रिम् ।
अहो रामरूपं तथा कृष्णरूपं धरन्तं मुरारिं भजे वेङ्कटेशम् ॥ ७ ॥
जयतु जयतु रामो . . . नुनी . . . राज्यो
जयतु जयतु विष्णुर्वासुदेवो मुकुन्दः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

जयतु जयतु कृष्णः कामिनीकेलिलीलो
जयतु जयतु देवो वेङ्कटेशः सुरेशः ॥ ८ ॥
वेङ्कटेशाष्टकं स्तोत्रं यः पठेच्छृणुयादपि ।
महापापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ ९ ॥

2001

74308 वेङ्कटेशाष्टकम्

This Stotra has been printed in the *Stotramañjari*, pp. 32-3.

2002

70257 वेङ्कटेशाष्टकम्

Beginning:

उदयरागा—

वासवविरिञ्चिमुनिवन्दितपादाम्बुजं वासवोज्ज्वलहेमवाससम् ।
दासनिकरेष्टफलदायकमचिन्तनं वासुदेवं विभुं वन्दे ॥
हरिं वन्दे शेषगिरिवासमखिलेशं वन्दारुसुरतरुं वन्दे ।
हरिं वन्दे शेषगिरिवासमखिलेशम् ॥ प ॥

End:

स्थिरतरार्जुननदीतीरनिलयेशं श्रीवेङ्कटाचलाधीशम् ।
भरितकौस्तुभरमाभासितोरःस्थलं वरगिरिस्थं प्रभुं वन्दे हरिं वन्दे . . . ॥ ८ ॥
अनुदिनं श्रीवेङ्कटाष्टकं यः पठेन्मनुजकामितफलदमन्त्रम् ।
घनवैभवानन्दकैवल्यसाधनं जनितदुःखानि नश्यन्ति ॥ ९ ॥
हरिं वन्दे शेषगिरिवासमखिलेशं वन्दारुसुरतरुं वन्दे हरिं वन्दे ॥

2003

PM2111 वेङ्कटेश्वराष्टकम्

Beginning:

परमपावनं पाण्डुपालनं पतगरोढनं फणिविशायिनम् ।
भाग्यदायिनं भवविमोचनं . . . भजे श्रीवेङ्कटेश्वरम् ॥

End:

भवविमोचनं पद्मलोचनं विपुलवक्षसं विदूरराक्षसम् ।
प्रणतपालनं भद्रखेलनं . . . भजे वेङ्कटेश्वरम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2009

66773 श्रीनिवासदण्डकम्

Beginning:

जय जयारम्भशुभजृम्भसंभिज्ज्वलितदम्भोलिकादभ्रशुभ्रविभ्रमभ्रमितान्छपुच्छगुच्छविच्छेदितो-ग्रंपच्छहयग्रीवरात्रिंचरपाटच्चरघलद्घलत्कीलालमिलज्जलतरङ्गरङ्गतिमितिमिंगिलघिलिघिलितझेलंझेलाय - मानप्रलयजलधिविलुठत्पुरातनवचःसमुद्धरणाम्वश्रीकप्रचार लीलावर्धक्षीकावतार . . .

End:

निरवधिक छन्दोमय गरुडध्वज ध्वजचक्रचामराङ्कुशहलकुलिशकल्पकजलजमत्स्यरेखाचिह्नित-चरणारविन्दविलन्दायमानवृन्दारकस्तोम श्रीमद्वेङ्कटाचलधाम देवतासार्वभौम जय विजयी भव ।

2010

73533 श्रीनिवासदण्डकम्

The following is the full text of the Stotra:

विधिशिवपाकशासनप्रमुखनिखिलसुरनिकरमणिमकुटोपलालितमन्दारमालालंकृतपादपीठम्; वि-विधविचित्ररत्ननूपुरशिञ्जारवरञ्जितारविन्दरथाङ्गशङ्खाङ्कुशकल्पकवज्रध्वजमकररेखाञ्चितचरणारविन्द - युगलम् ; युगपत्कोटीरविप्रभाभासमानपीताम्बरधरम् ; आश्रितजनानामनायासेन विरजानदीतर-णोपायवोधितमरतकवलयललितवामहस्तविन्यस्तकटीतटीतप्तहाटकविनिर्मितोदरबन्धम् ; स्वयंभुसंभव-हेतुभूतगम्भीरनाभीसरोरुहम् ; नागाभरणभूषितजानुलम्बिपरिभुजाभिरुपचीयमानम् ; आपन्नभयनि-वारणार्थरक्षोगणवक्षोविदारणविदग्धसुदर्शनधरम् ; दानवकुलविकलीकृतभीषणध्वनिविजृम्भितशोभित-पाञ्चजन्यम् ; पञ्चशरकोटिलावण्यम् ; अभितः श्रीकौस्तुभपृथुलकुचकुम्भकुङ्कुमपङ्काङ्कितविलसितश्री-वत्सलाञ्छनम् ; विमलोदारहारग्रैवेयकनकाङ्गदकेयूरादिभूषणैर्भूषितम् ; अंसावलम्बितकर्णपाशमकर-कुण्डलमण्डितगण्डस्थलनिष्यन्दमृगमदामोदभरितम् ; मन्दस्मितचन्द्रिकयाविनिर्जितेन्दुकुन्दकुमुदम्; मधुराधरबिम्बम् ; गन्धफलकुसुमनासापुटीमनोहरम् ; कृपारञ्जितायतपुण्डरीकाक्षम् ; कर्पूरधवलपुण्ड्रो-ज्ज्वलफालदेशम् ; अपरिमिततेजोबलखचितकिरीटधारिणम् ; पार्श्वद्वयेन जातीचम्पकमल्लिकातुलसी-वनमालाधारिणम् ; श्रीमद्वेङ्कटाचलनिवासं श्रीनिवासं संततं चिन्तयामि ।

2012

PM2611 श्रीपत्यष्टकम्

Beginning:

कृष्ण कृष्ण हरे परमात्मन् केशवाच्युत जनार्दन विष्णो ।
वासुदेव वसुदेवतनूज श्रीपते शमय दुःखभवाब्धिम् ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

रामचन्द्र रघुनायक वेद्य यादवेन्द्र यदुभूषणतिलक ।
दीननाथ दुरितक्षयकारिन् श्रीपते शमय दुःखभवाब्धिम् ॥ ८ ॥
श्रीपते(र)ष्टकमिदं रमणीयम् ईरितं कविलक्ष्मिनृसिंह(हेन) ।
यः पठेद्विषयदोषनिवृत्तिं जन्मदुःखमखिलं स जहाति ॥

2030

71324 श्रीरङ्गराजस्तवः सव्याख्यः

Beginning:

श्रीपराशर + + + मे स भूयसे ॥

परमकारुणिकश्रीसर्वेश्वरन् सर्वजीवनार्थमाक श्रीपराशरभट्टरै विशेषमाक कटाक्षं पणियरुळ अवरुं साक्षात्कृतपरापरतत्त्वराय् भगवदनुभवपरराय् अव्वनुभवजनितप्रीतियुळ्ळडङ्कामयाले भगवत्स्व-रूपगुणविभूतिकळै परकुक्वरुलि + + +

End:

. . . मां एन्नै पासीति यत् रक्षिक्कुरतेन्कुर यातोन्रु तत् अन्त रक्षणमानतु मरुभूपु मरुन्नदे-शङ्कलिले पानीयस्य शाला पानीयशालम् तण्णिचालै वैक्कुरताक स्यात् आकुम् । विभाषासेनासुराछा-याशालानिशानां एन्रु शालान्तमान तत्पुरुषन् विकल्पेन नपुंसकलिङ्गमाकुरतु ।

श्रीभूसारपुरीनिवासरसिकः श्रीश्रीनिवासात्मजो
माहाभाष्यरघूद्वहाह्वयगुरूत्तंसाङ्घ्रिपद्माश्रितम् ।
दासो दाशरथिर्लिलेख सुखं श्रीरङ्गराजस्तव-
व्याख्यामेष मणिप्रवालवपुषा प्रीत्यै महत्यै सताम् ॥

2031

70222 श्रीरङ्गराजस्तवव्याख्या

Beginning:

वेंकटाचार्यवर्यस्य चरणौ शरणं वृणे ।
यदीयसेवा सर्वेषां सूते तत्त्वार्थनिर्णयम् ॥
नानावृत्तश्लोकभङ्ग्या प्रवृत्तं श्रीरङ्गेशस्तोत्रमध्यात्मगर्भम् ।
श्रीमद्भट्टैरादरेण प्रणीतं यावच्छक्ति व्याकरोमि क्रमेण ॥

अथ तावत् भगवता चतुर्मुखेन स्वभवने चिरकालमभ्यर्चितं पश्चादिक्ष्वाकुचक्रवर्तिने तपसा तोषितेन तेन स्वयमभ्यर्चनार्थं न्यासरूपेण समर्पितं तदाप्रभृति रघुनायकपर्यन्तमयोध्यायां सरयूतीरे तद्वंशपरंपरया समाराधितं . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

इत्थं सकलोज्जीवनार्थं प्रवृत्तं प्रबन्धं स्वरक्षणमन्तरङ्गमिति प्रार्थयन् परिसमामयति त्वं मीनेति। हे रङ्गेश त्वं मीनपानीयनयेन जलवासिनां मत्स्यानां जलप्रदानन्यायेन कर्मयोगज्ञानयोग-भक्तियोगतदनुगुणवैराग्यजुषः पुरुषान् विभर्षि रक्षसि। मितंपचं परिमितं पचन्तमकिंचनमिति यावत् मितनखे चेति मितशब्दात् खप्रत्ययः। मां पासीति यत् तत् मरुभूषु निर्जलप्रदेशेषु पानीयशालं स्यात् विभाषासेनासुराच्छायाशालानिशानामिति शालाशब्दस्य नपुंसकत्वम्। अतः कर्मज्ञानभक्ति-निष्ठानां रक्षणं रक्षणमात्रम् अकिंचनस्य मम रक्षणमेव संरक्षणमिति सर्वं समञ्जसम्॥ १०४॥

Colophon:

इति रामानुजार्यविरचितश्रीरङ्गराजस्तोत्रव्याख्यायामुत्तरभागः समाप्तः।

वेंकटाचार्यशिष्येण रामानुजविपश्चिता।
रङ्गराजस्तुतिव्याख्या यथामति विनिर्मिता॥

2042

75398 **संपत्कुमारसुप्रभातम्**

Beginning:

स्वामिन् संयमिसार्वभौमभगवद्रामानुजार्यात्मभू-
र्याता रात्रिरुपस्थितं शिवमहो तेजोनिधे जागृहि।
श्रीमद्यादवशैलनित्यवसते श्रीभाष्यकारप्रिय
क्षेमं रङ्गवृषाद्रिहस्तियदुगिर्याद्येषु संवर्धय॥
श्रीनारायणदिव्यपट्टमहिषी श्रीयादवाद्रीश्वरी
श्रीर्देवी श्रितलोककल्पलतिके श्रेयोनिधे जागृहि।
स्नेहार्द्रैस्तव वीक्षणैर्यदुगिरिश्रीर्वर्धतां वर्धतां
दिव्यैरत्र महोत्सवैरनुदिनं देवेन नः प्रीणय॥

. . . .

अतीव विशदाधुना हरिदिगन्धकारो गतः
सुतीर्थकृतमज्जनाः सुकृतिनस्त्वदाराधकाः।
यतीन्द्रवरद प्रभो यदुगिरीश नारायण
प्रतीपहरचक्रभृद् भवतु सुप्रभातं तव॥

End:

त्वदीयपदपङ्कजद्वयजुषं तवातिप्रियं
मदीयमनघं गुरुं महितभट्टयोगीश्वरम्।
यदीक्षितुमिहार्हसे यदुगि(री)श नारायण
त्वदीक्षणपदं तदा त्वहमिति प्रियोऽस्मि प्रभो॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

जय जय सुप्रभातमरविन्दलोचन ते
जय जय यादवाद्रिशिखरोज्ज्वलदीप हरे ।
जय जय भाष्यकारकृतमङ्गलदीपनिधे
जय जय देवदेव विनतानभिनन्दय नः ॥
व्यक्तौ संनाहसंकल्पौ विश्वगोप्तुरिमौ हरेः ।
प्रतीतावङ्गमग्रे मे पक्षीश्वरसुदर्शनौ ॥

2054

75342 सप्तर्षिस्तोत्रं सव्याख्यम्

Beginning:

नित्यं किं धावसि चलविषयाननुभवितुं सुखलेशाभासान् . . . भो चेतः श्रीरामं शरणम् ।

भो चेत इति जीवरूपप्रत्यगात्मानमुद्दिश्य चेतो विषयीकृत्य गुरुः शिष्यमिव ज्ञानेन बोधयति । चलविषयान् चञ्चलप्रपञ्चतुच्छभोगान् क्षणभङ्गुरदेहत्वात् तुच्छत्वं ताननुभवितुं शाश्वतसुखलाभमिव नित्यं सार्वकालमपि तदेकचित्तः सन् किं धावसि अतिवेगतया गमिष्यसि । अचेतनस्य चेतनत्वारोपणं मनोवेगेन "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति स्मृत्या । तद्विषयानुभवेन स्वल्पमपि प्रयोजनं नास्तीत्याह सुखलेशाभासानिति ।

End:

"आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं समुत्पन्नं ध्येयो नारायणः सदा ॥
हरिरेकः सदा ध्येयो भवद्भिः सत्त्वमास्थितैः ।
ओमित्येवं सदा विप्रा वदत ध्यात केशवम् ॥"

इत्यादिव्यासोक्त्या च सदा रामस्मरणपूर्वकं श्रीरामं भजेति सर्वऋषीणाम् अद्वैततात्पर्यग्राहिणां श्रीरामब्रह्मैव भजने श्रेष्ठमिति सर्वेषामभिमतम् । श्रितचिन्तामणिमत . . . . चेतः श्रीरामं भज शरणम् । श्रितचिन्तामणिमत आश्रितामीष्टदम् अतिकरुणाकरम् अल्पीयस्यपि भजने बहुफलप्रदातारमित्यर्थः । अरिहरम् अरीन् हन्तीति (? हरतीति) अरिहरः तम् । उरुतरशरकोदण्डम् उरुतरं दृढम् अधिकमिति वा । उरुतरम् अतिवेगमिति वा एतादृशं शरं च कोदण्डं च यस्य तम् एवंभूतं श्रीरामं भजेति सर्वत्र संबन्धः ।

2072

67012 सुदर्शनध्यानम्

शङ्खं चक्रं च चापं परशुमसिमिषुं शूलपाशाङ्कुशाग्नि
बिभ्राणं वज्रखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ज्वालाकेशं त्रिणेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्यायेत् षट्कोणसंस्थं सकलरिपुजनप्राणसंहारचक्रम् ॥

2109

PM2934 हयग्रीवदण्डकम्

Beginning:

जय जय तुरङ्गास्य नस्तो मुखान्निःसृतानन्तवेदादिविद्याप्रबोधीकृताम्भोजसंभूत हेपारवान्निर्जिताशेषदैतेय लक्ष्म्यामृतेनानिशं सिच्यमान राकेन्दुकोटिप्रतीकाशदेहप्रभाभासिताब्जान्तगर्भाण्ड बाह्यान्तरानम्रधात्रीत्रे(?)रुद्रेन्द्रमुख्यामरव्रातकोटीरमाणिक्यकान्तिच्छटारञ्जिताङ्घ्रे । शरच्चन्द्रहृन्मन्दिरध्वान्तराशे ।

End:

जय वाजिवक्त्र प्रभो जय सिन्धुकन्यापते जय देवचूडामणे जयानन्तमूर्ते जयानन्दसिन्धो जयागाधबोध प्रभो श्रीरमानाथ लोकैकनाथाप्रमेयाच्युतानन्त गोविन्द तुभ्यं नमस्ते नमस्ते नमः पाहि मां पाहि ।

2110

69910 हयग्रीवदण्डकम्

Beginning:

जय जय हयग्रीव सुग्रीवमुद्ग्रीवयन् राममूर्त्यादिगत्याहवोत्साहवान् क्वापि गुञ्जानिकुञ्जे निलीय क्षणोन्मेषरोषोग्रदक्कोणकाषायभामञ्जरीसंजरीजृम्भदारण्यशोणेन बाणेन वेगप्रवीणेन घोरक्रियाशालिनं वालिनं . . .

End:

पार्श्वभागोच्चलन्नित्यसच्चामरं भार्गवीसादरं चार्वधःकन्धरं हेप्रया बन्धुरं नीरजातात्मजानर्घविद्यागुरुं कण्ठभागे मिलद्वैजयन्तीसरं वेदविद्यादृशां मादृशां तारकम् ॥ ४ ॥

2111

70733 हयग्रीवस्तोत्रम्

Beginning:

तारैकाक्षरवाच्याय ताराय नतिभागिने ।
तथा भगवते तुभ्यं हयग्रीवाय योगिने ॥
सकलामरवन्द्याय सर्वेषां गुरवे नमः ।
ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभाव ते ।
सर्वाभासाय देवाय नमोऽस्तु परमात्मने ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

रक्ष सकलापद्भ्यः कामानिष्टान् ददाति च ।
तस्मात् सायं तथा प्रातः मध्याह्ने च विशेषतः ।
स्तुत्वा जपान्ते सर्वात्मन् ईप्सितार्थमवाप्नुयात् ॥

2123

73969 हयग्रीवस्तोत्रं सव्याख्यम्

Beginning:

हयग्रीवमभिष्टोतुं प्रतिजानीते स्वत इति—स्वतः सिद्धं + + + ईडीमहि महः ॥ स्वतः सिद्धं स्वप्रकाशम् । ननु सिद्धशब्दस्य भावार्थविहितक्तप्रत्ययान्तत्वे स्वत इति पञ्चम्यर्थभूतहेत्वर्थ-विहिततसिल्प्रत्ययस्यानन्वयः स्यात् । सिद्धशब्दस्य प्रकाशमात्रार्थकत्वेन स्वशब्दस्यापि प्रकाशार्थत्वेन तसः पञ्चम्यर्थहेत्वर्थत्वेन च प्रकाशानधीनप्राकाशार्थलाभात् ।

End:

स्वग्रन्थस्य विश्वसनीयत्वाय स्वनाम प्रकटयन् स्वकृतस्तोत्रस्य फलमप्याह—वागर्थसिद्धिहेतुं + + + एताम् ॥ हे सुधिय इत्यध्याहारः । कवितार्किककेसरिणा कवितार्किकश्रेष्ठेन वेंकटनाथेन वेंकटनाथाह्वयेन विरचितां निर्मिताम् एतां सम्यक् वाक्यरचनोज्ज्वलां वागर्थसिद्धिहेतुं वाचां वाग्रूपाणा-मर्थानां प्रसिद्धिज्ञानहेतुं कारणं हयग्रीवस्तुतिं हयग्रीवस्तवं भक्त्या पठत अनुसंधध्वम् ॥ ३२ ॥

Colophon:

इति श्रीभारद्वाजकुलोद्भवेन सामवेदाध्यायिना श्रीनिवासाचार्येण कृतौ हयग्रीवस्तोत्र-व्याख्या संपूर्णा ।

राक्षसेऽब्दे मेषमासे शुक्लपक्षे बुधे दिने ।
हयग्रीवस्तुतिव्याख्या लिखिता भक्तिपूर्वकम् ॥

2135

PM2936 हरिस्तुतिः सव्याख्या

Beginning:

अथानन्दगिरीयहरिमीडेस्तोत्र(? विवरण)प्रारंभः—

यद्विशुद्धं परं ब्रह्म सच्चिदानन्दमद्वयम् ।
तदेवाहं परं तत्त्वं स शिवः स परो हरिः ॥
अच्युतानन्त गोविन्द सच्चिदानन्द शाश्वत ।
मच्चेतो रमतां नित्यं त्वच्चारुचरणाम्बुजे ॥
अहमस्मि परं ब्रह्म निश्चितं चित्त चिन्त्यताम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

चिद्रूपत्वादसंगत्वादबाध्यत्वात्प्रयत्नतः ॥
संसारसर्पपरिदष्टविनष्टदृष्टेः संजीवनाय कृपया परयोपपन्नम् ।
ब्रह्मावबोधपरमौषधमुद्वहन्तं तं शंकरं परतरं भिषजं नमामि ॥
ऐदंपर्येण वेदान्ता यद्वदन्ति परं पदम् ।
तदहं ब्रह्म निर्भेदं सत्यादिपदलक्षितम् ॥

मुमुक्षूणां विचारासमर्थानां जपमात्रादपि ब्रह्मविद्या भूयादिति मन्वानः परमकारुणिको भगवान् भाष्यकारः सर्ववेदान्तसारसर्वस्वं स्तुतिव्याजेन दिदर्शयिषुः आदौ प्रतिजानीते । प्रतिज्ञां करोति स्तोष्य इति ।

End:

भगवत्पादीयमिदं स्तोत्रं यः पठति शृणोति वा स सकामश्चेद्विष्णुलोकं व्रजति निष्कामश्चेत् स्वे आत्मनि ज्ञानं ज्ञेयं ब्रह्माप्नोति भवभीतिध्वान्तमज्ञातस्य किं नाशेन अर्कवदाभाति । अत्र भक्तानामेवाधिकार इत्याह भक्तजन-ईड्यं स्तुत्यमित्यर्थः ।

Colophon:

इति श्रीमच्छंकराचार्यकृतस्तोत्रविवरणं आनन्दगिरीयं समाप्तम् ।

2152

67160 हर्यष्टप्रासपञ्चकम्

Beginning:

आदावेव मुनिर्विकारवपुषे वेदादिसद्योनये
भेदाभेदविवर्जितात्मगतये वेदान्तवेद्यात्मने ।
पादाम्भोरुहदाससंसृतिभयच्छेदाय लक्ष्मीपते
कादाचित्कतयात्मकल्पितजगद्भेदाय तुभ्यं नमः ॥ १ ॥

End:

पायाच्छेषफणासहस्रमणिभासायाह्नकोटयुष्णरुक्-
छायाभासितदीयभोगशयने जायाष्टकेनावृते ।
मायावर्जितयोगमुद्रितमुनिध्येयात्मनिद्रां भजन्
कायात्कायमुपेत्य दुःखितमितोऽपायान्मुकुन्दोऽद्य माम् ॥ ५ ॥
हठात्कारेण संसारदुःखानि निखिलान्यपि ।
हरत्येव न संदेहो हर्यष्टप्रासपञ्चकम् ॥ ६ ॥

Colophon:

इति श्रीहर्यष्टप्रासपञ्चकस्तोत्रं समाप्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2153

66592 हस्तिगिरीशस्तवः

Beginning:

श्रीमच्छ्रीनिधियोगीन्द्रश्रीरङ्गेशयतीश्वरौ ।
प्रणम्य सादरं कुर्वे हस्तीशस्तवमद्भुतम् ॥
प्रह्लादजनकोद्दामदानवैभवशालिनौ ।
करिक्ष्माभृदधीशानौ कलयेमहि कावपि ॥ १ ॥
कनक(?)परममायिने करिगिरेरधःस्थायिने
चराचरविधायिने चतुरमीष्टसंदायिने ।
नमः परमयोगिने नतजनावनोद्योगिने
नृशंसहतकायिने नृहरये जगत्कायिने ॥ २ ॥

End:

हस्तीश निस्तुलतरस्तुतिरत्नजाल-
मस्तीति मत्स्तुतिरियं परमास्तिकेड्य ।
नोपेक्षितुं त्वलमहो शुकभाषितादौ
संतोषमाकलयते हि महानृसंज्ञः ॥ ५० ॥
इत्थं सवीररघुराट्छुतिमौलियोगि-
क्ष्माभृत् करिक्षितिपतेः स्तवमद्भुतार्थम् ।
प्रीत्यै हरेर्व्यतनुत प्रणिशम्य सन्तः
संतोषमत्र कलयन्तु गताभ्यसूयाः ॥ ५१ ॥
श्रीमद्वीररघूद्वहश्रुतिशिरोयोगिक्ष्माभृत्कृतं
हस्तीशस्तवमादरात् पठति यः शुद्धो विशुद्धाशयः ।
जिह्वायामिह नानटीति सततं वाग्देवता तस्य सं-
सिध्यन्ति ह्यचिरेण किंच महिताः सर्वे पुमर्था भुवि ॥ ५२ ॥
श्रीमते वीरराघववेदान्तमहादेशिकाय नमः ।

The following verses are written at the end:

अहोबिलगुहामहर्निशमुदञ्चयन्तं च ता-
मभीष्टफलमञ्जसा प्रतिदिशन् नृकण्ठीरवः ।
ददातु मलयानिलस्फुटितमल्लिकामञ्जरी-
निरर्गलविनिर्गलन्मधुझरीधुरीणं वचः ॥ १ ॥
श्रुतिशिखरनिगूढं तत्त्वमत्यद्भुताभिः
फणितिभिरनघाभिः सर्ववर्णोचिताभिः ।
सकलसुगममध्याख्यापयन् सत्त्वनिष्ठः
शठमथनमुनिर्मे भूयसे श्रेयसेऽस्तु ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कुमतिकलितमायावर्तबम्भ्रम्यमाणा
श्रुतिविततिरयासीद्यस्य भाष्येण पारम् ।
शुभगणरमणीयं ब्रह्म वामा . . . .

2154

70281 अनन्तपद्मनाभाष्टोत्तरशतनामावलिः

Beginning:

ओम् अनन्ताय नमः। अनन्तनिलयाय नमः। अनन्तश्रियै नमः। अनन्तकीर्तये नमः। अनन्तमहत्त्वाय नमः। अनन्तविद्याप्रभवे नमः। अनन्तदोर्दण्डाय नमः। अनन्तपूजिताय नमः। अनन्तकामदाय नमः।

End:

अलंकरिष्णवे नमः। अयनाय नमः। अयोनये नमः। अर्थदायकाय नमः। अर्चिताय नमः। आश्रितवत्सलाय नमः। अलंकारिणे नमः। आजानुबाहवे नमः। अत्यन्ततमोहराय नमः। श्रीमदनन्तपद्मनाभाय नमः।

2212

74300 दामोदराष्टोत्तरशतनामस्तोत्रम्

Beginning:

दामोदरो जगन्नाथो देवेन्द्रो देवकीसुतः ।
नरकासुरविध्वंसी मुष्टिकासुरभञ्जनः ॥ १ ॥
कंसशत्रुरमेयात्मा पार्थसारथिरच्युतः ।
सुदर्शनधरः श्रीमान् पाञ्चजन्यविभूषितः ॥ २ ॥

End:

निरीहो निश्चलः शान्तो निर्विकारो महाभुजः ।
अजैकपादहिर्बुध्न्यो मघोनो मघवान् विभुः ॥ १२ ॥
सूरसेनो यदुश्रेष्ठो . . . . ॥

2273

PM2609 रामाष्टोत्तरशतनामस्तोत्रम्

Beginning:

रामभद्रो रामचन्द्रो रामो राममदापहः ।
रामाभिरामो रामाप्तो रामसक्तो रमेश्वरः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

रघुनाथो रघुवरो रघुश्रेष्ठो रघूद्वहः ।
रघुवीरो राघवेशो राघवो रघुनन्दनः ॥

End:

रत्नद्वीपान्तसंचारी रत्नपर्वतसंस्थितः ।
रत्नपुष्पकमध्यस्थविमानक्रोडसंस्थितः ॥
रत्नसिंहासनासीनो राजर्षी राजपालकः ।
एवं रेफादिनामानि अष्टाविंशाधिकं शतम् ॥

Colophon:

श्रीरामाष्टोत्तरं संपूर्णम् ।

2298

TR827 विष्णुसहस्रनामनिरुक्तिः

Beginning:

ज्ञानानन्दघनानन्ततनवेऽनन्तशक्तये ।
नमोऽनन्ताभिधानाय रमानाथाय विष्णवे ॥
सुधां बोधमयीं पीत्वा यन्मुखाम्बुरुहोदिताम् ।
प्रापन्नम(र)तां सन्तो वेदव्यासं नमामि तम् ॥
चित्ते मे पूर्णबोधोऽस्तु वाचि मे भातु भारती ।
क्रियासुर्गुरवः सर्वे दयां मयि दयालवः ॥
तत्प्रसादाद्यथाशक्ति श . . . स्य निरन्तरम्
विष्णुनामसहस्रस्य निरुक्तिः संप्रकाश्यते ।
शास्त्रेषु भारतं सारं तत्र नामसहस्रकम् ॥

वैष्णवं + न भारतसमं + भारतं सर्ववेदाश्च + देवैः ब्रह्मादिभिः सर्वैः + न्यासस्यैवा + श्रीवेदव्यासाय नमः । यस्य ज्ञान + वैशम्पायन उवाच ॥ महत्त्वाद्भारवत्त्वाच + संज्ञितम् । इति ब्रह्माण्डे । श्रुत्वा धर्मानित्यादिकं सहस्रनामक . . . . न प्रस्तावार्थम् । तस्यार्थः—वेदविहितान् धर्मान् शिष्टैरनुष्ठेयान् धर्मान् ।

End:

इमं स्तवमित्यनेन स्वतः सर्वज्ञेन भगवता बादरायणेन लोकहितार्थं कृतत्वात् इदं स्तोत्रं सादरं सर्वैः पठनीयमिति दर्शयति । किमत्र बहुनोक्तेन भगवद्भक्ताः कृतकृत्या इति दर्शयति । विश्वे-श्वरमिति । पद्मनाभ सुरोत्तम । + इति श्रीमहाभारते + संपूर्णम् ।

एवं विद्याधिराजेन प्रीत्यै माधवमध्वयोः ।
विष्णुनामसहस्रस्य निरुक्तिः संप्रकाशिता ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2299

PM2964 विष्णुसहस्रनामनिरुक्तिः

Beginning:

ईश्वरः—

शान्त्यध्यायं प्रवक्ष्यामि विष्णोर्नामसहस्रकैः।
सर्वशान्तिकरं देवि समाहितमनाः शिवे ॥
शृणुष्व सर्वशान्त्यर्थं सर्वाभीष्टार्थमेव च।
धर्मार्थकाममोक्षार्थं विष्णोः प्रीत्यर्थमेव च ॥
विष्णुभक्तिप्रसिध्यर्थं मम तुष्ट्यर्थमेव च।
राजचोराग्निरोगादिशत्रुशान्त्यर्थमेव च ॥
विश्वं ब्रह्म विशत्यस्मिन् जगदित्यभिधीयते।
आदौ स्वयं जगत् सृष्ट्वा तत्र वानुप्रवेशनात् ॥
शान्तिं करोतु मे नित्यं विश्वरूपधरो हरिः।
विष्णुव्याप्तं जगत् सर्वं यस्य शक्त्या महात्मनः।
वषट्कारः स्वधा स्वाहा वषडित्येवमादिभिः ॥

End:

सनादित्यव्ययं नाम सनान्नाम इतीरितम्।
सन्तो वै बहुवाक्येन सद्भ्यो नाम इतीरितम् ॥
महाद्रिधृक् इति प्रोक्तं त्रिलोकधृदितीरितः।
असंमित (इति) प्रोक्तमखण्डपरशुस्तथा ॥
एवं व्याख्यानमालोक्य कर्तव्या ह्यर्चना बुधैः।
चतुर्थ्यन्तेन सर्वेषां नाम्नां कर्तव्यमित्यपि ॥

2353

68505 विष्णुसहस्रनामभाष्यार्थकारिका (नामकारिकासहस्रम्)

Beginning:

यत्पादाम्बु निपीय शुद्धमतयः संत्यज्य सर्वक्रियाः
सत्यज्ञानसुखात्मकं परमहं ब्रह्मास्मि नान्यत्ततः।
निश्चित्येति दुरन्तसंसृतिमहासिन्धुं तरन्ति प्रजा-
स्तं सर्वेश्वरतीर्थराजममृतप्राप्त्यै सदोपास्महे ॥
विष्णोर्नामसहस्रस्य भाष्ये योऽर्थः प्रकीर्तितः।
संगृह्यते स सर्वोऽर्थः एकैकश्लोकतोऽधुना ॥
विश्वं विश्वस्य हेतुर्वा ब्रह्मोंकारश्च वा जगत्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तत् सृष्ट्वा तत् प्रविष्टो वा विश्वस्यास्मिँल्लयेन वा ॥ १ ॥
विष्णुर्व्यापनशीलत्वात् स्वकान्तिव्याप्तितोऽथवा ।
रोदस्योः क्रमणाद्वापि यद्वा सृष्ट्वा प्रवेशनात् ॥ २ ॥

End:

रथाङ्गपाणिर्यत्पाणौ रथाङ्गं चक्रमस्ति सः ।
चक्रीकृत्य तु तत्साम्यात् चक्रकृत्त्वमिहोच्यते ॥ ९८ ॥
अत एवायमक्षोभ्यो ह्यशक्यक्षोभणः परैः ।
प्रपन्नाभयदानाख्यव्रतदार्ढ्यादपीतरे ॥ ९९ ॥
एतावन्त्येवायुधानि विद्यन्तेऽस्य न केवलम् ।
किं तु सर्वाणि सन्तीति सर्वप्रहरणायुधः ॥ १०० ॥
नमो महाभारतकृन्मुनिभ्यो नमोऽस्तु तच्छंकरभाष्यकृद्भ्यः ।
नमोऽस्तु सर्वेश्वरतीर्थवर्यगुरुभ्य ईशस्य च संभवेभ्यः ॥

Colophon:

इति श्रीमन्नामकारिकासहस्रे दशमं शतकं समाप्तम् ।

Scribal note:

यतिना रचितां नीतां सुब्रह्मण्येन केरलात् ।
श्रीनामकारिकामेतां सुब्रह्मण्याह्वयोऽलिखत् ॥
सुब्रह्मण्यसमानीतां यतिना केनचित् कृताम् ।
श्रीनामकारिकामेतां सुब्रह्मण्याह्वयोऽलिखत् ॥

मुम्बिलत्ते श्लोकं सामान्यमाणँ येन्निदँ पिन्ने मारि ।

2384

73247 **विष्णवष्टोत्तरशतनामस्तोत्रम्**

Beginning:

शुक्लाम्बरधरं + + + शान्तये ॥ ओं भूर्भुवःसुवरोम् ॥ ममोपात्तसमस्तं + + + प्रीत्यर्थं विष्णुप्रसादेन सर्वाभीष्टसिध्यर्थं नामरत्नस्तवमहामन्त्रजपं करिष्ये । अस्य श्री + + + विनियोगः । ध्यानम्—मेघश्यामं + + + नाथम् । पञ्चपूजा ॥

श्रीरङ्गशायी श्रीकान्तः श्रीप्रदः श्रितवत्सलः ।
अनन्तो माधवो जेता जगन्नाथो जगद्गुरुः ॥
सुरव्ययः(?) सुराराध्यः सुरराजानुजः प्रभुः ।
हरिर्हतारिर्विश्वेशः शाश्वतः शंभुरव्ययः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

जनार्दनो जगद्धेतुर्जितमन्मथविग्रहः ।
चक्रपाणिः शङ्खधारी शार्ङ्गखड्गगदाधरः ॥
एवं विष्णोः शतं नाम्नामष्टाधिकमिहोदितम् ।
स्तोत्राणामुत्तमं गुह्यं नामरत्नस्तवाभिधम् ।
सर्वदं सर्वरोगघ्नं चिन्तितार्थफलप्रदम् ॥

Colophon:

इति श्री-आग्नेयपुराणे नामरत्नस्तवाभिधं नाम चतुर्दशोऽध्यायः ।

2394

71422 वेङ्कटेशाष्टोत्तरशतनामस्तोत्रम्

Beginning:

सिद्धा ऊचुः—

भगवन् वेङ्कटेशस्य नाम्नामष्टोत्तरं शतम् ।
अनुब्रूहि दयासिन्धो क्षिप्रसिद्धिप्रदं नृणाम् ॥ १ ॥

नारद उवाच—

सावधानेन मनसा श‍ृण्वन्तु तदिदं शुभम् ।
जप्तं वैखानसैः पूर्वं सर्वसौभाग्यवर्धनम् ॥ २ ॥
ओंकारपरमार्थश्च नरनारायणात्मकः ।
मोक्षलक्ष्मीप्राणकान्तो वेङ्कटाचलनायकः ॥ ३ ॥

End:

तेजोराशीक्षणः स्वामी हार्दाविद्यानिवारणः ।
इति श्रीवेङ्कटेशस्य नाम्नामष्टोत्तरं शतम् ॥
प्रातः प्रातः समुत्थाय यः पठेद् भक्तिमान् नरः ।
स इष्टार्थानवाप्नोति वेङ्कटेशप्रसादतः ॥

Colophon:

इति श्रीस्कान्दपुराणे सनत्कुमारसंहितायां वेङ्कटेशदिव्यनामाष्टोत्तरशतं संपूर्णम् ।

2408

70682 हयग्रीवाष्टोत्तरशतनामस्तोत्रम्

Beginning:

हयग्रीवो रमाकान्तो भयत्राता जगत्प्रभुः ।
आहर्ता सर्ववेदानामादिमः पुरुषोत्तमः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वेदोपदेष्टा विश्वात्मा ब्रह्मशोकनिवर्तकः ।
विद्यानामादिमो वक्ता वेदान्तोद्गीथवैभवः ॥
मायामीनवपुर्विष्णुर्मधुकैटभमर्दनः ।
नारायणास्त्रनिर्माता नम्थो नारायणो हरिः ॥

End:

उद्गीथविद्यासंवेद्यः सर्वसंपत्समृद्धिदः ।
हयग्रीवं हरिं नाम्नामष्टोत्तरशतेन यः ॥
विध्युक्तेनामुना नित्यं पूजयेद्धन्य एव सः ।
तस्मै प्रसीदति श्रीमांस्तस्यैव हयाननः ।
ददाति वाञ्छितान् भोगानन्ते हरिपदं व्रजेत् ॥

Colophon:

इति हयग्रीवसंहितायां हयग्रीवाष्टोत्तरशतदिव्यनामस्तोत्रं संपूर्णम् ।

LAKṢMĪ-STOTRA-S

2416

73438 अलर्मेल्मङ्गैनाच्चियार्प्रपत्तिः

Beginning:

यद्वल्लभः पुरुष उत्तम ईश्वरो यच्छय्यासनं फणिपतिर्गरुडस्तु वाहः ।
यत्किंकरा विधिशिवप्रमुखाः सुरास्तां श्रीवेङ्कटेशमहिषीं श्रियमाश्रयामः ॥ १ ॥

End:

वानाचलाख्ययतिवर्यमवेक्ष्य दोषैर्जुष्टं गुणैर्विरहितं परमाणुमात्रैः ।
मां चातिवत्सलतया भृशमार्द्रयन्तीं श्रीवेङ्कटेशमहिषीं श्रियमाश्रयामः ॥ ११ ॥

2417

73438 अलर्मेल्मङ्गैनाच्चियार्मङ्गलाशासनम्

Beginning:

श्रीनिवासभुजामध्ये भूषा यत्पादपङ्कजम् ।
तस्यै वेङ्कटनायक्यै श्रियै भवतु मङ्गलम् ॥ १ ॥
मङ्गलानां समस्तानां वासस्थानं यदीक्षणम् ।
तस्यै वेङ्कटनायक्यै श्रियै भवतु मङ्गलम् ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

सर्वाभीष्टप्रदायिन्यै शौरेः सर्वाश्रितस्य च ।
तस्यै वेङ्कटनायक्यै श्रियै भवतु मङ्गलम् ॥ ११ ॥
स्वामिपुष्करिणीतीरे वासिन्यै हरिणा सदा ।
तस्यै वेङ्कटनायक्यै श्रियै भवतु मङ्गलम् ॥ १२ ॥

2418

TR805 अष्टमहिषीप्रार्थना

Beginning:

श्रीवेङ्कटेशदाराः धीरा क्षेमस्य मे सदाधारा ।
करुणावनसंचारा तारासंकाशरत्नमयहारा ॥ १ ॥
नारायणवनजनिता नारी नारायणस्य मे माता ।
पारायणार्हचरिता त्राता(?) पीताम्बरेण चायाता ॥ २ ॥

End:

प्रणमति कस्तव पादं धनपतिरपि भवति देवि निष्खेदम् ।
प्रपठति कस्तव वेदं स भवति भुवि याति मातरामोदम् ॥ १०० ॥
आत्रेयगोत्रजनिना कथितं (ना)रामानुजार्यविदुषेदम् ।
अङ्गीकुर्वन्त्वार्याः कृपया श्रीवेङ्कटेशदाराश्च ॥ १०१ ॥

Colophon:

इति अष्टमहिषीप्रार्थनाशतकं समाप्तम् ।

2419

TR808 इन्दिराशतकम्

Beginning:

अथ निरोष्ठ्यपदैर्ललितामिमां कलशसिन्धुसुताविभवोदयाम् ।
कलयितुं कविकृष्ण इह स्तुतिं कलयते हृदि तां हरिनायिकाम् ॥
जयति सा जलधेस्तनया दयाकलितनित्यचराचररक्षणा ।
सहचरी च हरेर्ललितक्रियालसितदैत्यनिहन्तृहृदन्तरा ॥

End:

इति निरोष्ठ्यपदैर्ललितामिमां स्तुतिमुदारमतिः कृतकौतुकः ।
जयति कृष्णकविः कमलापदाम्बुजयुगे कलयन् सफलक्रियः ॥

Colophon:

इति निरोष्ठ्यम् इन्दिराशतकं समाप्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2420

PM2606 इन्दिरास्तोत्रम्

This is printed in *Kāśīkhaṇḍa* (of *Skāndapurāṇa*), Ganapat Krishnaji Press, Bombay, 1881, Pūrvabhāga, ch. 5, vv. 80-109.

2424

TR803 कमलात्रिशती

Beginning:

परमाभरणं विष्णोर्वक्षसि सा सागरेन्द्रवरपुत्री ।
या मूर्तिमती काले क्षमा जनानां कृतापराधानाम् ॥ १ ॥
सा नः श्रेयो दद्यात् कमला कमलासनादिजननीं याम् ।
संप्राप्य सहचरीं किल हरिरवति जगन्त्यनाकुलं सततम् ॥ २ ॥

End:

कमले कथं नु वर्ण्यस्तव महिमा निगममौलिगणवेद्यः ।
इति निश्चित्य पदाब्जं तव वन्दे मोक्षकामोऽहम् ॥ ३०१ ॥
त्वामम्ब बालिशोऽहं त्वचमत्कारैर्गिरां गुम्फैः ।
अयथायथक्रमं हि स्तुवन्नपि प्राप्तजन्मसाफल्यः ॥ ३०२ ॥

Colophon:

इति कमलात्रिशती समाप्ता ।

2449

69910 रमादण्डकम्

Beginning:

पातु श्रेयोमूर्तिः पावनपदपद्मलक्ष्महरिवक्षाः ।
वामाक्षि सोदरीयं वनजभवपितु(?) . . . . . ॥

. . . सदा चारुमुक्तारदे धूतदेवीमदे सर्वमोक्षप्रदे पद्मशोभापदे साधुवेषास्पदे स्वात्मरजन्तदे बाहुनद्धाङ्गदे संगलत्सद्गदे पार्श्वरज . . . भीमत्कदे नेत्रपद्मच्छदे सर्वभक्तोन्मुदे सर्वदा सर्वदे भक्तसौर्यंगदे दैत्यराड्भङ्गदे श्रीरमे ।

End:

भूमिनाकेशया साधुनाकेशया मर्त्यनार्यंशया देवदेवाशयासन्ननैजांशयापन्नरक्षाशया श्रीदया ।

वरदे वरदेवनुते वरदे . . . नित्यविधृते त्वम् ।
कुशलं कुरु मे निखिलं कुलदैवं भासि यस्य तस्येह ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

षट्सप्ततिशतमात्रं पादे पादे द्वियुगपदायुक्तम् ।
. . . नरंरगणो भातु रमादण्डकोऽत्र विबुधमुदे ॥
विजयरघुवीरकथितं दण्डकमालोक्य भूसुरा आर्याः ।
सद्वृत्त . . . नयुगं नन्दन्तु नित्यमन्वङ्घ्रि ॥

Colophon:

रमादण्डकम ।

2450

69461 राधास्तोत्रम्

Beginning:

अथ श्रीराधास्तोत्रं लिख्यते । श्रीनारद उवाच—

किंनु पुण्यतरं ब्रह्मन् यच्चिन्त्यमखिलेश्वरैः ।
तन्मे ब्रूहि सुतत्त्वज्ञ योगेश मयि वत्सल ॥

श्रीब्रह्मोवाच—

शृणु गुह्यतमं तात नारायणमुखाच्छ्रुतम् ।
सर्वैश्च पूजिता देवै राधा वृन्दावनेऽवनौ ।
राधाविश्लेषितः कृष्णो ह्येकदा प्रेमविह्वलः ।
राधामन्त्रं जपन् ध्यायन् राधां सर्वत्र पश्यति ॥

अस्य श्रीराधास्तोत्रमहामन्त्रस्य . . . ध्यानम् ।

गृहे राधा वने राधा राधा पृष्ठे पुरः स्थिता ।
यत्र तत्र स्थिता राधा राधैवाराध्यते मया ॥ १ ॥

End:

जिह्वाग्रे राधिकानाम नेत्राग्रे राधिकातनुः ।
कृष्णाग्रे राधिकाकीर्तिर्मनोऽग्रे राधिकामनः ॥ ८ ॥
राधा रससुधासिन्धू राधा सौभाग्यसुन्दरी ।
राधा व्रजाङ्गनामुख्या राधैवाराध्यते मया ॥ ९ ॥
कृष्णेन पठितं स्तोत्रं राधायाः प्रीतये परम् ।
यः पठेत् प्रयतो नित्यं राधाकृष्णप्रियो भवेत् ॥ १० ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे श्रीकृष्णकृतं राधास्तोत्रं संपूर्णम् ।

2452

TR819 लक्ष्मीमङ्गलाशासनम्

Beginning:

मङ्गलं मङ्गलानां या दत्ते मङ्गलदेवता ।
संश्रिता नृहरिं तस्यै लक्ष्म्यै भवतु मङ्गलम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अनन्याधीनकल्याणो यया देवः स्वतः श्रिया ।
परर्धिः परमस्तस्यै लक्ष्म्यै भवतु मङ्गलम् ॥

End:

पराङ्कुशयतीन्द्राख्यमाशासयति या मुनिम् ।
मङ्गलं मङ्गलायास्यै लक्ष्म्यै भवतु मङ्गलम् ॥
वात्सल्यं सर्वकल्याणगुणजीवातुमक्षतम् ।
सदालम्ब्य स नः पायाल्लक्ष्मीमानुपकेसरी ॥

Colophon:

लक्ष्मीमङ्गलं समाप्तम् ।

2453

73483 **लक्ष्मीस्तवः**

Beginning:

सुधासारासारादपि बहुलसारा कुवलया-
वलीदामभ्यामा शुभविभवसामस्त्यजननी ।
मम श्रेयो भूयो वितरतु सुधासिन्धुदुहितुः
कृपातुङ्गापाङ्गोल्लसदसमशृङ्गारलहरी ॥ १ ॥

End:

कृतानन्दस्यन्दं कनकजलधाराजलधरं
कटाक्षं लक्ष्मि त्वं कलय मयि कारुण्यविवशा ।
विषक्तो यस्यासौ करितुरगरत्नालिभरित-
स्त्रयाणां लोकानां दिशति वरसाम्राज्यविभवम् ॥ ९८ ॥

2454

70707 **लक्ष्मीस्तोत्रम्**

Beginning:

श्रिया युक्तः श्रीमान् स्थितिजनिलयादीन् कलयते
जगत्या नैवं चेत् स्वमपि न च पुष्णात्यशरणः ।
अतस्त्वां तत्तादृग्दुरधिगमनिःसीमविभवां
भजामो रुद्राणीपरिचितपदाम्भोजयुगलीम् ॥ १ ॥

End:

इति श्रीभूसारंपुरमधिवसन् राघवकविः
कुले वाधूलाख्ये महति जनिमान् लोकविनते ।
सतां सेवी सत्त्वाधिकरघुवराचार्यतनयात्
समुत्पन्नो लक्ष्म्याः स्तुतिभिरधुनानर्च चरणौ ॥ १९ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2456

68345 लक्ष्म्यष्टकम्

Beginning:

पुण्डरीकविशालाक्षि त्रैलोक्यजयसुन्दरि ।
नानाभरणसर्वाङ्गि वन्दे लक्ष्मि नमोऽस्तु ते ॥
कुञ्जरेण महातोये अभिषिच्यैव संततम् ।
पुष्पवर्षं महाघोरं वन्दे लक्ष्मि नमोऽस्तु ते ॥

End:

प्रणम्य शिरसा देवि भद्रे परमसुन्दरि ।
श्रीरामदयिते देवि वन्दे लक्ष्मि नमोऽस्तु ते ॥
लक्ष्म्यष्टकमिदं पुण्यं भक्तितो यः पठेन्नरः ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon:

लक्ष्म्यष्टकम् ।

2457

69413 लक्ष्म्यष्टकम्

Beginning:

लक्ष्मीं तुष्टाव जननीं सर्वेषां प्राणिनां मुदे ।
नमो देवि जगन्मात्रे विष्णुवक्षःस्थलालये ॥
नमोऽब्धिसंभवे तुभ्यं महालक्ष्मि हरिप्रिये ।
सिद्ध्यै पुष्ट्यै स्वधायै च स्वाहायै सततं नमः ॥
संध्यायै च प्रभायै च धात्र्यै भूत्यै नमो नमः ।

End:

लक्ष्म्यष्टकमिदं पुण्यं नित्यं भक्त्या पठन्ति ये ।
ते पुत्रपौत्रसंपन्नाः क्षिप्रमेव भवन्ति च ॥

Colophon:

इति लक्ष्म्यष्टकं संपूर्णम् ।

2466

TR834 श्रीगुणरत्नकोशः सव्याख्यः

This is same as MT. 758(a).

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2472

TR833 श्रीगुणरत्नकोशः सव्याख्यः

This anonymous comm. is identical with MT. 758(b).

2473

TR819 श्रीप्रपत्तिः

Beginning:

श्रीवीरराघवमुनिश्रुतिमौलिसूरिश्रीमत्पदाम्बुजसमाश्रयलब्धबोधम् ।
श्रीवीरराघवमुनीन्द्रकृपावलम्बं श्रीमत्पराङ्कुशयतीन्द्रगुरुं भजामः ॥
कल्याणगुणपूर्णा या कान्तोरःस्थलवासिनी ।
कामनाकल्पवल्लीं तां प्रपद्ये शरणं श्रियम् ॥

End:

भर्तुर्या परिचर्यासु शेषशेषासनादिकान् ।
सर्वान् प्रीत्यादिशति तां प्रपद्ये शरणं श्रियम् ॥
पराङ्कुशयतीन्द्राख्यमुनिं देशिकवीक्षितम् ।
या स्वयं पालयति तां प्रपद्ये शरणं श्रियम् ॥

Colophon:

श्रीप्रपत्तिः समाप्ता ।

2477

71404 श्रीस्तवः सव्याख्यः

Beginning:

अथ सर्वेश्वराभिमतस्वरूपरूपगुणविभवां सकलचेतनानां सकलपुरुषार्थप्राप्तौ पुरुषकारभूतां सर्वेश्वरवत् स्वयमपि प्राप्यप्रापकभूतां लक्ष्मीं स्तोतुकामः श्रीवत्साङ्कमिश्रः सकलजगदुज्जीवनार्थमाशीर्वादमेव प्रबन्धमुखे निबध्नाति—स्वस्ति श्रीः + + + । सा श्रीः अशेषजगतां स्वस्ति मङ्गलं दिशतात् । स्वस्तीति द्वितीयान्तं पदमनव्ययम् । अशेषजगतामित्यस्यात्राप्यन्वयः । सर्गः सृष्टिरूपसर्गः । उपद्रवः संहार इति यावत् ।

End:

स्तोत्रं परिसमापयति—क्षणलक्ष्यं यथा भवति तथा लक्षिता महेशाः जगतामधीश्वराः ॥ १३ ॥

Colophon:

इति रामानुजार्यविरचितं श्रीवत्साङ्कमिश्रकृतलक्ष्मीस्तोत्रव्याख्यानं संपूर्णम्

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2502

PM2756 साम्राज्यलक्ष्मीध्यानम

Beginning:

आकाशभैरवकल्पान्तर्गतसाम्राज्यलक्ष्मीध्यानम्—

इत्थं न्यासविधिं कृत्वा ध्यायेत् साम्राज्यदां श्रियम् ।
क्षीरसागरमध्यस्थे श्वेतद्वीपेऽतिविस्तृते ।
विजयाख्यपुरे रम्ये चिन्तामणिगृहाग्रतः ॥

End:

ससादिभिश्च तुरगैर्योधैर्नानायुधोद्धतैः ।
कोटिशः कोटिशोऽजस्रं सेव्यमानां समन्ततः ॥
सर्वलावण्यवसतिं विभ्रमावासमन्दिरम् ।
साम्राज्यलक्ष्मीं ध्यत्वैवं वर्णलक्षं जपेन्मनुम् ॥

2504

PM2734 सिद्धलक्ष्मीस्तोत्रम्

Beginning:

अस्य श्रीसिद्धलक्ष्मीस्तोत्रमन्त्रस्य. हिरण्यगर्भ ऋषिः । सिद्धलक्ष्मीर्देवता । अनुष्टुप् छन्दः । मम समस्तक्लेशपीडादारिद्र्यनिर्हरणार्थम् ऐश्वर्यलक्ष्मीप्राप्त्यर्थं सिद्धलक्ष्मीस्तोत्रजपे विनियोगः । . . . अथ ध्यानम्—

ब्राह्मी च वैष्णवी भद्रा षण्मुखा च चतुर्भुजा ।
त्रिनेत्रा खड्गशूला च शङ्खचक्रगदाधरा ॥ १ ॥

End:

पञ्चमं विष्णुपत्नी च षष्ठं कात्यायनी तथा ।
सप्तमं तु वरारोहा अष्टमा हरिदायिनी ॥ ११ ॥

Colophon:

इति श्रीसिद्धलक्ष्मीस्तोत्रं संपूर्णम् ।

2506

69938 लक्ष्मीद्वादशनामस्तोत्रम्

This Stotra with some variants is found in the *Tulākāverīmāhātmya*, ch. 22, verses 80-3 (ed. Chakravarti Ayyangar, Mysore, 1893 (Te), p. 142). The following is the full text of the Stotra:

श्रीकृष्ण उवाच—

श्रीदेवी प्रथमं नाम द्वितीयं कमलोद्भवा ।
तृतीयं कमला प्रोक्ता चतुर्थं लोकसुन्दरी ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

पञ्चमं विष्णुपत्नी च षष्ठमं(?) वैष्णवी तथा ।
सप्तमं तु वरारोहा अष्टमं हरिवल्लभा ॥
नवमं शार्ङ्गिणी प्रोक्ता दशमं देवदेविका ।
एकादशं महालक्ष्मीः द्वादशं श्रीहरिप्रिया ॥
एतानि द्वादश नामानि त्रिसंध्यं यः पठेन्नरः ।
आयुरारोग्यमैश्वर्यं भुवि पुण्यफलप्रदम् ॥
एकमासं जपेन्नित्यं सिद्धिर्भवति संपदः ।
द्विमासं सर्वकार्याणि षण्मासं राज्यमाप्नुयात् ।
संवत्सरं तु पूज्या स्याल्लक्ष्मीः संपूर्णमुत्तमम् ॥

Colophon:

इति श्रीकावेरीमाहात्म्ये लक्ष्मीद्वादशनामस्तोत्रं संपूर्णम् ।

2507

75398 लक्ष्मीद्वादशनामस्तोत्रम्

This is also found in the *Tulākāverīmāhātmya* (see above No. 2506) as verse 84 in ch. 22. The following is the full text of the Stotra:

श्रीः पद्मा कमला मुकुन्दमहिषी लक्ष्मीस्त्रिलोकेश्वरी
मा क्षीराब्धिसुता विरिञ्चिजननी विद्या सरोजा रमा ।
सर्वाभीष्टफलप्रदेति सततं नामानि यो द्वादश
प्रातः शुद्धमनाः पठेदनुदिनं सर्वं स सद्यो लभेत् ॥ १ ॥

2520

72105 महालक्ष्मीस्तोत्रम्

Beginning:

अस्य श्रीमहालक्ष्मीदिव्यनामस्तोत्रमन्त्रस्य उमामहेश्वर ऋषिः । अनुष्टुप् छन्दः । श्रीमहालक्ष्मीदेवता । श्रीमहालक्ष्मीप्रसादसिद्धयर्थे श्रीमहालक्ष्मीदिव्यनामस्तोत्रपठने विनियोगः । ध्यानम्—

यस्याः कटाक्षायतभागदृष्टाः ब्रह्मा शिवस्त्रिदशलोकपतिर्महेन्द्रः ।
चन्द्रश्च सूर्यो धनदो यमोऽग्निः प्रभूतमैश्वर्यमवाप्नुवन्ति ॥
लक्ष्मीः श्रीः कमला विद्या माता विष्णुप्रिया सती ।
पद्मालया पद्महस्ता पद्माक्षी लोकसुन्दरी ॥

End:

एतानि दिव्यनामानि प्रातरुत्थाय यः पठेत् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सुमहत् प्रियमाप्नोति धनधान्यमकल्मषम् ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon:

इति श्रीपद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे त्रिपाद्विभूतिकथने श्रीमहालक्ष्मीस्तोत्रं संपूर्णम् ।

GARUḌA-STOTRA-S

2542

66183 गरुडदण्डकम्

The following verse is added at the end:

अमृतकलशयुक्तं कान्तिसंपूर्णगात्रं सकलविबुधवन्द्यं वेदशास्त्रैरचिन्त्यम् ।
विविधरुचिरपक्षैर्धूयमानाण्डकोशं सकलविषविनाशं चिन्तयेत् पक्षिराजम् ॥

2564

67747 गरुडाष्टोत्तरशतनामस्तोत्रम् (वैनतेयाष्टोत्तरशतनामस्तोत्रम्)

Beginning:

देवदेव जगन्नाथ सर्वज्ञ करुणाकर ।
श्रोतुमिच्छामि तार्क्ष्यस्य नामाष्टशतमुत्तमम् ॥
शृणु देवि परं श्रेष्ठं गरुडस्य महात्मन: ।
नाम्नामष्टोत्तरशतं . . . . . नाशनम् ॥

. . . अस्य श्री गरुडाष्टोत्तशतमहामन्त्रस्य उमामहेश्वर ऋषि: । अनुष्टुप् छन्द: । श्री गरुडात्मा देवता । श्रीमहागरुड इति बीजम् । सुपर्ण इति शक्ति: । वैनतेय इति कीलकम् । . . . ध्यानम्—

अमृतकलशयुक्तं कान्तिसंपूर्णदेहं सकलविविधविद्यैर्वेदशास्त्रैरचिन्त्यम् ।
विविधसुलभपक्षैर्धूतमार्ताण्डकोशं सकलविषविनाशं चिन्तयेत् पक्षिराजम् ॥
वैनतेय: खगपति: काश्यपेयो महाबल: ।
तप्तकाञ्चनवर्णाभ: सुपर्णो हरिवाहन: ॥

End:

सामगानरत: स्रग्वी स्वच्छन्दरतिरग्रणी: ।
य इदं परमं गुह्यं गरुडस्य महात्मन: ।
नाम्नामष्टशतं पुण्यं विचित्रं पापनाशनम् ॥

Colophon:

वैनतेयाष्टोत्तरशतदिव्यनामामृतस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

HANUMAT-STOTRA-S

2566

70910 आञ्जनेयस्तोत्रम्

Beginning:

श्रीरामचन्द्रदासाय चिन्तितार्थप्रदाय च ।
घटिकाचलवासाय आञ्जनेयाय ते नमः ॥ १ ॥
सर्वलोकशरण्याय सर्वपापहराय च ।
घटिकाचलवासाय आञ्जनेयाय ते नमः ॥ २ ॥

End:

ललिताश्रितलोकाय लङ्कापुरहराय च ।
घटिकाचलवासाय आञ्जनेयाय ते नमः ॥ ७ ॥
घटिकाचलाष्टकं पुण्यं कामितार्थफलप्रदम् ।
सर्ववश्यफलं नृणां सर्वपापविनाशनम् ॥ ८ ॥

2567

74280 आपदुद्धरणहनुमत्स्तोत्रम्

Beginning:

अस्य श्री आपदुद्धारणहनुमत्स्तोत्रमहामन्त्रस्य विभीषण ऋषिः। आपदुद्धारणहनुमान् देवता । त्रिष्टुप् छन्दः। ह्रां बीजम्, ह्रीं शक्तिः, ह्रूं कीलकम् । मम आपदुद्धारणहनुमत्प्रसाद-सिद्ध्यर्थे जपे विनियोगः। ध्यानम्—

वामे करे वैरिभिदं वहन्तं सव्ये करे शृङ्खलहारटङ्कम् ।
दधानमास्वच्छसुवर्णवर्णं भजे ज्वलत्कुण्डलमाञ्जनेयम् ॥

. . . . विभीषण उवाच—

ख्यातः श्रीरामदूतः पवनतनुभवः पिङ्गलाक्षः शिखावान्
सीताशोकापहर्ता दशमुखविजयी लक्ष्मणप्राणदाता ।
आनेता भेषजाद्रिं लवणजलनिधिं लङ्घितो वायुवेगाद्
वीरः श्रीमान् हनूमान् मम मनसि हितं कार्यसिद्धिं विदध्यात् ॥

End:

विभीषणकृतं स्तोत्रं यः पठेत् सततं नरः ।
सर्वापद्भ्यो विमुच्येत नात्र कार्या विचारणा ॥
भूतप्रेतपिशाचादिकूष्माण्डब्रह्मराक्षसाः ।
दूरादेव प्रधावन्ति रामदूतस्य कीर्तनात् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

बुद्धिर्बलं + + + भवेत् ॥

रामेष्टं करुणापूर्णं हनूमन्तं भयापहम् ।
शत्रुनाशकरं वन्दे सर्वाभीष्टफलप्रदम् ॥

Colophon:

श्रीस्कान्दे पुराणे आपदुद्धारणं हनुमत्स्तोत्रं संपूर्णम् । आञ्जनेयस्तोत्रम् ।

2568

TR804 हनुमत्प्रसादस्तोत्रम्

Beginning:

विलासो वैदेहीहृदयकमलोन्मीलनकला-
विदग्धो वाचां यः समभवदशोकावनितले ।
प्रमाद्यल्लङ्केशस्मयविदलनोद्दाममहिमा
स दद्यादस्माकं सुरभिरिह वाचां मधुरताम् ॥
त्विषामीशं देवं वियति समुदञ्चत्स्वकिरणं
सुरद्रोर्मन्वानः फलमिति परीपाकमधुरम् ।
ग्रहीतुं तं मातुर्वहिरवतरन्नेव जठरात्
समुद्युक्तो योऽभूत् स वितरतु धार्टीं मम गिराम् ॥

End:

जयतु जयतु रम्यं ब्रह्मचर्यस्य भाग्यं जयतु जयतु देव्या अञ्जनायाश्च भाग्यम्
जयतु च रघुवीरे भक्तिमद्भागधेयं जयतु विशरणानां पवित्रमं भागधेयम् ॥
भैरोजीरङ्गनाथेन कृतं स्तोत्रं हनूमतः ।
भूयाद् भूत्यै रसविदां भक्तिभाजां हनूमति ॥

Colophon:

इति श्रीहनुमत्प्रसादस्तोत्रं समाप्तम् ।

2569

66580 हनुमद्भुजङ्गम्

Beginning:

स्फुरद्विद्युदुल्लासबालार्कघण्टाझणत्कारनादप्रवृद्धाट्टहासम् ।
भजे वायुसूनुं भजे रामदूतं भजे वज्रदेहं भजे भक्तबन्धुम् ॥
प्रपञ्चानुरागं प्रभाकाञ्चनाङ्गं जगद्गीतशौर्यं तुषाराद्रिधैर्यम् ।
तृणीभूतहेतिं रणोद्यद्विभूतिं भजे वायुपुत्रं पवित्रात् पवित्रम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

महाभूतपीडां महोत्पादपीडां महाव्याधिपीडां महाधिप्रपीडाम् ।
हरत्याशु ते पादपद्मानुरक्तिर्नमस्ते कपिश्रेष्ठ रामप्रियाय ॥
नमस्ते महासत्त्ववाहाय तुभ्यं (नमः) नमस्ते महाकालकालाय तुभ्यं (नमः) ।
नमस्ते महाशौर्यशौर्याय तुभ्यं (नमः) नमस्ते महावज्रदेहाय तुभ्यं (नमः) ।
नमस्ते (महा)फलीभूतसूर्याय तुभ्यं (नमः) नमस्ते महात्माञ्जनेयाय तुभ्यं (नमः) ॥
आञ्जनेयाय विद्महे वायुपुत्राय धीमहि तन्नो हनूमान् प्रचोदयात् ॥
मर्कटेश महोत्साह सर्वक्षुद्रनिवारण ।
शत्रून् संहर मां रक्ष श्रियं दासाय देहि मे ॥

2574

71547 आञ्जनेयाष्टोत्तरशतनामावलिः

Beginning:

अञ्जनागर्भपाथोधिराकाचन्द्रमसे नमः ।
प्रभञ्जनतपःपुञ्जफलभूताय ते नमः ॥
करुणावरणीभूतहृदयाय नमो नमः ।
अरुणाम्भोजरुचिरचरणाय नमो नमः ॥
भक्तौघमानसोल्लासचतुराय नमो नमः ।

End:

सर्वमौनीश्वरध्येयसुगुणाय नमो नमः ।
पारिजातागमतलवासशीलाय ते नमः ॥
इन्द्रियग्रामविजयनिरताय नमो नमः ।
अधःकृतेन्द्रियभवज्ञानौघाय नमो नमः ॥
बहुजन्मार्जिताघौघदलनाय नमो नमः ।
सर्वमङ्गलसंवासचरिताय नमो नमः ।
श्रीमदाञ्जनेयस्वामिने नमः ॥

Colophon:

आञ्जनेयाष्टोत्तरशतदिव्यनामपूजां समर्पयामि ।

2575

PM2931 हनुमदष्टोत्तरशतनामस्तोत्रम्

Beginning:

नारद उवाच—

सर्वशास्त्रार्थतत्त्वज्ञ सर्वदेवनमस्कृत ।
यत्त्वया कथितं पूर्वं रामचन्द्रस्य धीमतः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

स्तोत्रं समस्तपापघ्नं श्रुत्वा धन्योऽस्मि पद्मज ।
इदानीं श्रोतुमिच्छामि लोकानां हितकाम्यया ॥
वायोरंशावताराणां माहात्म्यं सर्वकामदम् ।
वद मे विस्तराद्ब्रह्मन् देवगुह्यमनुत्तमम् ॥
इति पृष्टो नारदेन ब्रह्मा लोकपितामहः ।
नमस्कृत्य जगन्नाथं लक्ष्मीकान्तं परात्परम् ।
प्रोवाच वायोर्माहात्म्यं नारदाय महात्मने ॥

ब्रह्मोवाच—

यच्छ्रुत्वा सर्वसौभाग्यं प्राप्नुवन्ति जनाः सदा ।
इदं रहस्यं पापघ्नं वायोरष्टोत्तरं शतम् ॥
विष्णुना लोकनाथेन रमायै कथितं पुरा ।
रमा मह्यं ददौ दिव्यं तत्ते वक्ष्यामि नारद ॥
इदं पवित्रं पापघ्नं श्रद्धया हृदि धारय ।
हनूमानञ्जनापुत्रो वायुपुत्रो महाबलः ।
रामदूतो हरिश्रेष्ठः शूरः केसरिनन्दनः ॥

End:

अष्टोत्तरशतं दिव्यं वायुसूनोर्महात्मनः ।
यः पठेच्छ्रद्धया नित्यं सर्वबन्धात् प्रमुच्यते ॥
सर्वरोगविनिर्मुक्तो सर्वपापैर्न लिप्यते ।
राजवश्यं भवेत्तस्य भीमस्यास्य प्रभावतः ॥
भूतग्रहनिवृत्तिश्च प्रजावृद्धिश्च जायते ।
आयुरारोग्यमैश्वर्यं बलं कीर्तिं लभेत् पुमान् ॥
यः पठेद्वायुचरितं भक्त्या परमया युतः ।
सर्वज्ञानसमायुक्तो स याति परमं पदम् ॥

Colophon:

इति श्रीपाद्मोत्तरखण्डे ब्रह्मकाण्डे ब्रह्मनारदसंवादे हनुमदष्टोत्तरशतं संपूर्णम् ।

2576

71547 **हनुमदष्टोत्तरशतनामावलिः**

Beginning:

श्री हनुमते नमः। अञ्जनासूनवे नमः। वायुपुत्राय नमः। केसरिनन्दनाय नमः॥ विश्वकर्मार्चितध्वजाय नमः। ईश्वरांशाय नमः। स्वयंजाताय नमः।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

अमितविक्रमाय नमः। एकवीराय नमः। महाजम्बुमालिप्राणापहारकाय नमः। धूमनेत्रप्रमथनाय नमः। श्रीनवदुर्गात्रिकालादित्रिमूर्तिस्वरूपाय नमः। श्रीआञ्जनेयाय नमः। भद्राय किन्यै(?) नमः।

Colophon:

इति श्रीहनुमन्ताष्टोत्तरशतनामपूजां समर्पयामि।

NAVAGRAHA-STOTRA-S

2580

73530 अङ्गारकस्तोत्रम्

Beginning:

अस्य श्रीअङ्गारकस्तोत्रमहामन्त्रस्य विरूप ऋषिः। अङ्गारको देवता। गायत्री छन्दः। अङ्गारकप्रसादसिद्ध्यर्थे जपे विनियोगः। अग्निर्मूर्धा अङ्गुष्ठाभ्यां नमः. . . स्कन्द उवाच—

पुरा देवासुरा युद्धे राक्षसैर्विमुखीकृताः।
देवाः पप्रच्छुरागम्य विरूपाख्यं महामुनिम्॥
केन युद्धे जयोऽस्माकं भवेद् ब्रूहि द्विजोत्तम।
कस्य प्रसादाज्जेष्यामो राक्षसान् सुमहाबलान्॥
. . . . . .
मङ्गलाय नमस्तुभ्यं भूमिपुत्र नमोऽस्तु ते।
ऋणहर्त्रे नमस्तुभ्यं धनप्रद नमोऽस्तु ते॥

End:

रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात्।
यं यं चिन्तयते कामं तं तमाप्नोति पुष्कलम्॥
बहुनात्र किमुक्तेन सर्वाभीष्टफलप्रदम्।
स्तोत्रमेतन्मुनिश्रेष्ठ मया प्रोक्तं तवाधुना॥

Colophon:

इति स्कान्दपुराणे षण्मुखागस्त्यसंवादे अङ्गारकस्तोत्रं संपूर्णम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2581

PM2707 अङ्गारकस्तोत्रम्

Beginning:

तस्याश्रमपदं नित्यं हेमाद्रेः पार्श्वं उत्तरे ।
नानाद्रुमलताकीर्णे पुण्यद्विजसमाश्रये ॥ १ ॥
पुण्यभद्रानदीतीरे चित्राख्या च महाशिला ।
मृगाश्च सहजं वैरमुत्सृज्य सुखमासते ॥ २ ॥

End:

अङ्गारक महीपुत्र भगवन् भक्तवत्सल ।
नमोऽस्तु ते ममापि त्वं व्रणमाशु विनाशय ॥ २७ ॥
मन्त्रेणानेन संपूज्य रेखास्तस्य विलोपयेत् ।
एवं सप्तसु वारेषु कर्तव्यं व्रतमुत्तमम् ॥ २८ ॥

Colophon:

इति श्रीमार्कण्डेयपुराणे मार्कण्डेयसनत्कुमारसंवादे व्रणहरम् अङ्गारकस्तोत्रं संपूर्णम् ।

2624

TR315 नवग्रहध्यानश्लोकाः (नवग्रहस्वरूपध्यानम्)

Beginning:

हृषीकेशं नमस्कृत्य हृत्पङ्कजनिवासिनम् ।
सर्वेषामिष्टदातारं नतानां सुलभं प्रभुम् ॥
भोगिभोगसमाविष्टमनन्तं पुरुषोत्तमम् ।
नित्यानन्दस्वरूपं तु वक्ष्येऽहं शुभसिद्धये ।
नवानां ग्रहदेवानां स्वरूपध्यानलक्षणम् ॥

End:

नवानां ग्रहदेवानां प्राप्यानुग्रहमुत्तमम् ।
पुत्रपौत्रादिसंपन्ना धनधान्यादिसंपदः ॥
वर्णाश्रमाचाररतास्तथा निष्कल्मषाः परम् ।
उत्तरोत्तरवृद्धिं ते प्राप्नुवन्ति महितले ॥

Colophon:

नवग्रहस्वरूपध्यानं समाप्तम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2687

69525 सूर्यस्तवराजः

Beginning:

अस्य श्री सूर्यस्तवराजस्तोत्रमहामन्त्रस्य काश्यप ऋषिः अनुष्टु . . . णो देवता। घृणिरिति बीजम्। सूर्य इति शक्तिः। आदित्य इति कीलकम्। . . . पे विनियोगः। ओं भूः अङ्गु०। ओं भुवः तर्जनी०। ओं सुवः म० . . . ओं जनः अनामि० . . .।

. . . . . . येत् परमात्मानमव्ययम्।
विष्णुं चतुर्भुजं रत्नं पाकशासनमध्य . . .॥

End:

एकविंशतिनामाख्यः स्तवराज इति श्रुतः।
. . . . सां धर्मवृद्धियशस्करः॥
पूजितोऽयं महामन्त्रः सर्वाभीष्टफलप्रदः।
. . . . . .
अष्टाविंशतिकष्टानि महारोगाश्च येऽपि च।
अशीतिर्वात . . . . ॥

2688

68345 सूर्याष्टकम् (सौराष्टकम्)

Beginning:

उदयाद्रिमस्तकमहामणिलसत्कमलाकरैकसुहृदं महौजसम्।
गदपङ्कशोषणमघौघनाशनं शरणं गतोऽस्मि रविमंशुमालिनम्॥ १॥
तिमिरापहारनिरतं निरामयं निजरागरञ्जितजगत्त्रयं विभुम्।
गदपङ्कशोषण . . . . रविमंशुमालिनम्॥ २॥

End:

अहमन्वहं . . . तुरगक्षताभवीशतकोटिहाटकमहामहीधरम्।
गदपङ्कशोणमघौघनाशनं शरणं गतोऽस्मि रविमंशुमालिनम्॥ ८॥
इति सौराष्टकमहर्मुखे रविं प्रणिपत्य यः पठति भक्तितो नरः।
स विमुच्यते सकलरोगकल्मषैः सवितुः समीपमपि सम्यगाप्नुयात्॥ ९॥

Colophon:

सौराष्टकम्।

2689

77656 सूर्याष्टकम्

Beginning:

साम्ब उवाच—

आदिदेव नमस्तुभ्यं प्रसीद मम भास्वर।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते॥ १॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सप्ताश्वरथमारूढं प्रचण्डं काश्यपात्मजम् ।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥ २ ॥

End:

तं सूर्यं जगतां नाथं ज्ञानप्रकाशमोक्षदम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ८ ॥
सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनम् ।
अपुत्रो लभते पुत्रं दरिद्रो धनवान् भवेत् ॥
आमिषं मधुपानं च यः करोति रवेर्दिने ।
सप्तजन्म भवेद्रोगी जन्मजन्मदरिद्रता ॥
स्त्रीतैलमधुमांसानि ये त्यजन्ति रवेर्दिने ।
न व्याधिः शोकदारिद्र्यं सूर्यलोकं स गच्छति ॥

Colophon:

इति साम्बपुराणे रोगापनयने सूर्याष्टकं समाप्तम् ।

2692

67190 शनैश्चराष्टोत्तरशतनामावलिः

Beginning:

ओं शनैश्चराय नमः । छायासूनवे नमः । नीलवस्त्रधराय नमः । अञ्जनाभाय नमः . . . । मन्दगतये नमः । रविपुत्राय नमः । गृध्रस्थिताय नमः । किरीटिने नमः । शूलधारिणे नमः । कोणाय नमः ।

End:

ईप्सितवरप्रदाय नमः । ईड्याय नमः । ईतिष्याय(?) नमः । असह्याय नमः । शक्ताय नमः । सर्वाभीष्टदाय नमः । सर्वैश्वर्यप्रदायकाय नमः । शनैश्चराय नमः । अष्टोत्तरशतनामार्चनपूजां समर्पयामि ।

NADĪ-TĪRTHA-STOTRA-S

2706

70257 कावेरीस्तुतिः

Beginning:

मातेय नुतमनोजातेय हरमनोप्रीतेय भुवनविख्यातेया ।
नेहि उन्नतजनजातेय शिवन संगातिय नोडुव बन्निरय्या ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

कावेरिया भवहारिया दुरितारिया मोक्षकारिया ।
नोडुव बन्निरय्या कावेरिया भवहारिया ॥ प. ॥
श्लो. । मज्जन्ति मुनयः सर्वे भवानिः(?) को न मुच्यते ।
अम्ब त्वद्दर्शनान्मुक्तिः न जाने स्नानजं फलम् ॥

End:

श्लो. । कावेरी गिरिजातेयं वैकुण्ठं रङ्गमन्दिरम् ।
परवासुदेवरङ्गेशं प्रत्यक्षं परमं पदम् ॥
टी. । आवाव जन्मकर्मगळ सलेयोळु कावेरिय कण्डु सुखियागिरै ।
श्री विष्णुस्वामिपुरंदरविठलन सेवेयोळनुदिन इप्पुदय्या ॥
कावेरिया भवहारिया ।

2707

67197 कावेरीस्तोत्रम्

Beginning:

मोक्षकामकवेरराजतपोविपाकसमागतां
लोकपावनहेतुना विधिना करेण वितान्तमाम् (?) ।
भूतलेऽमलसह्यपर्वतसानुकामलकान्तिके
सर्वपापविनाशनं परिभावयामि कवेरजाम् ॥
कुम्भसंभवकुण्डिकाजल . . . स्वतीर्थजलाश्रितां
कुम्भजन्मकुटुम्बिनीमखिलाङ्गनप्रतिपादिताम् (?) ।
विष्णुपादसरोजनिर्गतशंग(?) देहिविमोक्षदां
विश्वपावनकारणं परिभावयामि कवेरजाम् ॥

End:

श्वेतकाननशंकरालयकाशिवासजनाश्रितां
पुण्य(?)यवनेश्वरालयवैभवं सरुरुत्तमम् ।
सर्वरत्नविराजमानसमुद्रराजसुशोभितां
पुण्यसंगमुनीश्वरीं परिभावयामि कवेरजाम् ॥
यस्तु पुण्यकवेरजास्तुतिमादरेण सुकीर्तयेत्
श्रद्धया परया शृणोतु दश मानवो भुवि सर्वदा ।
सर्वपापविवर्जितोदितपुत्रपौत्रधनादिकां
दीर्घमायुरवाप्य दुर्लभविष्णुलोकमवाप्नुयात् ॥
. . . . . . कावेरि देवि कावेरि पाहि माम् ।
. . . . . . कावेरि देवि कावेरि रक्ष माम् ॥

Colophon:

कावेरीस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2708

PM33 कावेर्यष्टकम्

Beginning:

अच्छस्वच्छलसद्दुकूलवसनां पद्मासनाध्यासिनीं
हस्तन्यस्तवराभयाब्जकलशां राकेन्दुकोटिप्रभाम् ।
भास्वद्भूषितगन्धमाल्यरुचिरां चारुप्रसन्नाननां
श्रीगङ्गादिसमस्ततीर्थनिलयां ध्यायामि कावेरिकाम् ॥
भक्तानुकम्पे भवभाग्यलभ्ये नित्ये जगन्मङ्गलदानशूरे ।
निरञ्जने दक्षिणदेशगङ्गे कावेरि कावेरि मम प्रसीद ॥

End:

मणिमयगिरिसिन्धौ स्नानमात्रेण माघे मदन . . . . वदना तत्र विद्याधरात्वम् ।
क्षपित . . . विन्ध्यपादावतीरं सकल . . . . वृत्ति ॥

Colophon:

श्रीकावेरि-अष्टकं संपूर्णम् ।

2711

PM642 गङ्गालहरी

Contains the following verses (the first of which is found in *BSM*, I, p. 344, *Gaṅgāṣṭaka* of Kālidāsa), not found in printed editions of the text:

कत्यस्थीनि करोट्य: कति कति द्वीपे द्विपानां त्वच:
काकोला: कति पन्नगा: कति सुधाधाम्नश्च खण्डा: कति ।
किं च त्वं च कति त्रिलोकजननि त्वद्वारिपूरोदरे
मज्जज्जन्तुकदम्बकं समुदयत्येकैकमादाय यत् ॥ ५९ ॥
कियद्दूरे तीरद्रुमकुसुमसौरभ्यरभस-
भ्रमद्भृङ्गीनीतध्वनिह्वतकुरङ्गीपरिगतम् ।
पयो मन्दाकिन्या: सुरपुरपुरंध्रीकुचतटी-
विटङ्काध्यारोहप्रवरमणिसोपानसरणि: ॥ ६० ॥
जडता जडतामम्ब पङ्क: पङ्कं व्यपोहते ।
भ्रमस्ते भ्रममस्माकमधोगतिरधोगतिम् ॥ ६१ ॥
इमां पीयूषलहरीं + + + सर्वसंपद: ॥ ६२ ॥

Colophon:

इति गङ्गालहरी समाप्ता ।

साधारणनामसंवत्सर-चैत्रशुद्ध ४ भानुवार हगलु ४ घटि व्याळेह्लि बरद गङ्गालहरी पुस्तककै सकलसाम्राज्यवैभवादिसिद्धिगळु वुंटागलि ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2716

PM2636 गङ्गालहरी सव्याख्या

Beginning:

गङ्गां प्रणम्य वरदां बालबुद्धि(वि,शुद्धये ।
जगन्नाथस्य लहरीव्याख्यानं . . . करोम्यहम् ॥

हे गङ्गे, ते सुधासौन्दर्यम् अमृतदर्शनं च सुन्दरं सलिलं नः अशिवं पापं शमयतु । कथंभूतम्? सकलवसुधायाः सर्वपृथिव्याः समृद्धं संपूर्णं सौभाग्यं शोभारूपम् । पुनः, लीलया जनितम् उपमौदितं(?) सकलजगत् येन तस्य खण्डपरशोः शिवस्य किमपि अनुपमं तत् महैश्वर्यं षड्गुणैश्वर्यम् । पुनः, श्रुतीनां सर्वस्वं त्रिकाण्डप्रतिपादितं फलम् । अथ सुमनसां पुण्यं तत् । देवानां साधूनां वा मूर्ति(र्तं) ग्राह्यं सुकृतं सर्वदा अदृश्यमपि कारुण्यात् दृश्यरूपम्; "मूर्तामूर्ते द्वे ब्रह्मणो रूपे" इति श्रुतेः ॥ १ ॥

End:

वीचिभिः तरङ्गैः क्षालितं निर्विषीकृतं यत् कालीये सर्पे आहितं स्थापितं पदं श्रीकृष्णपदं यया हे गङ्गे, हे स्वर्लोककल्लोलिनि । व्यालः महासर्पः तेन अवलीढः विषदन्तेन ग्रस्तः आत्मा तनुः अन्तःकरणं च यस्य तस्य मम अधुना तापं विषयविषसंतापं यत् दूरीकुरु । कथंभूतं तापम्? मन्त्रैः मन्त्राणां पुरश्चरणैः मीलितः एकीकृतः; मां; पुनः, औषधैः रसायनैः मुकुलितः कमलकुलवत् मुकुलयो(?) जातः तम् । पुनः, सुराणां गणैरुपासितं पञ्चयज्ञादिदेवनासमुदायैः त्रस्तः भीतः तम् । सान्द्रा निबिडा या सुधा वनस्पतिः विदलितः शकलीकृतः । एतादृशैरुपायैः मम; सर्पो यथा नश्यति तथा अयमपि तापः एतैः पूर्वैरेवोपायै . . . जातः त्वमेव तं वारयेत्यर्थः ॥ ५० ॥

2719

67681 गङ्गाष्टकम्

End:

गङ्गे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये
पुण्ये ब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे ।
प्रायश्चित्तं यदि स्यात् तव जलकणिका ब्रह्महत्यादिपापैः
कस्त्वां स्तोतुं समर्थस्त्रिजगदभयदे देवि गङ्गे प्रसीद ॥ ९ ॥
गङ्गां तुङ्गतरङ्गिणीं भवभयक्लेशापहां सर्वदां
मर्त्यानामवगाहनात् कलुषिणां स्वर्गेऽतिसंस्थापिनीम् ।
लक्ष्मीकान्तपदारविन्दगलितां विश्वेशमूर्ध्नि स्थितां
काश्यामुत्तरवाहिनीं भगवतीं भागीरथीं प्रार्थये ॥ १० ॥

Colophon:

इति शंकराचार्यविरचितं गङ्गाष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2729

72813 **गङ्गाष्टकम्**

The following additional verse is found in the middle:

त्रिजगति विहरन्ती किल्बिषं निर्दहन्ती हरशिरसि वसन्ती प्राणिनः पावयन्ती ।
किमपि शुचि वहन्ती फेनपुञ्जैर्वसन्ती जलधिमनुसरन्ती जाह्नवी नः पुनातु ॥

2733

PM696 **गङ्गास्तोत्रम्**

Beginning:

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे ।
शंकरमौलिनिवासिनि विमले मम मतिरास्तां तव पदकमले ॥

End:

भो भुवनेश्वरि पुण्ये धन्ये देवद्रुममणिमुनिवरकन्ये ।
भवभीतं मामुद्धर गङ्गे लोकोद्धारिणि जाह्नवि गङ्गे ॥
गङ्गास्तोत्रमिदं खलु भवसारं वाञ्छितफलदं विहितमुदारम् ।
शंकरसेवकशंकररचितं पठतां विषये भवति समस्तम् ॥

2734

PM2665 **तापनाशिनीपञ्चरत्नम्**

Beginning:

उन्नतगिरिहंतत्पापिनि काशिजलेश्वरि अगस्त्यमुनिमन्त्रपुष्पपुजिलायमहामुनि(?) ।
सुगन्धपुष्पधूपदीपमालतिमनोहरि त्रिगुणतापनाशिनि प्रत्यक्षसूर्यनन्दिनि ॥

End:

गुप्तनाथसोमनाथमध्यतीर्थे अश्विनि करोति स्नानदानध्यानसद्यमोक्षदायिनि ।
अघोरपापतापकष्टदुष्टदैत्यनाशिनि त्रिगुणपापनाशिनि प्रत्यक्षसूर्यनन्दिनि ॥

Colophon:

श्रीशंकराचार्यविरचितं तापिपञ्चरत्नं स्तोत्रं संपूर्ण समाप्तम् ।

संवत् १९४१ ना वर्षे शके १७०६ प्रवर्तमाने आषाढमासे शुक्लपक्षे १ मन्दवासरेण भटभगवान्सुतभटविजयशंकरेण लिखितम् ।

2739

PM2675 **त्रिवेणीस्तोत्रम्**

Beginning:

शेष उवाच—

पुरा कल्पापाये भगवति शयाने वटपुटे
यदा सर्वान् लोकान् जठरपिठरे संहृतवति ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तदा क्षेत्रं वेणी जयति जगदीशस्य वसतिः
प्रयागे ब्रह्माण्डे नहि गुणसमान्या विजयते ॥

End:

त्वं मोक्षलक्ष्मीस्त्वमतिप्रभासि त्वं ब्रह्मनाडी वरनाडिकासि ।
त्वं ब्रह्ममायासि विचित्रगासि प्रत्यक्षरूपासि नमो नमस्ते ॥
इति शेषेण पाताळे सनकादिभ्य ईरितम् ।
स्तोत्रं दिवाथ वा नक्तं पठनात् सर्वकामदम् ॥
पठितव्यं पठितव्यं पठितव्यं पुनःपुनः ।
सर्वसिद्धिकरं नृणां नाख्येयं यस्य कस्यचित् ॥

Colophon:

इति **त्रिवेणीस्तोत्रं** संपूर्णम् ।

2741

69592 **त्रिवेणीस्तोत्रम्**

Beginning:

(दे)हेन्द्रियप्राणमनोमनीषा . . . ताहमज्ञानविभिन्न . . . वा ।
तत्साक्षिणी या स्फुरति स्वभावात् साक्षात् त्रिवेणी मम सिद्धिदास्तु ॥
जाग्रत्पदं स्वप्नपदं सुषुप्तिं विद्योतयन्ती विकृतिं तदीयाम् ।
या निर्विकारोपनिषत्प्रभावात् साक्षात् त्रिवेणी मम सिद्धिदास्तु ॥

End:

अनेन स्तवनेनैव त्रिसंध्यं यः पठेत् सदा ।
तस्य वेणी सुप्रसन्ना भुक्तिमुक्तिप्रदायिनी ॥
ब्रह्मादयोऽपि ये देवा वेणीस्नानाभिकाङ्क्षया ।
वासं वाञ्छन्ति चान्येषां मानवानां तु का कथा ॥

Colophon:

इति **श्रीमत्पद्मपुराणे** प्रयागमाहात्म्ये **वेणीस्तोत्रं** संपूर्णम् ।

2742

69910 **दुग्धापगादशकम्**

Beginning:

वीरराघववेदान्तयतिराड् देशिकोत्तमः ।
सर्वतन्त्रस्वतन्त्रो मे संनिधत्तां सदा हृदि ॥
कलशतटिनी भाति स्वच्छप्रवाहपरंपरा
पृथुलतरलोदारस्फायत्तरङ्गकरम्बिता ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

मृदुलसलिलास्वादाभ्याशाभ्युपागतसंभृत-
त्रिदशमहिषीवक्षोदेशक्षरन्नवकुङ्कुमा ॥ १ ॥

दुग्धापगा दुरितदूषितदुर्जनानां . . . ।

End:

गङ्गातुङ्गातरङ्गावलिभिरधिगता वारिखेलद्रथाङ्गा-
नङ्गासङ्गावभङ्गावहनिजमहिमा तां परां गाहतां वा ।
तां गाथाभिः स्तुवन्तः कलशनदि शुभां त्वां परां गाहमानाः
सन्तो गङ्गाधराङ्गाकलनविरहितेत्यादरान्मुक्तसङ्गाः ॥ १० ॥
वीरराघववेदान्तवर्याख्यानशालिने ।
साक्षाल्लक्ष्मीनृसिंहाय त्रैलोक्यगुरवे नमः ॥

2751

69592 प्रयागस्तोत्रम् (प्रयागाष्टकम्)

Has the following colophon:

इति श्रीपद्मपुराणे पातालखण्डे प्रयागमाहात्म्ये शेषसनत्कुमारसंवादे त्रयोदशोऽध्यायः ।

2756

77644 मणिकर्णिकास्तोत्रम्

This is same as MT. 3986 (c) but the last verse is omitted in our MS.

GĀYATRĪ-STOTRA-S

2762

72843 गायत्रीत्रिकालध्यानम्

Beginning:

बाला त्वं सिद्धिगायत्रीं प्रत्यक्षचतुराननाम् ।
रक्तां रक्ताम्बरोपेतामक्षसूत्रधरां तथा ॥
कमण्डलुधरां देवीं हंसवाहनसंस्थिताम् ।
ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

शङ्खचक्रगदापद्मधारिणीं विष्णुदेवताम् ।
बदरिकाश्रमवासान्तामायान्तीं सूर्यमण्डलात् ॥

2763

71209 गायत्रीध्यानम्

Beginning:

उदयम्—

ब्रह्माणी चतुराननाक्षवलये कुम्भं करैः स्रुक्स्रुवौ
बिभ्राणारुणकान्तिरिन्दुवदना ऋग्रूपिणी बालिका ।
हंसारोहणकेलिरम्बरमणिर्बालेन्दुमौलिः सदा
गायत्री सुरसेविता भवतु नः संपत्समृद्ध्यै सदा ॥

End:

सायम्—

ध्येया साधु सरस्वती भगवती पीताम्बराडम्बरी
श्यामा श्यामवपुर्लता परिमली सारस्वती वैष्णवी ।
ग्रेध(तार्क्ष्य)स्था मणिनूपुरा परिणता ग्रैवेयभूषोज्ज्वला
हस्तालम्बितशङ्खचक्रवरदाभीतीर्दधानाम्बिका ॥

2764

72535 गायत्रीध्यानम्

Beginning:

रक्तश्वेतसुवर्णनीलवदनैर्युक्तां सुनेत्रोज्ज्वलां
मुक्तायुक्तमणिस्तुतिशतैर्युक्तां(?) कुमारीमिमाम् ।
गायत्रीं (कर)कमलेक्षणां शङ्खाब्जयुग्मां करैः
पद्माक्षं च वरस्रजं च दधतीं हंसाधिरूढां भजे ॥

End:

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिन्दुकलानिबद्धमकुटां तत्त्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2768

67774 **गायत्रीमहाचक्रस्तवराजः**

Beginning:

कैलासशिखरासीनं शिवं पप्रच्छ पार्वती ।
गायत्र्यास्तु महाचक्रं मम ब्रूहि महेश्वर ॥

महेश्वर उवाच—

साधु पृष्टं त्वया देवि सर्वलोकसुखावहम् ।
साधकानां त्रिवर्णानां दृष्टमात्रेण सिद्धिदम् ॥

End:

देहलीं पूजयेत् सम्यक् चक्रराजस्तवं पठेत् ।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥
श्राद्धकाले पठेत् स्तोत्रं पितॄणां पुरतः स्थितः ।
शतं सवत्सरं नित्यं गयायां पिण्डदानतः ।
चक्रस्मरणमात्रेण मम सायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीविष्णुयामले सहस्रकोटिविस्तारे उमामहेश्वरसंवादे गायत्रीमहाचक्रस्तवराजं संपूर्णम् ।

2775

71209 **गायत्र्यष्टकम**

Beginning:

विश्वामित्रतपःप्रियां प्रियतरां विप्रालिसंसेवितां
नित्यानित्यविवेकदां स्मितमुखीं खण्डेन्दुभूषोज्ज्वलाम् ।
ताम्बूलारुणभासमानवदनां मार्ताण्डमध्यस्थितां
गायत्रीं हरिवल्लभां त्रिणयनां ध्यायामि पञ्चाननाम् ॥
जातीपङ्कजकेतकीकुवलयैः संपूजिताङ्घ्रिद्वयां
तत्त्वार्थात्मिकवर्णपङ्क्तिसहितां तत्त्वार्थबुद्धिप्रदाम् ।
प्राणायामपरायणैर्बुधजनैः संसेव्यमानां शिवां
गायत्रीं हरिवल्लभां त्रिणयनां ध्यायामि पञ्चाननाम् ॥

End:

पादाब्जान्तररेणुकुङ्कुमलसत्फाल(द्यु)रामावृतां
रम्भानाट्यविलोकनैकरसिकां वेदान्तबुद्धिप्रदाम् ।
वीणावेणुमृदङ्गकाहलरवां देवैः कृतां शृण्वतीं
गायत्रीं हरिवल्लभां त्रिणयनां ध्यायामि पञ्चाननाम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

हत्यापानसुवर्णतस्करमहागुर्वङ्गनासंगमान्
दोषान् चेल्समा पुरंदरसमा संच्छिद्य सूर्योपमाम् ।
गायत्रीं श्रुतिमातुरेकमनसः संध्यासु ये भूसुरा
जप्त्वा यान्ति परां गतिं मनुमिमं देव्याः परं वैदिकाः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं गायत्र्यष्टकं संपूर्णम् ।

SARASVATĪ-STOTRA-S

2801

71856 भारतीनवरत्नाङ्गीस्तोत्रम्

Beginning:

श्वेताम्भोरुहमध्यस्थां शङ्खकुन्देन्दुसंनिभाम् ।
श्वेतमाल्याम्बरधरां भारतीं भावये हृदि ॥ १ ॥
पाशविद्यजपेवादिघृणिहस्तां(?) त्रिलोचनाम् ।
हंसासनस्थितां देवीं भारतीं भावये हृदि ॥ २ ॥

End:

रत्नमौलिनिभेदं(?) च यशोज्ञानप्रदायिनीम् ।
धर्मकामादिफलदां भारतीं भावये हृदि ॥ ८ ॥
षडम्भोरुहसंचारां सहस्राराम्बुजालयाम् ।
समस्तदेवतारूपां भारतीं भावये हृदि ॥ ९ ॥
भारतीनवरत्नाङ्गीस्तोत्रं यः पठते नरः ।
वाग्विभूतिं समाश्रित्य ज्ञानश्रियमवाप्नुयात् ॥ १० ॥

2802

68345 वागीशीस्तवः

Beginning:

अमलकमलाधिवासिनि . . . . मनोज्ञे ।
सुन्दरगात्रि सुशीले तव चरणाम्भोरुहं नमामि सदा ॥ १ ॥
अचलात्मजा च दुर्गा कमला त्रिपुरेति भेदिता जगति ।
या सा त्वमेव वाचामीश्वरि सर्वात्मना प्रसीद मम ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

बोधात्मिके बुधानां हृदयाम्बुजचारुरङ्गनटनवरे ।
भगवति भवभङ्गकरीं भक्तिं भद्रार्थदे प्रसीद मम ।। १२ ।।
त्वच्चरणसरसिजन्मस्थितमहितधियां न लिप्यते दोषः ।
भगवति भक्तिमतस्त्वयि परमां वरदेश्वरि प्रसीद मम ।। १३ ।।
वागीशीस्तवमिति नित्यश्रद्ध . . . .

Colophon:

इति वागीशीस्तवं समाप्तम् ।

2803

72447 वागीश्वरीस्तोत्रम्

Beginning:

अस्य श्रीसरस्वतीस्तोत्रमहामन्त्रस्य मार्कण्डेय ऋषिः। स्रग्धरानुष्टुप्छन्दांसि। श्रीसरस्वती देवता। मम शीघ्रमेव वाक्सिद्ध्यर्थे जपे विनियोगः। ध्यानम्—

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ।।

End:

पक्षद्वये त्रयोदश्यामेकविंशतिसंख्यया ।
अविच्छेदं पठेच्छ्रीमान् ध्यायेद्देवीं सरस्वतीम् ।।
सर्वकामसमायुक्तो सर्वलोकेषु विश्रुतः ।
वाञ्छितं फलमाप्नोति लोकेऽस्मिन्नात्र संशयः ।।

Colophon:

इति श्रीसनत्कुमारसंहितायां वागीश्वरीस्तोत्रं संपूर्णम् ।

2804

TR803 शारदात्रिशती

Beginning:

परमाभरणं धातुर्वदनाम्भोजस्य शारदा देवी ।
या राजति जननी सा लसतु सदा सुप्रसन्ना नः ।। १ ।।
सा शारदा प्रसन्ना राजति मम मानसे नित्यम् ।
या शारदाब्जवदना जननी कीर्त्या हि सर्वलोकानाम् ।। २ ।।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

मातः कथं नु वर्ण्यस्तव महिमा वाणि निगमचयवेद्यः ।
इति निश्चित्य पदाब्जं तव वन्दे मोक्षकामोऽहम् ॥ ३०० ॥
त्वामम्ब बालिशोऽहं त्वचमत्कारैर्गिरां गुम्भैः ।
अयथायथक्रमं हि स्तुवन्नपि प्राप्तजन्मसाफल्यः ॥ ३०१ ॥

Colophon:

इति शारदात्रिशती समाप्ता ।

2805

69633 **सरस्वतीप्रार्थना**

Beginning:

कोकावलिशोकापहभूकान्तमणिश्रीर्लोकाहतराकाशशिनीकाशमुखश्रीः ।
कोकास्यविकासास्पदसाकारतनुश्रीर्धीचापलमाचामतु वाचामधिदेवी ॥ १ ॥

End:

ध्यानादिविधानार्पितमानाकलनार्थं कृष्णावनिपालावनलीलातनुरेषा ।
दत्ते भुवि तोषं सुखपोषं सुमनीषां धीचापलमाचामति वाचामधिदेवी ॥ १० ॥

Colophon:

इति सरस्वतीप्रार्थना ।

2812

68345 **सरस्वत्यष्टकम्**

Beginning:

अमला विश्ववन्द्या सा कमलाकरमालिनी ।
विमलाभ्रनिभा वोऽव्यात् कमलायां सरस्वती ॥
वर्णसंस्थाङ्गरूपा सा स्वर्णरत्नविभूषिता ।
निर्णया भारती श्वेतवर्णा वोऽव्यात् सरस्वती ॥

End:

सर्वलोकप्रपूज्या सा पर्वचन्द्रनिभानना ।
सर्वजिह्वाग्रसंस्था सा सर्वान् वोऽव्यात् सरस्वती ॥
सरस्वत्यष्टकं नित्यं सकृत् प्रातर्जपेन्नरः ।
आन्ध्यैर्विमुच्यते सोऽयं प्रज्ञैरिष्टैश्च लभ्यते ॥

2813

70818 **सरस्वत्यष्टकम्**

Beginning:

. . . . . वदना सौवर्णपद्मासनी
यैषा रक्तकुशेशयाभचरणा सौवर्णदेहोज्ज्वला ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

यस्या वक्षसि कुम्भिकुम्भसदृशौ पीनावुभौ हि स्तनौ
वाणी मे (वदने सदा वसतु सा) पद्मासनाङ्कस्थिता ॥ १ ॥
या देवी सुरनाथवन्द्यचरणा सौन्दर्यभाग्याधिका
ब्रह्मावक्षसि सर्वदा स्थितवती श्वेताम्बरं बिभ्रती ।
गायन्ती पिकनादजित्कलरवं कौतूहलाद्देवता
वाणी मे वदने सदा वसतु सा पद्मासनाङ्कस्थिता ॥ २ ॥

End:

यां देवीं मुनयो वदन्ति परमं तद्ब्रह्मरूपं शिवं
विद्वांसोऽपि सरस्वतीमिति च यां भक्ताश्च गौरीमिति ।
राजानो बहुद्रव्ययुक्तमनुजा वक्ष्यन्ति यां सिन्धुजां
वाणी मे वदने सदा वसतु सा पद्मासनाङ्कस्थिता ॥ ८ ॥
इदमष्टकमादरेण यः पठेत् लभते वाञ्छितमर्थमुत्तमम् ।
स भजते कवितामधिकं यशः प्रभवते सकलप्रजाधिकः ॥ ९ ॥
कविना रामचन्द्रेण रचितं चेदमष्टकम् ।
मूलाण्डवासिना देव्या भारत्याः स्तवमुत्तमम् ॥ १० ॥
अस्मिंस्तवे सरस्वत्याः श्लोकैरष्टभिरादृते ।
अवद्धा ये च ते गोप्याः सरस्वत्या कवीश्वरैः ॥ ११ ॥

2814

TR316 सरस्वत्यष्टकम्

Beginning:

वसन्तीमम्भोजे वरतटनिजद्योतविजिते
वहन्तीमुत्तंसीं वदनसदृ . . . . . . शिशुम् ।
दधानामात्मीये वरमभयमभ्युत्करतले
बुधाना . . . . . भुवनजननीं नौमि सततम् ॥ १ ॥

(Śloka No. 2 is difficult to decipher)

पुरस्कुर्वन् पुण्यैर्जगति भवतीं पूरुषवरो
विधत्ते विश्वेषां जननि विबुधानां च विनुतिम् ।
भवत्यास्ताहृश्या भगवति नुतौ हन्त शरणं
त्वमेवैका तस्माज्जननि तनुमस्त्वां हृदि सदा ॥ ३ ॥

End:

सुधासध्रीचीनस्तुतितिलकमेनं गणपतेः
मुखाम्भोजात् मूर्तं मधुझरमिव द्राक् प्रसृमरम् ।
पठन्तो भारत्याः पदनलिनमाहात्म्यविभवात्
भजन्ते पाण्डित्यं परिहृत-(जडिम्ना)कषायाः पटु शिवात् ॥ ९ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2820

70640 **सरस्वत्यष्टोत्तरशतनामावलिः**

Beginning:

ओं मायायै नमः । भारत्यै नमः । वाण्यै नमः । विजयायै नमः । देव्यै नमः । सर्वगतायै नमः । गौर्यै नमः । वामाक्ष्यै नमः । कमलप्रियायै नमः । सरस्वत्यै नमः ।

End:

प्रज्ञायै नमः । प्रभायै नमः । मङ्गलसौन्दर्यै नमः । वाचे नमः । विशालायै नमः । विशालाक्ष्यै नमः । सर्वविद्यायै नमः । सुमङ्गलायै नमः । काळ्यै नमः । महेश्वर्यै नमः । सरस्वत्यष्टोत्तरशतमन्त्र-पुष्पं समर्पयामि ।

ĀCĀRYA-STOTRA-S

2822

70313 **अक्षरगद्यम् (बसवाक्षरगद्यम्)**

Beginning:

छत्रपताकमुख्यसितलक्ष्म . . . मृगाङ्कविग्रह
छत्रियपत्रयादिकछलद्विपिकुप्यनदिग्रह ।
चैत्रभटभटोद्भटभटाटनताण्डवमूर्तिछ्झदै-
त्यत्रिपुरापहारक छकारनुत बसवेश . . . ॥ १ ॥

End:

क्षरदुरिताक्षमक्षयजनिस्थितितारणकारणक्षया-
द्वरगणनायकाक्षयभवक्षयरोगभिषग्क्षमक्षपा-
क्षरेशकलाजटाजूटक्षपितप्रतिपक्षसुरासुरक्षमा-
ङ्कुरितकटाक्षवीक्षण क्षकारनुत बसवेश पाहि माम् ॥ ३८ ॥

Colophon:

अक्षरगद्यं संपूर्णम् ।

2823

73978 **अब्दमालिका**

Beginning:

नमः श्रीवरदार्याय श्रीमद्वेङ्कटसूरये ।
तद्गुरुभ्यश्च सर्वेभ्यः श्रियै तद्वल्लभाय च ॥ १ ॥
दासं कृतार्थीकर्तुं स्वं त्रय्यन्तार्याब्दमालिकाम् ।
तदाराध्यो हयग्रीवः कारयत्यमुना स्वयम् ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीकौशिककुलाब्धीन्दुवेङ्कटेशगुरोः सुतः ।
नत्वा याचे सतस्तेऽमूं वीक्षन्तां देशिकादरात् ॥ ३ ॥
दृष्टस्य केचित् प्रभवाः प्रदाने स्वर्गाद्यदृष्टस्य फलस्य केचित् ।
द्वयं न यद्विन्द्वयुतांशतुल्यं तस्यामृतस्यागममौलिसूरिः ॥ ४ ॥

End:

यः स्वेषां स्वोपदेशात् प्रबलतररिपून् कामपूर्वान् निवर्त्य
स्वान्ते शान्त्यादिबन्धूननवरतमुदे स्थापयित्वा प्रदीपम् ।
तत्त्वज्ञानात्मकं च प्रपदनत इहैवाक्षयान् मुक्तभोगान्
दत्त्वा रक्षत्यमुष्यागमशिखरगुरोः पादपद्मे गतिर्मे ॥ ६२ ॥
त्रयीशिखार्यपादुकाविनम्ररङ्गनामका-
र्पितेयमब्दमालिका तदीयवक्षआसिका ।
सतां मुदेऽस्तु देशिकाङ्घ्रयमोघभक्तिवर्धिका
प्रबोधवार्धिचन्द्रिका पठत्प्रियप्रदापिका ॥ ६३ ॥
दासोजीवनहेतोर्दासमुखेन स्वतः सुकारितया ।
प्रीतो भवति हयास्यो वेदशिरोदेशिकाब्दमालिकया ॥ ६४ ॥

Colophon:

इति चेट्लूर्-रङ्गाचार्यकृतिषु आचार्याब्दमालिका संपूर्णा ।

Scribal note:

इदिल् ३० वदु (दुर्मुखिनाम) संवत्सरश्लोकं मात्रं कैयि विट्टु पोयि विट्टदु । ग्रन्थान्तरं पार्तु एळुदवेणुम् ।

2824

71576 अमृतध्वनिः

Beginning:

जय जय देव यतीन्द्र विभो जय गुरुशेखरचन्द्र कुमतिमदावलसिंहरव मन्द्रध्वनिचलदिन्द्र मन्द्रध्वनिवलदिन्द्र द्विपमुखकुम्भिभ्रमणविजृम्भद्भवपरिरम्भोद्भट समुदञ्चचपलदृगञ्चच्छविसुर-गुच्छचटुगुणयुञ्ज जय . . . . .

End:

हुंकृतिभङ्गुरसंगरशंकरटङ्कद्रमिडसदङ्क टङ्कद्रमिडसदङ्ककुधितगुरूक्रमवचनाभभ्रमिशरदभ्राद्भुतकनदच्छाच्छमरकपुच्छच्छलसमगुच्छच्छविमिलदिन्दुद्युतिमदभिन्ददृरवरमन्द्रध्वनिघन दिनदिन + चङ्ग -अङ्ग-अङ्ग-अभिमत-रङ्ग-परमतभङ्ग शुभमतसङ्ग । हरिः ओम् ।

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2825

TR806 आचार्यद्वात्रिंशत्

Beginning:

(श्रीवेदान्तदेशिकस्तुतिरूपा) श्रीवेदान्तदेशिकस्य (तनियन् नामकः) प्रार्थनाश्लोकः।

श्रीमान् वेङ्कटनाथार्यः + + + हृदि ॥ इत्यस्य प्रार्थनाश्लोकस्यानुष्टुप्वृत्तस्य निगमान्तगुरुवरप्रसादसिद्धिहेतुकस्यानेकविधश्रेयःप्रदानशीलबहुबीजाक्षरमन्त्रकलापस्य द्वात्रिंशदक्षरघटितस्य प्रथमद्वितीयतृतीयाद्यक्षरवर्गं प्रथमद्वितीयतृतीयादिश्लोकावलेराद्यक्षरमानीतस्य आचार्यद्वात्रिंशन्नामकस्य स्तोत्रस्यास्य घटनक्रमव्यवस्था ज्ञेया। क्रमेण पूर्वोक्तेन यथा—प्रथमाक्षरम्—श्री (१)

श्रीकोशं ज्ञानमुद्रां करसरसिजयोर्बिभ्रदत्यन्तरुच्या
तिष्ठन् पद्मासने यः सनलिनतुलसीमालिको वेङ्कटेशः।
वेदान्ताचार्यवर्यः कविकथकघटाकेसरी सर्वतन्त्र-
स्वातन्त्र्यश्रीमदात्मा सकरुणनयनः संनिधत्तां सदा मे ॥

End:

वेदान्तदेशिकपदाम्बुजमेव नित्यं मद्दैवतं किमपि काङ्क्षितसर्वदायि।
यद्वैभवस्य लवलेशविचिन्तनेन बुद्धिः प्रसीदति विभूतियुगावलम्बा ॥
श्रीमद्वेङ्कटनाथार्याद्वेदान्ताचार्यवर्यतः।
न मे गतिर्भवेदन्या जन्मजन्मान्तरेष्वपि ॥
एकैकमपि तन्नाम कीर्तयन् सकृदुत्तमम्।
सर्वान् कामानवाप्नोति किमुताष्टोत्तरं शतम् ॥

Colophon:

इति श्रीनिवाससूरिविरचिता आचार्यद्वात्रिंशत् समाप्ता।

2844

TR806 आचार्यविंशतिः

Beginning:

[चोलंगिपुर-(चोलसिंहपुर-)निवासिना दोड्डयाचार्येण रचिता आचार्यविंशतिः श्रीवेदान्तदेशिकस्तुतिरूपा]

श्रीकान्तरम्यविभवैकान्तरङ्गजनमेकान्त एष कलये
श्रीकान्तिदान्तिनिवहैकान्तगेहपरमैकान्तिदेशिकमणिम्।
धीकान्तधीरवरलोकान्तरङ्गहितमाकान्तविग्रहयुतं
लोकान्तरोच्चधृतभूकान्तरङ्गवसदेकान्तरङ्गमनघम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

श्रीश्रीनिवासकृतमाश्रीशतोषकरधीश्रीप्रदानविलसद्-
वेदान्तसूरिवरमोदावहाद्भुतरसोदारविंशतिमिमाम् ।
संमानयन्तु कृतिसंमानिता गुणलसन्मानना बुधवराः
वात्सल्यतो जगति मात्सर्यदोषरहिताः सर्वलोकमहिताः ॥

Colophon:

इति दोड्डयाचार्यवर्यविरचिता आचार्यविंशतिः समाप्ता ।

2846

TR807 आचार्यशेखरः

Beginning:

यत्पादाम्बुजरेणुलेशविसराः वक्तुं सहस्रं क्षणात्
पद्यानामयुतं ततोऽपि नियुतं यच्छन्ति पुंसां मतिम् ।
यत्पादप्रवणा बृहस्पतिसमा विद्यासमुद्द्योतिताः
लक्ष्मीपूरुषसिंहपादसरसीजातद्वयार्चारताः ॥ १ ॥
आदिवण्शठविपक्षयोगिनं श्रीनृसिंहकलितात्मरूपिणम् ।
नाथयामुनयतीशदेशिकब्रह्मतन्त्रवरदेक्षितं भजे ॥ २ ॥

End:

आचन्द्रार्कं कथ्यमानाश्च सर्वैर्नो संपूर्णा योगनिष्ठा गुणा ये ।
ते संक्षिप्ताः कृष्णसूरिप्रभावादाचन्द्रार्कं शोभमाना जयन्तु ॥ ११९ ॥
कन्याज्येष्ठावतीर्णो यो यादवाद्रीशवीक्षतः ।
आदिवण् शठजिद्योगी तनोतु मम मङ्गलम् ॥ १२० ॥

Colophon:

इति श्रीमदहोबिलमठास्थानप्रथमाचार्याणाम् आदिवण्-शठकोपयतीन्द्राणां वैभववर्णनं नाम आचार्यशेखरः समाप्तः ।

2855

68964 ईशानस्तुतिः

The MS. contains the following colophon and extra information not found in printed eds.:

श्रीमत्परमहंसपरिव्राजकाचार्यपारावारपारीणयमनियमप्रत्याहारध्यानधारणसमाध्यष्टाङ्गयोगनिष्ठि-तचक्रवर्तिश्रीगुरुशंकराचार्यमुख्यशिष्याहोबलमुनिविरचिता ईशानस्तुतिः संपूर्णाभवत् ।

नन्दनाब्दे वृषे मासि पञ्चविंशद्दिनाहनि ।
नारायणः संव्यलिखदीशानस्तुतिपुस्तकम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ஸ்ரீகண்டார்யருடைய சமீபத்தில் யிருக்கும்போது கடையிலிருந்து செகப்புச்சிலையை முக்காடுபோட்டுக்கொண்டு வடபரம் வரப்பட்ட ஒரு வலைப்பார்த்து ௸ யார் மந்தஹாஸம் செய்தபோது எழுதி முடிஞ்சுது.

श्रीकण्ठार्यरुडय समीपत्तिल् इरुक्कुंपोतु कटैयिलिरुन्तु शेकप्पुच्चीलैयै मुक्काटुपोट्टुक्कोण्डु वटपरं वरप्पट्ट ओरुवलैप्पार्त्तु मेल्पटियार् मन्दहासं शैतपोतु एऴुति मुटिञ्चतु ।

2861

66187 **कुमारताතदेशिकमङ्गलाशासनम्**

Beginning:

श्रीशैलनाथपादाब्जषट्पदाश्रितचेतसे ।
श्रेयसे जगतामस्तु तातयार्याय मङ्गलम् ॥ १ ॥
पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे दैवताय च ।
प्राप्याय प्रापकायास्तु तातयार्याय मङ्गलम् ॥ २ ॥

End:

साग्निचित्यपौण्डरीकसर्वपृष्ठविश्वजिद्द्वादशाहवाजपेयसर्वतोमुखादिभिः ।
प्रीणयन्तमम्बुजाक्षमर्चयन्तमुक्तिभिस्तातयार्यमस्मदीयतातपादमाश्रये ॥ १४ ॥

Colophon:

कोविलव्याकुमारतातदेशिकमङ्गलाशासनं संपूर्णम् ।

2862

67806 **कृष्णदेशिकमङ्गलाशासनम्**

Beginning:

श्रीलक्ष्मणार्यसिद्धान्तनिर्धारणधुरंधरः ।
श्रीकृष्णदेशिकः स्यान्मे श्रेयसे शरदः शतम् ॥
उष्णांशुज्वलदाभाय विष्णावमितभक्तये ।
तृष्णाधिकप्रदात्रे नः कृष्णाय गुरवे नमः ॥
श्रीमद्वत्सान्वयपयःसिन्धुराजसुधांशवे ।
कलानां पूर्णनिधये श्रीकृष्णार्याय मङ्गलम् ॥

End:

कृत्वा त्रय्यन्तभाष्यं विवरितुमनसा भाष्यकारेण भूयो
भावित्रय्यन्तविद्यागुरुवरवपुषा सर्वविज्ञानसीम्ना ।
सोऽयं त्रय्यन्तार्यः प्रकटयितुमना नैजसिद्धान्तमेतं
स्फीतं जातः क्षमायां जयति बुधमणिः कृष्णसूरीन्द्रमूर्तिः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अनुदिनमनुसंधत्ते मङ्गलमस्मद्गुरोर्य इदं भक्त्या ।
तुङ्गं मङ्गलमीयादविगीतरमानृसिंहकविगीतम् ॥

Colophon:

इति मङ्गलाशासन . . . विषयं संपूर्णम् ।

2864

75316 गुरुतत्त्वमालिका (गुरुराजस्तवः)

Beginning:

दुःसावे निखिलैः सुरैः स्मृतिभुवाप्यन्योन्यसंघट्टने
विश्लेषव्यथया द्वयोऽपि वपुष्यर्धार्धशेषे शनैः ।
धीमद्भिस्त्वरया पुराणमुनिभिः पाणिग्रहे साधितं
दिष्ट्या यच्छिवयोरियत्यवसितद्वन्द्वं तदेकं नुमः ॥ १ ॥
नीलग्रीवमुमासखं त्रिणयनं रूपं यदाद्यं विभोः
दुःसंरोधभवप्रवाहलहरीकन्देन किं तेन नः ।
कारुण्यार्द्रकटाक्षवीक्षणकलानिर्धूतमायामलां
गीर्वाणेन्द्रगुरोः प्रसन्नललितां मूर्तिं स्मरामः पराम् ॥ २ ॥

End:

. . स्ति मे मृगमृगाङ्कलाञ्छितं वस्तु किंचन कुलक्रमागतम् ।
तत्तु दृष्टमिति यः . . . . तामहम् ॥ २८ ॥
खचिना गुरुगुणरत्नै रचिता श्रीनीलकण्ठेन ।
गुरुतत्त्वमालिकेयं कुरुत त्वरितां विचक्षणाः कण्ठे ॥ २९ ॥

Colophon:

श्रीनीलकण्ठदीक्षितविरचिता गुरुतत्त्वमालिका समाप्ता ।

Post-colophon writing:

इति श्रीनीलकण्ठदीक्षितकृतिषु गुरुराजस्तवः समाप्तः ।

2866

TR806 गुरुतिलकस्तुतिः

The scribe attributes this Stotra to Raghunāthādhvarin, father of Veṅkaṭādhvarin, on the title-page; but see the verse 22, extracted below.

Beginning:

(श्रीवेदान्तदेशिकस्तुतिरूपा)

स्वान्तान्तःसंततासीनप्राचीनार्वन्तमाश्रये ।
त्रय्यन्तसूरिमाश्चर्यचर्यं तं तारकं सताम् ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

मदनदशाविशालकलशाब्धिकुशान्यभूशा-
पतितसुधामुधाकरविधाः किल यस्य गिरः ।
जगति जयन्ति तस्य तुरगास्यविकल्पतनोः
निगमशिखागुरोश्चरणमस्मि गतः शरणम् ॥ २ ॥

End:

इयमनवीनसूक्तिशिखरार्यपदाम्बुरुह-
प्रवणसदार्यवंशजनिमद्वरदार्यसुतात् ।
अजनि शकुन्तराजजयकेतनदासवरात्
गुरुतिलकस्तुतिर्दिशतु सा मुदमत्र सताम् ॥ २२ ॥

. . . .

सद्वंशजः सुवृत्तः शुभगुणशाली सदा विशुद्धात्मा ।
रघुनाथदेशिकमणिः विलसतु हृदये महागुरुः श्लाघ्यः ॥ २४ ॥

Colophon:

इति रघुनाथाध्वरिविरचिता गुरुतिलकस्तुतिः ।

2867

67873 गुरुपरंपराध्यानश्लोकाः

Beginning:

श्रीमन्तं रघुनाथार्यं संपत्तनयदेशिकम् ।
वेङ्कटेशं चक्रवर्तिं रघुनाथगुरूत्तमम् ॥
वरदार्यं श्रीनिवासं नल्लार्यं श्रीनिधिं गुरुम् ।
वरदं श्रीनिवासार्यं वेङ्कटेशगुरूत्तमम् ॥
श्रीवासं वेङ्कटाचार्यं ·ीवासं श्रीनिधिं गुरुम् ।
वेङ्कटाचार्यमनघं नल्लान् वेङ्कटदेशिकम् ॥

(गीताभाष्यतनियन in margin of the 2nd fo.)

श्रीरङ्गलक्ष्मणमुनिः स्वकृतप्रबन्धगूढार्थबोधनकृते समभून्नदात्मा ।
वेदान्तलक्ष्मणमुनीन्द्रपदाब्जभृङ्गं श्रीरङ्गलक्ष्मणमुनिं तमहं प्रपद्ये ॥ १ ॥
श्रीचक्रवर्तिकवितार्किकसिंहसूनुं तस्मादधीतनिगमान्तयुगीरहस्यम् ।
रामानुजार्यपदपङ्कजराजहंसं श्रीमत्सदार्यगुरुवर्यमहं प्रपद्ये ॥ २ ॥

(At the end of the 4th fo.):

सारथ्यमर्जुनस्याजौ कुर्वन् गीतामृतं ददौ ।
लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः ॥ ३९ ॥

+ + + याचते ॥ अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम । सर्वधर्मानिति च मयैव ह्युक्तम् । अतस्त्वं तव तत्त्वतो मज्ज्ञानदर्शनप्राप्तिषु निःसंशयः सुखमास्व इति दत्तवरः प्रहर्षपरवश-

CC0. In Public Domain. Digitized by Muthulakshmi Academy

हृदयः सुखमासीत । श्रीमद्वेदान्तरामानुजमहादेशिकाय नमः । श्रीमद्गोपालमहागुरवे नमः । गोपालदेशिकपदाब्ज + + + शरणं प्रपद्ये ॥ श्रीकृष्णदेशिक + + + आश्रयामः ॥ श्रीरङ्गनाथ + + + शरणं प्रपद्ये ॥

On fo. 10a:

अविज्ञातं विजानतां विज्ञातमविजानताम् ।
रहस्यत्रयसाराख्यं परं ब्रह्मास्तु मे हृदि ॥

End:

विख्यातो यतिसार्वभौमजलधेश्चन्द्रोपमत्वेन यः
श्रीभाष्येण यदन्वयाः सुविदिताः श्रीविष्णुचित्तादयः ।
व्याख्यां भाष्यकृदाज्ञयोपनिषदां यो द्रामिडीनां व्यधात्
पूर्वं तं कुरुकेश्वरं गुरुवरं कारुण्यपूर्णं भजे ॥
तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥
सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

सारथ्यर्जुन + + + नमः ॥

2868

71017 गुरुपरंपराध्यानश्लोकाः

Beginning:

(रहस्यत्रयसारतनियन् in margin)

श्रीशैलदेशिकवराङ्घ्रिसरोजभृङ्गं श्रीरङ्गनाथयतिराजकटाक्षपात्रम् ।
श्रीवेङ्कटाख्ययतिनाथकृपावलम्बं श्रीश्रीनिवासगुरुवर्यमहं प्रपद्ये ॥ १ ॥
वन्दे वेङ्कट . . . . ।
यत्कटाक्षैकलक्ष्याणां सुलभः श्रीधरः सदा ॥ २ ॥
कल्याणावहमस्माकं कारुण्यकलशाम्बुधेः ।
प्रपद्ये रङ्गनाथस्य पदपङ्कजतल्लजम् ॥ ३ ॥
श्रीवीरराघवगुरोस्तनयं ततश्च शारीरकादि समधीत्य समग्रशास्त्रम् ।
विद्योतमानमनवद्यगुणैकतानं श्रीरङ्गनाथगुरुवर्यमहं प्रपद्ये ॥
श्रीवेङ्कटेशगुरुणा करुणाकरेण श्रीशे समर्पितभरं श्रितपारिजातम् ।
श्रीरङ्गनाथगुरुवीक्षणलब्धबोधं श्रीवीरराघवगुरुं शरणं प्रपद्ये ॥ ५ ॥

End:

श्रीरङ्गनाथगुरुपादसरोजभृङ्गं वेदान्त(लक्ष्मणमुनीन्द्रकृपात्तबोधम्) ।
श्रीमद्यतीन्द्रशठकोपदयावलम्बं वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

. . . . . . वेङ्कटाख्ययतिश्रेष्ठं रङ्गनाथ . . ।
. . . मुनिवर . . . रामराजीवनेत्रं . . . . ॥

2869

71037 गुरुपरंपराध्यानश्लोकाः

Beginning:

हारीतान्वयसंभूतानखिलागमपारगान् ।
अमलाचारसंपन्नानाचार्यानाश्रये क्रमात् ॥
नृसिंहार्यपदाम्भोजमाश्रयं तत्परायणम् ।
हारीतवंशसंभूतं श्रीरामगुरुमाश्रये ॥
रामाभिधाय गुरवे विरामाय हरिद्विषाम् ।
अभिरामाय महतामारामाय गिरां नमः ॥ १ ॥
श्रीरङ्गार्यपदाम्भोजद्वन्द्वसङ्केकजीवितम् ।
हारीतजलधे रत्नं नृसिंहार्यमहं भजे ॥ २ ॥
सुदर्शनगुरूत्तंससूनुं तत्पादसंश्रयम् ।
हारीतान्वयवार्धीन्दुं श्रये श्रीरङ्गदेशिकम् ॥ ३ ॥

End:

पद्मासनोपविष्टं परपदयुगले निविष्टचैतन्यम् ।
परतत्त्वबोधमुद्रं परमाचार्यं पराङ्कुशं वन्दे ॥ ३८ ॥
माता पिता युवतयस्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं
श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥ ३९ ॥

पराङ्कुशं नौमि नमामि यामुनं भजामि रामं कमलेक्षणं भजे ।
श्रयामि नाथं शठकोपमाद्रिये स्मरामि सेनेशमथो श्रियं हरिम् ॥ ४४ ॥
नीलां नमामि श्रीभूमिं भावये संश्रये श्रियम् ।
श्रियः पतिं जगन्नाथं नारायणमुपास्महे ॥ ४५ ॥

Colophon:

ஆசாரியாளைச் சேவிக்கிற தனியன் ஸம்பூர்ணம் (आचार्यलै शेविक्किर तनियन् संपूर्णम्) । अस्मद्गुरुभ्यो नमः । अस्मत्परमगुरुभ्यो नमः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2870

71631 गुरुपरंपराध्यानश्लोकाः

Beginning:

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम ॥
लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरंपराम् ॥
यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो रामानुजस्य चरणौ शरणं प्रपद्ये ॥

माता पिता + + + मूर्ध्रा ॥

End:

सौम्योपयन्तृमुनिवर्यदयापगायाः सिन्धुं गुणाधिकमवाप्तसमस्तविद्यम् ।
वाधूलवंश्यवरदार्यवरानुजातं श्रीगोपुरेशगुरुशेखरमाश्रयामः ॥ १६ ॥

वरदगुरुचरणशरणम् ॥ १७ ॥ सकलवेदान्तम ॥ १८ ॥ श्रीशैलेश । नमः श्रीशैल । लोकाचार्याय । श्रीकृष्णपादपादाब्जे । वेदान्तवेद्य । नमो वेदान्तवेद्याय । श्रीपराशर । रामानुजपद । श्रीवत्सचिह्न । पादुके यतिराजस्य । यो नित्यम् । कमलापति । यत्पदाम् । अयत्नतो । नमः पङ्कज । नमोऽचिन्त्य । माता । श्रीरङ्गचन्द्र । नमः श्रीरङ्ग । श्रीस्तन । श्रीमते रामानुजाय नमः । शुभमस्तु ।

2871

71623 गुरुपरंपराध्यानश्लोकाः

Beginning:

शुक्लाम्बरधरं + + + ॥ यस्य द्विरद + + + ॥ कूजन्तं राम + + + ॥ वाल्मीकेर्मुनि + + + ॥ यः पिबन् सततम् + + + ॥ गोष्पदीकृत + + + राक्षसम् ॥ हरिः ओम् । शुभमस्तु । अस्मद्गुरुभ्यो नमः । श्रीमते अपर्याप्तामृतमहागुरवे नमः ।

श्रीमत्तातगुरोर्दयाजलनिधेर्लब्धात्मशिक्षाविधि-
श्रीवङ्गान्वयदुग्धसिन्धुशशिनः श्रीश्रीनिवासाह्वयात् ।
संप्राप्तागममौलियुग्ममनघं श्रीवत्सवंशोद्भवं
वन्दे श्रीवरदार्यनन्दनमहं ताताभिधानं गुरुम् ॥
वात्स्यश्रीवरदाचार्यतनय विनयोज्ज्वलम् ।
सुदर्शनदयापात्रं श्रीमत्तातगुरु भजे ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ॥
अस्मद्देशिकतद्गुरूनपि गुरूनेषां च हस्तीश्वरान्
देवेशं वरदं च विष्णुमनघं नत्वा यतीन्द्रानपि ।
पूर्णं यामुनरामपद्मनयनान् नाथं मुनिं वैष्णवान्
वन्देऽहं शठकोपसैनिकपती श्रीभूमिनीलाहरीन् ॥

2872

71623 गुरुपरंपराध्यानश्लोकाः

Beginning:

गुरुपरंपरा—

श्रीमत्तातगुरोः सूनुं श्रीवत्सान्वयभूषणम् ।
वेदान्त(ा)न्वयवाराशिं वरदार्यमहं भजे ॥
श्रीवत्सवंशकलशोदधिपूर्णचन्द्रं श्रीरामदेशिकपदाम्बुजचञ्चरीकम् ।
श्रीमत्सुदर्शनदयापरिपूर्णबोधं श्रीतातदेशिकमहं सततं भजामि ॥
वात्स्यश्रीरामतनयवरदार्यकृपाश्रयम् ।
श्रीसुदर्शनदयापात्रं श्रीमत्तातगुरुं भजे ॥

End:

कुर्वे श्रीवैष्णवेभ्योऽहं सर्वेभ्यः सर्वदा नमः ।
विशेषोऽस्मत्कुलस्यैव येषामेव हि शेषता ॥
अतिगहनमसर्वध्येयमन्तःस्त्रिवर्गा-
श्रयबहुलमनन्तं वीक्ष्य वेदं दयालुः ।

2873

73931 गुरुपरंपराध्यानश्लोकाः

Beginning:

श्रीशैलवंशकलशोदधिपूर्णचन्द्रं श्रीवाजिवक्त्रकरुणापरिपूर्णबोधम् ।
वेदान्तलक्ष्मणमुनीन्द्रकृपैकपात्रं नौम्यण्णयार्यगुरुमाश्रितपारिजातम् ॥ १ ॥
गोपालदेशिकपदाब्जमधुव्रतस्य प्रज्ञाविरक्तिकरुणामुखसद्गुणाब्धेः ।
वेदान्तलक्ष्मणमुनेः श्रितभागधेयं पादारविन्दयुगलं शरणं प्रपद्ये ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीकृष्णदेशिकपदाम्बुजभृङ्गराजं वेदान्तलक्ष्मणमुनीन्द्रकृपात्तबोधम् ।
त्रय्यन्तदेशिकयतीन्द्रशठारिमूर्तिं गोपालदेशिकशिखामणिमाश्रयामः ॥ ३ ॥

End:

पितामहस्यापि पितामहाय प्राचेतसादेशफलप्रदाय ।
श्रीभाष्यकारोत्तमदेशिकाय श्रीशैलपूर्णाय नमो नमस्ते ॥

विगा + दरः । अनुज्झित + सहे । नमस्य + परम् । नाथेन + गतम् । यस्य + सहे । वन्दे + स्थितम् । सह + ग्रहाम् । क . . . + स्वयम् । श्रीमान् + हृदि ॥

2874

73528 गुरुपरंपराध्यानश्लोकाः

Beginning:

(आश्रयणसंप्रदायम् in margin) श्रीमते रामानुजाय नमः । गुरुपरंपरा ।

श्रीमच्छ्रीनिधिदेशिकेन्द्रतनयं तत्पादपद्माश्रयं
तत्प्राप्तोभयवेदमौलिमनघं शेषत्वसीमाभुवम् ।
शेषार्यान्वयदुग्धवारिधिकलानाथं गुणानां निधिं
श्रीरामानुजदेशिकं सकरुणं वन्दे सुवृत्तं सदा ॥ १ ॥
श्रीमच्छेषसुवंशमौक्तिकमणिं नारायणार्यात्मजं
श्रीमत्तत्पदपद्मयुग्मनिहिताशेषात्मरक्षाभरम् ।
श्रीमद्द्राविडवेदभाष्यवचनालंकारमुख्यार्थदं
श्रीमत् श्रीनिधिदेशिकं विमलधीवैराग्यभक्तिं भजे ॥ २ ॥
श्रीरामानुजसूरिवर्यतनयं शेषार्यवंशोद्भवं
श्रीमत् श्रीनिधिवर्ययोः पदयुगे न्यस्ताखिलात्मस्थितिम् ।
श्रीभाष्यद्रमिडागमार्थनिरतं वाचां विभूषार्थदं
श्रीनारायणसूरिवर्यममलज्ञानाश्रयं संश्रये ॥ ३ ॥

End:

सर्वकर्माणि संत्यज्य रामानुज इति स्मर ।
विभूतिं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥
श्रीमदनन्तार्यश्रीनिवासमहागुरवे नमः । कौशिकश्रीनारायणगुरवे नमः ।
श्रीमत्कौशिकवंशवारिधिविधुं श्रीशैलवर्यात्मजं
श्रीमच्छेषवरार्यलक्ष्मणगुरोः पादाब्जभृङ्गायितम् ।
तल्लब्धोभयवेदमौलिमनघं वात्सल्यवारांनिधिं
श्रीनारायणदेशिकं सकरुणं वन्दे सुवृत्तं सदा ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2875

75398 गुरुपरंपराध्यानश्लोकाः

Beginning:

. . . . संपदम् ।
वेंकटार्यगुरोः सूनुं वन्दे वेदान्तदेशिकम् ॥ ६ ॥
यतिक्षोणीशसंनद्धडिल्लीगमनधूर्वहम् ।
निगमान्तगुरोः सूनुं रघुनाथार्यमाश्रये ॥ ७ ॥

End:

सेवे समयनिर्वाहाद् वेङ्कटेशप्रसादतः ।
चक्रवर्तिरितिख्यातमात्तचक्रं जगद्गुरुम् ॥
श्रीतिम्मयाचार्यपदाब्जभृङ्गं श्रीश्रीनिवासार्यकृपानिवासम् ।
श्रीवल्लभन्यस्तसमस्तभारं श्रीवेङ्कटाचार्यमहं प्रपद्ये ॥

2876

67379 गुरुपरंपराध्यानश्लोकाः (अहोबलमठीयगुरुपरंपराश्लोकाः)

Beginning:

यस्याभवद्भक्तजनार्तिहन्तुः पितृत्वमन्येष्वविचार्य तूर्णम् ।
स्तम्भेऽवतारस्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥

प्राची + + +मूर्तिः ॥ विद्यु + + + पद्ये ॥

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तस्मै ॥
(भागवतम् IV. 9. 6)

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

यो नित्यं + + + प्रपद्ये ॥

यः पर्याप्तकलाख्यातो यतिराजाब्धिचन्द्रमाः ।
ददातु कुशलं मेऽसौ कुरुकेश्वरदेशिकः ॥
श्रीविष्णुचित्तपदपङ्कजसंगमाय चेतो मम स्पृहयते किमतः परेण ।
नो चेन्ममापि यतिशेखरभारतीनां भावः कथं भवितुमर्हति वाग्विधेयः ॥
वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

प्रपद्ये + + + मुनीश्वरम् ॥ शठारिनारायण + + + आदिगुरून् भजामः ॥ प्रणम्य नारायण + + + देशिकं भजे ॥ श्रीनारायण + + + वेदमौलिमुनीश्वरौ ॥ नारायणश्रीनिवास . . . यणमुनीश्वरौ ॥ वीरराघवयोगीन्द्रं + + + अनिशमाश्रये ॥ श्रीवासवीर + यतिशेखरमाश्रयामः ॥ श्रीवासवीर + + + श्रीरङ्गनाथयतिशेखरमाश्रयामः ॥

2877

67447 गुरुपरंपराध्यानश्लोकाः

Beginning:

श्रीमते श्रीनिवासमहादेशिकाय नमः ।

विष्णुश्रीपृतनापतीन् शठरिपुश्रीनाथपद्मेक्षणान्
रामं यामुनपूर्णमिश्रयतिराड्गोविन्दभट्टारकान् ।
वेदान्ताख्यमुनिं कलिप्रमथनं श्रीकृष्णपादाभिदं
श्रीरङ्गेश्वरकेशवार्यकमलावासान् भजे केशवम् ॥
केशवार्यकृपापात्रं धीशमादिगुणार्णवम् ।
श्रीशठारियतीशानं देशिकेन्द्रमहं भजे ॥
प्रपद्ये निरवद्यानां निषद्यां गुणसंपदाम् ।
शरणं भवभीतानां शठकोपमुनीश्वरम् । १ ॥

End:

श्रीपराङ्कुशयोगीन्द्रचरणाम्बुजशेखरम् ।
समस्तशास्त्रपारीणं शठकोपमुनिं भजे ॥ ७ ॥
शठकोपयतिश्रेष्ठपदपङ्कजषट्पदम् ।
सर्वशास्त्रार्थतत्त्वज्ञं पराङ्कुशमुनिं भजे ॥ ८ ॥

2878

67805 गुरुपरंपराध्यानश्लोकाः

Beginning:

विष्णुश्रीपृतनापतीन् + केशवार्य + ॥ प्रपद्ये निरवद्यानां + मुनीश्वरम् ॥
मीने जगत्यां रोहिण्यां कृतावतरणं विभुम् ।
विष्णुमादिगुरुं लक्ष्म्या मन्त्ररत्नप्रदं भजे ॥
பெருமாள் திருவவதார நாள் (पेरुमाळ् तिरुववतार नाळ्)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीस्तनाभरणं तेजः श्रीरङ्गेशयमाश्रये ।
चिन्तामणिमिवोद्वान्तमुत्सङ्गेऽनन्तभोगिनः ॥
फाल्गुनोत्तरफल्गुन्यां संभूतां श्रियमाश्रये ।
विष्णोर्दिव्यपदाम्भोजकटकां तत्पदाश्रिताम् ॥
பெருட்டியார் திருவவதாரம் (पिराट्टियार् तिरुववतारम्)

End:

श्रीवासरङ्गपतिवीररघूद्वहादिवेदान्तसंयमिपरैर्गुरुसार्वभौमैः ।
संप्रेक्षितं करुणया परिपूर्णबोधं श्रीरङ्गनाथशठकोपमुनिं श्रयामः ॥

श्रीमते श्रीरङ्गनाथशठकोपमहादेशिकाय नमः ।

विद्याम्भोधिपराङ्कुशादियतिराट्श्रीवासरङ्गाधिप-
श्रीमद्वीररघूद्वहश्रुतिशिरोयोगीश्वरैरन्वहम् ।
रङ्गाधीशशठारिसंयमिवरैश्चालोकितं सादरं
विद्यावारिनिधिं पराङ्कुशयतीन्द्राख्यं मुनीन्द्रं भजे ॥
श्रीवासरङ्गपतिवीररघूद्वहादिवेदान्तदेशिकपराङ्कुशलक्ष्मणाद्यैः ।
संप्रेक्षितं करुणया परिपूर्णबोधं श्रीश्रीनिवासनिगमान्तमुनिं भजामः ॥
श्रीरङ्गनाथयतिवर्यकृपात्तबोधं श्रीवासवेदशिखरार्यदयावलम्बम् ।
वैराग्यभक्तिमुखसद्गुणसागरं श्रीनारायणश्रुतिशिरोगुरुमाश्रयामः ॥

श्रीमते श्रीमन्नारायणवेदान्तयतीन्द्रमहादेशिकाय नमः ।

श्रीवासरङ्गपतिवीररघूद्वहादिवेदान्तमानिल्यवेदशिरोयतीन्द्रैः ।
संप्रेक्षितं करुणया परिपूर्णबोधं श्रीवीरराघवयतीन्द्रगुरुं भजामः ॥
श्रीरङ्गनाथशठकोपयतीन्द्रपादपङ्केरुहप्रवणचित्तमुदारबोधम् ।

2879

67816 गुरुपरंपराध्यानश्लोकाः

Beginning:

(आचार्यतनियन् in margin)

श्रीमते रामानुजाय नमः । श्रीमान् वेङ्कटनाथार्यः + हृदि ॥ श्रीगुरुभ्यो नमः । अस्मद्गुरुभ्यो नमः । अस्मत्परमगुरुभ्यो नमः । अस्मत्सर्वगुरुभ्यो नमः । श्रीमते वेदान्तगुरवे नमः । श्रीमते रामानुजाय नमः । श्रीमते पराङ्कुशदासाय नमः । श्रीमद्यामुनमुनये नमः । श्रीमते राममिश्राय नमः । श्रीमते पुण्डरीकाक्षाय नमः । श्रीमन्नाथमुनये नमः । श्रीमते शठकोपाय नमः । श्रीमते विष्वक्सेनाय नमः । श्रियै नमः । श्रीधराय नमः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ॥
विष्णुं श्रीपृतनापतिं शठरिपुं श्रीनाथपद्मेक्षणं
रामं यामुनपूर्णमिश्रयतिराड्गोविन्दभट्टारकान् ।
वेदान्ताख्यमुनिं कलिप्रमथनं श्रीकृष्णपादाभिधं
श्रीरङ्गेश्वरकेशवार्यकमलावासान् भजे केशवम् ॥
केशवार्यकृपापात्रं धीशमादिगुणार्णवम् ।
श्रीशठारियतीशानं देशिकेन्द्रमहं भजे ॥

प्रपद्ये निरवद्यानां + मुनीश्वरम् ॥

श्रीशठारियतीशानपदपङ्कजषट्पदम् ।
परार्ध्यगुणसंपन्नं पराङ्कुशमुनिं भजे ॥
श्रीपराङ्कुशयोगीन्द्रचरणाम्बुजषट्पदम् ।
श्रीनिवासमुनिं वन्दे श्रीभाष्यामृतसागरम् ॥

End:

श्रीवीरराघवयतीन्द्रपराङ्कुशादिरामानुजार्यकमलानिधियोगिवर्यैः
संप्रेक्षितं करुणया परिपूर्णबोधं श्रीरङ्गनाथयतिशेखरमाश्रयामः ॥
श्रीश्रीनिवासयतिशेखरलब्धबोधं श्रीरङ्गनाथयति (वर्य) पदाब्जभृङ्गम् ।
श्रीवीरराघवमुनिश्रुतिमौलिसूरिं श्रीनाथभक्तिभरिताशयमाश्रयामः ॥

श्रीमते वीरराघववेदान्तमहागुरवे नमः

Colophon:

आचार्यतनियन् संपूर्णम् ।

2880

68320 गुरुपरंपराध्यानश्लोकाः

Beginning:

श्रीरत्नाभरणं तेजः + + + भोगिनः ॥ १ ॥

नमः श्रीरङ्गनायक्यै यद्भ्रूविभ्रमभेदतः ।
ईशेशितव्यवैषम्यनिम्नोन्नतमिदं जगत् ॥ २ ॥
பெரியபிராட்டியார் தனியன் (पेरियपिराट्टियार् तनियन्)
श्रीरङ्गचन्द्रमसमिन्दिरया विहर्तुं विन्यस्य विश्वचिदचिन्नयनाधिकारम् ।
यो निर्वहत्यनिशमङ्गुलिमुद्रयैव सेनान्यमन्यविमुखास्तमशिश्रयाम ॥ ३ ॥
ஸேநமுதலியார் தனியன் (सेनमुदलियार् तनियन्)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ऋषीञ्जीषामहे . . . कृष्णातत्त्वमिवोदितम् ।
सहस्रशाखां योऽद्राक्षीद् द्राविडीं ब्रह्मसंहिताम् ॥ ४ ॥
நம்மாழ்வார் தனியன் (नम्माळ्वार् तनियन्)

End:

लोकाचार्याय गुरवे कृष्णपादस्य सूनवे ।
संसारभोगिसंदष्टजीवजीवातवे नमः ॥ १९ ॥
பிள்ளைலோகாசார்யார் தனியன் (पिळ्ळैलोकाचार्यार् तनियन्)

नमः श्रीशैलनाथाय कुन्तीनगरजन्मने ।
प्रसादलब्धपरमप्राप्यकैंकर्यशालिने ॥ २० ॥
திருவாய்மொழிப்பிள்ளை தனியன் (तिरुवाय्मोळिप्पिळ्ळै तनियन्)

2881

68786 गुरुपरंपराध्यानश्लोकाः

Beginning:

नमो रामानुजार्याय तस्मै निःसीमतेजसे ।
विश्वत्राणाय यस्यासीदवतारो महीतले ॥ १ ॥
पूर्वं यस्तु मुकुन्ददेवविभुना स्कन्धे धृतान्दोलिकः
प्राप्तः श्रीपुरुषोत्तमं रचितवान् भक्तप्रतिष्ठापनम् ।
लब्ध्वा दन्तितुरङ्गरत्नशिबिकाछत्रद्वयीचामर-
द्वन्द्वादीनि ययौ पुनश्च विजयी कर्णाटसिंहासनम् ॥ २ ॥
आसीद् व्यासस्य वीप्सा शुकमुनियमकं पुण्डरीकद्विरुक्तिः
प्रह्लादस्यानुवादः प्रथिततरतपाः प्राग्रणीर्वण्छठारिः ।
प्राज्ञानां यस्तु राज्ञां पदविनतिकृतामष्टवर्णोपदेशा-
दष्टैश्वर्याष्टभोगानमितसमधिकामष्टदिक्ख्याततां च ॥ ३ ॥
श्रीरामानुजसंप्रदायपदवीभाजां चतुस्सप्ततिः
श्रीमद्वैष्णवभूभृतां गुणभृतां सिंहासनस्थायिनाम् ।
अध्यक्षत्वमुपेयिवांसमतुलं श्रीमन्नृसिंहाज्ञया
प्राञ्चं वण्छठकोपसंयमधराधौरेयमीडीमहि ॥
भट्टानामट्टहासः फणिपतिफणितेर्भागधेयं कणाद-
व्याहारप्राणनाडी कपिलमतफलं नर्म धर्मागमानाम् ।
योगी श्रीवण्छठारिर्जगति विजयते किं च वेदान्तयुग्मा-
ऽऽचार्यो वेदोक्तमार्गस्थितिजननगुरुः सर्वतन्त्रस्वतन्त्रः ॥

(Then follows a श्रीमुखम् in Tamil)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

सर्वधारि संवत्सरं तैमासं ६ तियतियिलु बल्यपट्टियिलिरुक्करसन्नति अळशिङ्गर् पुत्रन् रामानुजाचार्यर् कुमारर् रघुनाथाचारियार् कोण्डुवन्द श्रीमुखम् सेविच्चुकोण्डुतु ।

2883

68924 गुरुपरंपराध्यानश्लोकाः

Beginning:

तनियन् (in margin)

अस्मद्गुरुभ्यो नमः + + + श्रीधराय नमः ॥ (same as in No. 2879 above) विष्णुश्री + + + ॥ वेदान्ताख्यमुनिं + + + ॥ केशवार्य + + + प्रपद्ये + + + (same as in No. 2877 above)

End:

श्रीवासरङ्गपति + + + मुनिं भजामः (same as in No. 2878 above)

2884

68990 गुरुपरंपराध्यानश्लोकाः

Beginning:

केशवार्य + + + भजे ॥ प्रपद्ये निरवद्यानां + + + मुनीश्वरम् (see No. 2877 above)

End:

वीरराघववेदान्तनारायणपदाश्रयम् ।
श्रीवीरराघवमुनिं संश्रये श्रितवत्सलम् ॥ २३ ॥
श्रीवीरराघवमुनिश्रुतिमौलिसूरिश्रीमत्पदाम्बुजसमाश्रयलब्धसत्त्वम् ।
श्रीवीरराघवमुनीन्द्रकृपावलम्बं श्रीमत्पराङ्कुशयतीन्द्रमुनिं श्रयामः ॥ २४ ॥

2885

70925 गुरुपरंपराध्यानश्लोकाः

Beginning:

गोपालदेशिकपदाब्जमधुव्रतस्य प्रज्ञाविरक्तिकरुणामुखसद्गुणाब्धेः ।
वेदान्तलक्ष्मणमुनेः श्रितभागधेयं पादारविन्दयुगलं शरणं प्रपद्ये ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीकृष्णदेशिकपदाम्बुजभृङ्गराजं वेदान्तलक्ष्मणमुनीन्द्रकृपात्तबोधम् ।
त्रय्यन्तदेशिकयतीन्द्रशठारिमूर्तिं गोपालदेशिकशिखामणिमाश्रयामः ॥ २ ॥
श्रीरङ्गनाथगुरुपादसरोजहंसं वेदान्तदेशिकपदाम्बुजभृङ्गराजम् ।
श्रीमद्यतीन्द्रशठकोपदयावलम्बं वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये ॥ ३ ॥

End:

विगाहे निगमान्तार्यविष्णुपादसमुद्भवाम् ।
रहस्यत्रयसाराख्यां त्रिस्रोतसमकल्मषाम् ॥ ३३ ॥

சீரொன்று தூப்பில் + போமளவும் வாழ்வு (शीरोन्रु तूप्पल् + पोमळवुं वाळ्वु) ॥ ३४ ॥

वैशाखे रोहिणीजातं काश्यपान्वयवारिधौ ।
इन्दुं श्रीपुण्डरीकाक्षं गोष्ठीपूर्णमहं भजे ॥

श्रीरहस्यत्रयसारतनियन्—अस्मद्देशिक + नारायणं संश्रये ॥

अस्मद्देशिकतद्गुरून् श्रुतिशिरश्चूडार्यरामानुजौ
रङ्गेशं रघुपुङ्गवानुजगुरुं श्रीमन्नतार्तिच्छिदम् ।
श्रीरामानुजपूर्णयामुनमुनीन् रामारविन्देक्षणौ
नाथश्रीशठकोपसैन्यरमणश्रीश्रीपतीन् भावये ॥

. . . .

प्लवाब्दे वृश्चिके मासि कृष्णपक्षे मघोडुनि ।
अपर्याप्तामृतः प्रायादपर्याप्तामृतो मुनिः ॥
नमोऽस्तु प्रियदत्तायै तुभ्यं देवि वसुंधरे ।
त्वं माता सर्वलोकानां पादस्पर्शं क्षमस्व मे ॥
अतन्द्रितचमूपतिप्रणतहस्तमस्वीकृत-
प्रणादमणिपादुकं किमिति चाकुलान्तःपुरम् ।
अवाहनपरिष्क्रियं पतगराजमारोहतः
करिप्रवरबृंहिते भगवतस्त्वरायै नमः ॥

2886

77643 गुरुपरंपरास्तोत्रम्

Beginning:

शिवाय हरये धात्रे वसिष्ठाय च शक्तये ।
पराशराय व्यासाय नमोऽस्तु शुकयोगिने ॥ १ ॥
श्रीगौडपादाचार्याय शुद्धाद्वैतप्रवर्तिने ।
गोविन्दभगवत्पादाचार्याय च नमो नमः ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

सत्यवाक्यप्रवक्त्रे च नमो ज्ञानस्वरूपिणे ।
सच्चिदानन्दभारत्यै नमोऽस्त्वभिनवाय च ॥ १६ ॥
सर्वविद्याविनीताय दक्षिणामूर्तिरूपिणे ।
गुरुपङ्क्तिनमस्कारं स्तोत्रमेतद्दिने दिने ।
यः पठेच्छृणुयाद्वापि भुक्तिं मुक्तिं च विन्दति ॥ १७ ॥

Colophon:

गुरुपरंपरास्तोत्रं संपूर्णम् ।

2888

PM255 गुरुराजसप्ततिः

Beginning:

विज्ञानैकवदान्यं विबुधैर्मान्यं कलेशमूर्धन्यम् ।
श्रीमत्त्यागाधीशं गुरुं मखीशं भजेतरामनिशम् ॥ १ ॥
यागानन्दितदेवो रागादीनामगोचरस्वान्तः ।
वागालयाननाब्जस्त्यागाधीशाभिधो गुरुर्जयति ॥ २ ॥

End:

इति गणपतिना कृतिना गुण्या गुरुराजसप्ततिः कलिता ।
ललिता रसभरमिलिता पठतां भक्त्या ददाति पाण्डित्यम् ॥ ७१ ॥
विजये विरचितविजये विहिता गुरुराजसप्ततिः सेयम् ।
अहिमकरे प्रेमकरे मकरे च करे परे वरे वारे ॥ ७२ ॥

Colophon:

इति श्रीगणपतिशास्त्रिणा विरचिता गुरुराजसप्ततिः संपूर्णा ।

2889

66148 गुरुस्तवः (भगवत्पादीयस्तोत्रम्)

Beginning:

वन्दे शिवं मुरहरं च विधिं वसिष्ठं शक्तिं पराशरमुनिं परवासवीयम् ।
श्रीमच्छुकं परविदं गुरुगौडपादं गोविन्दतीर्थमथ शंकरमार्यवर्यम् ॥ १ ॥

End:

सर्वज्ञमज्ञानतमःप्रकाशं सत्यात्मकं संश्रितकल्पवृक्षम् ।
कारुण्यलक्ष्मीकमनीयमूर्तिं श्रीशंकराचार्यमहं नमामि ॥ १४ ॥

Colophon:

. . . विशारद-श्रीविद्याशंकराचार्यविरचितं श्रीमद्भगवत्पादीयस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2890

67731 **गुरुस्तोत्रम्**

Beginning:

कामं तु जनयत्येकः पुनरुत्पत्तिकारणम् ।
हरत्येकोऽनयोः कश्चित् तं प्रपद्ये महेश्वरम् ॥ १ ॥
जातस्यैव करोत्येको मृत्युरूपां तिरस्कृतिम् ।
हरत्येकोऽनयोः कश्चित् तं प्रपद्ये महेश्वरम् ॥ २ ॥

End:

गुरुस्तोत्रमिदं प्रोक्तं भुक्तिमुक्तिफलप्रदम् ।
महाक्षेत्रमहातीर्थसंदर्शनफलप्रदम् ॥ ३३ ॥
छान्दोग्यबृहदारण्यप्रमुखश्रुतिगोपितम् ।
ज्ञात्वा गुरूक्त्या रचितं स्तोत्रं विजयतां गुरोः ॥ ३४ ॥

Colophon:

गुरुस्तोत्रं संपूर्णम् ।

2893

PM2111 **गुर्वष्टकम्**

Beginning:

(Only the first verse and refrain are same as in ŚG. vol. 18, pp. 140-2.)

क्षमामण्डले भूपभूपालबृन्दैः सदा सेवितं यस्य पादारविन्दम् ।
गुरोरङ्घ्रिपद्मे नमस्तेनद्वन्द्वं(? मनश्चेन्न लग्नं) ततः किं ततः किं ततः किं ततः किम् ॥
सुराधीशसर्वेशसत्यस्वरूपं परानन्दमानन्दचिन्मायरूपम् ।
गुरोरङ्घ्रिपद्मे नमस्तेनद्वन्द्वं(? मनश्चेन्न लग्नं) ततः किं ततः किं ततः किं ततः किम् ॥

End:

गुरोरष्टकं यः (? ये) पठन्ति त्रिकाले सदाचारभ्रान्तिं(?) सदा पुण्यगेहे ।
श्रियं संपदं पुत्रमित्रप्रदं च भवेत् सर्वसिद्धिप्रकल्पे परात्परा(?) ॥

Colophon:

इति श्रीमच्छंकराचार्यविरचितं गुरोरष्टकं संपूर्णम् ।

2894

73438 **गोदाप्रपत्तिः**

Beginning:

श्रीभूमिनायकमनोहरदेवि मान्ये श्रीविष्णुचित्ततनये श्रितकामधेनो ।
मातः समस्तजगतां महनीयकीर्ते गोदे त्वदीयचरणौ शरणं प्रपद्ये ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

साकल्यशान्तिसमताश्रितवत्सलत्वसौहार्ददान्तिमुखसद्गुणराशिपूर्णे ।
पुण्ये पुरंध्रि पुरुषोत्तमहृद्यवृत्ते गोदे त्वदीयचरणौ शरणं प्रपद्ये ॥ १२ ॥

2895

73438 **गोदामङ्गलाशासनम्**

Beginning:

श्रीविष्णुचित्तकन्यायै श्रीपुरीभाग्यराशये ।
गोविन्दराजनायक्यै गोदायै नित्यमङ्गलम् ॥ १ ॥
श्रीवेङ्कटेशभोग्यायै जगन्मात्रे श्रितात्मनाम् ।
भुक्तिमुक्तिप्रदायिन्यै गोदायै नित्यमङ्गलम् ॥ २ ॥

End:

नित्यनिर्दोषकल्याणगुणामृतपयोधये ।
गोविन्दकेलिमोदायै गोदायै नित्यमङ्गलम् ॥ ११ ॥
श्रीरामानुजयोगीन्द्रमङ्गलाशासनात् परम् ।
सर्वाभीष्टसमृद्ध्यै गोदायै नित्यमङ्गलम् ॥ १२ ॥

2907

67798 **चिदम्बरदीक्षिताष्टकम्**

Beginning:

शिवप्रदं शिवप्रभं सदन्तरङ्गतोषणं
. . . भङ्गभक्तिदं दुरन्तरङ्गशोषणम् ।
समस्तलोकवाञ्छितप्रदाननित्यदीक्षितं
सदा मुदा भजाम्यहं चिदम्बराख्यदीक्षितम् ॥ १ ॥

End:

स्मरन्तमङ्घ्रियुग्मकं गुरोः सदातिभक्तितः
प्रपाहि दीनमनृणं कुरुष्व मां कटाक्षतः ।
अभीत्यभीष्टरक्षणप्रदाननित्यदीक्षितं
भवन्तमेव सद्गुरुं चिदम्बराख्यदीक्षितम् ॥ ८ ॥
अयं स्तवस्तव प्रभो कृतोऽष्टकेष्टभूतिदः
पठज्जनेषु नित्यशो भवत्प्रसादकाङ्क्षिषु ।
मयाभिरामसंज्ञिना प्रपन्नदीनरूपिणा
भवेत् सतां स संमतः सदा सदात्मभाविनाम् ॥
श्रीचिदम्बरेशस्वामिने नमः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2908

73438 दिव्यसूरिप्रपत्तिः

Beginning:

पाण्ड्यक्षितौ कान्तिकनामपुर्यां (तुला) ख्यमासेऽतुलमूलतारे ।
शय्याभुजंगात्मदयावतीर्णं श्रीसौम्यजामातृमुनिं प्रपद्ये ॥ १ ॥
भूयात् सरोभूतपुरोगमुख्यभक्तस्फुरत्पादसरोरुहाणाम् ।
चेतोमयं . . . प्रतिबिम्बनाय कान्तं सरःकौतुकसेतुबन्धम् ॥ २ ॥

End:

नत्वा शठारिमखिलागमसारसूक्तिं सेनापतिं मुरजिदङ्घ्रिसखं निषेव्यम् ।
पद्मामशेषजगतां जननीं प्रणम्य श्रीकान्तमादिपुरुषं शरणं प्रपद्ये ॥ २३ ॥
प्रपत्तिसोपानपथं पठन्ति शृण्वन्ति ये नित्यमनन्यचित्ताः ।
तेषां हरेर्नित्यविभूतिसौधसुखावहारोहणमर्जितं स्यात् ॥ २४ ॥

2910

73438 दिव्यसूरिमङ्गलाशासनम्

Beginning:

कासारयोगिमुख्यानां वदन्तं मङ्गलस्तवम् ।
सज्जनानां प्रियं गार्ग्यं शठारिगुरुमाश्रये ॥ १ ॥
श्रीकाञ्च्यां हेमसरसि दिव्याम्भोरुहजन्मने ।
सरोऽभिधानमुनये शङ्खांशायास्तु मङ्गलम् ॥ २ ॥

End:

शेषांशाय श्रियः पत्युः परत्वस्थापकाय च ।
प्रपन्नकुलनाथाय भाष्यकाराय मङ्गलम् ॥ १३ ॥
योऽब्रवीन्मङ्गलाशास्तिं गोदागोविन्दराजयोः ।
तं वन्दे वादिभयकृद्देशिकं वात्स्यशेखरम् ॥ १४ ॥

2911

75398 दिव्यसूरिमङ्गलाशासनम्

Beginning:

द्वापरे श्रवणे काञ्च्यां सरसि स्वर्णपङ्कजे ।
पाञ्चजन्यावताराय सरोनाम्नेऽस्तु मङ्गलम् ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

तन्मासे वसुनक्षत्रे मल्लाख्यपुरि चोत्पलात् ।
गदांशेनावतीर्णाय भूतनाम्नेऽस्तु मङ्गलम् ॥ २ ॥

End:

अस्मच्छ्रीशैलपूर्णार्ययतीन्द्रगुरवेऽन्वहम् ।
नमोमासेऽनुराधर्क्षे अवतीर्णाय मङ्गलम् ॥ १४ ॥
सर्वेभ्योऽस्मद्गुरुभ्यश्च पूर्णेभ्यश्चोत्तमैर्गुणैः ।
परमोपायनिष्ठेभ्यो भूयो भूयोऽस्तु मङ्गलम् ॥ १५ ॥

2928

66479 भाष्यकाराष्टकम्

Beginning:

योऽयं दैवतसार्वभौमविभवो विश्वाधिको रुद्र इ-
त्याद्यैर्ह्याद्यवचोभिरद्वयपरैरद्यापि संस्तूयते ।
अद्वैतात्मविबोधनाय विदुषामिच्छासमङ्गीकृत-
स्तं श्रीशंकरदेशिकेन्द्रविदितं श्रीशंकरं भावये ॥

End:

हृत्वा संशयमेक एव विदुषां श्रीदक्षिणास्येश्वरो
लोकानामुपकारकं वपुरिदं शिष्यैश्चतुर्भिः सह ।
धृत्वा मोहमपानुदत् स इति यं गायन्ति पौराणिका-
स्तं श्रीशंकरदेशिकेन्द्रविदितं श्रीभाष्यकारं भजे ॥
भवभीतिहरं पुंसां भाविबन्धापनोदनम् ।
भाष्यकाराष्टकं भव्यं भजन्तु भुवि भावुकाः ॥

Colophon:

भाष्यकाराष्टकं संपूर्णम् ।

2933

71484 यतिराजदशकम्

Beginning:

प्रतिभटशंकरादिपरवादिमत्तकरिपुञ्जपञ्चवदनं
प्रणमदशेषलोकपरिपालनैकपरपादपङ्कजयुगम् ।
प्रकटितवारिराशितनयासहाय(पर)तत्त्वभाववचनं
प्रतिदिनमाश्रयामि यतिसार्वभौममतिवेलशीलजलधिम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

विमललसत्स्मितेन्दुपरिभूतिकारिवदनं प्रभाकरशत-
प्रतिमनिजाकृतिं तममलोर्ध्वपुण्ड्रविलसल्ललाटफलकम् ।
प्रकृतिमनोहराङ्घ्रिकमलं प्रभूतकमनीयमङ्गलगुणं
प्रतिदिनमाश्रयामि यतिसार्वभौममतिवेलशीलजलधिम् ॥
विरचितमत्रिगोत्रकमलानिवासकविना गुणाम्बुनिधिना
विमललसद्वधूलकुल(दी)परामगुरुदत्ततत्त्वमतिना ।
दशकमिदं पठन्ति यतिराजदिव्यगुणगुम्फितं सपदि ये
सकलहितं भजन्ति यतिसार्वभौमकरुणाकटाक्षविभवात् ॥

2958

69792 रङ्गरामानुजमुनिचरमश्लोकविंशतिः

Beginning:

अब्दोऽयं पार्थिवत्वं समभजदयनं दक्षिणत्वं प्रपेदे
मासोऽयं धर्मभावं स्फुटयति बुधतां वासरो याति तारम् ।
आसीत् पूष्णोपलाख्यं तिथिरपि दशमीत्यादृता तत्र काले
साक्षाच्छ्रीरङ्गरामानुजगुरुरनघो नित्यसूर्यात्मकोऽभूत् ॥ १ ॥

End:

वेदा निर्वेदमापुः स्मृतिततिरधुना म्लानतामानशे द्राक्
मीमांसा धूसराङ्गी समजनि जनितान्याकृतिर्व्याकृतिश्च ।
वेदान्तैर्मौनवृत्तिः सततमधिगता रङ्गरामानुजाख्ये
योगीन्द्रे न्यस्तदेहे विशति परपदं सर्वविद्यैकराशौ ॥ २० ॥
योगीन्द्रं रङ्गरामानुजमथ विरजातीरमासीनमारात्
सूरीन्द्रैः संपरीतं तदनु भगवतः स्थानमेवाभियान्तम् ।
श्रीकान्तं सेवमानं तदनु भगवता स्वैरमुत्थाप्य दोर्भ्यां
स्वाङ्के संरोप्य संलालितमपि मुदितं संततं चिन्तयामः ॥ २१ ॥
इति कवितार्किकसिंहो वत्सो वात्स्यस्य वेङ्कटार्यस्य ।
अवभृथविंशतिमेतामाचार्यस्यातनोन्मुदे विष्णोः ॥ २२ ॥

2959

67652 रङ्गरामानुजमुनिस्तोत्रम्

Beginning:

कथागर्वक्षुभ्यत्कुमतिकुलकोलाहलभव-
प्रपञ्चव्यामोहं प्रशिशमयिषुः प्रागजनि यः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

परिव्राजां राजा . . . . . . विजयते
दधद्रूपं रङ्गप्रथमपदरामानुजमुने: ।। १ ।।

End:

आमोदानि समर्पयन् कुवलयेष्वत्यर्थमुज्जीवयन्
जीवं जीवमनर्गलं घनरसं सारस्वतं वर्धयन् ।
दीप्तिं दिक्षु विजृम्भयन् विरचयन् सन्मण्डलं योगिनां
राजा राजति रङ्गलक्ष्मणमुनि: पूर्ण: कलानां निधि: ।।

2963

PM641 रामकृष्णेन्द्राष्टकम्

Beginning:

सद्गुरुश्रीरामकृष्णानन्देन्द्रस्वामिनामष्टकम्—

श्रीसूत्रभाष्यपीयूषपानमत्तशरीरकम् ।
रामकृष्णेन्द्रयोगीन्द्रं देशिकेन्द्रं नमाम्यहम् ।। १ ।।
शान्त्यादिषड्गुणोपेतस्वान्तं निर्मलरूपिणम् ।
रामकृष्णेन्द्रयोगीन्द्रं देशिकेन्द्रं नमाम्यहम् ।। २ ।।

End:

श्रीसद्गुरुस्वामिदिव्यपादपद्मप्रपूजकम् ।
रामकृष्णेन्द्रयोगीन्द्रं देशिकेन्द्रं नमाम्यहम् ।। ८ ।।
साक्षाद्ब्रह्मस्वरूपोऽसाववतीर्य महीतले ।
सच्चिदानन्दयोगीन्द्रशिष्योऽभूल्लीलया महान् ।। ९ ।।
संसिद्धरामकृष्णेन्द्रपादपङ्केरुहद्वयम् ।
नत्वाहं पूर्वसुकृतात् मुक्तोऽस्मि भवबन्धनात् ।। १० ।।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीसद्गुरुचरणारविन्दभृङ्गायमानस्वान्त-श्रीसदाशिवब्रह्मेन्द्र-सरस्वतीविरचितं सद्गुरुमूर्त्यष्टकं संपूर्णम् ।

2965

73438 रामानुजप्रपत्ति:

Beginning:

श्रीकान्तदिव्यपदपङ्कजसक्तचित्त श्रीकारिसूनुचरणाम्बुजभृङ्गराज ।
श्रीवत्सचिह्नगुरुमानसराजहंस रामानुजार्य चरणौ शरणं प्रपद्ये ।।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

आर्यैश्चतुष्कयुतसप्ततिपीठसंस्थैः संसेवितावमलसंयमिसप्तशत्या ।
अन्यैस्तदीयनिवहैरनुभाव्यमानौ रामानुजार्य चरणौ शरणं प्रपद्ये ॥
रामानुजार्य रमणीयगुणाभिराम रागादिदूरग गुरो यतिसार्वभौम ।
सत्त्वप्रधान शरणागतवत्सल त्वत्पादाब्जयोरिह परत्र च किंकरः स्याम् ॥

2966

72365 रामानुजमुनिप्रपत्तिः

Beginning:

संसारदावदहनप्रशमाम्बुवाहौ सर्वाश्रितामितसुखप्रदसेव्यभूतौ ।
सत्संप्रदायपरिपालकवेदमौलिरामानुजार्यचरणौ शरणं प्रपद्ये ॥

End:

स्वोत्सेकतीर्थकणसेवक(न)तो दुरन्तपापानपि श्रितजनान् कुरुतोऽनघान् यौ ।
तं(?तौ) भाष्यकृत्सदृशशक्तिकवेदमौलिरामानुजार्यचरणौ शरणं प्रपद्ये ॥

2968

68320 रामानुजमुनिस्तोत्रम्

Beginning:

रम्योपयन्तृमुनिवर्यदयानिवासं रामानुजं यतिपतिं करुणामृताब्धिम् ।
वन्दे मनोज्ञवरदाह्वयमात्मवन्तमाजन्मसिद्धपरिपूतचरित्रबोधम् ॥ १ ॥

End:

विद्याकेलिगृहं विरक्तिलतिकाविश्रान्तिकल्पद्रुमं
प्रोन्मीलद्गुणदिव्यरत्नपटलं निक्षेपमञ्जूषिकाम् ।
श्रीमल्लक्ष्मणयोगिवर्यपदवीरक्षैकदीक्षागुरुं
श्रीमद्व्योममहाचलेशनिरतं रामानुजार्यं श्रये ॥ १३ ॥
कान्तोपयन्तृमुनिवर्यदयानिवासं वैराग्यमुख्यमहनीयगुणाम्बुराशिम् ।
श्रीदेवनायय(क)पदप्रणयप्रवीणं रामानुजं यतिपतिं प्रणमामि नित्यम् ॥ १४ ॥

2969

68320 रामानुजमुनिस्तोत्रम्

Beginning:

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

रम्यजामातृयोगीन्द्रपादरेखालयं सदा ।
तदायत्तात्मसत्तादिं रामानुजमुनिं भजे ॥ २ ॥

End:

शठरिपुयतिराट् श्रीरम्यजामातृयोगी गगनगिरिमुनिश्रीपादसंजातभक्तिम् ।
शमदमगुणपूर्णं नौमि रामानुजाख्यं परिचितनिगमान्तद्वन्द्वमार्यं यतीन्द्रम् ॥ २१ ॥

2970

67816 रामानुजस्तोत्रम्

Beginning:

काषायशोभि + + + दृशोर्ममाग्रे (see MD. 9652).

न चेद्रामानुजे सैषा चतुरा चतुरक्षरम् ।
कामवस्थां प्रपत्स्यन्ते जन्तवो ह्यत्र मादृशाः ॥

End:

जय मायिततान्धकारभानो जय बाह्यप्रमुखाटवीकृशानो ।
जय संश्रितसिन्धुशीतभानो जय रामानुज रङ्गधाम्नि नित्यम् ॥

Colophon:

श्रीभाष्यकारविषयं स्तोत्रं संपूर्णम् ।

2972

71300 रामानुजस्तोत्रम्

This is the same as the first 9 verses of the *Rāmānujātimānuṣastava*, see No. 2974 of this catalogue; MT. 400 (b).

Beginning:

वन्दे रामानुजमुनिं त्रिविक्रममिवापरम् ।
निर्मर्यादेन शीलेन यस्य विश्वं सुखाकृतम् ॥ १ ॥
अतिशायितरामकृष्णवृत्तैरतियाताखिलदेवताप्रचारैः ।
अपहस्तितविश्वलोकसाम्यैरतिशिश्ये यतिसार्वभौमवृत्तैः ॥ २ ॥

End:

सालक्षणिं समुपयन्निह मानुषाणामूरीचकर्थ ननु विश्वविलक्षणत्वम् ।
यानि त्वदीयचरितान्यतिमानुषाणि पुण्यानि तानि मदयन्ति सतां मनांसि ॥ ८ ॥
विन्ध्याटवीषु ननु यादवविप्रलब्धः पन्थानमात्महृदि नावजगन्थ यस्त्वम् ।
स त्वं कथं शमधनैरपि मृग्यमाणं गोपीदृशोर्निहितवानपवर्गमार्गम् ॥ ९ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

2973

71351 रामानुजस्तोत्रम् (रामानुजदण्डकम्)

Beginning:

वैकुण्ठनाथहृद्यस्वरूपगुणानन्त्यादनन्तस्त्वम्। प्रकृष्टविज्ञानबलसंपन्नतानिवासशय्यासनपादुकां-शुकोपधानवर्षातपवारणादिशरीरभेदैः श्रियःपतेः तत्तदवसरोचितशेषभावापन्नत्वाच्छेषस्त्वम्। प्रख्यात-नित्यसूरिवर्गप्रधान एष इति अशेषप्राचीनदेशिकाशयनिश्चयक्रमेण ज्ञानी त्वात्मैव मे मतमित्युक्त-स्थलीयज्ञानिशब्दवाच्यतायाः त्वय्येव पर्यवसानाद् भगवदर्चनादिकं सर्वं तदन्तरात्मभूतभवत्पर्यवसायीति सततोत्सवमङ्गलानि त्वय्येव सुघटितानि। विजयी भव शेषनगराधिनाथ रामानुज नमस्ते यतिराजशेखर।

End:

तथैव मां बाल इति भवान् परवस्तुविख्यातिमद्वेङ्कटाचार्यरूपमाधिष्ठाय मामजीजनत्। रक्षणे पिता पोषणे माता अनुमोदने स्वामी विश्राणने दाता अनुसरणे बन्धुर्मित्रं सर्वं त्वमेव मा त्वं कारुण्यशीतलकटाक्षामृतधारापरंपराभिः सिञ्च त्वद्धृदयकमलमस्मदभिमुखं कुरु कैंकर्यविरोधिजातं निवर्तय कैंकर्याणि कर्तुमनुमतिं कुर्वन् तानङ्गीकृत्य प्रसन्नो भव शेषनगराधिनाथ रामानुज नमो नमो यतिराजशेखर।

2983

72271 वरददेशिकसुप्रभातम्

Beginning:

श्रीवत्सवंशकलशोदधिपूर्णचन्द्र श्रीकान्तपादसरसीरुहमत्तभृङ्ग।
श्रीविष्णुचित्तगुरुवर्यकटाक्षलब्धश्रीभाष्य ते वरददेशिक सुप्रभातम्॥ १॥
भास्वानुदेति बहिरङ्गतमोऽपहर्तुमन्तस्तमः शमयितुं निपुणो भवान् नः।
उत्तिष्ठ रम्यशयनात् करुणापयोधे लोका . . . ते वरददेशिक सुप्रभातम्॥ २॥

End:

तस्य प्रसीदति . . . .।
. . . . . . भक्तियुतः प्रभाते मुक्तिप्रदं वरददेशिकसुप्रभातम्॥ १२॥
. . . . . . ण्यं प्रातरुत्थाय यः पठेत्।
कोटिजन्मकृतं पापं . . . . . . ॥

2984

73537 वरवरमुनिगद्यम्

Beginning:

जय जय जगदुज्जीवनकरणनिपुणावतरण वितण्डाहवोद्दण्डडिण्डिमचण्डनादमुखर दिङ्मण्डल वैतण्डिकचण्ड पाषण्डकदलीकाण्डखण्डनवेतण्डशुण्डायमानत्रिदण्डमण्डितभुजदण्ड। शरीरात्मतत्त्व-चर्वितचर्वणगर्वितचार्वाकवराक . . .

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

निर्द्वन्द्वजनबृन्दवन्दित मन्दरगिरिमथितमहार्णवोद्गीर्णबहुलफेनपिण्डपाण्डुर सुन्दरसुकुमारदिव्य-विग्रह । ग्रहपतिप्रकाशप्रवरभावुकप्रसन्ननिजतेजोविशेषनि:शेषमुषिताशेषतमोगुणविजृम्भण । गम्भीर-मधुरोदारवकुलधरनिगमहृदयविवरणसरसवाग्वैखरीविलसितपरिहृतविमतमतान्तर । निरन्तरानुवर्ण्यमान-श्रीमद्रामानुजयतिभणित . . . .

2985

70587 वरवरमुनिवैभवम्

Beginning:

. . . . . .।
अशिश्रयदयं भूय: श्रीशैलाधीशदेशिकम् ॥ ३४ ॥
ततश्चितधन: सोऽयं तस्यैतस्य प्रसादत: ।
अशेषानश्रृणोद्दिव्यान् प्रबन्धान् बन्धनच्छिद: ॥ ३५ ॥
तत्त्वनिर्णायकत्वेन सारै: संसारघस्मरै: ।
तैरेव सरसैरेष निर्वृतिं नित्यमन्वभूत् ॥ ३६ ॥

End:

जयतु यशसा तुङ्गं रङ्गं जगत्त्रयमङ्गलं
जयतु सुचिरं तस्मिन् भूता रमा मणिभूषणम् ।
वरदगुरुणा सार्धं तस्मै शुभान्यभिवर्धयन्
वरवरमुनि: श्रीमान् रामानुजो जयतु क्षितौ ॥ ६३ ॥

Colophon:

इति श्रीमद्वत्सकुलतिलकसर्वलोकशरण्याचार्यपुत्रस्य वरवरमुनिदासस्य देवराजस्य कृतिषु वरवरमुनिवैभवे दशम: सर्ग: ।

2987

71246 वरवरमुनिशतकं सव्याख्यम्

Beginning:

श्रीमन्नृसिंहमतुलैरमलै: सुगुणैर्युतम् ।
लक्ष्म्यालिङ्गितवामाङ्कं रक्षिताशेषदेहिनम् ॥
अस्तु तद्वस्तु मे भूत्यै कन्धरोपरि सैंहिकम् ।
हिरण्याक्षमहारक्षोवक्षोदारणदारुणम् ॥
श्रीरङ्गशायी जयताच्छेषाद्रीशोऽखिलार्थद: ।
श्रीहस्तिगिरिनाथश्च श्रीयादवगिरीश्वर: ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

. . . वरवरमुनिवर्यं + + + समिन्धे ॥ वरो जामाता वरः श्रेष्ठः स चासौ मुनिवर्यस्तस्य पादयो रत्नमलंकारं तौ रत्नं प्राप्यप्रापकभूतं यस्य तमिति वा 'वरो जामातृपिङ्गयोः' 'वरः श्रेष्ठे त्वन्यवत्' इत्युभयत्रापि विश्वः। जामातृमहामुनिचरणरत्नमित्यर्थः।

End:

वरवरमुने नित्योदग्रा नित्या पूर्वं निःसपत्नं प्रबलप्रमाणबाधरहितं रघुकुलपतेः श्रीरामचन्द्रस्य महत्त्वं माहात्म्यं यत् यादृशम् उपदेशैकगम्यं प्रमाणान्तरागोचरं विश्वतो विश्वस्मिन् सप्तम्यास्तसिः . . . प्रमाणान्तरागोचरमुपदेशैकगम्यं रघुपतिमहत्त्वं तादृशैरेव योगैः प्रत्यक्षेणेतरोपदेशादिना चानिवर्त्यस्याप्यज्ञानस्य निवर्तनक्षमैः कटाक्षविशेषप्रभृतिभिरुपायैः प्रकटयसि विशदीकरोषि ततस्त्वमेव ममोत्तारक इति भावः।

2988

71473 वरवरमुनिसुचरितचषकम्

Beginning:

मूलर्क्षे श्रीनगर्यामुदयमधिगतो जैत्रजिह्वेशदासात्
तस्मात्तापादिपूर्वं रुचिरवर इति प्राप्तनामा गुणैः स्वैः।
तिष्ठन् ग्रामे कडारे कतिचन शरदो मातुलावासभूते
साङ्गोपाङ्गागमज्ञो द्रमिडनिगमवित् प्राप दारानुदारान् ॥ १ ॥

End:

प्रत्यावृत्याथ रङ्गप्रभुमणिवचसा किंच वृद्धागिरा च
स्वावासे वह्निजुष्टे फणिपतिवपुषा नालतो निर्गमेन।
श्रीमाञ्छेषावतारो वरवरमुनिरित्येव सर्वोऽपि लोको
यं मन्ये तं गुणाढ्यं रुचिरवरमुनिं प्रोच्य धन्यो मदात्मा ॥ २९ ॥
इत्थं भूसारवासान्नृहरिगुरुवराद्दाशरथ्यार्यवंश्या-
जातस्तद्दृष्टिपूतो वरदगुरुकृपालब्धबोधप्रबुद्धः।
सत्सेवी राघवार्यो रुचिरवरमुनेः सर्वलोकेडिताङ्के-
र्व्याजह्रे दिव्यचर्यारसचषकमिदं यः पठेत् सोऽतिधन्यः ॥ ३० ॥

Colophon:

सुचरितचषकं संपूर्णम्।

The following three verses are written after the colophon:

स्थातव्यं घटिकाचलस्य कटकोपान्तेषु संतोषतः
स्नातव्यं विनतोचितादिसरसां द्वयेऽनवद्ये जले।
ध्यातव्यं चरणद्वयं नरहरेरम्भोजडम्भापहं
नेतव्यं निजमायुरार्यरचितग्रन्थानुसंधानतः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

नृहरे त्वदीयचरणौ ममोचितं शरणं विरोधिनिचयापनुत्तये ।
न च मेऽन्यदस्ति भगवन् रमापते पदपङ्कजातनिरतान् दधस्व नः ॥
अवतारेष्वंन्यतममवैम श्रीमहागुरुम् ।
नो चेदन्यत्र तच्चक्रमाज्ञाकारि कथं भवेत् ॥

2990

68207 **वानाचलभट्टनाथस्तोत्रम्**

Beginning:

लक्ष्मीनाथपदारविन्दयुगलं सेनेशमुख्यान् गुरून्
नत्वा भट्टनभोऽद्रिसंयमिनुतिं कर्तुं करोम्युद्यमम् ।
सर्वे तेऽपि मयि प्रसादममलाः कुर्वन्तु पद्मापते-
र्दास्यैकप्रणयाभिरामहृदयाः क्षान्त्यादिभिर्भूषिताः ॥
आस्ते दक्षिणभूमिभागतिलकीभूता सुधाभुक्पुरी
तुल्या वानमहामहीध्रनगरी सत्संघसंपूरिता ।
यस्यां राजति तोदभूधरपतिः पद्माधरासंयुतः
सेनेशादिभिरादृतः फणिपतेर्भोगे भृशं मञ्जुले ॥

End:

अहीन्द्रपतगाधिपप्रभृतिसूरिवृन्दैः सदा
विरोधिविकले तले विविधशेषवृत्तिं कृताम् ।
तनोति निबिडीकृते सकलशत्रुसंघैर्यमी
नमामि यतिशेखरं रचितभट्टनाथाह्वयम् ॥
वन्देहं यतिराजस्य वानभूधरयोगिनः ।
भट्टनाथस्य पादाब्जं भवसागरपोतकम् ॥

3001

70871 **वेदान्तदेशिकदण्डकम्**

Beginning:

गुरुमखिलविबुधोत्तमैः सेव्यमानस्वजिह्वासनासीनवागीशदेवत्रयीचूलिकासूरिमीडे । स्वमातृ-प्रियभ्रातृवादीन्द्रहंसाम्बुवाहात्रिगोत्राम्बुराशीन्दुरामानुजाचार्यसत्तर्कवेदान्तशास्त्रप्रतिक्षितचार्वाकपाष-ण्डकाणादसिद्धान्तमिथ्यामतध्वान्तसंख्यागमं साधुनिर्णीतसर्वागमम् ।

End:

प्रपन्नार्तिहारिन् प्रभो वेंकटेशार्य नित्यां नुतिं . . . त्प्रबन्धे त्वदीयेषु हृद्यां बुधेन्द्रेषु भक्तिं त्वया वा वृषा लोभमात्सर्यडम्भादिहीनमहोनामहीनां च मे ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

विदुषां वैभवयुतो वेदान्ताचार्यदण्डकः ।
विदुषां प्रीतये विश्वमान्या विरचिता शुभा ॥

3007

73979 वेदान्तदेशिकद्वादशप्रासाष्टकम्

Beginning:

निजार्चादिव्याविर्भवनसमये स्वप्नविधया
स्वभक्तस्य व्याख्यादरदर(वि)लसत्पुस्तकधरः।
अभूद्यः प्रत्युक्तः पुनरपि हयग्रीवभजनं
स्थितः सत्या(?) काले स जयति वसन् देशिकमणिः ॥ १ ॥
सुत्रामवैरिजनवित्रासनस्वनपवित्रात्मवादविजिता
द्वित्राणि यद्विरुदपत्राणि वीक्ष्य नतवक्त्रा नमन्ति कथकाः।
अत्राणचेतनपरित्राणदक्षिणमपत्रासमिच्छथ जना
मित्राण्यनन्तगुरुपुत्रातिपावनपदत्राणमेव शरणम् ॥ २ ॥

End:

इतीव श्रीशैलान्वयकलशवाराशिशशिनः
समाख्याकर्पूरैर्वमुघमितविश्वस्य विदुषः।
तनूजन्मा श्रीमद्वरदसुगुरोरष्टकमिदं
व्यगायद्वीणावत् तुरगशिरसः श्रीनिधिगुरुः ॥ १२ ॥

Colophon:

इत्याचार्यद्वादशप्रासाष्टकम् ।

3008

73978 वेदान्तदेशिकनक्षत्रमालिका

Beginning:

यत्स्तुत्याम्ब रमेऽभीष्टवस्तुत्यागवती पुरा ।
प्रस्तुत्यातः स्तुतिं तुभ्यमस्तु त्यागात्मिके नमः ॥ १ ॥
नयनयुगसततगलदमृतनिभवीक्षा
परिमृदितदुरितयुतविनतजनतापा ।
हरिवपुषि कृतवसतिरशुभहतये स्या-
जलदलसदचिररुचिरिव जलधिकन्या ॥ २ ॥

. . . . . .

कवितारचनासु नैपुणीं चतुरा विदुरागमार्य ते ।
अवमानकरीं विरोधिनां कुशलाकरताकरीं सताम् ॥ १६ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अस्मिन् श्लोके पादचतुष्टयतृतीयाक्षरवाचने तारामाला इत्युद्भ्रियते । अतो गूढप्रबन्धनामकं नाम शब्दचित्रम् । अथ नक्षत्रमालाप्रारंभः ।

कृपासिन्धो क्षपाबन्धो त्रयीकुवलयावले: ।
स्तुतग्रीवाश्वयुक्तात्मन् गति: श्रुतिगुरो भवे: ॥ १ ॥

End:

सारङ्गनायको भीतीरेव तीव्रा अपानुदत् ।
श्रीरङ्गवासिनां यस्य स्तोत्राज्जीयात् स देशिक: ॥ २७ ॥
श्रीमद्देशिकविषया शुद्धा मालोड्वभिख्ययोपेता ।
श्रद्धासूत्रग्रथिता श्रीनिधिपूर्वेण राघवार्येण ॥ २८ ॥
मया तव दयाकृता कृतिरियं कृतिष्वग्रणी-
रिति प्रकृतिकोमलाकृतितयेह जोघुष्यताम् ।
निरक्षरगकुक्षिराट् क्षरितबुद्धिरेतां कथं
करोतु निकरो विदामिति विदांकरोतु स्फुटम् ॥ २९ ॥

Colophon:

इति श्रीशैलकुलतिलकस्य मेनिमङ्गलं श्रीनिवासराघवाचार्यस्य कृति: नक्षत्रमाला संपूर्णा ।

3014

73978 वेदान्तदेशिकप्रार्थनासप्तकम्

Beginning:

विज्ञापनमिदं श्रीमन् शृणु वेदान्तदेशिक ।
उदारां त्वयि मे भक्तिं वितरस्व दयानिधे ॥ १ ॥
कृपया तव वेदान्तदेशिकेन्द्र मतिर्भवेत् ।
रहस्यत्रयसारे न: परिशीलनतत्परा ॥ २ ॥

End:

गतोऽद्य चरणाम्भोजं शरणं तव देशिक ।
तेन मामपि पापिष्ठं कृपया परिपालय ॥ ६ ॥
कवितार्किकमत्तेभकण्ठीरव दयानिधे ।
इति प्रार्थयते यस्तु तस्य मुक्ति: करे स्थिता ॥ ७ ॥

Colophon:

इत्याचार्यप्रार्थनासप्तकं संपूर्णम् ।

3015

73979 वेदान्तदेशिकविंशतिरत्नमालिका

Beginning:

वेङ्कटाचार्यरचिता वेदान्ताचार्यसंस्तुति: ।
उपलाल्या गुरोरेषा शिशोरस्फुटवागिव ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

यद्वाणीकणपाठनिर्मलमना गर्वोद्धतानां पुरो
जेता संसदि वावदूकसदसां किं च त्रयीपारगः ।
यत्पादाम्बुजसंसृतेरपि नृणां स्वर्गापवर्गोदयः
सोऽयं वेदशिरोगुरुर्विजयतामाचन्द्रमातारकम् ॥ २ ॥

End:

गुरुवर हर दोषं मद्विवेकप्रमोषं कुरु नयनविलासान् कल्पितांहोनिरासान् ।
य इह शुभतरं ते सत्प्रबन्धं पठन्ते निगमपटुरमीषामभ्युदेतान्मनीषा ॥ २० ॥
जयति शुभतमानां जन्मभूमिर्गुणानां पर इव परिणामः पुष्कलानां कलानाम् ।
सुरतरुरिव भौमः संश्रितानां जनानां विमलतरविवेको विष्णुघण्टावतारः ॥ २१ ॥
तीर्थोत्सवे महति शेषधराधरेन्दोस्तद्दैवतेऽप्युडुनि भाद्रपदे च मासे ।
घण्टात्मनोऽवतरतो निगमान्तसूरेर्ह्वद्यां श्रियं वहतु विंशतिरत्नमाला ॥ २२ ॥

Colophon:

इति विंशतिरत्नमाला संपूर्णा ।

3024

75398 वेदान्तदेशिकस्तोत्रम्

Beginning:

विश्वामित्रकुलोद्भूतः काञ्चीनगरजन्मभूः ।
श्रीपुण्डरीकाक्षयज्वपौत्रो वेदान्तदेशिकः ॥
अनन्ताचार्यतनयो यतिराजैकजीवनः ।
पराङ्कुशपदासक्तः परकालाङ्घ्रिभक्तिमान् ॥

End:

सर्वदिव्यक्षेत्रसुखी श्रीमद्रङ्गनिकेतनः ।
श्रीवेङ्कटाद्रिसंसेवी यादवाचलसेवकः ॥
अगण्यकल्याणगुणावासो वेदान्तदेशिकः ।
संनिधत्तां मम स्वान्ते सदा सर्वदयापरः ॥

3026

73978 वेदान्तदेशिकस्तोत्रम्

Beginning:

रविसदृशतनुः श्रीवेङ्कटाचार्यपादः करकलितपवित्रः सूत्तरीयस्वभावः ।
सरसिजमणिमालामूर्ध्वपुण्ड्रान् दधानो मम मनसि विभाते संततं संनिधत्ताम् ॥ १ ॥
वेदान्तदेशिकपदाम्बुजमेव नित्यं मद्दैवतं किमपि काङ्क्षितसर्वदायि ।
यद्वैभवस्य लवलेशविचिन्तनेन बुद्धिः प्रसीदति विभूतियुगावलम्बा ॥ २ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

भगवन्तमिवानन्तकल्याणगुणसागरम् ।
वेदान्तदेशिकं नौमि वेङ्कटेशगुरूत्तमम् ॥ ११ ॥
श्रीमद्वेङ्कटनाथार्यवेदान्ताचार्यवर्यतः ।
न मे गतिर्भवेदन्या जन्मजन्मान्तरेष्वपि ॥ १२ ॥

3027

72267 वेदान्तरामानुजमुनिदण्डकम्

Beginning:

(त्रय्य)न्तार्ययतीन्द्रयामुनशठारातिस्वरूपः पुरा
मग्नान् घोरभवाम्बुधौ बहुजनानुद्धृत्य लक्ष्मीपतिः ।
अद्यत्वे निगमान्तलक्ष्मणमहायोगी बभूवादराद्
अस्मानप्यतिघोरसंसृतिमहागर्तस्थितान् रक्षितुम् ॥ १ ॥

इह हि जयति कोऽपि वेदान्तरामानुजाख्यो योगीन्द्रवर्यो दयादुग्धसिन्धुः श्रितानेकशिष्यौघ-संरक्षणाद्युच्छ्रितश्रीर्महाघोरसंसारदावानलाप्लुष्टदीनौघसंतापनिर्वापणाम्भोधराभ्यां प्रपन्नावली . . .

End:

श्रुतिशिखरविलासिनः श्रीनिधेः पादपाथोजयुग्मे जनानां रुचिर्मादृशामेवमुद्यत्पदाब्जाश्रयान्तस्य शान्त्यादिवारांनिधेः सर्वदाकिंचनाभीष्टचिन्तामणेर्यामुनार्योऽथ रामानुजार्यस्त्रयीशेखरार्योऽथवेत्यूह्य-मानस्य वेदान्तरामानुजस्वामिनः पादपद्मद्वयं संनिधत्तां सदा मामके मानसे ।

3028

TR807 शंकराचार्यगुरुपरंपरा

Beginning:

संख्या	आचार्याणां नामानि	अवतारकालः शालिवाहनशकगणितः		समाधिस्थलम्	स्थितिसंवत्सरः
1.	जगद्गुरु-आदिशंकर-भगवत्पादाचार्याः	742	शार्वरिमाघकृष्णचतुर्दशी	मेरुगुहा	32(?)
2.	सुरेश्वराचार्याः	784	चित्रभानुकार्तिकशुक्लपौर्णमी	काशीक्षेत्रम्	42
3.	बोधनाचार्याः	832	प्रमोदूतमार्गशीर्षशुक्लद्वादशी	शृङ्गेरिक्षेत्रम्	48
4.	ज्ञानघनाचार्याः	881	सिद्धार्थ्याश्वयुजशुक्लसप्तमी	विरूपाक्षक्षेत्रम्	49
5.	ज्ञानोत्तमशिवाचार्याः	925	शोभकृन्माघशुक्लपौर्णिमा	अवन्ती	44

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

संख्या	आचार्याणां नामानि	अवतारकाल: शालिवाहनशकगणित:		समाधिस्थलम्	स्थितिसंवत्सर:
45.	अभिनवशंकरभारती-स्वामिन:	1750	सर्वधारिमाघशुक्लचतुर्थी	कन्नेपल्लिस्थलम्	8
46.	अभिनवोद्दण्डनृसिंह-भारतीस्वामिन:	1777	राक्षसफाल्गुनशुक्लद्वादशी	कौण्डिन्यक्षेत्रम्	27
47.	अभिनवविद्यारण्य-भारतीस्वामिन:	1787	क्रोधनमार्गशीर्षकृष्णद्वादशी	तक्कलकोट-स्थलम्	10
48.	विद्याशंकरभारती-स्वामिन:	1790	विभवमार्गशीर्षकृष्णद्वादशी	गुडिगुण्डस्थलम्	3
49.	अभिनवोद्दण्डनृसिंह-भारतीस्वामिन:	1793	धातृमाघशुद्धाष्टमी	चाकलिग्राम-स्थलम्	3

3029

TR828 शंकराचार्यविजयखड्गधारा

Beginning:

(श्रीजगद्गुरुशंकराचार्याणां दिव्यावतारसचरित्रकथासारात्मिका मध्ये मध्ये पर्वश्लोकगुम्फिता च)

अन्त्यप्रासजातिक्रमसूचिका

प्रथमखड्गधारा दाप्रासगुम्भिता । यथावा—

सदावलिस्तुत-पदाब्जमहिमा-ऽवदातदीधिति—इत्यादि ।

द्वितीयखड्गधारा राप्रासगुम्भिता । यथावा—

पुरा हि दुर्मति-भिरावृते यति-धरातले तत्—इत्यादि ।

. . . .

तत्रादौ मङ्गलाचरणम्—

स्तम्बेरमाननं देवं लम्बोदरलसन्मणिम् ।
हेरम्बं जगतामेकमवलम्बमुपास्महे ॥
वन्दे बृन्दारकस्तोमवन्द्यमानपदाम्बुजम् ।
चन्द्रमौलीश्वरं साम्बं चिन्तितामीष्टसिद्धये ॥

End:

द्वादशखड्गधारा—

धरातलश्री - पुराभिधानम-धुरापुरीपरि-सरातिविलस-द्वरानन्तसा-गराग्रहार-स्थिरावसथशं-करा-भिधोगुरु-वराङ्घ्रिसरसिज-परागगणधू-सरातिपावित-शिरा: स्वयंशं-करार्यचरिता-भिरामखड्गा-परायणो

CC0. In Public Domain. Digitized by Muthulakshmi Academy

गुरु-वरानुग्रहं-चिरायुरारो-ग्यराजसंप-द्वरापत्यसुख-मरातिविजयं-निराकुलधियं-स्थिरां च लक्ष्मीं-गिरां समृद्धिं-वरांश्च संप्रार्थयामि सद्भक्तिं साधुजनासक्तिमपि च भवमुक्तिम् ।

निगमनश्लोकः—

जगदाचार्यकटाक्षप्रोत्साहितधीरनन्तबुधसूनुः ।
शंकर एता द्वादश खड्गाः सार्याः सतां मुदे व्यतनोत् ॥

Colophon:

इति शंकराचार्यविजयखड्गधारा समाप्ता ।

3036

70910 शठकोपस्तोत्रम्

Beginning:

नम्वाळ्वरुविषयम्—

भक्तामृतं विश्वजनानुमोदनं सर्वार्थदं श्रीशठकोपवाङ्मयम् ।
सहस्रशाखोपनिषत्समागमं नमाम्यहं द्राविडवेदसागरम् ॥ १ ॥
पाठादेव प्रशमिततमोग्रन्थयो यस्य गाथाः
सर्वान् भोगान् परमपि पदं प्राणिनः प्रापयन्ति ।
आबिभ्राणो वकुलकुसुमैर्नद्धमंसेन माल्यं
द्रष्टव्यो मे स खलु भगवान् द्राविडब्रह्मदर्शी ॥ २ ॥

End:

अस्तौदच्युतमन्यद् वस्तु तृणीकृत्य तिन्त्रिणीमूले ।
कुरुकापुर्यामस्यां शठकोपमुनिः सहस्रशाखाभिः ॥ १३ ॥
व्याख्यानमुद्राविलसत्कराब्जं शठारिमानन्दघनस्वरूपम् ।
ध्यायेस्सलक्ष्मीपतिपादसेवाविलक्षणा योगिवरं प्रपद्ये(?) ॥ १४ ॥

3037

73672 श्रीनिवासदेशिकविंशतिः

Beginning:

श्रीमानम्बुजलोचनोऽयमनघः श्रीवेङ्कटाधीश्वरः
स्वासाधारणभव्यसद्गुणगणः कारुण्यपाथोनिधिः ।
यः सर्वानवलोक्य संसृतिमहाकूपारमज्जना-
नुद्धर्तुं भुजगाचले विजयते सोऽयं जगद्रक्षकः ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

श्रीमच्छ्रीनिधिदेशिकेन्द्रमणिभिः श्रीवासरामानुजैः
श्रीवेदान्तरघूद्वहानुजमहायोगीशसद्देशिकैः ।
गोपालार्यगुरूत्तमप्रभृतिभिर्मान्यैः पुनर्भूषितां
वन्देयाद्य सुपुष्कलां गुणगणैः पङ्क्तिं गुरूणामहम् ॥ २ ॥

End:

सत्पक्षपातयुक्तः सद्गतिचरणः सविष्णुपदलोलः ।
श्रीश्रीनिवासहंसो विहरतु मम मानसे द्विजश्रेष्ठः ॥ २५ ॥
इत्थं श्रीवासयोगिप्रवरपदसरोजातभृङ्गायमान-
स्वान्तः श्रीवत्सवंशोदधिविबुधतनोः श्रीनिवासार्यसूरेः ।
पुत्रः श्रीवासदासः प्रणमदघघटापञ्चवक्त्रं यमीशं
विंशत्या श्रीनिवासं गुरुकुलतिलकं साधु तुष्टाव हृष्टः ॥

3038

70695 श्रीशैलाष्टकम्

Beginning:

श्रोतुं द्राविडवेदभूरिविवृतिं सौम्योपयन्तुर्मुने-
रुत्कण्ठास्ति ममैनमानयत तं तार्क्ष्याश्रयं मण्टपम् ।
आविश्याचर्कमूचिवानिति मुदा निश्येष लोकान्वितो
रङ्गी वत्सरमेकमेवमशृणोद् वक्तुर्यथोक्तं क्रमात् ॥ १ ॥
श्रीभूम्यां रङ्गनाथे शठजिदुपनिषद्व्याक्रियां श्रोतुकामे
शेषत्वं तोषयिष्यन् वरवरमुनितां प्राप्य यो वर्ततेऽग्रे ।
काषायश्रीतुलस्यम्बुजमणिसुशिखाब्रह्मसूत्रत्रिदण्डै-
र्भान्तं शुभ्रोर्ध्वपुण्ड्रं स्मर हृदय सदा कोशमुद्राङ्कहस्तम् ॥ २ ॥

End:

यद्वद् वक्तुं न युक्तं प्रणवहरिपदाभ्यन्तरेऽन्यत् पदं तत्
कृष्णेत्येतत् कदाचिच्छ्रुतिमुनिवचनैर्वैदिकैस्तत्त्वविद्भिः ।
तत्तद्(? तद्वद्) रङ्गेशभक्तैः शमदमनियतैः स्वामिभिस्तत्त्वविद्भि-
र्वक्तुं युक्तं न मध्ये सपदि यदि तयोरेतयोः पद्यमन्यत् ॥ ७ ॥
शठरिपुरेक एव कमलापतिदिव्यकवि-
र्मधुरकविर्यथा च शठजिन्मुनिमुख्यकविः ।
यदुकुलपुंगवस्य भुवि रङ्गसुधाकविराड्
वरवरयोगिनो वरदराजकविश्च तथा ॥ ८ ॥

Colophon:

श्रीशैलेशाष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3039

70265 **बसवसहस्रनामावलिः**

Beginning:

श्रीमदखण्डतेजद्युतिराजसुरासुरभोगिराजनि-
नामनिरामयाङ्ग भवभङ्ग दयाभरितान्तरङ्ग निः-
सीमगजेन्द्रसान्द्रतरकृत्तिवासन निरामयाङ्ग नि-
ष्काम दिगम्बर त्रिमलदूर निरञ्जनलिङ्ग पाहि मां बसवेश ॥ १ ॥
श्रीगुरुवरेण्य महिमासागर चरणाम्बुराशिहिमभानो ।
सदा योगिहृत्पद्मग्रह वेदागमनुतिपात्र पाहि मां बसवेश ॥ २ ॥
धर्मस्वरूप निश्चल निर्मल चिद्गात्र शरणमित्र रघुवीर ।
महेश शंकर शंभुकर्मत्रय पाहि मां बसवेश ॥ ३ ॥

ओं प्रमथगणेश्वरबसवाय नमः। उग्रगणेश्वरब°। निःशङ्कगणेश्वरब°। शंकरगणेश्वरब°। विचित्रगणेश्वरब°। कालाग्निरुद्रगणेश्वरब°। मातापितृगणेश्वरब°। जननमरणविवर्जितगणेश्वरब°। तालमेलगणेश्वरब°। अकलङ्कगणेश्वरब°।

End:

ओं परमहर्षोदकहस्तमार्जनप्रसादबस°॥ १००० ॥ त्रिकरणशुद्धताम्बूलप्रदबस°। जितमायाबस°। मनोऽतिमन्दनिवृत्तिकरब°। लिङ्गजङ्गमदासब°। अनादिपरशिवतत्त्वचित्स्वरूपबस° अखण्डपरिपूर्णज्योतिर्मयबस° ॥ १००६ ॥......

...विरताग्रणिशिवपूजानिरतं सुज्ञानभक्तिवैराग्यदयाभरितं अतिसतिगालद बसवेशं निरूपिसलू काम्बरदे° ?।

Colophon:

इति **बसवेश्वरसहस्रनामावलिः** संपूर्णा ।

Post-colophon note:

गणसहस्रनामावळीलि **पाल्कुरिकि सोमेश्वराचार्यरिं** भक्तजनक्के वर्णिसिद श्लोकपदमागिर्पुदु । ४६५ प्रमथगणरु । १७१ रुद्रगणरु । २८ योगाचार्यरु । ६३ त्रिषष्टिपुरातनगणरु । १६ षोडशगणरु । १३ तेरसगणरु । १० दशगणरु । २३४ अमरगणंगळु । अंतु १००० गणसहस्रनामगळु । ५३ मंदि पुरातनर त्रिविधि । ७७ पदंगळु **निजगुणशिवयोगीन्द्ररिंद** विरचितमादद्दु ।

3048

PM1002 **शृङ्गेरीनृसिंहभारतीन्द्रस्वाम्यष्टोत्तरशतनामस्तोत्रम्**

Beginning:

श्रीशृङ्गेरीपुराधीशः शारदापीठपूजकः ।
तुङ्गभद्रातीरवासी तुङ्गकल्याणवैभवः ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सुपैङ्गलाब्दोर्जशुक्लचतुर्दश्यश्विनीभवः ।
कल्याणगुणसंपूर्णः सर्ववन्द्यपदाम्बुजः ॥ २ ॥

End:

विद्यासंपत्समृद्ध्यादिसर्वाभीष्टफलप्रदम् ।
शृङ्गेरीशश्रीनृसिंहभारत्याख्यजगद्गुरोः ॥ ३६ ॥
पादाब्जदर्शनोद्भूतप्रतिमोन्मेषशालिना ।
तत्पूजासक्तचित्तेन लोकानन्दविधायिना ॥ ३७ ॥
श्रीशृङ्गेरीयतीन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
त्रिसंध्यं यः पठेद् भक्त्या स सर्वाभीष्टमाप्नुयात् ॥ ३८ ॥

Colophon:

श्रीशृङ्गेरीनृसिंहभारतीन्द्रस्वामिनामष्टोत्तरं संपूर्णम् ।

MISCELLANEOUS STOTRA-S

3050

72094 अक्षमालिकास्तोत्रम्

Beginning:

अक्षमालिकास्तोत्रमन्त्रस्य शब्दब्रह्म ऋषिः । पञ्चाशद्वर्णरूपिणी श्रीमहामातृका नाना छन्दांसि । अकथादित्रिरेखात्मकी महाकुण्डलिनी चतुर्विधपरिमि(त)सुषुम्नानाडी सरस्वती देवता । चतुर्विंशद्वर्ण बीजम् । पञ्चस्वरं शक्तिः । स्वरवर्णमयं कीलकम् । अक्षमालिकाप्रीत्यर्थे स्तोत्रपठने विनियोगः । . . . ध्यानम्—

सौषुम्नं सुषिरं पथत्रयपदं पादत्रयान्तं परं
प्राणादिप्रणवादिसंपुटवरं मार्गत्रयं बिन्दुषु ।
वाचा वाणि विचित्रवेदजननी सौषुम्नसंचारिणी
श्रीमाले वशिनी वशासि वशगे वर्गाष्टके मातृके ॥

End:

अक्षमालामहामन्त्रं त्रिसंध्यं यः पठेन्नरः ।
आयुरारोग्यमैश्वर्यं संप्राप्नोति न संशयः ॥

. . . .

वशीकरं शान्तिकरं प्रसन्नं वाग्देवताचित्रविचित्रवाच्यम् ।
लक्ष्मीकरं पुष्टिकरं सुसौख्यं पञ्चोपचारैः फलमीदृशं स्यात् ॥

Colophon:

इति श्रीब्रह्मतान्त्रिके अक्षमालिकास्तोत्रं नाम द्वात्रिंशोऽध्यायः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3051.

73814 **अश्वत्थनारायणस्तोत्रम्**

Beginning:

अथ ध्यानं प्रवक्ष्यामि सर्वाभीष्टफलप्रदम् ।
पुत्रकामैः स्तुतं देवं श्वेतवर्णं सुरोत्तमम् ॥ १ ॥
समस्तबीजभवनं वरदाभयपाणिनम् ।
शङ्खचक्रधरं देवं पूर्णेन्दुसदृशाननम् ॥ २ ॥

End:

अश्वत्थसेवा तिलपात्रदानं गोस्पर्शनं ब्राह्मणतर्पणं च ।
एतानि सद्यः प्रहरन्ति पापं गङ्गानदी भारतकीर्तनं च ॥ ५५ ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अश्वत्थनारायण . . . .

3052

TR804 **अष्टदिक्पालस्तुतिः**

Beginning:

तत्रादौ विधातारं प्रति प्रणामः—

आरूढं स्कन्धदेशं मृदुसितविपुलं राजहंसस्य यूनो
भारत्यान्वास्यमानं सनकमुखमहायोगिबृन्दैरमन्दैः ।
श्रीमत्तत्त्वावबोधे विनिहितमतिभिः सेव्यमानं विरिञ्चिं
सेवे प्रस्थानकालोचितनवविजयश्रेयसे भूयसे नः ॥ १ ॥

End:

ईशानं प्रति प्रणामः—

अन्यं संचारशीलं रजतगिरिमिव श्वेतमानं समन्ताद्
आध्यारूढं महोक्षं तुहिनगिरिसुताश्लेषदत्तावधानम् ।
सेनानीविघ्नराजप्रमथगणशतैः सेवितं शूलपाणिं
सेवे प्रस्थानकालोचितनवमहितश्रेयसे भूयसे नः ॥ ९ ॥

स्तुतिपठनफलम्—

इति कौशिकरङ्गनाथक्लृप्तां सुरनाथस्तुतिमन्वहं पठन् सन् ।
लभते परमां श्रियं धरायामिह तेषां कृपया विधूतदोषः ॥ १० ॥

Colophon:

इति अष्टदिक्पालस्तुतिः समाप्ता ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3053

TR930 **अष्टप्रासपुष्पाञ्जलिः**

Beginning:

त्राता यो जगतां सकृत्प्रपदनप्रीतान्तरात्मा मुहुः
दाताभूदभयस्य चेति जगति ख्यातापदानावलिः ।
नैतादृक् करुणाकरोऽन्य इति निर्धूतान्यदेवः सदा
सीतानायकमेव तं मम मनो जातादरं सेवते ॥ १ ॥

End:

श्रीमानेष रघूद्वहस्त्रिजगतां क्षेमाय पूषान्वये
भूमावत्र सतां कृतावतरणः सीमातिगप्राभवः ।
वामाक्षीमणिजानकीनिरवधिप्रेमार्द्रवीक्षावशः
सोमादित्यमुखामरैरभिनुतो मामादरात् त्रायताम् ॥ ३८ ॥

Colophon:

इति सुन्दरदासविरचितः अष्टप्रासपुष्पाञ्जलिः समाप्तः ।

3056

73802 **कार्तवीर्यार्जुनस्तोत्रम्**

Beginning:

कार्तवीर्याय सूर्याय विष्णवे विपुलौजसे ।
अर्जुनाय रमाधाम्ने स्थेम्ने नृपतितेजसे ॥
चन्द्रवंशस्य चन्द्राय हैहयान्वयभानवे ।
कृतवीर्यमहाराजसूनवे विष्णुमूर्तये ॥

End:

एभिर्यो नामभिः स्तुत्वा कार्तवीर्यार्जुनं विभुम् ।
तस्य चापन्न चोरारिभयं नो विद्यते क्वचित् ॥
प्रापता(? पापानि) च विनश्यन्ति प्रत्यहं विह्वतान्यपि ।
वर्धन्ते सौख्यसौभाग्यबलपुण्यानि नित्यशः ॥

3057

73802 **कार्तवीर्यार्जुनस्तोत्रम्**

Beginning:

दत्तात्रेय महाभाग सर्वज्ञ करुणानिधे ।
श्रोतुमिच्छामि तत्त्वज्ञ कार्तवीर्यस्य वैभवम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

गङ्गाया दक्षिणे भागे रेवायाश्च नदीतटे ।
माहिष्मतीनाम्नि पुरे हैहये राजवंशजम् ॥

End:

नूपुरद्वयसंयुक्तं खड्गखेटकधारिणम् ।
एवं ध्यायेत् कार्तवीर्यमर्जुनं राजवंशजम् ॥
देवगन्धर्वयक्षैश्च सिद्धैश्च परिसेवितम् ।
उर्वश्याद्यैरप्सरसैः सेव्यमानं भयंकरम् ॥

Colophon:

इति विष्णुधर्मे कार्तवीर्यार्जुनकल्पे ध्यानप्रतिष्ठाविधिर्नाम प्रथमः पटलः ।

3058

73802 कार्तवीर्यार्जुनस्तोत्रम्

Beginning:

कृतवीर्यसुतो राजा सहस्रभुजमण्डितः ।
अवतारो हरेः साक्षात् पालयेत् सकलं मम ॥
कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ।
तस्य स्मरणमात्रेण हृतं नष्टं च लभ्यते ॥

End:

लोकेश्वर महावीर्य महाबलपराक्रम ।
रक्ष मां सर्वदैत्यघ्न शत्रून् नाशय नाशय ॥
दुष्टघ्न किं नु स्वपिषि किं तिष्ठसि चिरायसि ।
पाहि नः सर्वदा सर्वभयेभ्यः स्वसुतानिव ॥

3059

71924 कार्तवीर्यार्जुनस्तोत्रम् (अरिनिग्रहस्तोत्रम्)

Beginning:

कृतान्त इव कल्पान्ते गर्जन्नुज्जृम्भितोऽर्जुनः ।
अस्मद्विरोधिनामायुर्हरत्वतिभयंकरः ॥
आबध्यातिदृढं पाशैरलमस्मद्विरोधिनम् ।
खादिरेन्धे महत्यग्नौ क्षिपत्वक्षय्यविक्रमः ॥

End:

यः पठेन्निशि संध्यासु प्रयाणे रणसंकटे ।
राजारिचोरबाधासु जलारण्यभयेषु च ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

विवादे कलहे चैव कोलशार्दूलविप्लवे ।
अभयं तस्य सौख्यं च भवेदत्र मुनीरितम् ॥

Colophon:

इति इन्द्रविरचितम् अरिनिग्रहस्तोत्रं समाप्तम् ।

3060

71924 कार्तवीर्यार्जुनस्तोत्रम्

Beginning:

सप्तद्वीपैकनाथः सवितृसमरुचिः सर्वदुष्टान्तको नः
पायादब्जायताक्षो रथवरनिलयः स्थूलकायोऽतिभीमः ।
चापान्तेषु त्रिलोकीं करधृतधनुषा निस्वनैस्त्रासयानः
श्रीमान् श्रीकार्तवीर्यो निखिलनृपनताङ्घ्र्यम्बुजः क्षिप्रकारी ॥

End:

बाहासाहस्रराजद्बहुतरविशिखोद्दानकल्पान्तवह्निं
क्रूरा(चक्रा)कारप्रदीताङ्कुशकलितमहाध्वान्तदन्तावलेन्द्रम् ।
क्रूरं क्रूराट्टहासाविधृतवनमृगस्तेनवेतालभूत-
व्यालाद्यं स्यन्दनस्थं विबुधमुनिनुतं कार्तवीर्यं नमामि ॥

3061

PM2618 कार्तवीर्यार्जुनस्तोत्रम्

Beginning:

रक्तस्रजं वरविभूषणकुण्डलाढ्यं चापासिसायकगदाशनिचक्रयूथैः ।
संशोभितायतसहस्रकरं गुणाब्धिं श्रीलोकनाथमनिशं मनसा स्मरामि ॥ १ ॥

End:

दशास्यदर्पघ्नमतिप्रसन्नं रक्ताम्बरं हाटकमालिकण्ठम् ।
सहस्रबाहुं जगतीपतीशं चक्रावतारं प्रणमामि विष्णुम् ॥ ३२ ॥
माहिष्मतीनाथमनाथनाथं राजेन्द्रपूज्यं शशिवंशकेतुम् ।
रक्ताङ्गरागं भवरोगवैद्यं श्रीकार्तवीर्यं हृदि भावयामि ॥ ३३ ॥

Colophon:

इत्युड्डामरेश्वरतन्त्रे उमामहेश्वरसंवादे श्रीकार्तवीर्यस्तवराजः समाप्तः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3063

PM2111 काशीपुरीशाष्टकम्

Beginning:

वारणासुरेन्द्रगर्वहारिणं विचारिणं वारणेन्द्रवैरिवर्ग(र्न)चारिणं प्रवीणिनम् ।
वारणान्तकारणप्रवीणमुक्तिकारणं काशिकापुरीशमीशमाशिवं समाश्रये ॥ १ ॥

End:

पङ्कजासनादिसेव्यपङ्कजं परात्परं पङ्कजासनादिसेव्यशंकरं शुभाकरम् ।
शंकरं समग्रलोककिंकरं भयंकरं काशिकापुरीशमीशमाशिवं समाश्रये ॥
काश्यष्टकमिदं पुण्यं यः पठेच्छिवसंनिधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

Colophon:

इति श्रीवेदव्यासविरचितं काशी-अष्टकं संपूर्णम् ।

3068

68381 गुरुवन्दनस्तवराजः

Beginning:

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं ज्योतिःक्रमं शांभवीम् ।
वीराद्यष्ट च ताश्च षष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥ १ ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ २ ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ३ ॥

End:

शिवो यदि मृषावादी न गुरुर्यदि दैवतम् ।
तथा मे शांभवीमार्गे हानिर्भवतु नान्यथा ॥ २१ ॥
शास्त्रदृष्टिर्गुरोर्वाक्यं त्रितयं चात्मनिश्चयम् ।
त्रिविधं यो विजानाति स मुक्तो भवबन्धनात् ॥ २२ ॥

Colophon:

इति श्रीज्ञानार्णवे गुरुवन्दनीयस्तवराजं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3069

67160 गोष्ठेश्वराष्टकम्

Beginning:

सत्यज्ञानमनन्तमद्वयसुखाकारं गुहान्तःस्थितं
श्रीचिद्व्योम्नि चिदर्करूपममलं यद् ब्रह्मतत्त्वं परम् ।
निर्बीजस्थलमध्यभागविलसद्गोष्ठोत्थवल्मीकसं-
भूतं सत् पुरतो विभात्यहह तद् गोष्ठेशलिङ्गात्मना ॥ १ ॥

End:

श्रीकाञ्चीतरुमूलपावनतलं भ्राजत्त्रिवेण्युद्भवं
त्यक्त्वान्यत्र विधातुमिच्छति मुहुर्यस्तीर्थयात्रादिकम् ।
सोऽयं हस्तगतं (फलं) विहाय कुधिया शाखाग्रलीनं वृथा
यष्ट्या ताडितुमीहते जडमतिर्निःसारतुच्छं फलम् ॥ ८ ॥

Colophon:

श्रीमद्राजतशैलोत्थत्रिवेणीमहिमाङ्कितम् ।
गोष्ठेश्वराष्टकमिदं सारज्ञैरवलोक्यताम् ॥

3072

66463 ज्वरस्तोत्रम्

The following is the full text of the Stotra:

नमामि त्वानन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंहारहेतुं यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥
कालो दैवं कर्म जीवस्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्संघातो बीजरोहप्ररोहः त्वन्मायैषा तां निरोद्धुं प्रपद्ये ॥
नानाभावैर्लीलयैवोपपन्नान् देवान् साधून् लोकसेतून् बिभर्षि ।
हंसोन्मार्गान् लीलया वर्तमानान् जन्मैतत्ते भारहाराय भूमेः ॥
तप्तोऽहं ते तेजसा दुःसहेन शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं नासेवीरन् यावदाशानुबन्धान् ॥
त्रिशिरस्ते प्रपन्नोऽहं यत्तु देव ज्वराद्भयम् ।
योऽसौ स्मरति संवादं तस्य त्वन्नो भवेद् भयम् ॥

3073

TR811 तत्त्वार्थसारावलिः

Beginning:

श्रीमद्वेङ्कटनायकं श्रुतिशिरःसीमन्तिनीवल्लभं
लक्ष्मीप्राणधवं भुवःपतिमजं सर्वेश्वरं सद्गुणम्

CC0. In Public Domain. Digitized by Muthulakshmi Academy

शङ्खं चक्रमथाभयं वरमथ स्वैः पाणिभिः संततं
विभ्राणं भगवन्तमार्तिहरणं वन्दे मदिष्टार्थदम् ॥

End:

वेदान्तसारभूतैस्तत्त्वमसीत्यादिकैर्महावाक्यैः ।
श्रीमच्छंकरभगवच्चरणोक्तार्थैः प्रबोधितः सोऽस्मि ॥
सुब्रह्मण्यमुखोद्गतसिद्धान्तार्थस्तुतिं विष्णोः ।
पठतां पापनिवृत्तिः फलमभिलषितं भवेत् सत्यम् ॥

Colophon:

इति तत्त्वार्थसारावलिः समाप्ता ।

3075

PM2666 तारतम्यस्तोत्रं (बृहत्तारतम्यस्तोत्रं) सव्याख्यम्

Beginning:

नत्वा नारायणं विष्णोरावेशं च दिवौकसाम् ।
अवतारं तारतम्यं दर्शयिष्येऽन्यतः स्थितम् ॥ १ ॥
मत्स्यः कूर्मः क्रोडसिंहौ वटुरामौ च भार्गवः ।
कृष्णबुद्धौ दत्तकल्की हयग्रीवैतरेयकौ ॥ २ ॥

Comm.:

व्यासतीर्थमनोमञ्चे मध्वमानसतल्पके ।
शयानौ नौमि मत्यर्थं लक्ष्मीनारायणौ प्रभू ॥
तारतम्यस्तवव्याख्यां बालार्थं श्लोकरूपतः ।
कृत्वा तां व्याकरिष्येऽहं विट्ठलो नाम पूर्वकम् ।

अथेष्टानिष्टप्राप्तिपरिहारार्थं सर्वदेवानां लक्ष्मीनारायणयोश्चावतारावेशतारतम्यज्ञानमावश्यकमुक्तम् । तदुक्तम्—

अवतारान् हरेर्ज्ञात्वा नावतारा हरेश्च ये ।
आवेशांश्च तथा सम्यग् ज्ञात्वा मुक्तिर्न चान्यथा ॥
तारतम्यं ततो ज्ञेयं सर्वोच्चत्वं हरेस्तथा ।
एतद्विना न कस्यापि विमुक्तिः स्यात् कथंचन ॥

इति । एतदर्थमानन्दतीर्थैस्तत्र तत्र बृहदारण्यकभाष्यादौ कथितम् ।

End:

दशप्रमतिशास्त्रसजलधितोऽमराणां हरेः
प्रवेशनसुतारतम्यजनिजानि रत्नानि च ।
विमृश्य विनिघृष्य सज्जनपरीक्षया व्यासराट्-
प्रशिष्य इति विट्ठलोऽनुपमकण्ठमालां व्यधात् ॥ ७६ ॥

इति तारतम्योक्त-आवेशांशसाक्षादवतारक्रमः संपूर्णः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Comm.:

उक्तस्तोत्रस्य प्रचयगमनार्थं विष्णुतीर्थश्लोकमन्ते निबध्नाति सर्वोत्तम इति। एतत् सर्वं मध्वशास्त्रमेव संगृहीतम्; नाप्रामाणिकमित्याह दशेति। प्रवेशनमावेशः।

तारतम्यादि(स्थ)सद्रत्नमाला मुक्तिसुखप्रदा।
पाठाच्छ्रुतेश्च विद्वद्भिर्ध्येयेयं हृदि सर्वदा॥

Colophon:

बृहत्तारतम्यं संपूर्णम्।

3076

71165 तुलसीस्तोत्रम्

Beginning:

श्रीशौनकः—

नामोच्चारे कलौ यस्याः भजन्ति सुरतां जनाः।
पापानि यान्ति विलयं पुण्यं भवति चाक्षयम्॥
सा कथं तुलसी लोके पूज्यते विद्यते तथा।
दर्शनेनापि यस्यास्ति फलं कोटिगवां शतम्॥

End:

क्षीरोदमथनोद्भूते तुलसि त्वं प्रसीद मे।
द्वादश्यां जागरे रात्रौ यः पठेत् तुलसीस्तवम्॥
पात्रं शतपरा . . . .

3077

72447 तुलसीस्तोत्रम्

Beginning:

जगद्धात्रि नमस्तुभ्यं विष्णोश्च प्रियवल्लभे।
यतो ब्रह्मादयो देवाः सृष्टिस्थित्यन्तकारिणः॥
नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे।
नमो मोक्षप्रदे देवि नमः संपत्प्रदायिके॥

End:

तुलसी भूर्महालक्ष्मीः पद्मिनी श्रीर्हरिप्रिया।
तुलसी श्रीसखि शुभे पापहारिणि पुण्यदे॥
नमस्ते नारदनुते नारायणमनःप्रिये।

Colophon:

इति श्रीपुण्डरीककृतं तुलसीस्तोत्रं संपूर्णम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3078

70691 त्वंमेऽहंमे-इतिश्लोकः द्राविडव्याख्यासहितः

This verse is supposed to have been composed by the author to illustrate the position of the Jīva in relation to God and has been quoted by Vedāntadeśika in his *Rahasyatrayasāra*. For an English translation of this verse, see the *Rahasyatrayasāra*, translated by M. R. Rajagopala Ayyangar, Kumbakonam, 1956, pp. 89-90.

Beginning:

त्वंमेऽहं मे कुतस्तत् तदपि कुत इदं वेदमूलप्रमाणाद्
एतच्चानादिसिद्धादनुभवविभवात् तर्हि साक्रोश एव ।
काक्रोशः कस्य गीतादिषु मम विदितः कोऽत्र साक्षी सुधीः स्या-
द्धन्त त्वत्पक्षपाती स इति नृकलहे मृग्यमध्यस्थवत् त्वम् ॥

. . . ह्रीश्च ते लक्ष्मीश्च पत्न्यौ என்றும் वैकुण्ठे तु परे लोके श्रीसहायो जनार्दनः ।

End:

அவன் தேவருக்கு பக்ஷபாதியாகையாலே कूटसाक्षि என்ற गुरुकलहे யிப்படி देवरीரோடே சேதனனவன் விவாதம் பண்ணுகிறவளவிலே मृग्यमध्यस्थवत्त्वं प्रमाणं कर्तुमत्र मध्यस्थवत्त्वं என்கிறபடியே யவனல் सिद्धि பண்ணப் போகாதபடி யத்னம் பண்ணியருளுகிறுப்போலே யிருனின்றது. பட்டர் திருவடிகளே சரணம்.

प्रथितं पातकिवर्गं कृतघ्नं को हि कृत्स्नमतिशेते ।
तमिमं क्रियमाणघ्नः ततोऽपि दुरात्मा करिष्यमाणघ्नः ॥

The following two verses are written at the end of the MS.

न प्रकाशोऽहमित्युक्तिर्यत्प्रकाशैकबन्धना ।
स्वप्रकाशं तमात्मानमप्रकाशः कथं स्पृशेत् ॥
तथाप्याभाति कोऽप्येष विचाराभावजीवनः ।
अवश्यायश्चिदाकाशे विचारार्कोदयावधिः ॥

3079

68311 दत्तात्रेयगद्यम्

Beginning:

भज चित्तात्रितनयं भज भव्यगुणाश्रयम् ।
भज सह्याद्रिनिलयं भ . . . . ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इह जगति वरामृतानोकहस्यूतमालूरमाकन्दबन्धूकतक्कोलतालालि . . . . नस्पन्दमन्दारचाम्पेयकादम्बजम्बीरपुन्नागपूगोन्नमन्नारिकेरादिपृथ्वीरु . . . . . भिसंवीतसह्यागराजन्यतुङ्गोत्तमाङ्गस्थलीजातनानामणिद्योतकान्तिच्छटाकबुं . . . . शोभमानासितस्निग्धधात्रीधरित्रीजरूपात्मसंशोभितम् ।

End:

उद्बुद्धलक्ष्याकृतिप्रातभेदे . . . . मव्यक्तमानन्दसान्द्रामृताम्भोधिमच्छिन्नचिद्व्योमवर्ष्माणम् आत्रेयमात्मान . . . . न्नरङ्गे मुदा . . . त्रिमुनिभाग्यसीम्ने धाम्ने वेदान्तविश्रुतमहिम्ने दत्तात्रेय . . . . . भूयान्ममात्मचिद्भूम्ने ।

3080

PM644 दत्तात्रेयदशकम्

Beginning:

मूलाधारे वारिजपत्रे सचतुष्के वं शं षं सं वर्णविशालैः सुविशालैः ।
रक्तं वर्णं श्रीगणनाथं भगवन्तं दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि ॥
स्वाधिष्ठाने षड्दलपत्रे तनुलिङ्गै(र्वा)लान्तैस्तावद्वर्णविशालैः सुविशालैः ।
पीतं वर्णं वाक्पतिरूपं द्रुहिणं तं दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि ॥

End:

चित्तोंकारैर्ध्वनिनादैः सदानन्दैरादिक्षान्ताक्षरवर्णैः कर्णसान्द्रैः ।
वेदान्तार्थज्ञानस्वरूपं तं ज्योतिर्दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोऽस्मि ॥

3081

PM1392 दत्तात्रेयस्तोत्रम्

Beginning:

जटाधरं पाण्डराङ्गं शूलहस्तं कृपानिधिम् ।
सर्वरोग . . . . दत्तात्रेयमहं भजे ॥

अस्य श्रीदत्तात्रेयस्तोत्रमहामन्त्रस्य । भगवान् नारद ऋषिः । अनुष्टुप् छन्दः । श्रीदत्तः . . . देवता । दत्तप्रीत्यर्थे जपे विनियोगः ।

जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे ।
भवपाशविमुक्ताय दत्तात्रेय नमोऽस्तु ते ॥

End:

दत्तविद्याय ल . . च दत्तस्वातस्वरूपिणे ।
गुणनिर्गुणरूपाय . . . .
. . . .
इदं स्तोत्रं महादिव्यं . . . . . ।
दत्तात्रेयप्रसा . न . . . . ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्रीनारदपुराणे . . . . . त्रेयस्तोत्रं संपूर्णम् ।

3082

67160 दशश्लोकीस्तवराजः

Beginning:

यो देवः प्रथमो विधीशहरिमुख्यानां पुरो नाकिनां
य: शुण्डापरिशोभिलम्बिजठरो यो नालिकेरप्रियः ।
मूलाधारचतुर्दलाब्जविलसच्छ्रीवल्लभानायको
विघ्नान् नो विधुनोतु मोदककृतानन्दः स विघ्नेश्वरः ॥

End:

यत् सच्चित्सुखरूपमद्वयमनासक्तं मृषामात्रके
विश्वेऽस्मिन्नबुधैरशास्त्रगुरुभिर्भ्रान्त्या समूरीकृते ।
तत् साक्षात् परतत्त्वसंज्ञकमखण्डानन्दपीयूषनिः-
ष्यन्दैकाकृति वस्तु मेऽस्तु सततं प्रत्यङ्मुखे चेतसि ॥
स्वाभीष्टदेवतावर्गस्तुतिध्यानस्वरूपिणीम् ।
दशश्लोकीमिमां वीक्ष्य सन्तः कुर्वन्त्वनुग्रहम् ॥

शुभमस्तु । दशश्लोकीस्तवराजाभिप्रायसारसर्वस्वमपि संगृह्यैकश्लोकेनोच्यते—

चिन्ताया मणिरूपतामुपगतो यो योगिनां ब्रह्म ना-
ड्युन्मेषे सति सद्गुरूदितरहस्यार्थोपदेशादिभिः ।
भोगासक्तिमतां च चिन्तितमनोभावार्थदायी च यः
सोऽग्रे मेऽस्त्विह भोगमोक्षफलदश्चिन्तामणिश्चिन्मयः ॥

3083

73247 धर्मराजस्तोत्रम्

Beginning:

शुक्लाम्बरधरं + + + शान्तये ॥

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं मृत्युभयनिवृत्तिद्वारा आयुरभिवृद्ध्यर्थं धर्मराजप्रसादसिद्ध्यर्थं धर्मराजस्तुतिपारायणं करिष्ये ।

धर्मराज नमस्तेऽस्तु साक्षाद्धर्मस्वरूपिणे ।
धर्मिष्ठ शान्तरूपाय सत्यरूप नमो नमः ॥

End:

यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय ते नमः ॥
भूयो भूयो नमस्तुभ्यं भक्तरक्षण ते नमः ।
इदं पापहरं स्तोत्रं पुण्यं मृत्युहरं शुभम् ॥
. . . .
इदं स्तोत्रं पठेच्छुद्धः श्रावयेद्वा सकृद् द्विजः ।
प्राप्नुयात् स शतायूंषि किं पुनर्भोगसंपदः ॥

Colophon:

इति श्रीमदाग्नेयपुराणे ब्रह्मशर्मकृत-धर्मराजस्तोत्रं नाम नवमोऽध्यायः ।

3084

66521 देवसेनाध्यानम्

पीतामुत्पलधारिणीं शशिनिभां दिव्याम्बरालंकृतां
वामे लम्बकरां महेन्द्रतनयां मन्दारमालाधराम् ।
देवैरर्चितपादपद्मयुगलां सेनानिवामे स्थितां
सेनां दिव्यविभूषितां त्रिणयनां देवीं त्रिभङ्गीं भजे ॥

The following verse on Vallī is written before this verse:

श्यामां पङ्कजधारिणीं मणिलसत्ताटङ्ककर्णोज्ज्वलां
दक्षे लम्बकरां किरीटमकुटां तुङ्गस्तनीकञ्चुकाम् ।
अन्योन्येक्षणसेवितां शरवणोद्भूतस्य सव्ये स्थितां
गुञ्जामाल्यधरां प्रवालवसनां वल्लीश्वरीं भावये ॥

3086

71065 नृपगुम्भिनीप्रशंसा

Beginning:

आ सेतोरा सुमेरोरखिलवसुमतीरा पराब्धेरथ प्राक्
पूर्वाब्धेर्जागरूकः प्रतिहतिरहितः शास्ति यस्या नियोगः ।
यामाहुर्मातृभूतां निखिलमनुभुवां पालने सार्वभौमी
सेयं देदेति धार्मीतनुरिव महिभृत्कुम्भिनी श्रीमती सा ॥ १ ॥

End:

नो वावायेत वायुर्जलधरनिकरं मेलयन्त्यत्रथेयं
नो देद्युत्येत विद्युज्जलमुच इह निर्भिन्दती वर्षणाय ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

नो चेत् क्षिप्येत चापं बत बत मघवा पश्चिमाया यदा दि-
श्या देदीयेत भूमीलवमिह महिभृत्कुम्भिनीयं परेशाम् ॥ २४ ॥
सुतीर्थपथरोधिनः कलहिनो निरोरुध्यतं
पिशुननॄन् विनेनीयते बतेह नृपगुम्भिनी किमुचितम् (?) ॥

3087

TR804 पञ्चश्लोकी

Beginning:

श्रीवैकुण्ठनाथस्तुतिरूपा पञ्चश्लोकी—

आब्रह्मकीटमपरैर्दुरतिक्रमा या यत्प्रेरिता गुणमयी तरुणीव माया ।
तामप्यहो तरति कोऽपि कदाचिदेव यस्य प्रसादवशतस्तमिमं नताः स्मः ॥

End:

असारं संसारं सरुचि विसृजन्तः शमधनाः
चिराद्योगारूढा निजहृदयनालीकमुकुलम् ।
समुद्घाट्य श्रीमच्चरणयुगलं यत्प्रयतनैः
निषेवन्ते धन्यास्तदिदमवतंसो भवतु नः ॥

Colophon:

इति पञ्चश्लोकी समाप्ता ।

3089

77442 प्रभातस्तवः

Beginning:

ब्रह्मा मुरारिस्त्रिपुरान्तकश्च भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ १ ॥
ब्रह्मैकनिष्ठाः सनकः सनन्दनः सनत्कुमारश्च सनत्सुजातः ।
सनातनो योगिवरश्च पञ्च कुर्वन्तु सर्वे मम सुप्रभातम् ॥ २ ॥

End:

अश्वापगा स्कन्दमुखी च चित्रा वराहसंज्ञा च घटापगा च ।
श्वेतापगा चैव चिदम्बराख्या कुर्वन्तु सर्वे मम सुप्रभातम् ॥ १४ ॥
प्रभातसंज्ञं मनुसंमितं स्तवं यः प्रातरुत्थाय पठेत् समाहितः ।
स सप्तजन्मार्जितपापपञ्जरात् प्रमुच्यमानः पदमाप शांभवम् ॥ १५ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3090

PM2728 प्रातःस्मरणस्तोत्रम्

Beginning:

प्रातर्नमामि गणनाथमशेषहेतुं ब्रह्मादिदेववरदं सकलागमाद्यम् ।
धर्मार्थकामफलदं जनमोक्षहेतुं वाचामगोचरमनादिमनन्तरूपम् ॥

End:

प्रातर्नमामि गिरिजां भवभूतिहेतुं संसारसिन्धुपरपारकरीं त्रिणेत्राम् ।
तत्त्वादिकारणमुदस्तसुरारिमायां मायामयीं सुरमुनीन्द्रनुतां सुरेशीम् ॥

Colophon:

इति गणपतिपुराणोक्तं प्रातःस्मरणं संपूर्णम् ।

3102

72019 महोक्षस्तोत्रम्

Beginning:

वन्दे वृषभदेवाय सितवर्णस्वरूपिणे ।
तीक्ष्णशृङ्गाय तुङ्गाय वेदपादाय नन्दिने ॥ १ ॥
शंभोर्वाहनमिन्दुकुन्दधवलं शैलादिमुख्यैर्गणैः
सम्यग् लालितमादृतं दिविषदां मुख्यैः सदा वन्दितम् ।
गम्भीरध्वनिकण्ठगर्जितभुवर्लोकादिकम्पप्रदं
वन्दे गोपतिमात्तरक्षणविधौ धर्मप्रदं नन्दिनम् ॥

श्रीमत्सुरासुरमुनिवरयक्षराक्षसगरुडगन्धर्वकिंनरकिंपुरुषसिद्धविद्याधरभूतवेतालादिभिरनवरतवि-नमितपादारविन्दयुगल ।

End:

तुहिनगिरिमकुटं क्रियक्रियडुकडुकडण्डामध्यमदुर्गं दुर्गम् । तुकटत्तु . . . तानितटा एतत्तटि-मतटा । एतत्तटिमतटे . . . सुखक्रमटट्टक्रमतटविकटक्रमतटविकटितटा । प्रा . . . रपुटी . . . वाल्म् वृषभ ता . . . . पुष्पपुटं देशाक्षी वृषसंनिधौ । हर्ष . . . कुरं भवेत् ।

3103

73098 योव्योमाडिनगो-इतिश्लोकः सव्याख्यः

Beginning:

यो व्योमाडिनगो हरीडुडुपगोयुग्मः कगभ्रोऽपभी-
र्भीमभ्र्वर्यसुकी रमारतिरसो नाभ्यब्रुडासीनकः ।
द्योसच्चम्वनवम्यपत्सलिलजो वार्धिस्ववष्टार्धदो-
राद्यो गद्यसिवाडघादमृतदः पायात् स नः कंदभाः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

अस्यार्थः—कंदभाः अघान्नः पायादिति संबन्धः। कीदृशः कंदभा इत्युक्ते, यो व्योमाडिनगः व्योम्नि अटन्तीति व्योमाटः पक्षिणः, तेषाम् इनः अधिपः गरुडः, तेन गच्छतीति व्योमाडिनगः गरुडगमन इत्यर्थः। हरीडुडुपगोयुग्मः; हरीणां किरणानाम् ईट् पतिः सूर्यः; स च उडून् पालयतीति उडुपश्चन्द्रः; हरीट् च उडुपश्च हरीडुडुपौ। गवोर्नेत्रयोर्युग्मं गोयुग्मम्; तावेव गोयुग्मं यस्य स हरीडुडुपगोयुग्मः। क्वगध्रः, कुः भूमिः, अगः पर्वतः; कुश्च अगश्च क्वगौ तौ ध्रियत इति क्वगध्रः।

End:

गदी, गदास्यास्तीति गदी। असिवाट्, असिं वहतीति असिवाट्। अमृतं मोक्षं ददातीत्यमृतदः। कं जलं ददातीति कंदः, तस्य भा इव, भाः कान्तिरिव कान्तिर्यस्य कंदभाः, नीलमेघश्याम इत्यर्थः। स एतादृशविशेषणविशिष्टः हरिः अस्माकम्(न्) अघात् पापात् पायात् रक्षत्विति संबन्धः।

वाश्वारेड् ध्वजधग् + + + देवो मुदे वो मृडः (see No. 1078 above).

3113

70868 वरुणस्तोत्रम्

Beginning:

चन्द्रप्रभं पङ्कजसंनिविष्टं पाशाङ्कुशाभीतिवरान् दधानम्।
मुक्ताकलापाङ्कितसर्वगात्रं ध्यायेत् प्रसन्नं वरुणं सुवृष्टयै॥
त्वं वै जलपतिर्भूत्वा सर्वसस्याभिवृद्धये।
निमन्त्रितो महेशान पूर्वं त्रैलोक्यरक्षणे॥

End:

ओं नमो भगवते वरुणाय जलाधिपतये मकरवाहनाय श्वेतवर्णाय पाशहस्ताय सर्वान् मेघान् आकर्षय आकर्षय मुञ्च मुञ्च शीघ्रमेव महावर्षं स्रावय स्रावय एहीन्द्र एहि वरुण एहि पर्जन्य एह्यगस्त्य एहि ऋश्यश्रृङ्ग सद्यः संपूर्णवृष्टिं देहि पर्जन्योम्।

3121

67160 विदारधरणीमहिमाष्टकम्

Beginning:

इतः परं विदारधरणीमहिमाष्टकमुच्यते—

श्रीकाञ्चीतरुमूलोत्थनीलानद्यवलम्बतः।
नैव केरलदोषांशो विदारधरणेरिह॥ १॥
नीलानद्युत्तरे तीरे श्रीकल्लायतटाकगे।
प्रासादे निवसन्ती सा पाति हेमाम्बिकाखिलान्॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

हरिदासजनाकीर्णविदारधरणेरिदम् ।
अष्टकं पठतां नृणामभीष्टं भवति ध्रुवम् ॥ ९ ॥

श्रीमद्रजताद्रिहस्तिगिर्यादिमहापुण्यस्थलसंभवां नीलामुकुरनद्योरुभयोरपि नर्मदावन्न क्वापि नदत्वशङ्कावकाश इत्यवगन्तव्यम् ।

3122

PM2835 विरक्तिमुक्तावलिः

Beginning:

यस्येच्छासमकाल एव जगतः सृष्टिः स्थितिश्चाप्ययः
य: सच्चित्सुखदेहवांश्च रमते लक्ष्म्या स्वयं लीलया ।
यश्चान्ते स्मृतमात्र एव हि भवागाधाम्बुधेरुद्धर-
त्युद्गीतो निगमागमैरवतु मां श्रीमान् स नारायणः ॥ १ ॥
यस्यापाङ्गनिरीक्षणामृतधुनीपूरेण संवर्धिता
मच्चित्ते कवितालता नवरसाधारैः फलैः शोभते ।
रङ्गाचार्यमहं गुरुं स्वपितरं नत्वा तमम्बां सती-
मार्यां तां च सरस्वतीं भवपरिक्लेशान् निजान् वर्णये ॥ २ ॥
देवं गुरुं च युगपन्नत्वा श्रीवासुदेवपदवाच्यम् ।
ग्रथये विरक्तिमुक्तावलिं मुदे सास्तु सुमनसां रुचिरा ॥ ३ ॥
नत्वा शिरसा कौलगिरघुनाथाचार्यदेशिकपदाब्जम् ।
स्वकृतं हि निवेदयतः प्रायश्चित्तं ममास्तु हरिपदयोः ॥ ४ ॥
अज्ञानोग्रनिदाघतप्तहृदयः पातुं सुविद्यापय-
स्तृष्णालोलमना भ्रमन् दिशि दिशि श्रान्तो भृशं संश्रितः ।
गेहारण्यमथ स्ववृक्षगहनं तत्रापि चिन्तादवा-
क्रान्तोऽहं चकितो मृगो घनमिव ध्यायामि कृष्णं हृदि ॥ ५ ॥

End:

रङ्गाचार्यतनूभवेषु गणने यो जन्मतो मध्यमः
सा प्रासूत सरस्वती यमुटकेगोविन्दनामा च यः ।
श्रीमत्कौलगिवासुदेवचरणा यस्मिन् कृतानुग्रहा-
स्तेनेयं रचितार्पिता हरिपदे वैराग्यमुक्तावलिः ॥ १०२ ॥
न सुवर्णग्रथितेयं न महार्हपदार्थसुचिरनिर्वर्ण्या ।
तदपि च मुक्तावलिरिति हरिपदभागिति भवेत् सुजनमान्या ॥ १०३ ॥
चोले तञ्जपुरस्थेन सेयं मुक्तावलिः शुभा ।
ग्रथिता दुन्दुभौ ग्रीष्मे कलिमाने गते धवे ॥ १०४ ॥ (4963=A.D. 1862)

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति श्री उटकेरङ्गाचार्यसुतगोविन्दाचार्यविरचिता विरक्तिमुक्तावलिः संपूर्णा ।

रुधिरोद्गारिण्यधिसृति विमनोयोगेन निजसुखं प्राप्ताः ।
चैत्रे सितसप्तम्यां गोविन्दार्या हरेः पदं याताः ॥

3123

67292 विष्वक्सेनाष्टकम्

Beginning:

शुक्लाम्बर + + + शान्तये ॥ १ ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥ २ ॥
वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।
यद्वेत्रशिखरस्पन्दे विश्वमेतद् व्यवस्थितम् ॥ ३ ॥

End:

चतुर्भुजैकान्तिकपारिजातप्रलम्बमुक्तामणिहारवक्षः ।
सैन्येश देवाधिप वेत्रहस्त नमोऽस्तु ते विघ्नविदूरपाद ॥ १० ॥
विष्वक्सेनाष्टकं पुण्यं नित्यं पठति यो नरः ।
सर्वकार्याणि सिध्यन्ति विद्यावान् धनवान् भवेत् ॥ ११ ॥

3124

PM2860 शरभसालुवस्तोत्रम्

Beginning:

कोपोद्रेकातितिर्यङ्निटिलपरिचरत्तारमायाप्रभूत-
ज्वालामालाग्रदग्धस्मरतनुसकलं त्वामहं सालुवेश ।
याचे त्वत्पादपद्मं प्रणिहितमनसं द्वेष्टि मां यः क्रियाभिः
तस्य प्राणप्रयाणं परशिव भवताच्छूलभिन्नस्य तूर्णम् ॥ १ ॥

End:

त्वद्दोर्दण्डाग्रमुण्डप्रकटितविनमच्चण्डकोदण्डमुक्तै-
र्बाणैर्दीप्तैरनेकैः शिथिलितवपुषः क्षीणकोलाहलस्य ।
तस्य प्राणावसानं परशरभरिपोऽहं त्वदाज्ञाप्रवाहै-
स्तूर्णं पश्यामि यो मां परिहसति सदा स्वादिमध्यान्तहेतोः ॥ ७ ॥
. . . .
इति गुह्यं महावीर्यं परमं रिपु(पाप)नाशनम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

पा . . . समारभ्य . . . लान्तं जपेत् सुधीः ॥

श्रीमुखसंवत्सर-आश्विजबहुल १ अङ्गारकवारम् . . . ।

3127

66076 शिवविष्णु(-समत्वबोधक)-स्तोत्रम्

Beginning:

एकः स्वनेत्रकमलार्पणलब्धचक्रः अन्यः स्वपादजनितं प्रददौ तदस्मै ।
को वा तयोरधिक इत्यनुचिन्त्य वृद्धाः सत्यं वदन्तु तमिमं वयमाश्रयामः ॥ १ ॥
एकस्त्वनीशहवनश्च . . . . . यातः अन्यः सदक्षममुना क्रतुमाममर्द ।
को वा तयोः . . . . ॥ २ ॥
एको व्यधाद्ध्रुवपदे ध्रुवमल्पतारमन्यो दधौ विधुकलां नियतं ललाटे ।
को वा तयोः . . . . ॥ ३ ॥
एकः पुराणपुरुषः खलु पीतवासास्त्वन्यः . . . .

End:

. . . रुषः पतिरिन्दिराया वेदस्तदन्यमुरुगायगुरुं गरीयान् ।
को वा तयोः . . . . ॥ ५० ॥
एकः पयोधिममृतेप्सुरमन्थदादावन्यस्तदुद्भवविषं प्रपपावनीशः ।
को वा तयोः . . . . ॥ ५१ ॥
. . . . र इति वर्णविदां वचःसु दातार आस्य इति च प्रभुरुन्निविष्टः ॥ ५२ ॥

3128

73277 शुक्लाम्बरधर-इतिश्लोकव्याख्या

Beginning:

शुक्लाम्बरधरो विष्णुः शशिवर्णश्चतुर्भुजः ।
प्रसन्नवदनः पायात् सर्वविघ्नोपशामकः ॥

अस्यार्थः—शुक्लं शुभ्रम् अम्बरं वस्त्रं धरतीति सः विष्णुः । विषॢ व्याप्तौ । व्यापकशीलः । शशिनश्चन्द्रस्य वर्ण इव वर्णो यस्य सः । धवलवर्ण इत्यर्थः । चत्वारो भुजा यस्य सः पाशाङ्कुशवराभयहस्त इति यावत् । भक्तेष्टप्रसन्नं वदनं यस्य सः प्रसन्नवदनः प्रसन्नाख्यगणपतिः । सर्वविघ्नोपशामकः आध्यात्मिकादिसकलदुरितनिवारकः । एतादृशः महागणपतिः पायात् रक्षतु इति वज्रकवचायिताशीर्वादः ॥ १ ॥

अन्यत्र—शुक्लाम्बरधरः चतुर्भुजः शशिवर्णः विष्णुः नारायणनाभिकमलोत्पन्नत्वात् विष्णुः । आत्मा वै पुत्रनामासीति श्रुतेः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

End:

अन्यत्र—स्वभावतः कृष्णमम्बरं शुक्लाम्बरतया धरति पुष्णातीति शुक्लाम्बरधरः। विष्णुः विष्वयनाद्यणुकालान्तहेतुभूतः। शशिनः चन्द्रस्य वर्णः स्वरूपम् आकारं इति यावत्। यथाहुः—

सलिलमये शशिनि विभोः दीधितयो मूर्छितास्तमो नैशम्।
क्षपयन्ति दर्पणान्तरनिहिता इव मन्दिरान्तभवेति(?)॥ (बृहत्संहिता ४. २)

शशिवर्णः। प्रसन्नः प्रणवः ब्रह्मणि प्रकर्षेण सन्नत्वात् प्रणवः वदने येषां ते ..... प्रसन्नवदना वेदाः यस्य सः। चतुर्वेदमय इत्यर्थः। एवंभूतः चतुर्भुजः पद्मद्वयवराभयहस्तः रविः सर्वविघ्नोपशामकः सन् पायात्॥ ६॥ ततोऽन्यत्र—प्रसन्नवदनं प्रकृत्यां सन्नं संसक्तं मुखम् आरम्भः यस्य सः। 'स ईक्षत बहु स्यां प्रजायेयेति' इति श्रुतेः। शुक्लाम्बरधरः शुक्लमपुरुषम् अम्बरम् आकाशः शुद्धाकाशादितामसधरान्तरूपः। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति। चतुर्भुजं चतुर्विधाहारम्। आमर्शनालेपालोकनाभोग इति स्थावरजङ्गमात्मक इति यावत्। शशिवर्णं शभ्यादिस्वरूपम्। चन्द्रसूर्याग्निमणिज्योतिर्वृक्षादिरूपः। विष्णुः सर्वत्राहमिति व्यापकशीलः परमात्मा। कर्त्रध्याहारः कविसामर्थ्येन कल्पनीयः। एतादृशः महान् परमात्मा पायादित्यनवद्येयमाशीः॥ ७॥

3129

67379 शुक्लाम्बरधर-इतिश्लोकव्याख्या

Beginning:

शुक्लं तेजो रेतसीति कोशपर्यालोचनया शुक्लपदं रेतोवाचकं भवति तथा च रेतोमये अम्बरधरे आकाशभूमी यस्य। तत्र प्रमाणम्—

अप एव ससर्जादौ तासु बीजमुपासृजत्।
तदण्डमभवद्धैमं सहस्रार्कसमप्रभम्॥

इति। विष्णुं व्यापनशीलम्। शशिवर्णं शं सुखं शिवं भद्रं ते ददातीति शशिवर्णः। नृ दाने। तं शशिवर्णम्। चतुर्भुजं चतुर्युगभोक्तारम्। अथवा धर्मार्थकाममोक्षभोक्तारम्। प्रसन्नवदनं ....

End:

प्रसन्नवदनम् अनुग्रहविशिष्टमुखम्। विष्णुं श्रीकृष्णम्। शुक्लः अम्बरधरः यस्य। विष्णुं व्यापनशीलम्। शशिवर्णं चन्द्रप्रभम्; चन्द्रचूडत्वात्। ब्रह्मक्षत्रवैश्यशूद्रभोक्तारम्। अथवा अण्डजस्वेदजोद्भिज्जजरायुजभोक्तारम्। प्रसन्नवदनं दक्षिणामूर्त्यवतारे ऋषीणां मन्त्रोपदेशकर्तारम्; एतादृशं रुद्रम्। प्रसन्नस्य गजस्य वदनमिव वदनं यस्य तं विनायकम् ...।

3130

TR931 शौरिराजस्तोत्रम्

Beginning:

शौरिराजचरणारविन्दशरणागतिसारः—

शेषसंततिधर्माय शेषतादिमते गुरौ।
शेषिणे गुरवेऽस्माकं शेषवृत्तिं विदध्महे॥ १॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

वन्दे बृन्दं गुरूणां मे नन्दात्मजपदात्मकम् ।
इन्दिराकरुणापात्रं मन्दमादृग्जनाश्रयम् ॥ २ ॥
शठजिन्मुनिसूक्ते या शौरिराट्शरणागतिः ।
उपदिष्टा यथा साद्य क्रियते तत्पदे मया ॥ ३ ॥
यामुनार्ययतीन्द्रोक्तस्तोत्रगद्यस्थरीतितः ।
वृणोमि शरणं शौरिं व्याससंक्षेपतः क्रमात् ॥ ४ ॥
रङ्गक्षेत्रमुखेऽष्टकेऽपि सततं शौरिः स्वयंव्यक्तक-
स्थानेऽष्टाक्षरवर्णखण्डवपुषा संसेव्यते सूरिभिः ।
श्रीमत्कृष्णपुरे तु सर्वमनुराजात्मा यतो राजते
तत्तेनैव मनुक्रमेण शरणं संश्रीयतेऽसौ मया ॥ ५ ॥

End:

करुणारससारवारमूर्ते कलयास्मिन् मयि मानसं प्रसन्नम् ।
मम दोषमचिन्तयन् यतीन्द्रं मनसा वीक्ष्य मदेकजीवनं तम् ॥
जय मङ्गलराशिभिस्त्वमग्र्यैर्जय शौरिपते नमो नमस्ते ।
सविभूतिरिहैव सर्वकालं कृपया जयतात् मयि प्रसन्नः ॥ ११७ ॥

Colophon:

इति श्रीविष्णुचित्तरामानुजदासभिक्षुविरचिते श्रीशौरिराजचरणारविन्दशरणागतिसारे चतुर्थ्यर्थानुसंधानं नाम तृतीयः खण्डः ।

3131

77643 षडाधारस्तुतिः

Beginning:

वशाम्रसदलयुक्ते सम्यगाधारपत्रे तरुणमरुणगात्रं वारणास्यं त्रिणेत्रम् ।
अभयवरदहस्तं चारु पाशाङ्कुशोद्यत्करकमलसमेतं चिन्तयेद् वल्लभेशम् ॥ १ ॥

End:

विश्वव्यापिनमादिदेवममलं नित्योदितं निष्कलं
नित्योद्बुद्धसहस्रपत्रकमले लिप्यक्षरैर्मण्डितम् ।
नित्यानित्यमनन्तपूर्णपरचिरस्वच्छात्मनित्यात्मकं
स्वात्मानन्दमनेकविश्वकुहरं ब्रह्माद्वयं चिन्तयेत् ॥ ७ ॥

Colophon:

षडाधारस्तुतिः समाप्ता ।

3132

PM2904 संबन्धमूर्तिस्तोत्रम्

Beginning:

शैवज्ञानेन सम्यग् भवति दृढतरो बन्ध एतस्य मूर्ते-
रस्य ज्ञानेन बन्धो भवति सुखकरो दिव्यमूर्तेश्च शैव्याः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

सर्वेषां मूर्तयश्च प्रबलपरशिवज्ञानसंबन्धवत्यो
येनाभूवन्महात्मा गुरुरवतु विभुर्ज्ञानसंबन्धमूर्तिः ॥ १ ॥

End:

यत्प्रोक्तं स्कान्दसंज्ञं परमशिवगुणोत्कर्षभूमिं पुराणं
श्रीमान्नारायणोऽपि प्रथयति भुवने व्याससंज्ञामुपेत्य ।
यद्वाचस्तामसत्वं विदुरिह निजदैवस्य दोषानभिज्ञा-
श्चक्रे योऽस्थीनि योषां निखिलगुरुरयं ज्ञानसंबन्धमूर्तिः ॥ ८ ॥
संबन्धमूर्तेः स्तुतिमत्र भक्त्या पठन्ति ये अप्पयदीक्षितानाम् ।
ते मुक्तपापा बहुभूतिमन्तः श्रीस्कन्दसायुज्यपदं प्रयान्ति ॥ ९ ॥

3134

66259 सप्तस्थानचूर्णिका

Beginning:

अयि(स्ति)खलु सप्तसागरसप्तकुलाचलसप्तद्वीपपरिमण्डिते भूमण्डले पञ्चाशत्कोटियोजनविस्तीर्णे जम्बूद्वीपो रत्नद्वीपः। तत्रासन्नतमाः षट्पञ्चाशद्देशाः। तेष्वपि अनेककोटिसुरालयभूसुरालयमण्डित- श्चोलदेशः। तस्मिन्नपि अपरिमितहरिहरालयविबुधकोटिसंकीर्णसह्यजातीरस्थलानि सर्वोत्तमानि। तेष्वपि ये(ए)तावद्वर्णितवैभवं साक्षाद्दाक्षायणीपतिनिवासभूतं सहस्रवदनेनापि सहस्रकोटियुगैरपि वर्णितुम- शक्यम् अवाङ्मनसगोचरम् अत्यद्भुतवैभवम् अनाद्यं किंचिदस्ति स्थलम्। तस्मिन् वृन्दारकपति- नन्दनवनशोभिमन्दारमुखबृन्दारकतरुसंदोहसंदेहकरमाकन्दकन्दतिन्दुकचन्दनचम्पकचाम्पेयपनसपाट- लप्रियालहिन्तालतालतमालकृतमालनक्तमालतक्कोलरसालवकुलसरलतिलकामलकजम्बुजम्बीरखर्जूरनालि- केरदाडिमद्राक्षानारङ्गबदरीबिल्वकपित्थकदलीपटलजटिल . . .

End:

प्रणतार्तिहरविख्यातकीर्तिः करुणामूर्तिः श्रीसाम्बमूर्तिः पञ्चमहापातकेभपञ्चाननपञ्चनदस्थलालया- न्तः प्रविष्टः कर्पूरनीराजनविराजमानकर्पूरगौरशरीरसंदर्शनाय सकलकोटिभक्तजनाभीष्टः सकलदेव- वरिष्ठः सकलजगदीशः धर्मसंवर्धनीशः मम हृदन्तरे निरन्तरं निवसन् पातु मां पातु मां पञ्चनदीशः।

Colophon:

सप्तस्थानचूर्णिका समाप्ता।

धर्मसंवर्धनीसमेतश्रीमत्पञ्चापगेश्वरस्वामिने नमः।

This passage is written after the colophon:

फालवनम्रत्किरीटं फालनेत्रार्चिषादग्धपञ्चेषुकीटं शूलाहतारातिकूटं शुद्धमध्येन्दुचूडं भजे मार्गबन्धुं शंभो महादेव देव।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3135

PM2907 **समयाष्टकम्**

Beginning:

भूदेवा यत्र देवाः सुललितललना दिव्यकन्यायमानाः
सानन्दा गीतगानं विदधति विधिवद् विप्रवत् सर्ववर्णाः।
द्वारं सायुज्यमुक्तेर्हरिहरविधिभिः सर्वदा सेव्यमानं
श्रीचक्रं संप्रवर्तं जगति विजयते दैवतं देवतानाम् ॥ १ ॥

End:

दोषं दोषा कविप्रस्तवपदकृपया कण्ठपूर्णं पिबामः
स्वच्छन्दं दिव्यचित्तं सुललितवनितास्वादनेनावशिष्टा।
शुद्ध्यै शुद्ध्यन्तराणां सुखपदमनसैवेतराग्नौ जुहोमः
श्रीचक्रं संप्रवर्तं लसदितरवधूवृन्दमानन्दयामः ॥ ८ ॥

Colophon:

इति शंकराचार्यविरचितं समयाष्टकं संपूर्णम्।

3136

71274 **सारनाथस्तोत्रम्**

(On the God at Tirucharai near Kumbakonam).

Beginning:

सारक्षेत्रपतिं सरोजजपतिं सारातिदूरं सदा
सारं सारविमानगं सुरवरं सारेश्वरीनायकम्।
नित्यं सारसरोवरे विरचितस्नानद्विजाराधितं
संसाराब्धितरिं सरोजनयनं तं सारनाथं भजे ॥

End:

ब्रह्मेशादेर्नियन्ता परमपुरुष इत्याह नित्या हि वाणी
पुंवाक्यैस्तस्य बाधः कथमिव भविता प्राप्तदोषप्रभेदैः।
दूरापास्तं च गौरं मधुमथनभिदा बाधकं वाक्यजालं
लक्ष्मीशं तं प्रपद्ये प्रतिभटरहितप्राभवोद्भूतिभव्यम् ॥
वेदान्तेषु प्रतीतात् तदितरभजनाद्यस्य भक्तिः प्रकृष्टा-
दत्रैव स्थानमग्र्या स्फुरति विधिशिवस्थानतोऽप्यूर्ध्वदेशे।
लक्ष्म्या सार्धं तमेकं हृदयसरसिजे ब्रह्मविद्याप्रदात्र्या
देवं नारायणाख्यं भवजलधिसमुत्तारणं संश्रयामः ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3138

PM2784 सीतास्तवः

Beginning:

सिंहासने स्थितां देवीं सम्राज्ञीं सर्वरूपिणीम् ।
रामवामाङ्कनिलयां सर्वालंकारशोभिताम् ॥
सर्वशक्तिमयीं देवीं चिन्मयानन्दविग्रहाम् ।
स्मितवक्त्रां विशालाक्षीं वन्दे सीतां जगन्मयीम् ॥

End:

नमामि सततं देवीं रावणान्तकरूपिणीम् ॥
ज्ञानरूपां ज्ञानदात्रीं राघवप्राणनायकीम् ।
आनन्दरूपाममलां नमामि सततं शिवाम् ॥

Colophon:

इति श्रीसीतास्तवं संपूर्णम् ।

The following verse is written after the colophon:

कालाम्भोधरकान्तिकान्तममलं वीरासनाध्यासितं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं भजे ॥

3154

66686 नन्दिकेश्वराष्टोत्तरशतनामावलिः

Beginning:

ओं श्रीमते नमः । पशुपतये नमः । नीलाय नमः । कपिलाय नमः । श्वेतपिङ्गलाय नमः । बभ्रवे नमः । कृष्णाय नमः । एकवर्णाय नमः । मित्राय नमः । सर्वलोहिताय नमः ।

End:

महाहेतवे नमः । सुश्रवाय नमः । वामनाय नमः । धीपतये नमः । सर्वयज्ञधराय नमः । हरये नमः । वाक्पतये नमः । सर्वतत्त्वज्ञाय नमः । सर्वसिद्धिप्रदायकाय नमः । श्रीनन्दिकेश्वराय नमः ।

Colophon:

अष्टोत्तरशतं संपूर्णम् ।

3155

75720 शरभसालुवसहस्रनामस्तोत्रम्

Beginning:

अस्य श्रीशरभसालुवपक्षिराजदिव्यसहस्रनामस्तोत्रमहामन्त्रस्य कालाग्निवामदेवऋषये नमः । अनुष्टुप्छन्दसे नमः । श्रीशरभसालुवपक्षिराजदेवतायै नमः । खं बीजाय नमः । स्वाहा शक्तये नमः । फट् कीलकाय नमः । मोक्षार्थे जपे विनियोगः । क्षामित्यादिषडङ्गन्यासः ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

ध्यानम्—

क्वाकाशः क्व समीरणः क्व दहनः क्वापः क्व विश्वंभरा
क्व ब्रह्मा क्व जनार्दनः क्व तरणः क्वेन्द्रः क्व देवासुराः।
कल्पान्ते शरभेश्वरः प्रमुदितः श्रीसिद्धयोगीश्वरः
क्रीडानाटकनायको विजयते देवो महासाल्वः॥

रक्ताभं सुप्रसन्नं + + + नमामि॥ भैरव उवाच—

श्रीनाथो रेणुकानाथो जगन्नाथो जगाश्रयः।
श्रीगुरुर्गुरुगम्यश्च गुरुरूपः कृपानिधिः॥
हिरण्यबाहुः सेनानीर्दिक्पतिस्तरुराड्वरः।
हरिकेशः पशुपतिर्महासस्पिंजरो मृडः॥

End:

सोऽहमस्मीति नित्यस्थो सोऽहंहंसस्वरूपवान्।
हंसो हसंस्वरूपश्च हंसविग्रहनिःस्पृहः॥
स्वासीनः स्वासिविश्वासः पक्षिराजो निरञ्जनः।
अष्टाधिकसहस्रं तु नामसाहस्रमूर्तिमान्।
कीर्तयन्ति सदा तेषां वाञ्छितार्थफलं भवेत्॥
. . . .
एभिर्नामसहस्रैस्तु अर्चयेद् भक्तिमान् नरः।
कुलं तारयते तेषां कल्पकोटिशतैरपि॥

Colophon:

इति श्री-आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शंकरेण विरचिते शरभसालुवपक्षिराजकल्पे . . . . ध्यायः।

3157

PM2862 शास्तृसहस्रनामावलिः

Beginning:

ओं हरिहरपुत्राय नमः। पुत्रलाभाय नमः। शास्त्रे नमः। नाथनामाय(?) नमः। हरिहराय नमः। पुत्राय नमः। मत्ताय नमः। प्रमत्ताय नमः। मत्तगजाय नमः। मत्तगजवाहनाय नमः।

End:

शातोदर्याहृदयमोहनाय नमः। शान्ततेजसे नमः। शान्ताय नमः। प्रसन्नजनकामदपारिजाताय नमः। मुद्राङ्कुशाभयविराजितहस्तपद्माय नमः। मत्तद्विपेन्द्रनिलयाय नमः। महाशास्त्रे नमः। (पायसनिवेद्यम्)।

Colophon:

इति गुह्यरत्नचिन्तामणौ शास्तृसहस्रनाम समाप्तम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

JAINA-STOTRA-S

3169

74242 चतुर्विंशतितीर्थंकरसुप्रभातम्

Beginning:

श्रीमत्समस्तभुवनेश्वरवन्दिताय विध्वस्तमोहतिमिराय महोदयाय ।
ज्ञानांशुबोधितजगत्त्रितयाय नित्यं तस्मै नमस्त्रिभुवने जिनभास्कराय ॥ १ ॥
विद्याधरामरनरोरगयातुधानसिद्धास्सुराधिपतिसंस्तवपादपद्मम् ।
हेमद्युते वृषभनाथ युगादिदेव श्रीमज्जिनेन्द्र विमलं मम सुप्रभातम् ॥ २ ॥

End:

सर्वार्थसाधक समुद्रगभीर धीर चामीकरस्फुरितनन्दितकायकान्ते ।
चिन्तामणे भुवनभूषण वर्धमान श्रीमज्जिनेन्द्र विमलं मम सुप्रभातम् ॥ २५ ॥
द्रिव्यां प्रभातमणिकां बलिकां स्वरूपकण्ठेन शुद्धगुणसंग्रथितां क्रमेण ।
ये तारियन्ति मनुजा जिननाथभक्त्या निर्वाणपादपफलं खलु ते लभन्ते ॥ २६ ॥

Colophon:

इति चतुर्विंशतितीर्थंकरसुप्रभातं परिसमाप्तम् ।

3171

74238 चन्द्रनाथाष्टकम्

Beginning:

शंकरं चतुराननं सरसीरुहायतलोचनं सर्वभव्यमनःसरोरुहसप्तसैन्धवविग्रहम् ।
संनतेन्द्रकिरीटघट्टितपादपद्मविराजितं संनुतातुलकन्यलाधिपचन्द्रनाथमहं भजे ॥ १ ॥

End:

अङ्गनायुतभूषणादिविधूतचित्सुखभाजनं तुङ्गमङ्गलमन्दमष्टमतीर्थनायकमैर्मयम् ।
सतभङ्गिविधायकात्मकप्रार्थितार्थनिरूपकं संनुतातुलकन्यलाधिपचन्द्रनाथमहं भजे ॥ ८ ॥
कामक्रोधकषायदावजलधिं कर्माटवीतापहं
भीमप्रायभवाब्धितारणतरिं पिण्डद्रुमाद्यष्टकम् ।
सोमप्रस्फुरदर्ककोटिविलसत्सौन्दर्यदिव्याकृतिं
श्रीमत्कन्यलसंनिभेश्वरपुरश्रीचन्द्रनाथं भजे ॥ ९ ॥

Colophon:

इति चन्द्रनाथाष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3174

74236 **चिक्कसमन्तभद्रम्**

Beginning:

नमस्ते पार्श्वनाथाय धाराशिखनिवासिने ।
नागराजेन्द्रविस्तीर्णफणालंकृतमूर्तये ॥
वृषभं त्रिभुवनपतिशतवन्द्यं मन्दरगिरिमिव धीरमनिन्द्यम् ।
वन्दे मनसिजगजमृगराजं राजिततनुर्मजितं जिनराजम् ॥

End:

परिनिर्वृतिसुखबोधितबोधं सारासारविराजितबोधम् ।
वन्दे मन्दरमस्तकपीठे कृतजन्माभिषवं नुतपाठे ॥
अनणुगुणनिबद्धामर्हतं माखणनन्दीव्रतरचितसुवर्णानेकपुष्पव्रजानाम् ।
स भवति नुतिमालां योऽपि धत्ते सुकण्ठे प्रियपतिरमरश्रीमोक्षलक्ष्मीवधूनाम् ॥

Colophon:

इति माखणन्द्याचार्यविरचितचिक्कसमन्तभद्रं संपूर्णम् ।

3176

74242 **चैत्यालयवर्णनास्तोत्रम्**

Beginning (written in continuation of *Śāntyaṣṭaka*):

सर्वेन्द्रस्तुत्यपादाब्जं सर्वज्ञं दोषवर्जितम् ।
श्रीजिनाधीश्वरं नौमि परमानन्दमक्षयम् ॥ ९ ॥
नमस्तस्यै सरस्वत्यै विमलज्ञानमूर्तये ।
विचित्रा लोकयात्रेयं यत्प्रसादात् प्रवर्तते ॥ १० ॥

End:

जय पश्चिमतीर्थेश जयामरगणार्चित ।
जय सत्यसुखस्थान जय निर्जितमन्मथ ॥ ४५ ॥
जय भव्याब्जघर्मांशो जय जीवप्रियंकर ।
जय मुक्तिवधूनाथ जय वाचामगोचर ॥ ४६ ॥

Colophon:

इति (शान्त्यष्टक)चैत्यालयवर्णनास्तोत्रं परिसमाप्तम् ।

3177

74236 **जयमालास्तुतिः**

Beginning:

जय कारुण्यमहावीर्य जय लोकत्रयवन्दित ।
जय भव्यजनप्रिय जय स्वामिन् जिनेश्वर ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

निर्वाणफलदाय निर्वाणदेवाय सागरगभीराय सागरजिनेशाय ।
साधुपरमेशाय साधुजनमहिताय विमलप्रमेशाय विम(ल)प्रभाज्ञाय ॥

End:

देवपालाख्य जिनदेव परिपालय ।
श्रीमहानन्तवीर्य आमयविदूर जय ॥
जय जीव नन्द वर्धेति स्मृतार्थे सन्तु वन्दिनः ।
भाविकाल जिने नमोऽस्तु पान्तु मां पापहारिणाम् ॥

Colophon:

इति जयमालास्तुति संपूर्णम् ।

3186

74242 **जिनाष्टोत्तरशतनामस्तोत्रम्**

Beginning:

पूजान्ते प्रणिपत्येशं महीनिहितजान्वसौ ।
वचःप्रसूनमालाभिरित्यानर्चे गिरां पतिम् ॥ १ ॥
त्वं ब्रह्मा परमज्योतिस्त्वं प्रभूष्णुरजोऽरजाः ।
त्वमादिदेवो देवानामधिदेवो महेश्वरः ॥ २ ॥

End:

त्वं हि ब्रह्मविदां ध्येयस्त्वं हि ब्रह्मपदेश्वरः ।
त्वंनाममालया देवमित्यभिष्टुमहे वयम् ॥ १७ ॥
अष्टोत्तरशतं नाम्नामित्यनुध्याय चेतसा ।
त्वामीडे नीडमीडानां प्रातिहार्यकरं प्रभुम् ॥ १८ ॥

Colophon:

इति अष्टोत्तरशतस्तोत्रं परिसमाप्तम् ।

3187

74270 **तीर्थंकरस्तोत्रम्**

Beginning:

चतुर्विंशतितीर्थेशान् चतुर्गतिनिवृत्तये ।
वृषभादिमहावीरपर्यन्तान् प्रणमाम्यहम् ॥
येन स्वयं बोधमयेन लोके आश्वासिताके च निमित्तकार्ये ।
प्रबोधिता केवलमोक्षमार्गे तमादिनाथं प्रणमामि नित्यम् ॥

End:

प्रसंस्कृतो येन विभक्तिभूषं विराजितो येन करोमि हर्षम् ।
शीलं व्रतं ब्रह्मपदं गतो यः तं कुन्थुनाथं प्रणमामि नित्यम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

न संसितो यः प्रणतः सभा यः येभ्यो पितोन्दगणपूरणायः(?)।
पदार्पिते केवलिभिर्जिनस्य . . . . ॥

3188

74236 दण्डनायकदण्डकस्तोत्रम्

Beginning:

पान्तु श्रीपादपद्मानि पञ्चानां परमेष्ठिनाम्।
लालितानि सुराधीशचूडामणिमरीचिभिः॥
जय जय जयामयान्तक जय जय निष्कलङ्क लोकविभो।
जय जय तीर्थंकर जय जय देव मेव सुखं दद्यात्॥

श्रीमदमरेन्द्रवन्दितपादकंजाय तामरसनिहितपदनखरुचिपुञ्जाय करतलामलकायमानघनलोकाय चिरघोरसंसारपारावलोकाय चरमाङ्गमात्मपरिमात्मपरिमाणाय परमशुक्लध्यानजितकुसुमबाणाय।

End:

भूमिसुरपूज्याय कमठनतपार्श्वाय चरमधरपार्श्वाय श्रीवर्धमानाय भावन्यमानाय परमूर्तये नमः। सुरकीर्तये नमः। स्वर्णगुरवे नमः। परमगुरवे नमः। भो भोः चतुर्विंशतितीर्थनाथाः तीर्थंकराः काल्पा मदीयवाणी यूयं महान्तः क्व तथापि भक्त्या नित्योत्सवं रक्षन्तु माम्।

Colophon:

इति दण्डनायकदण्डकस्तोत्रं समाप्तम्।

3190

74242 दशावतारस्तोत्रम्

Beginning:

श्रीमते सकलज्ञानसाम्राज्यपदमीयुषे।
धर्मचक्रभृते . . . कृत्रे नमः संसारमीमुषे॥ १॥
अनादिनिधनं तुङ्गमलब्धफलदायिनम्।
उवाध्वं विपुलच्छायं श्रुतस्कन्धमहाद्रुमम्॥ २॥

End:

त्वामन्तकान्तकं प्राहुर्मोहान्धासुरमर्दनात्।
अर्थन्ते नारयो यस्मादर्धनारीश्वरोऽस्यतः॥ ९॥
सिद्धेभ्यस्तीर्थकृद्भ्यश्च नमः सर्वत्र सर्वदा।
चैत्येभ्यश्च त्रिलोकेषु सार्धदीपद्वयेषु च॥ १०॥

Colophon:

इति दशावतारस्तोत्रं संपूर्णम्।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3192

74250 नेमिनाथाष्टकम्

Beginning:

श्रीमदाकृतिभासुरं जिनपुंगवं हृदि वा गतं
वामनाधिपुरे गतं मयिलापुरे पुनरागतम् ।
हेमनिर्मितमन्दिरे गगनस्थितं हितकारणं
नेमिनाथमहं चिरं प्रणमामि नीलमहत्विषम् ॥

End:

सानन्दवन्दितपुरंदरवृन्दमौलिमन्दारफुल्लनवकेसरधूसराङ्घ्रिम् ।
आनन्दकान्तमतिसुन्दरमिन्दुकान्तं श्रीनेमिनाथजिननाथमहं नमामि ॥

Colophon:

इति नेमिनाथाष्टकं संपूर्णम् ।

3197

74250 पुष्पाञ्जलिस्तोत्रम्

Beginning:

दर्शनं देवदेवस्य दर्शनं पापनाशनम् ।
दर्शनं स्वर्गसोपानं दर्शनं मोक्षशासनम् ॥
त्रिदशराजपूजितं वृषभनाथमूर्जितं ।
कनककेतकैर्यजे भवविनाशकं जिनम् ॥
वृषभतीर्थंकराय पुष्पाञ्जलिः ॥

End:

स्वभक्तवर्धमानकं विबुधवर्तमानकम् ।
सुरजपुष्पकैर्यजे भवविनाशकं जिनम् ॥
वर्धमानतीर्थंकराय पुष्पाञ्जलिः ॥
इति विश्वलकुणयणन(तान्तगुणेन)जिनं विगताखिलदोषसमूहमहम् ।
वरमुक्तिसुखाय सदा सुयजे परिशुद्धशरीरवचोमनसा ॥

Colophon:

इति पुष्पाञ्जलिस्तोत्रं संपूर्णम् ।

3203

74250 बाहुबलिनाथाष्टकम्

Beginning:

ज्ञानवरशीलगुणसागरमनन्तं मानमदलोभभयवर्जितमृषीन्द्रम् ।
काननकरीन्द्रवरचारुगतिमार्गं बाहुबलिनं परमयोगिनमुदीडे ॥ १ ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इन्द्रगणचन्द्ररविवन्दितसुपादं सुन्दरमृगेन्द्रवरमन्दरकदन्तम् ।
कन्दरकरीन्द्रवरचारुगतिमार्गं बाहु + + + + + मुदीडे ॥ २ ॥

End:

इति बाहुबलिनाथाष्टकं भक्त्या यः पठेत् सततं क्रमात् ।
भूशशिमुक्तिकान्तानां कान्तो भवतु निश्चितम् ॥

Colophon:

इति बाहुबलिनाथाष्टकं संपूर्णम् ।

3206

74263 **ब्रह्मदेवदण्डकम्**

Beginning:

तरङ्गण्यधीशोरुरङ्गत्तरङ्गस्तुतिभृङ्गतं मङ्गलाङ्गत्वरङ्गम् ।
क्वणत्किंकिणीकं समारूढमोहं हृदि ब्रह्मदेवं मुदा संदधेऽहम् ॥ १ ॥
कनत्काञ्चनाङ्गं जितानन्तरङ्गं जिनाधीश्वराङ्घ्रिद्वयाम्भोजभृङ्गम् ।
सदोर्दण्डचण्डोरुचण्डप्रचण्डं हृदि ब्रह्मदेवं मुदा संदधेऽहम् ॥ २ ॥

End:

वाक्स्वर्धुनीपूरयज्ञोपवीतं यशःपूरकर्पूरकामोदितांसम् ।
सुधर्मामृताम्भोधिरङ्गासुधांसं हृदि ब्रह्मदेवं मुदा संदधेऽहम् ॥ ८ ॥
(इति) ब्रह्मदेवाष्टकं दिष्ट्या यः पठेत् सान्द्रभक्तितः ।
तस्य विघ्नोपशमनं कार्यसिद्धिश्च संभवेत् ॥

Colophon:

इति ब्रह्मदेवदण्डकं संपूर्णम् ।

3214

74250 **मङ्गलाष्टकम्**

Beginning:

श्रीमन्नम्रसुरासुरेन्द्रमकुटप्रद्योतरत्नप्रभा-
भास्वत्पादनखेन्दवः प्रवचनाम्भोधीन्दवः स्थायिनः ।
ये सर्वे जिनसिद्धसूर्यनुगतास्ते पाठकाः साधवः
स्तुत्या योगिजनैश्च पञ्चगुरवः कुर्वन्तु मे मङ्गलम् ॥

End:

एतन्मङ्गलमष्टकं पठति यो यः श्रूयते सर्वदा
पूर्वाह्णे च महोत्सवेषु सुधियां तीर्थंकराणामपि ।
ये शृण्वन्ति पठन्ति ते च सुजनाः धर्मार्थकामान्विता
लक्ष्मीराश्रियतेऽप्यपायरहिता कुर्वन्तु मे मङ्गलम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

इत्थं श्रीजिनमङ्गलाष्टकमिदं सौभाग्यसंपत्करं
(कल्याणेषु महोत्सवेषु सुधियः) कल्याणकालेऽपि वा ।
इत्येते जिनपादपद्मयुगलप्रौढानुरागान्मया
श्रेयान् (भूयात्) सर्गमलाभिभव्यनिचयः भद्रं शुभं मङ्गलम् ॥
मङ्गलं भगवानर्हन् मङ्गलं भगवान् जिनः ।
मङ्गलं प्रथमाचार्यो मङ्गलं वृषभेश्वरः ॥

Colophon:

इति मङ्गलाष्टकं संपूर्णम् ।

3216

74261 मुखस्तुतिः

Beginning:

जय जय जिन शश्वद्विश्वविश्चैकमूर्ते हर हर दुरितं मे जन्मजन्मन्यदोष ।
नय नय नतनाकीव्रातमामुक्तिमार्गं भव भव शरणं मे जन्मजन्मन्यधीश ॥
अपवित्रः पवित्रो वा सुस्थितो दुस्थितोऽपि वा ।
ध्यायेत् पञ्चनमस्कारं सर्वपापैः प्रमुच्यते ॥

End:

एदेसिं उवघादो कदो वाकारिदो वा ।
कीरदो वा समणु मणिदो तं समिंछामि दुंकडम् ॥

3221

74257 वृषभनाथाष्टकम्

Beginning:

कमलकुवलयसदृशवदनविलोचनं कमलासनं
कनकगिरितटसदृशपृथुतरवक्षसं विभुमक्षयम् ।
अनघमनुपममचलमभयदमादिनाथमनामयं
वृषभजिनपतिमखिलगुणनिधिमादरेण भजामहे ॥
विविधमणिगणकिरणकृतसुरचापकेसरिविष्टरं
विजितहिमकरतरुणदिनमणिकोटिदेहजदीधितिम् ।
विमलचमरजकलितकरतलदक्षयक्षनिसेवितं
वृषभजिनपतिमखिलगुणनिधिमादरेण भजामहे ॥

End:

इति वृषभनाथाष्टकं भक्त्या यः पठेत् सततं क्रमात् ।
भूशशिमुक्तिकान्तानां कान्तो भवतु निश्चितम् ॥

CC0. In Public Domain. Digitized by Muthulakshmi Academy

Colophon:

इति वृषभनाथाष्टकं संपूर्णम् ।

3229

74242 **सरस्वतीदेव्यष्टकम्**

Beginning:

चन्द्रार्ककोटिघटितोज्ज्वलदिव्यमूर्ते श्रीचन्द्रिकाकलितनिर्मलशुभ्रवासे ।
कामार्थदायि कलहंससमाधिरूढे वागीश्वरि प्रतिदिनं मम रक्ष देवि ॥
देवासुरेन्द्रनतमौलिमणिप्ररोचिश्रीमञ्जरीनिबिडरञ्जितपादपद्मे ।
नीलालकीप्रमदहस्तिसमानयाने वागीश्वरि प्रतिदिनं मम रक्ष देवि ॥

End:

डिण्डीरपिण्डहिमशङ्खतुषारहारे पूर्णेन्दुबिम्बरुचिशोभितदिव्यगात्रे ।
चाञ्चल्यमानमृगशावललाटनेत्रे वागीश्वरि प्रतिदिनं मम रक्ष देवि ॥

Colophon:

इति सरस्वतिदेवी-अष्टकस्तोत्रं परिसमाप्तम् ।

3230

74266 **सरस्वतीस्तोत्रम्**

Beginning:

भववीजाङ्कुरमजननरागाद्याक्षयमुपागता यस्य ।
ब्रह्मा वा विष्णुर्वा महेश्वरो वा नमस्तस्मै ॥
सरस्वत्या प्रसादेन काव्यं कुर्वन्ति मानवाः ।
तस्मान्निश्चलभावेन पूजनीया सरस्वती ॥
सरस्वती मया दृष्टा दिव्या कमललोचना ।
हंसस्कन्धसमारूढा वीणापुस्तकधारिणी ॥

End:

कपाली कर्मदीप्तायै कान्तायै(ते)नमो नमः ।
मनोन्मनि महायोगी वागीश्वर्यै नमो नमः ॥
इति सरस्वतीस्तोत्रमगस्त्यमुनिवाचकम् ।
सर्वसिद्धिकरं शान्तं सर्वकामफलप्रदम् ॥

Colophon:

इति सरस्वतीस्तोत्रं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

3232

74242 सिद्धिस्तोत्रम्

Beginning:

श्रीशतेन्द्रयोगिबृन्दवन्द्यपादपङ्कजं शास्त्रतीर्थबोधदृष्टिवीर्यसौख्यभासुरम् ।
सुप्रशस्तयोगदग्धघातिकर्मवैरिणं भूप्रशस्तनाथमर्हधीशमर्चयाम्यहम् ॥ १ ॥
अष्टकर्मविप्रमुक्तमष्टसद्गुणोज्ज्वलं दुष्टभावदुःखदूरमष्टमीधराग्रहम् ।
स्पष्टदुष्टलोकलोकमच्युतं तु लोकितं तोष्टमीमिनिष्टिदार्थमिद्धसिद्धसंचयम(?) ॥ २ ॥

End:

शक्राद्या व्योम्नि दूरादमरपरिवृढा वाहनेभ्योऽवतीर्ण
स्वर्णं मूर्धावनम्रस्तुतिमुखरमुखाः कुड्मलीभूतहस्ताः ।
हस्तान्तध्वान्तधाम्नः प्रणिहितमनसो यस्य पादौ प्रणेमुः
क्षेमं श्रीमान् स नेमीत्रुटित घटयतु प्रान्तबोधप्रसिध्यै ॥

3243

74257 स्वरूपाष्टकम्

Beginning:

मुनिस्तुत्यचित्तत्वनीरेजभृङ्गं परित्यक्तरागादिदोषानुषङ्गम् ।
जगद्वस्तुविद्योतसज्ञानरूपं सदा पावनं भावयामि स्वरूपम् ॥
स्वसिद्धात्मपीयूषवाराशिपूरं जिनेन्द्रोक्तजिह्वादितत्त्वार्थसारम् ।
सुवर्णत्वनित्यत्वचैतन्यरूपं सदापावनं भावयामि स्वरूपम् ॥

End:

स्वचिद्भाववाक्संभवानन्दशक्तिं निराशं निरीशं परिप्रातमुक्तिम् ।
त्रिलोकेश्वरं निश्चलं नित्यरूपं सदा पावनं भावयामि स्वरूपम् ॥

Colophon:

इति स्वरूपाष्टकं संपूर्णम् ।

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy

CC0. In Public Domain. Digitized by Muthulakshmi Academy